नमो नमः श्रीगुरुप्रेमसूरये ।

पू.कलिकालसर्वज्ञ-आचार्यदेवश्रीहेमचन्द्रसूरिविनिर्मितं

श्रीत्रिषष्टिशलाकापुरुषचरितम् ।

भाग-२ (पर्व : २-३)

प्रेरकाः

प.पू. वैराग्यदेशनादक्ष-आचार्य-श्रीमद्विजय-हेमचंद्रसूरीश्वराः

पू.पंन्यास-कल्याणबोधिविजयगणिवरश्च ।

प्रकाशकः

श्री जिनशासन आराधना ट्रस्ट

श्रीत्रिषष्टिशलाकापुरुषचरितम् ।

प्रथमावृत्तिः ।
वि.सं. २०६०
वीर सं. २५३०
इस.सं. २००४

१००० प्रतयः ।
मूल्य रु. ७००
(संपूर्ण सेटना)

भाग-२ (पर्व : २-३)

प्राप्तिस्थान

श्री जिनशासन आराधना ट्रस्ट
C/o. बी.सी. जरीवाला
शोप नं. ५, बद्रीकेश्वर सोसायटी,
मरीनड्राईव, 'ई' रोड,
मुंबई-४००००३. फोन : २२४१४३८०

श्री जिनशासन आराधना ट्रस्ट
C/o. चंद्रकांतभाई संघवी,
६/बी, अशोका कोम्पलेक्ष,
रेल्वे गरनाळा पासे,
पाटण (उ.गु.)

દ્રવ્ય સહાયક

શ્રુતસર્જન સુકૃત પ્રશસ્તિ

જૈન કાવ્યસાહિત્યના અજોડ ગ્રંથરત્નસમા 'શ્રીત્રિષષ્ટિશલાકાપુરુષચરિતં'ના સંપૂર્ણ ૧૦ પર્વોના પ્રકાશનનો લાભ લેનાર મહાનુભાવો

૧. શ્રી વર્ધમાન શ્વે.મૂ.પૂ. જૈન સંઘ, વાલકેશ્વર, મુંબઈ

૨. શ્રી માટુંગા જૈન શ્વે.મૂ.પૂ. તપાગચ્છ સંઘ એન્ડ ચેરીટીઝ (માટુંગા, મુંબઈ)
(પૂ. મુનિરાજ શ્રી પ્રશાંતવલ્લભવિજયજી મ.સા.ની પ્રેરણાથી)

૩. શાહ મંછાલાલ જગરૂપજી સિરોહીવાળા પરિવાર તરફથી
શ્રુતભક્તિ નિમિત્તે, જેથી કેવળજ્ઞાનની પ્રાપ્તિ થાય.
હ. શા. ચંપાલાલજી, સુનીલ, શ્રેયાંસ, પ્રણય, શોભનાબેન,
ઉષા, સંગીત, નિશા, શ્રુતિ આદિ બેટા પોતા પરિવાર
(પૂ. મુનિરાજ શ્રી ધર્મરત્નવિજયજી મ.સા.ની પ્રેરણાથી)



પ્રકાશકીય

સુગૃહિત નામધેય પ.પૂ. કલિકાલ સર્વજ્ઞ આચાર્ય ભગવંત શ્રીમદ્ વિજયહેમચંદ્રસૂરીશ્વરજી રચિત **"શ્રીત્રિષષ્ટિશલાકાપુરુષચરિતં"** મહાકાવ્ય ગ્રંથના દશ પર્વને છ ભાગમાં પ્રકાશિત કરી સંઘના ચરણે ધરતા ટ્રસ્ટ અત્યંત આનંદની અનુભૂતિ કરે છે. આ કાવ્યગ્રંથમાં ૨૪ તીર્થંકર ભગવંતો, ૧૨ ચક્રવર્તી, ૯ વાસુદેવ, ૯ પ્રતિવાસુદેવ, ૯ બળદેવ આમ કુલ ૬૩ શલાકાપુરુષના જીવન ચરિત્રને અતિ અદ્‌ભૂત શૈલીમાં આલેખવામાં આવેલ છે.

શલાકાપુરુષ એટલે વિશ્વના શ્રેષ્ઠ મહાપુરુષો...

આ પૂર્વે પણ ટ્રસ્ટ દ્વારા પર્વ ૨-૩-૪-૫-૬ પ્રકાશિત કરવામાં આવેલ છે. પરંતુ આ ગ્રંથની જૈન સંઘમાં અતિ જરૂરિયાત હોઈ દશે દશ પર્વને સેટ સ્વરૂપે પુનઃ પ્રકાશિત કરવામાં આવી રહ્યા છે. દશે દશ પર્વનું નવું કંપોઝ કરવામાં આવેલ છે. સુંદર-ટકાઉ અને કિંમતી કાગળ ઉપર તેનું મુદ્રણ કરવામાં આવેલ છે. જેથી વર્ષો સુધી તેની જીવંતતા બની રહે.

નવું કંપોઝ કરી આ ગ્રંથનું પનુઃ પ્રકાશિત કરવાનું કામ ઘણું જ કપરૂં હતું, પરંતુ પૂ. આચાર્ય ભગવંતશ્રીના શિષ્યો મુનિશ્રી રત્નબોધિવિજયજી, મુનિશ્રી સૌમ્યરત્નવિજયજી તથા મુનિ શ્રી જિનપ્રેમવિજયજીની ચીવટપૂર્વકની મહેનતથી આ કાર્ય સરળ બન્યું છે. મુનિરાજ શ્રી પદ્મબોધિવિજયજી અને મુનિરાજ શ્રી પ્રશાંતવલ્લભવિજયજી પણ કેટલાક પર્વોના પ્રુફો તપાસવામાં સહાયક બન્યાં છે.

'એમ. બાબુલાલ પ્રિન્ટરી'નાં માલિક શ્રી કીર્તિભાઈએ પણ પ્રિન્ટીંગ કાર્યમાં સખત જહેમત ઉઠાવી છે. ભવિતવ્યતાવશ અધવચ્ચે જ તેઓ દિવંગત થયા. બાકીનું કાર્ય શ્રી શ્રેણિકભાઈ તથા શ્રી ધવલભાઈએ સાંગોપાંગ પાર પાડ્યું. તેઓ પણ ધન્યવાદને પાત્ર છે.

દરેક ભાગમાં ગ્રંથમાં આવતા બોધદાયક બધા સુભાષિતોનો સંગ્રહ પણ મુનિઓએ કર્યો છે જે વાચકવર્ગને ઘણો જ ઉપયોગી થશે. આ કાવ્યના પઠન-પાઠન દ્વારા સૌ કોઈ સમ્યગ્જ્ઞાનસંપન્ન બને, પરમાત્મભક્તિસંપન્ન બને, વૈરાગ્યસંપન્ન બને અને આત્મશુદ્ધિ કરી 'મોક્ષ' પ્રાપ્ત કરનારા બને. શ્રુતભક્તિનો વિશેષ લાભ મળ્યા કરે એ જ શ્રુતાધિષ્ઠાયિકા શ્રી સરસ્વતીદેવીને પુનઃ પુનઃ પ્રાર્થના.....

લિ. ચંદ્રકુમારભાઈ જરીવાલા, લલીતભાઈ કોઠારી, પુંડરીકભાઈ એ. શાહ



प.पू. सकलागमरहस्यवेदि-
आचार्यदेव-श्रीमद्विजयदानसूरीश्वराः ।



प.पू. सिद्धांतमहोदधि-
आचार्यदेव-श्रीमद्विजयप्रेमसूरीश्वराः ।



प.पू. न्यायविशारद-गच्छाधिपति-
श्रीमद्विजयभुवनभानुसूरीश्वराः ।



प.पू. समतासागर-पंन्यास-
श्रीपद्मविजयगणिवराः ।



प.पू. पंजाबदेशोद्धारक-आचार्य-
श्रीमद्विजयानंदसूरि म. (पू. आत्मारामजी म.) ।



प.पू. जिनभक्तिरसिक-
उपाध्यायश्रीवीरविजयगणीवराः ।

॥ वंदना तेहने माहरी श्वास मांहे सो वार ॥

દિવ્યકૃપા

સુવિશુદ્ધ સંયમના બળે સેંકડો સુવિહિત શ્રમણ રત્નોનું સર્જન કરનારા
પ.પૂ. આચાર્ય ભગવંત શ્રીમદ્ વિજય **પ્રેમસૂરીશ્વરજી** મહારાજ
સંઘ, શાસન અને સેંકડો શિષ્યોની જવાબદારી વચ્ચે વર્ધમાન તપની ૧૦૮ ઓળી કરનારા
પ.પૂ. આચાર્ય ભગવંત શ્રીમદ્ વિજય **ભુવનભાનુસૂરીશ્વરજી** મહારાજ
કેન્સરની ઘોર બિમારીમાં પણ માસક્ષમણાદિ તપના આરાધક, બેજોડ સમતાના ધારક
પ.પૂ. પંન્યાસપ્રવર શ્રી **પદ્મવિજયજી** મહારાજ

શુભઆશિષ

શાસ્ત્રનિષ્ઠા, વ્યવહાર કુશળતા અને પૂર્ણ પ્રેમ અને વાત્સલ્ય ભાવના બળે વિરાટ શ્રમણ સમુદાયનું
સફળ સંચાલન કરનારા ગચ્છાધિપતિ આચાર્ય ભગવંત શ્રીમદ્ વિજય **જયઘોષસૂરીશ્વરજી** મહારાજ

પ્રેરક-માર્ગદર્શક

વૈરાગ્યમય દેશના દ્વારા અનેકોના હૈયાને અરિહંતમય કરનારા
પ.પૂ. આચાર્ય ભગવંત શ્રીમદ્ વિજય **હેમચંદ્રસૂરીશ્વરજી** મહારાજ

પ્રસ્તાવના

અદ્‌ભુત કલાકૃતિની આછેરી ઝલક

"ત્રિષષ્ટિશલાકા પુરૂષ ચરિત્ર" એટલે વર્તમાનમાં ઉપલબ્ધ જૈન સાહિત્યના નજરાણાનું એક ઝળકતું કાવ્યરત્ન, તમામ સાધુ સાધ્વીજી ભગવંતોનું લાડીલું કાવ્યરત્ન, સંસ્કૃતના પ્રારંભિક અભ્યાસ પછી ભાષા ઉપર વિશેષ પ્રભુત્વ પ્રાપ્ત કરવા 'ત્રિષષ્ટિ કાવ્ય' એ સર્વમાન્ય આધારસ્તંભ સમુ કાવ્ય છે. દશ પર્વનું સાંગોપાંગ વાંચન થતા બુદ્ધિપ્રતિભા-જ્ઞાનપ્રતિભા અને વૈરાગ્યપ્રતિભા પૂરબહારમાં ખીલી ઊઠે છે. કારણ, આ કાવ્ય બેજોડ છે. તેમાં કયો રસ નથી એ જ સવાલ છે.

આ મહાકાવ્યના સ્રષ્ટા છે કલિકાલસર્વજ્ઞ શ્રી હેમચંદ્રસૂરીશ્વરજી મહારાજા. કાવ્યનો વિષય છે વિશ્વના સર્વશ્રેષ્ઠ 'ત્રેસઠ' પુરૂષોના જીવનચરિત્રનો ચિતાર... કથાઓની રોચકતા સાથે વ્યવહારિક જીવન પ્રસન્નતાપૂર્વક કેમ જીવવું ? તેના કિમિયા બતાવાયા છે. આધ્યાત્મિક વિકાસ સાધવાની માસ્ટર કી બતાડી છે. પરમાત્મભક્તિમાં તરબોળ કરી દે એવા ભાવવાહી શબ્દોના સાથિયા પૂરાયા છે, તો સંસાર ઉપર ફિટકાર ઊભો થઈ જાય એવા વૈરાગ્યરસના ધોધ પણ કાવ્યમાં વહી રહ્યા છે.

જીવનની દશા અને દિશાઓ બદલી નાંખે એવી સૂક્તિઓનાં ભંડાર ભરેલા છે. તો અજ્ઞાનતાના અંધકાર ઉલેચી જીવનમાં જ્ઞાનનો ઝગમગાટ પથરાય એવા ખજાનાનો પણ તોટો નથી.

બુદ્ધિને ધારદાર બનાવે એવી તર્ક સંગત વાતોથી કાવ્યની ઉપાદેયતા વધી છે તો હૃદયને ભીનું ભીનું કરી દે એવી આર્દ્ર વાતોથી કાવ્યની આકર્ષકતા વધી છે.

કાવ્યકૃતિની કલાસુંદરતા તેના કર્તાના જીવનવૈભવ અને જ્ઞાનની અગાધતાને આભારી હોય છે.

નવ-નવ સૈકા પૂર્વે થયેલા હેમચંદ્રાચાર્યનું નામ આજે પણ માત્ર ગુજરાતના જ નહીં પણ વિશ્વના ખૂણે-ખૂણે ગુંજી રહ્યું છે. કો'ક તેમને કલિકાલ સર્વજ્ઞ કહે છે, કો'ક Ocean of knowledge કહે છે, તો કોઈ સરસ્વતીનો શણગાર કહે છે. ૧૧૬૨ થી ૧૨૨૯ સુધીનો કાળ જાણે હેમયુગ જ બની ગયો હતો.

શું એમની દિવ્ય પ્રતિભા હશે ! કે ગુર્જરેશ્વરોના ઉન્નત મસ્તકો તેમને નમતા હોય, સરસ્વતીના તટ ઉપર સરસ્વતીનો સાક્ષાત્કાર કરાવતા જે સૂરીશ્વરના ચરણોને મોટા રાજરાજેશ્વરો સ્વર્ણ કમલથી પૂજતા હોય, પ્રકાંડ વિદ્વાનો પણ તેમની બુદ્ધિ પ્રતિભા જોઈ પાણી પાણી થઈ જતા હોય.

ગુજરાતની ધરા ઉપર એમણે જે ઉપકારો કર્યા છે તેને શબ્દસ્થ કરવા અશકય છે, ઘર-ઘરમાં આજે પળાતી અહિંસા અને જયણાના ઝરણાનું મૂળ છે 'કલિકાલ સર્વજ્ઞ'.

સરસ્વતીની સાધના કરી સ્વયં જ્ઞાનસિદ્ધ બન્યા અને જ્ઞાનનો ધોધ વહેવડાવી અનેકોના મિથ્યાંધકારોને દૂર કર્યા. સદાચાર અને સુસંસ્કારોના સિંચનથી ગુજરાતની ધરતીને ગુણનિષ્પન્ન બનાવી હતી.

સિદ્ધરાજ જયસિંહ જેવા પ્રતાપી રાજાઓને પ્રતિબોધ કરી તેમને જૈન ધર્મના રાગી બનાવ્યા હતાં. તેના દ્વારા જૈન શાસનની જબરજસ્ત પ્રભાવનાઓ કરાવી હતી. આચાર્યશ્રીના ઉપદેશનું પાલન કરી સિદ્ધરાજે 'સિદ્ધવિહાર', 'રાયવિહાર' જેવા ઉત્તુંગ અને ભવ્ય જિનાલયોના સર્જન કર્યા હતા.

સિદ્ધરાજની વિનંતિથી 'સિદ્ધ-હેમ' નામના શબ્દાનુશાસનની રચના કરી. આ દુષ્કરસર્જનને પટ્ટહસ્તી ઉપર સ્થાપી શોભાયાત્રા દ્વારા આખા ગામમાં ફેરવી આચાર્યશ્રીની વિદ્વત્તાનું ગૌરવ આસમાને પહોંચાડયું. સંસ્કૃત-પ્રાકૃત-શૌરસેની-માગધી-પિશાચી-ચૂલિકાપિશાચી-અપભ્રંશ વિ. ભાષાઓનું સાંગોપાંગ બોધ કરાવતું આ વ્યાકરણ વિશ્વનું બેજોડ સર્વમાન્ય રાષ્ટ્રીય વ્યાકરણ બન્યું. ત્રણસો લહિયાઓ બેસાડી સિદ્ધરાજે આ વ્યાકરણની સેંકડો-હજારો નકલો લખાવી ગામેગામ મોકલી.

પ્રજા સુખચેનથી રહી શકે અને રાજા પણ રાજયને સુરાજય બનાવી શકે એવા કિમિયાઓનો પ્રકાશ પાથરતાં "અર્હન્નીતિ" જેવા ગ્રંથોના સર્જનમાં પણ તેમણે ક્યાંય કચાશ છોડી નથી.

યોગશાસ્ત્ર (મૂળ ૧૨૦૦ શ્લોક અને બાર હજાર શ્લોક પ્રમાણ સ્વોપજ્ઞ ટીકા સહિત) જેવા ગ્રંથો સર્જી યોગસાધના અને ધ્યાન સાધનાની દુનિયામાં દિવ્ય પ્રકાશ પાથર્યો. સાધુ અને શ્રાવક જીવનની આચારચર્યાઓને અદ્‌ભુત રીતે તેમાં વણી લીધી.

દશ પર્વથી અલંકૃત "ત્રિષષ્ટિ શલાકા પુરૂષ ચરિત્ર મહાકાવ્ય" સર્જન કરીને તો આ હેમચંદ્રાચાર્યે ખરેખર કમાલ કરી છે. ઉક્ત તમામ વિષયોને અને ભાવોને જાણે આ એક કાવ્યમાં સમન્વિત ન કર્યા હોય !..!..!

શું પદલાલિત્ય !... શું અદ્‌ભૂત છંદરચના ! કેવી રોચક સૂક્તિઓ ! કેવી ભાવવાહી પ્રભુ સ્તુતિઓ ! કેવા મોહક કથારસના ખળખળ વહેતા રસઝરણાં ! કોના વખાણ કરવા ? કોને ચઢિયાતા કહેવા ? બધુ જ રોચક-મોહક અને અદ્‌ભૂત રસસભર....

આ મહાકાવ્યના વાંચનથી મહાપુરૂષોના જીવન કવનનો બોધ તો થાય જ, સાથે જીવન જીવવાની કળા આત્મસાત્ થાય અને વૈરાગ્યરસની પુષ્ટિ પણ થાય.

'સિદ્ધરાજની વિનંતિથી જેમ 'સિદ્ધહેમ વ્યાકરણ'ની રચના હેમચંદ્રસૂરિજીએ કરી, તેમ વીતરાગ સ્તોત્ર-યોગશાસ્ત્ર અને ત્રિષષ્ટિ શલાકા પુરુષ ચરિત્ર જેવા ગ્રંથરત્નોના સર્જન મારા (જેવાના બોધ) માટે કર્યું છે,' એવી કુમારપાળની વાચાને આચાર્યશ્રી સ્વયં ત્રિ.શ.પુ.માં શબ્દસ્થ કરે છે.

पूर्वं पूर्वजसिद्धराजनृपतेर्भक्तिस्पृशो याञ्चया
सांगं व्याकरणं सुवृत्ति–सुगमं चक्रुर्भवन्तः पुराः ।
मद्धेतोरथ योगशास्त्रममलं लोकाय च द्व्याश्रय–
श्छंदोऽलङ्कृतिनामसंग्रहमुखान्यन्यानि शास्त्राण्यपि ॥
लोकोपकारकरणे स्वयमेव यूयं, सज्जा स्थ यद्यपि तथाऽप्यहमर्थयेऽदः ।
मादृग्जनस्य प्रतिबोधकृते शलाका–पुंसां प्रकाशयत वृत्तमपि त्रिषष्टेः ॥

આચાર્યશ્રીના મુખમાંથી સરસ્વતીને પ્રવાહ ખળખળ વહેતો, આઠ/દશ લહિયાઓ એક સાથે બેસી તેને ક્રમશઃ ઝીલતા-આલેખતા, તેઓ પરસ્પર એવી સમજૂતી કે કળાથી ગ્રંથ આલેખતા કે આખો ગ્રંથ સહજ સુંદર રીતે સંકલિત થઈ જતો.

અનેક ગ્રંથોના નૂતન સર્જન-પઠન-પાઠન, પ્રતિલિપિકરણ, જ્ઞાન પ્રચાર-પ્રસાર વિ. જ્ઞાનવર્ધક પ્રવૃત્તિઓ દ્વારા ગુજરાતને અને ખાસ કરીને ગુજરાતની રાજધાની પાટણને વિદ્યાનું ધામ બનાવ્યું.

॥३॥

કયો વિષય તેમના માટે વણખેડયો હતો ? એ એક સવાલ છે. શબ્દાનુશાસન-લિંગાનુશાસન-કાવ્યાનુશાસન-છંદોનુશાસન અને વાદાનુશાસન આ પાંચ અનુશાસનોનું સર્જન વિશ્વના બેજોડ સર્જન કહી શકાય.

શબ્દાનુશાસન-લિંગાનુશાસન, ધાતુ પારાયણ, ઉણાદિગણપાઠ, લઘુવૃત્તિ, બૃહદ્‌વૃત્તિ, બૃહન્ન્યાસ વિ.ના સર્જન કરી શબ્દશાસ્ત્રને સમૃદ્ધ કર્યું.

અભિધાનચિંતામણિ, દેશીનામમાલા, અનેકાર્થ સંગ્રહ, નિઘંટુ શેષ આ ચાર મહાકોષો વિ.ના સર્જન કરી શબ્દાર્થશાસ્ત્રની ગરિમા વધારી છે.

કાવ્યાનુશાસન અને છંદોનુશાસનની રચના કરી છંદશાસ્ત્ર, અલંકારશાસ્ત્ર, અપભ્રંશ સાહિત્યના ખજાનાને તરબતર કરી દીધું. કવિઓ અને સાહિત્યકારો માટે આ ગ્રંથો તો જાણે પ્રાણ કરતાં ય મૂલ્યવાન બની ગયા.

બે આશ્રયવાળા દ્વ્યાશ્રય જેવા મહાકાવ્યની રચના તો એવી અદ્‌ભૂત રીતે કરી છે કે જેમાં સમસ્ત શબ્દાનુશાસન, સિદ્ધરાજનો દિગ્વિજય ચૌલુકયવંશનો અમર ઈતિહાસ, પાટણની પ્રશસ્તિ અને ગુજરાતની ગૌરવગાથા મૂળરાજથી માંડીને કુમારપાળ સુધીનો ગુજરાતનો ઈતિહાસ વિ. બધુ એક સાથે વણાઈ જાય અને કાવ્યની દેદિપ્યમાનતા સોળે કળાએ ખીલી ઉઠે.

પ્રમાણમીમાંસા જેવા ગ્રંથો સર્જી ન્યાયનું સતલ ઊંડાણ ખેડ્યું, તો અન્યયોગવ્યવચ્છેદ-અયોગવ્યવચ્છેદ અને વીતરાગસ્તોત્ર જેવા ગ્રંથોના નિર્માણ કરી ન્યાયની કઠણ શૈલીમાં પરમાત્મભક્તિના ભાવોને ગુંથી લીધા, ન્યાયની કર્કશ શૈલી અને ભક્તિના ભાવોને ક્યાં તાલમેળ મળે ? પણ આ જ તો તેમની ભક્તિ અને વિદ્વત્તાપૂર્ણ સર્જનકળાનો કસબ હતો.

આ થઈ તેમના સાહિત્યસર્જનની વાત...

શ્રી કલિકાલસર્વજ્ઞએ લાખોમાં એક કહી શકાય એવા ગુર્જરેશ્વર કુમારપાળ જેવા શ્રાવકરત્નનું સર્જન-ઘડતર કર્યું. અઢાર દેશમાં અભયદાનની ઉદ્‌ઘોષણા કરી, રાજ્યમાંથી સાત વ્યસનોને તિલાંજલી અપાવી. અપુત્રીઓનું ધન રાજગ્રાહ્ય બનતું અટકાવ્યું. ત્રિભુવન વિહાર-કુમારવિહાર જેવા ૧૪૪૪ ગગનચુંબી જિનચૈત્યોથી પૃથ્વીને મઢી દીધી. નિર્દોષ પશુઓના નિર્મમ બલીઓ ચઢાવવાની પ્રથા જાનના જોખમે બંધ કરાવી, લગભગ ૨૧ જેવા વિરાટ જ્ઞાનભંડારોના નિર્માણ કર્યા, સમ્યક્‌ત્વ

સહિત બાર વ્રત ગ્રહણ કર્યા. અનેક જર્જરિત જિનાલયોના જીર્ણોદ્ધાર કરાવ્યા, અનેક દાનશાળાઓ ખોલી, લગભગ ચૌદ કરોડ રૂપિયાનો સદ્વ્યય કરી નિર્ધન અને અલ્પપુન્યવાળા સાધર્મિક બંધુઓની કાયાપલટ કરી દીધી, પ્રજા ઉપરના ઘણા આકરા કરવેરાઓ માફ કરાવ્યા. શત્રુંજય-ગિરનારના છ'રી પાલિત સંઘો કઢાવ્યા. યોગશાસ્ત્ર-વીતરાગ સ્તોત્ર જેવા સૂત્રો કંઠસ્થ કર્યા.

॥૫॥ મોટી ઉંમરે ધર્મ પામ્યા છતાં શાસનના એક એક અંગની જબરદસ્ત આરાધના કરી લીધી. શ્રી કલિકાલસર્વજ્ઞ આચાર્ય ભગવંતે આ એક પરમાર્હત્ શ્રાવકરત્નનું સર્જન કરી તેના દ્વારા જગતભરમાં અને વિશેષ કરી ગુજરાતમાં શાસનની બેજોડ પ્રભાવના કરી જૈન ધર્મનો ડંકો વગાડી દીધો હતો.

જાણવા મુજબ આ શ્રી હેમચંદ્રસૂરિજીએ પાંત્રીશ હજાર જેટલા માનવોને ધર્મોપદેશ દ્વારા નવા જૈન બનાવ્યા હતા.

આચાર્ય હેમચંદ્રસૂરિજીએ 'શિષ્યસર્જન'નું કાર્ય પૂરી ચીવટથી કર્યું હતું. આ. બાલચંદ્રસૂરિ મ., આ. રામચંદ્રસૂરિ મ., આ. મહેન્દ્રસૂરિ મ., પં. વર્ધમાનગણિ મ., પં. ગુણચંદ્રગણિ મ., પં. યશશ્ચંદ્રગણિ મ., પં. ઉદયચંદ્રગણિ મ. મુનિ દેવચંદ્રજી, પં. ઉદયસાગરગણિ જેવા વિદ્વાન, કવિ, શાસ્ત્રમર્મજ્ઞ શિષ્યોના સર્જન કરી એક મહાન કાર્ય આચાર્યશ્રીએ કર્યું. આચાર્યશ્રીના આ વિદ્વાન શિષ્યરત્નોએ પણ વિવિધ વિષયક અનેક ગ્રંથોના સર્જન કરી જૈન સાહિત્ય સંગ્રહને સમૃદ્ધ કરવામાં અનેરૂ યોગદાન આપ્યું છે.

વિદ્વત્તા સાથે હેમચંદ્રાચાર્યની નમ્રતા પણ ગજબ કોટીની હતી. "બધું જ્ઞાનસંપાદન ગુરુની પાસે અને તેમની કૃપાથી જ થયું છે." એવું સ્પષ્ટ તેમણે જ ત્રિ.શ.પુ.ની પ્રશસ્તિમાં જણાવ્યું છે.

आचार्यो हेमचंद्रोऽभूत्तत्पदांभोजषट्पदः ।
तत्प्रसादादधिगत–ज्ञान–संपत्महोदयः ॥

દિગ્ગજ વિદ્વાનો પણ હેમચંદ્રાચાર્યની બહુમુખી પ્રતિભાથી અત્યંત પ્રભાવિત હતા, તેમની સ્તુતિ કરતા થાકતા ન હતા, આટલી નાની જિંદગીમાં આટલું વિરાટ સર્જન કાર્ય કઈ રીતે કરી શકયા, એ બધા માટે આશ્ચર્યરૂપ હતું. ॥૫॥

किं स्तुमः शब्दपाथोधेः हेमचंद्रयतेर्मतिम् ।
एकेनापि हि येनेदृक् कृतं शब्दानशासनम् ॥

"એકલપંડે આટલુ સર્જન કરનારની શું સ્તુતિ કરીએ ?" એમ કહી બધા અટકી ગયા.

માતા પાહિણી અને પિતા ચાચિંગના કુળમાં આવેલ ચાંગાએ સંવત ૧૧૫૦માં પાંચ વર્ષે દીક્ષા ગ્રહણ કરી સોમચંદ્રમુનિ બન્યા. મુનિ સોમચંદ્રનું જીવન નિર્દોષ અને પવિત્ર હતું. તેમની દૃષ્ટિ નિર્મળ હતી, કચરામાં પણ સોનાના દર્શન થતા હતા.

એકદા ગુરુ સાથે નિર્ધન બનેલા શ્રેષ્ઠિપુત્રના ઘરે ગોચરી ગયા. ખૂણામાં પડેલ કચરાનો ઢગલો તેમને સોનાનો દેખાયો, તેમને થયું 'જેને ઘરે સોનાના ઢગલા છે તે આવો નિર્ધન !" ચાલાક શ્રેષ્ઠિપુત્રએ તુરંત બાલમુનિ સોમચંદ્રને કચરાના ઢગલા ઉપર બેસાડ્યા અને તે બ્રહ્મચારીના નૈષ્ઠિક સંયમ પ્રભાવથી કચરાનો ઢગલો સોનાનો બની ગયો. ત્યારપછી મુનિ સોમચંદ્ર, સોમચંદ્રને બદલે 'હેમચંદ્ર' તરીકે ખ્યાત થયા. પાછળથી આચાર્ય બનેલા મુનિ હેમચંદ્રએ રૈવતાવતાર તીર્થમાં (ખંભાતમાં) સરસ્વતીદેવીની સાધના કરી તેમને પ્રત્યક્ષ કરી હતી તેમની અનહદ કૃપા વરદાન મેળવી તેઓ ધન્ય બન્યા હતા.

વિ.સં. ૧૧૬૬માં ખંભાતનગરે પૂજ્યશ્રીની આચાર્યપદવી થઈ, ત્યારે માતા પાહિણીએ પણ દીક્ષા ગ્રહણ કરી હતી. ઉત્તમ સંયમ પાળી માતા સાધ્વીએ અંતસમયે જ્યારે પાટણમાં અણસણ કર્યું ત્યારે આચાર્યશ્રીએ પણ ત્રણ લાખ શ્લોક સર્જનનું પુન્યભેટણું આપી અપાર માતૃભક્તિ પ્રદર્શિત કરી હતી.

ગુરુકૃપા અને સરસ્વતીની મહેર, આ બે બળના જોરે તેમણે દિગ્ગજ જેવા ગણાતા દિગંબરાચાર્યને વાદમાં પછડાટ આપી હતી અને શ્વેતામ્બર સંપ્રદાયનો જયજયકાર ફેલાવ્યો હતો.

આચાર્યશ્રી બેજોડ વિદ્વાન તો હતા જ, સાથે અચ્છા જ્યોતિર્વિદ્-ભવિષ્યવેત્તા પણ હતા, એક પ્રતિષ્ઠા મહોત્સવમાં આચાર્યશ્રીએ જાહેર કર્યું હતું કે "મારું આયુષ્ય હવે માત્ર છ મહિનાનું જ બાકી છે અને મારા સ્વર્ગવાસ બાદ છ મહિના પછી કુમારપાળનું પણ મૃત્યુ થશે" અને અક્ષરશઃ તેમજ થયું હતું.

૧૨૨૯માં પાટણમાં સંઘ સમક્ષ પોતાના આજ્ઞાંકિત અને વફાદાર શિષ્ય આ. રામચંદ્રસૂરિને પોતાની પાટ સોંપી આચાર્યશ્રી સમાધિપૂર્વક કાળધર્મ પામ્યા હતા, રાજકવિ સોમેશ્વરદેવના મોઢામાંથી તે સમયે શબ્દો સરી પડયા : **"वैदुष्यं विगताश्रयं श्रितवति श्रीहेमचंद्रे दिवम्"** આ. હેમચંદ્રસૂરિ દેવલોક પામ્યાથી વિદ્વતા જાણે આશ્રયવગરની થઈ ગઈ.

આવા મહાપુરુષ રચિત ત્રિષષ્ટિ શલાકા પુરુષ ચરિત્ર એક અદ્‌ભુત મહાકાવ્ય છે. કરૂણરસ, શૌર્યરસ, ભક્તિરસ, વૈરાગ્યરસ વિ. બધા રસોનો શ્રેષ્ઠ સમન્વય છે. છંદો સુંદર છે. અલંકાર અદ્‌ભુત છે, રચના મનોહર છે, શૈલી સરળ છે, ભાવો ગહન છે, ઉપમાઓ અલૌકિક છે, કથાઓ મનોહર છે, સૂક્તિઓ ચોટદાર છે, સ્તુતિઓ ભાવવાહી છે, દેશનાઓ અસરકારક છે, ઉપદેશો પ્રેરક છે, પદલાલિત્ય અનુપમ છે.

ટુંકમાં કહીએ તો બધું જ અદ્‌ભૂત... અદ્‌ભૂત... અદ્‌ભૂત છે.

આ ચરિત્ર દશ પર્વમાં વિભક્ત છે, પ્રત્યેક પર્વમાં અનેક સર્ગો છે, ચરિત્રમાં કથાનકો સાથે ઈતિહાસો, પૌરાણિક કથાઓ, શાસ્ત્ર અને સિધ્ધાંતની વાતો, ગહન તત્ત્વજ્ઞાન અને કર્મસિદ્ધાંતોની વાતો પણ વણી લેવામાં આવી છે.

- પહેલા પર્વમાં આદીશ્વર ભગવાન-ભરતચક્રીના ચરિત્ર
- બીજા પર્વમાં અજિતનાથ ભગવાન-સગરચક્રીના ચરિત્ર
- ત્રીજા પર્વમાં સંભવનાથ ભગવાનથી શીતલનાથ ભગવાન સુધીના ૮ ભગવાનના ચરિત્રો.
- ચોથા પર્વમાં શ્રેયાંસનાથ ભગવાનથી ધર્મનાથ ભગવાન સુધીના પાંચ તીર્થંકરો, પાંચ વાસુદેવો, પાંચ પ્રતિવાસુદેવો, પાંચ બળદેવો, મઘવા અને સનત્કુમાર ચક્રવર્તી આમ ૨૨ મહાપુરુષોના ચરિત્ર.
- પાંચમા પર્વમાં શાંતિનાથ ભગવાનનું ચરિત્ર (તેઓ તીર્થંકર અને ચક્રવર્તી બંને હતા, એટલે બે ચરિત્ર ગણત્રીમાં લેવાયા છે.)
- છટ્ઠા પર્વમાં કુંથુનાથ ભગવાનથી મુનિસુવ્રતસ્વામી સુધીના ચાર તીર્થંકર, ચાર ચક્રવર્તી, ૨ વાસુદેવ, ૨ પ્રતિવાસુદેવ, ૨ બળદેવ આમ ૧૪ મહાપુરુષોના ચરિત્ર.
- સાતમા પર્વમાં નમિનાથ ભગવાન-૧૦માં ચક્રી હરિષેણ, ૧૧માં ચક્રી જય, આઠમાં બળદેવ-વાસુદેવ - પ્રતિવાસુદેવો ક્રમશઃ રામ-લક્ષ્મણ-રાવણ આ છના ચરિત્રો છે. આ ચરિત્ર જૈન રામાયણના નામે પ્રચલિત છે.
- આઠમાં પર્વમાં નેમિનાથ ભગવાન, નવમા વાસુદેવ, બળદેવ, પ્રતિવાસુદેવ ક્રમશઃ કૃષ્ણ-બળભદ્ર અને જરાસંધ આ ચાર મહાપુરુષના ચરિત્ર છે. ઉપરાંત-પાંડવો અને કૌરવોના ચરિત્રો પણ છે.
- નવમા પર્વમાં પાર્શ્વનાથ ભગવાન અને બ્રહ્મદત્ત ચક્રી ચરિત્ર છે.
- દશમા પર્વમાં મહાવીર ચરિત્ર છે, બીજા પર્વો કરતાં આ પર્વ મોટું છે. ૧૩ સર્ગ છે. અંતે ગ્રંથકારની પ્રશસ્તિ છે.

સાથે સાથે શ્રેણિક, કોણિક, સુલસા, અભયકુમાર, ચેડારાજા, હલ્લ-વિહલ્લ, મેઘકુમાર, નંદિષેણ, ચેલ્લણા, દુર્ગંધા, આર્દ્રકુમાર, ઋષભદત્ત, દેવાનંદા, જમાલી, શતાનિક, ચંડપ્રદ્યોત, મૃગાવતી, આનંદ વિ. દશ શ્રાવક, ગોશાળો, હાલિક, પ્રસન્નચંદ્ર, દુર્દરાંક દેવ, ગૌતમ સ્વામી, પુંડરીક, કંડરીક, અંબડ, દશાર્ણભદ્ર, ધન્ના-શાલિભદ્ર, રોહિણેય, ઉદાયન, શતાનિક પુત્ર, કપિલ કેવલી, કુમારનંદી, ઉદાર્ય, કુલવાલક, કુમારપાળ વિ. અનેક ચરિત્ર ખૂબ રોચક શૈલીમાં આલેખન થયા છે.

૩૬ હજાર શ્લોક પ્રમાણ આ કૃતિમાં તીર્થંકરોની દેશનાના માધ્યમે અનેક શાસ્ત્રીય સિદ્ધાંતોની અદ્‌ભૂત વિવેચના કરાઈ છે. ખળખળ વહેતી સરિતાના નીર જેવા મુલાયમ અને મધુર કથાનકોની સાથે સાથે કઠણ-કર્કશ અને ગહન એવા નય-પ્રમાણના સ્વરૂપો, ક્ષેત્રસમાસ-જીવવિચાર-કર્મસ્વરૂપ, આત્મસિધ્ધિ-બાર ભાવના જેવા વિષયોને પણ સરળ શૈલીમાં રજૂ કરી આચાર્યશ્રીએ પોતાની કામણગારી વિદ્વત્તાને છતી કરી છે.

દશમાં પર્વમાં પ્રદર્શિત કરેલ કુમારપાળનું ભવિષ્યકથન અને અંતિમ ગ્રંથ સર્જન પ્રશસ્તિ આ બે વસ્તુ ઘણી મહત્ત્વની અને સૂચક છે.

આ એક મહાકાવ્યના વાંચનથી, પઠન-પાઠનથી આત્મિક સુખોની પ્રજ્ઞા સોળે કળાએ ખીલી ઉઠે છે અને સર્વતોવ્યાપી બોધ પ્રાપ્ત થાય છે એ નિર્વિવાદ વાત છે.

ત્રિષષ્ટિ એ જૈન સમાજ અને સવિશેષ સાધુ-સાધ્વીજીઓ માટે અતિલોકપ્રિય કાવ્ય છે. અધ્યયન-અધ્યાપનના ક્ષેત્રે સવિશેષ તેની ઉપયોગિતા છે.

કલિકાલસર્વજ્ઞની આ અજાયબ કાવ્યકૃતિ આજે સેંકડો વર્ષ પછી પણ આપણને ઉપલબ્ધ થઈ છે તે આપણું પ્રકૃષ્ટ પુન્ય છે.

હજુ સુધી સેંકડો વર્ષો સુધી આ સુકૃતસર્જન સુરક્ષિત રહે એ શુભાશયથી પ્રસ્તુત પ્રકાશન સાકાર થઈ રહ્યું છે.

અમારા પૂ. ગુરુદેવશ્રી વૈરાગ્યદેશનાદક્ષ આચાર્ય ભગવંત શ્રીમદ્ વિજય હેમચંદ્રસૂરીશ્વરજી મહારાજાની પ્રેરણાથી 'શ્રી જિનશાસન આરાધના ટ્રસ્ટ' જિનશાસનના સાતે ક્ષેત્રની અનુપમ ભક્તિ કરી રહ્યું છે. તેમાં પણ છેલ્લા ૧૫ વર્ષથી

શ્રુતભક્તિનો મહાયજ્ઞ આરંભાયો છે. જીર્ણ-શીર્ણ થયેલા લગભગ ૨૭૫થી અધિક ગ્રંથોના જીર્ણોદ્ધાર થયા છે. અને ભારતભરના જ્ઞાનભંડારોમાં આ તમામ ગ્રંથો ભેટસ્વરૂપે મોકલાયા છે.

ત્રિષષ્ટિનાં દશે દશ પર્વના પ્રકાશનની ઘણી જ આવશ્યકતા હતી જે આજે પરિપૂર્ણ થઈ રહી છે. તે જૈન સંઘ માટે અતિ આનંદનો વિષય છે.

આવા વિરાટ પ્રકાશનકાર્ય માટે ઘણું મોટું યોગદાન જરૂરી હોય છે.

પ.પૂ. મુનિરાજશ્રી રત્નબોધિવિજયજી મ.સા.

પ.પૂ. મુનિરાજશ્રી સૌમ્યરત્નવિજયજી મ.સા.

પ.પૂ. મુનિરાજશ્રી જિનપ્રેમવિજયજી મ.સા.

આદિ મહાત્માઓએ સખત પરિશ્રમ લઈ પ્રસ્તુત પ્રકાશનને સાકાર કર્યું છે. મહાત્માઓની આ શ્રુતભક્તિ ખરેખર અનુમોદનીય છે.

પ્રાંતે એક જ કામના કે... પ્રસ્તુત કાવ્યરચનાના પઠન-પાઠનમાંથી સૌ કોઈ વૈરાગ્યભાવથી ભાવિત બનો, પ્રભુભક્તિમાં લીન બનો... રાગદ્વેષથી મુક્ત બની, શીઘ્ર મુક્તિગામી બનો... એજ

લિ.

પ.પૂ. વૈરાગ્યદેશનાદક્ષ આચાર્ય ભગવંતશ્રી હેમચંદ્રસૂરીશ્વરજી મ.ના

વિનેય પંન્યાસ કલ્યાણબોધિવિજયજી ગણિ

સં. ૨૦૫૯ ભાદરવા વદ ૪ તા. ૧૪-૯-૦૩ વડોદરા

(૧૦૦મી ઓળી પારણા દિન)

॥ सूरिप्रेमाष्टकम् ॥

रचयिता : पन्यासश्रीकल्याणबोधिविजयगणी ।

(उपजातिः)

प्रकृष्टशक्तावपि मुक्तवान् हि
व्याख्यानदाने परसत्त्ववान् यः ।
ब्रह्मैकनिष्ठामनुपालनाय
पायात्स पापात् परमर्षि–प्रेमः ॥१॥

मिष्टान्नभोज्यानि फलानि यो हि
आम्रप्रमुखाण्यपि भुक्तवान्न ।
मां जिह्मजिह्माजडनागपाशात्
पायात्स पापात् परमर्षि–प्रेमः ॥२॥

आक्रोशसोढाऽनपराधकारी
स्वरक्षणे यस्य न काऽपि वाञ्छा ।
अहो प्रशान्ति–र्नतमस्तकर्षिः
पायात्स पापात् परमर्षि–प्रेमः ॥३॥

वृद्धेऽपि काये बहुरुग्निकाये
न यस्य काङ्क्षा प्रतिकर्मणे हि ।
अन्तोऽरियोद्धा भवभीतिधर्ता
पायात्स पापात् परमर्षि–प्रेमः ॥४॥

मुग्धीकृता दृक् चरितं निरीक्ष्य
गुणैकपश्या–परिकुण्ठितापि ।
यन्नामतो सिध्यति वाञ्छितं द्राक्
पायात्स पापात् परमर्षि–प्रेमः ॥५॥

आयुःक्षयेण च्युतयोगयागः
समागतश्चैव गतश्च सेद्धुं ।
प्राणाँश्च दत्त्वा जिनशासनाय
पायात्स पापात् परमर्षि–प्रेमः ॥६॥

क्वासन्नसिद्धस्य पुनो मयाप्तिः ?
क्व तद्गुणाब्धे–र्लवलेशलब्धि ?
तथापि याचे भवरागनागात्
पायात्स पापात् परमर्षि–प्रेमः ॥७॥

यदीयसेवा इयमेव शिष्टा
यदाशयस्य प्रतिपालनैव ।
श्रीहैमचन्द्रेप्सितमेकमेव
पायात्स पापात् परमर्षि–प्रेमः ॥८॥

॥ सूरिभुवनभान्वष्टकम् ॥

रचयिता : पन्यासश्रीकल्याणबोधिविजयगणी ।

(वसंततिलका)

सज्ज्ञानदीप्तिजननैक–सहस्रभानो !
सद्दर्शनोच्छ्रयविधौ परमाद्रिसानो !
दुष्कर्मभस्मकरणैकमनःकृशानो !
भावाद् भजे भुवनभानुगुरो ! भवन्तम् ॥१॥

यो वर्द्धमानतपसामतिवर्द्धमान–
भावेन भावरिपुभिः प्रतियुध्यमानः ।
क्रुच्छ्रलोभरहितो गलिताभिमानो
भावाद् भजे भुवनभानुगुरो ! भवन्तम् ॥२॥

तेजः परं परमतेज इतो समस्ति
कुदृष्टिभिद्तदमिचंदनि चामिदृष्टिः ।
भूताऽपि शैलमनसां नयनेऽश्रुवृष्टिः
भावाद् भजे भुवनभानुगुरो ! भवन्तम् ॥३॥

तुभ्यं नमो भविकपङ्कजबोधभानो !
तुभ्यं नमो दुरितपङ्कविशोषभानो !
तुभ्यं नमो निबिडमोहतमोघ्नभानो !
भावाद् भजे भुवनभानुगुरो ! भवन्तम् ॥४॥

गुणैर्महानसि गुरो ! गुरुताप्रकर्ष !
पापेष्वपि प्रकृतदृष्टिपियूषवर्ष !
वृत्त्यैकपूतपरिशुद्धवचोविमर्श !
भावाद् भजे भुवनभानुगुरो ! भवन्तम् ॥५॥

कल्लोलकृद्वर–कृपा भवतो विभाति
विस्फुर्जते लसदनर्घ्यगुणाकरोऽन्तः ।
गम्भीरताऽतिजलधे ! नयनिम्नगाधे
भावाद् भजे भुवनभानुगुरो ! भवन्तम् ॥६॥

सीमानमत्र न गता न हि सा कलाऽस्ति
प्रक्रान्तदिक्सुगुणसौरभभाग्गुरोऽसि
दृष्टाश्च दोषनिकरा दशमीदशायां
भावाद् भजे भुवनभानुगुरो ! भवन्तम् ॥७॥

त्वद्पादपद्मभ्रमरेण देव !
श्रीहेमचन्द्रोक्तिकृता सदैव ।
भानो ! नुतोऽसि ननु भक्तिभावात्
त्वत्संस्मृतिसाश्रुससम्भ्रमेण ॥८॥ (इन्द्रवज्रा)

શ્રુતસમુદ્ધારક

૧. ભાણબાઈ નાનજી ગડા, મુંબઈ(પ.પૂ. ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્‌વિજય ભુવનભાનુસૂરીશ્વરજી મ.સા.ના ઉપદેશથી).

૨. શેઠ આણંદજી કલ્યાણજી, અમદાવાદ.

૩. શ્રી શાંતિનગર શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ, અમદાવાદ.
(પ.પૂ. તપસમ્રાટ આચાર્યદેવ શ્રીમદ્‌વિજય હિમાંશુસૂરિ મ.સા.ની પ્રેરણાથી).

૪. શ્રી શ્રીપાળનગર જૈન ઉપાશ્રય ટ્રસ્ટ, વાલકેશ્વર, મુંબઈ(પ.પૂ. ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્ વિજય રામચંદ્રસૂરિ મ.સા.ની દિવ્યકૃપા તથા પૂ. આચાર્યદેવ શ્રીમદ્‌વિજય મિત્રાનંદ સૂ.મ.સા.ની પ્રેરણાથી).

૫. શ્રી લાવણ્ય સોસાયટી શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ, અમદાવાદ. (પ.પૂ. પંન્યાસજી શ્રી કુલચંદ્રવિજયજી ગણિવર્યની પ્રેરણાથી).

૬. નયનબાળા બાબુભાઈ સી. જરીવાળા હા. ચંદ્રકુમાર, મનીષ, કલ્પનેશ (પ.પૂ. મુનિરાજ શ્રી કલ્યાણબોધિ વિજયજી મ.સા. પ્રેરણાથી).

૭. કેશરબેન રતનચંદ કોઠારી હ. લલિતભાઈ (પ.પૂ. ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્ વિજય જયઘોષસૂરીશ્વરજી મહારાજની પ્રેરણાથી)

૮. શ્રી શ્વેતામ્બર મૂર્તિપૂજક તપગચ્છીય જૈન પૌષધશાળા ટ્રસ્ટ, દાદર, મુંબઈ.

૯. શ્રી મુલુંડ શ્વેતામ્બર જૈન સંઘ, મુલુંડ, મુંબઈ(આચાર્યદેવ શ્રી હેમચંદ્રસૂરિ મ.સા.ની પ્રેરણાથી).

૧૦. શ્રી શાંતાક્રુઝ શ્વે. મૂર્તિ. તપાગચ્છ સંઘ, શાંતાક્રુઝ, મુંબઈ (આચાર્યદેવશ્રી હેમચંદ્રસૂરિ મ.સા.ની પ્રેરણાથી).

૧૧. શ્રી દેવકરણ મૂળજીભાઈ જૈન દેરાસર પેઢી, મલાડ (વેસ્ટ), મુંબઈ (પ.પૂ. મુનિરાજશ્રી સંયમબોધિ વિ.મ.સા.ની પ્રેરણાથી).

૧૨. સંઘવી અંબાલાલ રતનચંદ જૈન ધાર્મિક ટ્રસ્ટ, ખંભાત, (પૂ.સા.શ્રી વસંતપ્રભાશ્રીજી મ. તથા પૂ.સા.શ્રી સ્વયંપ્રભાશ્રીજી મ. તથા પૂ.સા. શ્રી દિવ્યયશાશ્રીજી મ.ની પ્રેરણાથી મૂળીબેનની આરાધનાની અનુમોદનાર્થે).

૧૩. બાબુ અમીચંદ પનાલાલ આદીશ્વર જૈન ટેમ્પલ ચેરીટેબલ ટ્રસ્ટ, વાલકેશ્વર, મુંબઈ-૪૦૦ ૦૦૬. (પૂ. મુનિરાજ શ્રી અક્ષયબોધિવિજયજી મ.સા. તથા પૂ. મુનિરાજ શ્રી મહાબોધિવિજયજી મ.સા. તથા પૂ. મુનિરાજશ્રી હિરણ્યબોધિવિજયજી મ.સા.ની પ્રેરણાથી).

૧૪. શ્રી શ્રેયસ્કર અંધેરી ગુજરાતી જૈન સંઘ, મુંબઈ(પૂ. મુનિશ્રી હેમદર્શન વિ.મ. તથા પૂ. મુનિશ્રી રમ્યઘોષ વિ.મ.ની પ્રેરણાથી).

૧૫. શ્રી જૈન શ્વેતામ્બર મૂર્તિપૂજક સંઘ, મંગળપારેખનો ખાંચો, શાહપુર, અમદાવાદ. (પ.પૂ. આચાર્યદેવ શ્રી રૂચકચંદ્રસૂરિ મ.ની પ્રેરણાથી).

૧૬. શ્રી પાર્શ્વનાથ શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ, સંઘાણી સ્ટેટ, ઘાટકોપર (વેસ્ટ), મુંબઈ. (પૂ. કલ્યાણબોધિવિ.મ.ની પ્રેરણાથી).

૧૭. શ્રી નવજીવન સોસાયટી જૈન સંઘ, બોમ્બે સેન્ટ્રલ, મુંબઈ. (પૂ. મુનિરાજ શ્રી અક્ષયબોધિ વિ.મ.ની પ્રેરણાથી).

૧૮. શ્રી ઘાટકોપર જૈન શ્વેતામ્બર મૂર્તિપૂજક સંઘ, ઘાટકોપર (વેસ્ટ), મુંબઈ (વૈરાગ્યદેશનાદક્ષ પૂ.આ. શ્રી હેમચંદ્રસૂરિ મ.સા.ની પ્રેરણાથી).

૧૯. શ્રી કલ્યાણજી સોભાગચંદ જૈન પેઢી પિંડવાડા (રાજ.) (સિદ્ધાંતમહોદધિ સ્વ. આચાર્ય શ્રી વિજય પ્રેમસૂરીશ્વરજી મ.ના સંયમજીવનની અનુમોદનાર્થે).

૨૦. શ્રી આંબાવાડી શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ, અમદાવાદ. (પૂ. મુનિ શ્રી કલ્યાણબોધિ વિ. મ.ની પ્રેરણાથી).

૨૧. શ્રી જૈન શ્વેતામ્બર મૂર્તિપૂજક સંઘ, વાસણા, અમદાવાદ. (પૂ. આચાર્ય શ્રી નરરત્નસૂરિ મ.ના સંયમજીવનની અનુમોદનાર્થે પૂજ્ય તપસ્વીરત્ન આચાર્ય શ્રી હિમાંશુસૂરીશ્વરજી મ.સા.ની પ્રેરણાથી).

૨૨. શ્રી પ્રેમવર્ધક આરાધક સમિતિ, ધરણીધર, દેરાસર, પાલડી, અમદાવાદ. (પૂ. ગણિવર્ય શ્રી અક્ષયબોધિવિજયજી મ.ની પ્રેરણાથી).

૨૩. શ્રી મહાવીર જૈન શ્વે.મૂ.પૂજક સંઘ, પાલડી, અમદાવાદ. શેઠ કેશવલાલ મૂળચંદ જૈન ઉપાશ્રય.
(પ.પૂ. આચાર્યશ્રી રાજેન્દ્રસૂરિ મહારાજની પ્રેરણાથી).

૨૪. શ્રી માટુંગા જૈન શ્વે. મૂર્તિપૂજક તપગચ્છ સંઘ એન્ડ ચેરીટીઝ, માટુંગા, મુંબઈ.

૨૫. શ્રી જીવિત મહાવીરસ્વામી જૈન સંઘ, નાંદિયા. (રાજસ્થાન) (પૂ. ગણિવર્ય શ્રી અક્ષયબોધિવિજયજી મ.સા. તથા મુનિશ્રી મહાબોધિવિજયજી મ.સા.ની પ્રેરણાથી).

૨૬. શ્રી વિશા ઓશવાળ તપગચ્છ જૈન સંઘ, ખંભાત.
(વૈરાગ્યદેશનાદક્ષ પ.પૂ. આચાર્યદેવ શ્રી હેમચંદ્રસૂરિ મ.સા.ની પ્રેરણાથી).

૨૭. શ્રી વિમલનાથ જૈન દેરાસર આરાધક સંઘ, બાણગંગા, વાલકેશ્વર, મુંબઈ-૪૦૦ ૦૦૬.

૨૮. શ્રી પાલીતાણા ચાતુર્માસ આરાધના સમિતિ.
(પરમપૂજ્ય વૈરાગ્ય દેશનાદક્ષ આચાર્યદેવ શ્રીમદ્ વિજય હેમચંદ્રસૂરીશ્વરજી મહારાજ સાહેબના સંવત ૨૦૫૩ના પાલીતાણા મધ્યે ચાતુર્માસ પ્રસંગે થયેલ જ્ઞાનદ્રવ્યની ઉપજમાંથી).

૨૯. શ્રી સીમંધર જિન આરાધક ટ્રસ્ટ, એમરલ્ડ એપાર્ટમેન્ટ, અંધેરી(ઈ.) મુંબઈ, (પ્રેરક-મુનિશ્રી નેત્રાનંદવિજયજી).

૩૦. શ્રી ધર્મનાથ પોપટલાલ હેમચંદ જૈન શ્વેતામ્બર મૂર્તિપૂજક સંઘ, જૈનનગર, અમદાવાદ.

૩૧. શ્રી કૃષ્ણનગર જૈન શ્વેતામ્બર મૂર્તિપૂજક સંઘ, સૈજપુર, અમદાવાદ. (પ.પૂ. આચાર્ય વિજય હેમચંદ્રસૂરીશ્વરજી મ.સા.ના કૃષ્ણનગર મધ્યે સંવત ૨૦૫૨ના ચાતુર્માસ નિમિત્તે પ.પૂ. મુનિરાજ શ્રી કલ્યાણબોધિવિજય મ.સા.ની પ્રેરણાથી).

૩૨. શ્રી બાબુભાઈ સી. જરીવાળા ટ્રસ્ટ, નિઝામપુરા, વડોદરા-૩૯૦ ૦૦૨. (પ્રેરક - મુનિશ્રી કલ્યાણબોધિ વિજયજી મ.)

૩૩. શ્રી ગોડી પાર્શ્વનાથજી ટેમ્પલ ટ્રસ્ટ, પૂના.
(પૂ. ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્ વિજય જયઘોષસૂરીશ્વરજી મ.સા. તથા પૂ. મુનિરાજ શ્રી મહાબોધિવિજયજી મ.સા.ની પ્રેરણાથી).

૩૪. શ્રી શંખેશ્વર પાર્શ્વનાથ જૈન શ્વેતામ્બર મંદિર ટ્રસ્ટ, ભવાની પેઠ, પુના. (પૂ. મુનિરાજ શ્રી અનંતબોધિવિજયજી મ.સા.ની પ્રેરણાથી).

૩૫. શ્રી રાંદેર રોડ જૈન સંઘ, સુરત.
(પૂ.પં. શ્રી અક્ષયબોધિ વિજયજી મ.સા.ની પ્રેરણાથી)

૩૬. શ્રી શ્વેતામ્બર મૂર્તિપૂજક તપાગચ્છ દાદર જૈન પૌષધશાળા ટ્રસ્ટ, આરાધના ભુવન, દાદર, મુંબઈ(મુનિશ્રી અપરાજિત વિ.મ.ની પ્રેરણાથી).

૩૭. શ્રી જવાહરનગર જૈન શ્વે. મૂર્તિ સંઘ, ગોરેગામ, મુંબઈ.
(પૂ.આ. શ્રી રાજેન્દ્રસૂરિ મ.સા.ની પ્રેરણાથી).

૩૮. શ્રી કન્યાશાળા જૈન ઉપાશ્રય, ખંભાત (પૂ. પ્રવર્તિની શ્રી રંજનશ્રીજી મ.સા., પૂ. પ્રવર્તિની શ્રી ઈંદ્રશ્રીજી મ.સા.ના સંયમજીવનની અનુમોદનાર્થે પ.પૂ. સા. શ્રી વિનયપ્રભાશ્રીજી મ.સા. તથા પ.પૂ.સા. શ્રી વસંતપ્રભાશ્રીજી મ.સા.

તથા પ.પૂ. સાધ્વીજી શ્રી સ્વયંપ્રભાશ્રીજી મ.સા.ની પ્રેરણાથી).

૩૯. શ્રી માટુંગા જૈન શ્વેતામ્બર મૂર્તિપૂજક તપાગચ્છ સંઘ એન્ડ ચેરીટીઝ, માટુંગા, મુંબઈ. (પંન્યાસ પ્રવર શ્રી જયસુંદરવિજયજી ગણિવર્યની પ્રેરણાથી).

૪૦. શ્રી શંખેશ્વર પાર્શ્વનાથ શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ, ૬૦ ફૂટ રોડ, ઘાટકોપર (ઈ.) (પૂ.પં. શ્રી વરબોધિવિજયજી ગણિવર્યની પ્રેરણાથી).

૪૧. શ્રી આદિનાથ શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ, નવસારી. (પ.પૂ.આ. શ્રી ગુણરત્નસૂરિ મ.ના શિષ્ય પૂ. પંન્યાસજી શ્રી પુણ્યરત્નવિજયજી ગણિવર્યની તથા પૂ.પં. યશોરત્નવિજયજી ગણિવર્યની.

૪૨. શ્રી કોઈમ્બતુર જૈન શ્વેતામ્બર મૂર્તિપૂજક સંઘ, કોઈમ્બતુર.

૪૩. શ્રી પંકજ સોસાયટી જૈન સંઘ ટ્રસ્ટ, પાલડી, અમદાવાદ. (પ.પૂ.આ. શ્રી ભુવનભાનુસૂરિ મ.સા.ની ગુરૂમૂર્તિ પ્રતિષ્ઠા પ્રસંગે થયેલ આચાર્ય પંન્યાસ-ગણિ પદારોહ દીક્ષા વગેરે નિમિત્તે થયેલ જ્ઞાનનિધિમાંથી).

૪૪. શ્રી મહાવીર સ્વામી જૈન શ્વેતામ્બર મૂર્તિપૂજક દેરાસર, પાવાપુરી, ખેતવાડી, મુંબઈ(પ્રેરક મુનિશ્રી રાજપાલવિજયજી તથા પં. શ્રી અક્ષયબોધિ વિ.મ.).

૪૫. શ્રી હીરસૂરીશ્વરજી જગદ્‌ગુરૂ શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ ટ્રસ્ટ, મલાડ(પૂર્વ), મુંબઈ.

૪૬. શ્રી પાર્શ્વનાથ શ્વે. મૂર્તિપૂજક જૈન સંઘ, સંઘાણી એસ્ટેટ, ઘાટકોપર (વેસ્ટ), મુંબઈ (પ્રેરક ગણિ શ્રી કલ્યાણબોધિવિજયજી મ.).

૪૭. શ્રી મરીન ડ્રાઈવ જૈન આરાધક ટ્રસ્ટ (મુંબઈ).

૪૮. શ્રી સહસ્રફણા પાર્શ્વનાથ જૈન દેરાસર ઉપાશ્રય ટ્રસ્ટ, બાબુલનાથ મુંબઈ (ગણિવર્ય અપરાજિત વિજયજીના શિષ્ય મુનિશ્રી સત્ત્વભૂષણવિજયજીની પ્રેરણાથી).

૪૯. શ્રી ગોવાલિયા ટેંક જૈન સંઘ મુંબઈ (પૂ. આચાર્યદેવશ્રી હેમચંદ્રસૂરિ મ.ના શિષ્ય ગણિવર્યશ્રી કલ્યાણબોધિવિજયજી મ.ની પ્રેરણાથી).

૫૦. શ્રી ધર્મનાથ પોપટલાલ હેમચંદ જૈન શ્વે. મૂ. પૂ. સંઘ જૈન નગર અમદાવાદ (પૂ. મુનિ શ્રી સત્યસુંદર વિ.ની પ્રેરણાથી).

૫૧. રતનબેન વેલજી ગાલા પરિવાર, મુલુંડ મુંબઈ (મુનિશ્રી રત્નબોધિ વિ.ની પ્રેરણાથી).

૫૨. શ્રી વિમલનાથ જૈન દેરાસર આરાધક સંઘ બાણગંગા, વાલકેશ્વર, મુંબઈ-૬. (પ્રેરક-પૂ.આ. હેમચંદ્રસૂરિ મ.)

૫૩. શ્રી વાડીલાલ સારાભાઈ દેરાસર ટ્રસ્ટ, પ્રાર્થના સમાજ, મુંબઈ (મુનિ શ્રી રાજપાલવિજયજી તથા પંન્યાસજી શ્રી અક્ષયબોધિવિજયજી ગણિ).

૫૪. શ્રી પ્રીન્સેસ સ્ટ્રીટ, લુહાર ચાલ જૈન સંઘ (પ્રેરક-ગણિ કલ્યાણબોધિ વિ.મ.)

૫૫. શ્રી ધર્મશાંતિ ચેરીટેબલ ટ્રસ્ટ, કાંદીવલી (ઈ.), (પ્રેરક : પૂ. મુનિશ્રી રાજપાલવિજયજી મ.સા., પૂ.પં. શ્રી અક્ષયબોધિવિજયજી મ.સા.).

૫૬. પૂ.સા.શ્રી સૂર્યયશાશ્રીજી તથા પૂ.સા.શ્રી સુશીલયશાશ્રીજીના પાર્લા (ઈસ્ટ) કૃષ્ણકુંજમાં થયેલ ચાતુર્માસની જ્ઞાનનિધિની આવકમાંથી.

૫૭. શ્રી પ્રેમવર્ધક દેવાસ શ્વે. મૂ.પૂ. જૈન સંઘ (દેવાસ-અમદાવાદ).

૫૮. શ્રી પાર્શ્વનાથ જૈન સંઘ, સમારોડ, વડોદરા.
(પ્રેરક : પં. શ્રી કલ્યાણબોધિવિજયજી ગણિવર્ય).

૫૯. શ્રી મુનિસુવ્રત સ્વામી જૈન દેરાસર ટ્રસ્ટ, લક્ષ્મીપુરા જૈન સંઘ, કોલ્હાપુર.
(પ્રેરક : પૂ.આ.શ્રી જયસુંદરસૂરિજી મ.ના શિષ્ય મુનિશ્રી પ્રેમસુંદરવિ.)

૬૦. શ્રી ધર્મનાથ પોપટલાલ હેમચંદ જૈનનગર શ્વે. મૂ.પૂ. જૈન સંઘ, નવા શારદામંદિર રોડ, અમદાવાદ. (પ્રેરક : પૂ. પુણ્યરતિવિજયજી મ.)

૬૧. શ્રી દિપક જ્યોતિ જૈન સંઘ, કાલા ચોકી, પરેલ, મુંબઈ. (પ્રેરક : પૂ.પં.શ્રી ભુવનસુંદરવિજયજી તથા શ્રી ગુણસુંદરવિજયજી).

૬૨. શ્રી પદ્મમણિ જૈન શ્વે. તીર્થ પેઢી પાબલ, જિ. પુના.
(પં. કલ્યાણબોધિ વિ.મ.ની વર્ધમાન તપની ૧૦૦ ઓળીની આરાધનાની અનુમોદનાર્થે).
પં. વિશ્વકલ્યાણ વિ.મ.ની પ્રેરણાથી.

૬૩. ૐકારસૂરીશ્વરજી આરાધના ભવન, સુરત. (પ્રેરક : પૂ. આ.શ્રી ગુણરત્નસૂરિજીના શિષ્ય મુનિશ્રી જિનેશરત્ન વિ.મ.).

૬૪. શ્રી ગોડી પાર્શ્વનાથ જૈન શ્વે. મૂ. પૂ. તપ. સંઘ
નાયડુ કોલોની, ઘાટકોપર (ઈસ્ટ), મુંબઈ.

૬૫. શ્રી આદીશ્વર શ્વે. મૂ.પૂ. જૈન સંઘ, ગોરેગામ, મુંબઈ.

૬૬. શ્રી આદીશ્વર જૈન શ્વે. ટ્રસ્ટ, સાલેમ.
પ્રેરક પૂ. ગચ્છાધિપતિશ્રી જયઘોષસૂરિજી મ.

૬૭. શ્રી ગોવાલિયા ટેંક જૈન સંઘ, મુંબઈ.

શ્રી જિનશાસન આરાધના ટ્રસ્ટ-મુંબઈ
દ્વારા પ્રકાશિત થયેલા ગ્રંથોની સૂચિ

૧ જીવવિચાર પ્રકરણ સટીક, દંડક પ્રકરણ સટીક, કાયસ્થિતિ સ્તોત્રાભિધાન સટીક
૨ ન્યાયસંગ્રહ સટીક
૩ ધર્મસંગ્રહ સટીક ભાગ-૧
૪ ધર્મસંગ્રહ સટીક ભાગ-૨
૫ ધર્મસંગ્રહ સટીક ભાગ-૩
૬ જીવસમાસ ટીકાનુવાદ
૭ જંબુદ્વીપ સંગ્રહણી સટીક
૮ સ્યાદ્વાદમંજરી સાનુવાદ
૯ સંક્ષેપ સમરાદિત્ય કેવળી ચરિત્ર
૧૦ બૃહત્ ક્ષેત્રસમાસ સટીક
૧૧ બૃહત્ સંગ્રહણી સટીક
૧૨ બૃહત્ સંગ્રહણી સટીક
૧૩ ચૈઇયવંદણ મહાભાસ
૧૪ નયોપદેશ સટીક
૧૫ પુષ્પમાળા (મૂળ અનુવાદ)
૧૬ મહાવીરચરિયં
૧૭ મલ્લિનાથ ચરિત્ર
૧૮ વાસુપૂજ્ય ચરિત્ર
૧૯ શાંતસુધારસ સટીક
૨૦ શ્રાદ્ધગુણ વિવરણ
૨૧ તત્ત્વજ્ઞાન તરંગિણી
૨૨ ત્રિષષ્ઠિશલાકાપુરુષ ચરિત્ર પર્વ ૩/૪
૨૩ ત્રિષષ્ઠિશલાકાપુરુષ ચરિત્ર પર્વ ૫/૬
૨૪ અષ્ટસહસ્રી તાત્પર્ય વિવરણ
૨૫ મુક્તિપ્રબોધ
૨૬ વિશેષણવતીવંદન પ્રતિક્રમણ અવચૂરી
૨૭ પ્રવ્રજ્યા વિધાનકુલક સટીક
૨૮ ચૈત્યવંદન ભાષ્ય (સંઘાચાર ભાષ્ય સટીક)
૨૯ વર્ધમાનદેશના પદ્ય (ભાગ-૧ છાયા સાથે)
૩૦ વર્ધમાનદેશના પદ્ય (ભાગ-૨ છાયા સાથે)
૩૧ વ્યવહાર શુદ્ધિ પ્રકાશ
૩૨ અનેકાન્ત વ્યવસ્થા પ્રકરણ
૩૩ પ્રકરણ સંદોહ
૩૪ ઉત્પાદાદિસિદ્ધિ પ્રકરણ સટીક
૩૫ અભિધાન વ્યુત્પત્તિ પ્રક્રિયા કોશ ભાગ-૧ (ચિંતામણિ ટીકાનું અકારાદિ ક્રમે સંકલન)
૩૬ અભિધાન વ્યુત્પત્તિ પ્રક્રિયા કોશ ભાગ-૨ (ચિંતામણિ ટીકાનું અકારાદિ ક્રમે સંકલન)

૩૭ પ્રશ્નોત્તર રત્નાકર (સેનપ્રશ્ન)
૩૮ સંબોધસપ્તતિ સટીક
૩૯ પંચવસ્તુ સટીક
૪૦ શ્રી જંબુસ્વામી ચરિત્ર
૪૧ શ્રી સમ્યક્ત્વ સપ્તતિ સટીક
૪૨ ગુરુ ગુણ ષટ્ત્રિંશત્ષટ્ત્રિંશિકા સટીક
૪૩ સ્તોત્ર રત્નાકર
૪૪ ઉપદેશ સપ્તતિ
૪૫ ઉપદેશ રત્નાકર
૪૬ શ્રી વિમલનાથ ચરિત્ર
૪૭ સુબોધા સમાચારિ
૪૮ શાંતિનાથ ચરિત્ર ગ્રંથ
૪૯ નવપદ પ્રકરણ સટીક ભાગ-૧
૫૦ નવપદ પ્રકરણ સટીક ભાગ-૨
૫૧ નવપદ પ્રકરણ લઘુ વૃતિ
૫૨ શ્રાદ્ધ પ્રકરણ વૃત્તિ
૫૩ શ્રી પાર્શ્વનાથ ચરિત્ર
૫૪ વિજયપ્રશસ્તિ ભાષ્ય (વિજયસેનસૂરિ ચરિત્ર)
૫૫ કુમારપાળ મહાકાવ્ય સટીક (પ્રાકૃતદ્વયાશ્રય)
૫૬ ધર્મરત્ન પ્રકરણ સટીક ભાગ-૧
૫૭ ધર્મરત્ન પ્રકરણ સટીક ભાગ-૨
૫૮ ઉપદેશ પદ ભાગ-૧
૫૯ ઉપદેશ પદ ભાગ-૨
૬૦ શ્રાદ્ધદિનકૃત્ય ભાગ-૧
૬૧ શ્રાદ્ધદિનકૃત્ય ભાગ-૨
૬૨ પાર્શ્વનાથ ચરિત્ર
૬૩ વિચાર રત્નાકર
૬૪ ઉપદેશ સપ્તતિકા
૬૫ દેવેન્દ્ર નરકેન્દ્ર પ્રકરણ
૬૬ પુષ્પ પ્રકરણ માળા
૬૭ ગુર્વાવલી
૬૮ પુષ્પ પ્રકરણ
૬૯ નેમિનાથ મહાકાવ્ય
૭૦ પાંડવ ચરિત્ર ભાગ-૧
૭૧ પાંડવ ચરિત્ર ભાગ-૨
૭૨ પાર્શ્વનાથ ચરિત્ર ગદ્ય
૭૩ હીર પ્રશ્નોત્તરાણિ
૭૪ ધર્મવિધિ પ્રકરણ
૭૫ સુપાર્શ્વનાથ ચરિત્ર ભાગ-૧
૭૬ દેવધર્મ પરીક્ષાદિ ગ્રંથો
૭૭ સુપાર્શ્વનાથ ચરિત્ર ભાગ-૨-૩
૭૮ પ્રકરણત્રયી
૭૯ સમતાશતક (સાનુવાદ)
૮૦ ઉપદેશમાળા-પુષ્પમાળા
૮૧ પૃથ્વીચંદ્ર ચરિત્ર
૮૨ ઉપદેશમાળા
૮૩ પાઇયલચ્છી નામમાલા
૮૪ દોઢસો સવાસો ગાથાના સ્તવનો
૮૫ દ્વિવર્ણ રત્નમાલા
૮૬ શાલિભદ્ર ચરિત્ર
૮૭ અનંતનાથ ચરિત્ર પૂજાષ્ટક
૮૮ કર્મગ્રંથ અવચૂરી
૮૯ ઉપમિતિ ભવ પ્રપંચ કથા ભા. ૧

૯૦ ધર્મબિન્દુ સટીક
૯૧ પ્રશમરતિ સટીક
૯૨ માર્ગણાદ્વાર વિવરણ
૯૩ કર્મસિદ્ધિ
૯૪ જંબુસ્વામી ચરિત્ર અનુવાદ
૯૫ ચૈત્યવંદન ભાષ્ય સાનુવાદ
૯૬ ગુણવર્મા ચરિત્ર સાનુવાદ
૯૭ સવાસો દોઢસો ગાથા સ્તવનો
૯૮ દ્વાત્રિંશત્દ્વાત્રિંશિકા
૯૯ કથાકોષ
૧૦૦ જૈન તીર્થ દર્શન
૧૦૧ જૈન કથા સંગ્રહ ભાગ-૧
૧૦૨ જૈન કથા સંગ્રહ ભાગ-૨
૧૦૩ જૈન કથા સંગ્રહ ભાગ-૩
૧૦૪ રયણસેહર નિવકહા સટીક
૧૦૫ આરંભસિદ્ધિ
૧૦૬ નેમિનાથ ચરિત્ર ગદ્ય
૧૦૭ મોહોન્મૂલનમ્ (વાદસ્થાનમ્)
૧૦૮ શ્રી ભુવનભાનુ કેવળી ચરિત્ર (અનુવાદ)
૧૦૯ શ્રી ચંદ્રપ્રભસ્વામી ચરિત્ર (અનુવાદ)
૧૧૦ આપણા જ્ઞાનમંદિરો
૧૧૧ પ્રમાલક્ષણ
૧૧૨ આચાર પ્રદીપ
૧૧૩ વિવિધ પ્રશ્નોત્તર
૧૧૪ આચારોપદેશ અનુવાદ
૧૧૫ પટ્ટાવલી સમુચ્ચય ભાગ-૧
૧૧૬ પટ્ટાવલી સમુચ્ચય ભાગ-૨
૧૧૭ રત્નાકરાવતારિકા અનુવાદ ભાગ-૧
૧૧૮ રત્નાકરાવતારિકા અનુવાદ ભાગ-૨
૧૧૯ ચૈત્યવંદન ચોવીસી તથા પ્રશ્નોત્તર ચિંતામણી
૧૨૦ દાન પ્રકાશ (અનુવાદ)
૧૨૧ કલ્યાણ મંદિર લઘુશાંતિ સટીક
૧૨૨ ઉપદેશ સપ્તતિકા (ટીકાનુવાદ) પુસ્તક
૧૨૩ પ્રતિક્રમણ હેતુ (પુસ્તક)
૧૨૪ જૈન કુમારસંભવ મહાકાવ્ય
૧૨૫ દેવચંદ્ર સ્તનાવલિ
૧૨૬ આનંદકાવ્ય મહોદધિ ભાગ-૧
૧૨૭ શ્રી પર્યંત આરાધના સૂત્ર (અવચૂરી અનુવાદ સાથે)
૧૨૮ જિનવાણી (તુલનાત્મકદર્શન વિચાર)
૧૨૯ પ્રશ્નોત્તર પ્રદીપ ગ્રંથ
૧૩૦ પ્રાચીન કોણ ? શ્વેતામ્બર કે દિગમ્બર (ગુજરાતી)
૧૩૧ જંબૂદ્વીપ સમાસ (અનુવાદ)
૧૩૨ સુમતિ ચરિત્ર (અનુવાદ)
૧૩૩ તત્ત્વામૃત (અનુવાદ)
૧૩૪ ત્રિષષ્ઠિશલાકા પુરુષ ચરિત્ર પર્વ-૧
૧૩૫ ત્રિષષ્ઠિશલાકા પુરુષ ચરિત્ર પર્વ-૨
૧૩૬ જૈન કથા સંગ્રહ ભાગ-૪ (પ્રતાકાર સંસ્કૃત)

૧૩૭ જૈન કથા સંગ્રહ ભાગ-૫ (પ્રતાકાર સંસ્કૃત)
૧૩૮ જૈન કથા સંગ્રહ ભાગ-૬ (પ્રતાકાર સંસ્કૃત)
૧૩૯ જૈન ધર્મ ભક્તિ કંચનમાળા (સાનુવાદ) ભાગ-૧
૧૪૦ જૈન ધર્મ ભક્તિ કંચનમાળા (સાનુવાદ) ભાગ-૨
૧૪૧ શ્રીમોક્ષપદ સોપાન (ચૌદ ગુણસ્થાનકનું સ્વરૂપ)
૧૪૨ રત્નશેખર રત્નવતી કથા (પર્વતિથિ માહાત્મ્ય પર)
૧૪૩ ષષ્ઠિશતકમ્ (સાનુવાદ)
૧૪૪ નમસ્કાર મહામંત્ર (નિબંધ)
૧૪૫ જૈન ગોત્ર સંગ્રહ (પ્રાચીન જૈન ઇતિહાસ સહિત)
૧૪૬ નયમાર્ગદર્શન યાને સાતનયનું સ્વરૂપ
૧૪૭ મહોપાધ્યાયશ્રી વીરવિજયજી મહારાજા ચરિત્ર
૧૪૮ મુક્તિ માર્ગદર્શન યાને ધર્મપ્રાપ્તિના હેતુઓ
૧૪૯ ચેતોદૂતમ્
૧૫૦ મૂર્તિમંડન પ્રશ્નોત્તર
૧૫૧ પિંડવિશુદ્ધિ અનુવાદ
૧૫૨ નંદિસૂત્ર (મૂળ)
૧૫૩ નંદિસૂત્ર સટીક (બીજી આવૃત્તિ)
૧૫૪ નંદિસૂત્ર ચૂર્ણિ સટીક
૧૫૫ અનુયોગ દ્વાર સટીક
૧૫૬ દશવૈકાલિક સટીક
૧૫૭ દશવૈકાલિક સટીક
૧૫૮ ઓઘનિર્યુક્તિ સટીક
૧૫૯ પિંડનિર્યુક્તિ સટીક
૧૬૦ આવશ્યક સૂત્રની ટીકા ભાગ-૧
૧૬૧ આવશ્યક સૂત્રની ટીકા ભાગ-૨
૧૬૨ આવશ્યક સૂત્રની ટીકા ભાગ-૩
૧૬૩ આવશ્યક સૂત્રની ટીકા ભાગ-૪
૧૬૪ આવશ્યક સૂત્રની ટીકા ભાગ-૧
૧૬૫ આવશ્યક સૂત્રની ટીકા ભાગ-૨
૧૬૬ આવશ્યક સૂત્રની ટીકા ભાગ-૩
૧૬૭ આવશ્યક સૂત્રની દીપિકા ભાગ-૧
૧૬૮ આવશ્યક સૂત્રની દીપિકા ભાગ-૨
૧૬૯ આવશ્યક સૂત્રની દીપિકા ભાગ-૩
૧૭૦ ઉત્તરાધ્યયન સટીક ભાગ-૧
૧૭૧ ઉત્તરાધ્યયન સટીક ભાગ-૨
૧૭૨ ઉત્તરાધ્યયન સટીક ભાગ-૩
૧૭૩ જંબુદ્વીપ પ્રજ્ઞપ્તિ ભાગ-૧
૧૭૪ જંબુદ્વીપ પ્રજ્ઞપ્તિ ભાગ-૨
૧૭૫ જીવાજીવાભિગમ સૂત્ર ભાગ-૧
૧૭૬ જીવાજીવાભિગમ સૂત્ર ભાગ-૨
૧૭૭ રાજપ્રશ્નીય
૧૭૮ આચારાંગ દીપિકા

૧૭૯ ભગવતી સૂત્ર ભાગ-૧
૧૮૦ ભગવતી સૂત્ર ભાગ-૨
૧૮૧ ભગવતી સૂત્ર ભાગ-૩
૧૮૨ પન્નવણા સૂત્ર સટીક ભાગ-૧
૧૮૩ પન્નવણા સૂત્ર સટીક ભાગ-૨
૧૮૪ ઋષિભાષિતસૂત્ર
૧૮૫ હરિભદ્રીય આવશ્યક ટીપ્પણક
૧૮૬ સૂર્યપ્રજ્ઞપ્તિ સટીક
૧૮૭ આચારાંગ દીપિકા ભાગ-૧
૧૮૮ સૂત્રકૃતાંગ દીપિકા
૧૮૯ ઠાણાંગ સટીક ભાગ-૧
૧૯૦ ઠાણાંગ સટીક ભાગ-૨
૧૯૧ અનુયોગદ્વાર મૂળ
૧૯૨ સમવાયાંગ સટીક
૧૯૩ આચારાંગ દીપિકા ભાગ-૨
૧૯૪ સૂત્રકૃતાંગ સટીક ભાગ-૧
૧૯૫ સૂત્રકૃતાંગ સટીક ભાગ-૨
૧૯૬ ભગવતી સૂત્ર
૧૯૭ કલ્પસૂત્ર પ્રદીપિકા
૧૯૮ કલ્પસૂત્ર કૌમુદિ
૧૯૯ આનંદ કાવ્ય મહોદધિ ભાગ-૩
૨૦૦ શ્રી શ્રુતજ્ઞાન અમીધારા
૨૦૧ ઉત્તરાધ્યયન સૂત્રમૂળ
૨૦૨ ઉપધાન વિધિ પ્રેરક વિધિ
૨૦૩ હીરસ્વાધ્યાય ભાગ-૧
૨૦૪ હીરસ્વાધ્યાય ભાગ-૨
૨૦૫ ચૈત્યવંદનાદિ ભાષ્યત્રયી (વિવેચન)
૨૦૬ ભોજપ્રબંધ
૨૦૭ શ્રી વસ્તુપાલ ચરિત્ર (ભાષાંતર)
૨૦૮ શ્રી યોગબિંદુ સટીક
૨૦૯ ગુરુ ગુણ રત્નાકર કાવ્યમ્
૨૧૦ જગદ્‌ગુરુ કાવ્યમ્
૨૧૧ યોગદૃષ્ટિસમુચ્ચય (અનુવાદ)
૨૧૨ જૈન જ્યોતિર્ગ્રંથ સંગ્રહ
૨૧૩ પ્રમાણ પરિભાષા
૨૧૪ પ્રમેય રત્નકોષ
૨૧૫ જૈન સ્તોત્ર સંગ્રહ ભાગ-૨
૨૧૬ શ્રી યોગદૃષ્ટિસમુચ્ચય (ભાવાનુવાદ)
૨૧૭ નવસ્મરણ (ઈંગ્લીશ સાર્થ અનુવાદ)
૨૧૮ આઠ દૃષ્ટિની સજ્ઝાય
૨૧૯ આગમસાર (દેવચંદ્રજી)
૨૨૦ નયચક્રસાર (દેવચંદ્રજી)
૨૨૧ ગુરુ ગુણષટ્‌ત્રિંશિકા (દેવચંદ્રજી)
૨૨૨ પંચકર્મગ્રંથ (દેવચંદ્રજી)
૨૨૩ વિચાર સાર (દેવચંદ્રજી)
૨૨૪ શ્રી પયુષણ પર્વાદિક પર્વોની કથાઓ
૨૨૫ વિમળ મંત્રીનો રાસ
૨૨૬ બૃહત્ સંગ્રહણી અંતર્ગત યંત્રોનો સંગ્રહ
૨૨૭ દમયંતી સંગ્રહ
૨૨૮ બૃહત્સંગ્રહણી યંત્ર
૨૨૯ જૈન સ્તોત્ર સંગ્રહ
૨૩૦ યશોધર ચરિત્ર

૨૩૧ ચંદ્રવીરશુભાદિ કથા ચતુષ્ટયમ્
૨૩૨ વિજયાનંદ અભ્યુદયમ્ મહાકાવ્ય
૨૩૩ જૈનધર્મવરસ્તોત્ર-ગોધૂલિકાર્થ-સભાચમત્કારેતિ
૨૩૪ અનેકાર્થ રત્નમંજૂષા
૨૩૫ સિરિપાસનાહચરિયં
૨૩૬ સમ્યક્ત્વ કૌમુદી (ભાષાંતર)
૨૩૭ વિમલનાથ ચરિત્ર (અનુવાદ)
૨૩૮ જૈન કથારત્નકોષ ભાગ-૧ (અનુવાદ)
૨૩૯ જૈન કથારત્નકોષ ભાગ-૨
૨૪૦ જૈન કથારત્નકોષ ભાગ-૩
૨૪૧ શત્રુંજય તીર્થોદ્ધાર (અનુવાદ)
૨૪૨ જૈન સ્તોત્ર તથા સ્તવનસંગ્રહ સાર્થ
૨૪૩ વસ્તુપાલ ચરિત્ર
૨૪૪ સિદ્ધપ્રાભૃત સટીક
૨૪૫ સૂક્તમુક્તાવલી
૨૪૬ નલાયનમ્ (કુબેરપુરાણમ્)
૨૪૭ બંધહેતુદયત્રિભંગી પ્રકરણાદિ
૨૪૮ ધર્મપરીક્ષા
૨૪૯ આગમીય સૂક્તાવલ્યાદિ
૨૫૦ જૈન તત્ત્વસાર સટીક
૨૫૧ ન્યાયસિદ્ધાંતમુક્તાવલી
૨૫૨ હૈમધાતુપાઠ
૨૫૩ નવીન પૂજા સંગ્રહ
૨૫૪ સિદ્ધચક્રારાધન વિધિ વિ. સંગ્રહ
૨૫૫ નાયાધમ્મકહાઓ (પુસ્તક)
૨૫૬ પ્રમાણનયતત્વાલોકાલંકાર (સાવ.)
૨૫૭ તત્ત્વાર્થધિગમસૂત્ર (ગુજરાતી)
૨૫૮ વિચાર સપ્તતિકા સટીક -વિચારપંચાશિકા સટીક
૨૫૯ અધ્યાત્મસાર સટીક
૨૬૦ લીલાવતી ગણિત
૨૬૧ સંક્રમકરણ ભા. ૧ પુસ્તક
૨૬૨ સંક્રમકરણ ભાગ ૨ પુસ્તક
૨૬૩ ભક્તામરસ્તોત્રમ્ પ્રત
૨૬૪ ષટ્સ્થાનકપ્રકરણ પ્રત
૨૬૫ સુવ્રતઋષિકથાનક- સંવેગદ્રુમકંદલી
૨૬૬ શ્રી શત્રુંજય મહાતીર્થોદ્ધાર (મૂળ)
૨૬૭ જીવાનુશાસનમ્
૨૬૮ પ્રબંધ ચિંતામણી (હિન્દી ભાષાંતર)
૨૬૯ દેવચંદ્ર ભાગ-૨
૨૭૦ ભાનુચંદ્રગણિત
૨૭૧ દિગ્વિજય મહાકાવ્ય
૨૭૨ વિજ્ઞપ્તિ લેખ સંગ્રહ
૨૭૩ આબૂ ભાગ-૧
૨૭૪ આબૂ ભાગ-૨
૨૭૫ આબૂ ભાગ-૩
૨૭૬ આબૂ ભાગ-૪
૨૭૭ આબૂ ભાગ-૫
૨૭૮ ન્યાયાપ્રકાશ
૨૭૯ શોભનસ્તુતિ
૨૮૦ ઋષભપંચાશિકા
૨૮૧ કુમારવિહારશતકમ્

द्वितीयपर्वणि विषयानुक्रमः ।

श्रीअजितजिन–सगरचक्रिचरितम् ।

क्र.	विषयः ।	पृष्ठ क्र.
	प्रथमः सर्गः ।	
१	पूर्वभवचरिते प्रथमो विमलवाहनभवः ।	१–२२
	द्वितीयः सर्गः ।	
२	अजितप्रभोर्गर्भावतरणं विजयादेव्याः स्वप्नदर्शनं च ।	२३–२७
३	चतुर्दश स्वप्नाः ।	२८
४	स्वप्नलक्षणपाठकाः ।	२९–३०
५	अजितप्रभोर्जन्म ।	३१
६	दिक्कुमारिकाकृतो जिनजन्मोत्सवः ।	३२–३९
७	सौधर्मेन्द्रागमनम् ।	४०–४६
८	अजितजिनजन्मोत्सवार्थं चतुःषष्टेरिन्द्राणामागमनम् ।	४७–५०
९	चतुःषष्टीन्द्रकृतजिनजन्मोत्सवः ।	५१–५८
१०	जितशत्रुराजविहितोऽजितजिन–सगरचक्रिजन्मोत्सवः ।	५९–६२
११	नामकरणम् ।	६३
	तृतीयः सर्गः ।	
१२	अजितजिनसगरचक्रिणोर्बाल्यलीला ।	६४
१३	सगरचक्रिणो विद्याभ्यासः ।	६५–६७

क्र.	विषयः।	पृष्ठ क्र.
१४	अजितजिनसगरचक्रिणोर्यौवनं पाणिग्रहणं च ।	६८
१५	अजितजिनराज्याभिषेकः तत्पितुर्दीक्षा च ।	६९–७०
१६	अजितप्रभो राज्यवैभवः ।	७१
१७	अजितजिनस्य दीक्षासंकल्पः ।	७२–७४
१८	सगरस्य राज्याभिषेकः ।	७५
१९	अजितजिनस्य वार्षिकं दानम् ।	७६
२०	अजितजिनप्रव्रज्यामहोत्सवः ।	७७–८१
२१	अजितप्रभोः प्रव्रज्या ।	८२–८३
२२	अजितप्रभोः प्रथमं पारणम् ।	८४
२३	अजितजिनस्योग्रविहारिता ।	८५–८७
२४	अजितप्रभोः केवलोत्पत्तिः देवेन्द्राणामागमनं च ।	८८
२५	समवसरणम् ।	८९
२६	भगवतो द्वादश पर्षदां च समवसरणान्तर्गमनम् ।	९०
२७	कर्मक्षयजास्तीर्थकृदतिशयाः ।	९१
२८	प्रभोर्वन्दनार्थं सगरस्य गमनम् ।	९२–९३
२९	अजितप्रभोर्देशना तत्र च चतुर्विधध्यानस्वरूपवर्णनम् ।	९४–११९
३०	गणभृतां स्थापना ।	१२०
३१	बलिः गणभृद्देशना च ।	१२१
३२	अजितजिनशासनाधिष्ठायकदेवदेव्यौ ।	१२२

क्र.	विषयः।	पृष्ठ क्र.
३३	द्विजन्मना सह भगवतः संकेतवार्त्ता ।	१२२
३४	सुलक्षणाशुद्धभट्टयोः कथानकम् ।	१२३–१२८
	चतुर्थः सर्गः ।	
३५	सगरस्य चक्ररत्नोत्पत्तिः तत्पूजा च ।	१२९–१३०
३६	सगरस्य दिग्विजयः ।	१३१–१४९
३७	सगरस्य स्त्रीरत्नप्राप्तिः ।	१५०–१५१
३८	सगरस्य विनीतायां प्रवेशः ।	१५२
३९	सगरस्य चक्रिपदाभिषेकः ।	१५३–१५४
	पञ्चमः सर्गः ।	
४०	पूर्णमेघसुलोचनयोः पूर्वभवसम्बन्धः ।	१५५
४१	मेघवाहनसहस्राक्षयोः पूर्वभवः ।	१५६
४२	राक्षसवंशः ।	१५७
४३	सगरपुत्राणां यौवनप्राप्तिः पराक्रमश्च ।	१५८
४४	सगरपुत्राणां देशदर्शनम् ।	१५९–१६०
४५	सगरपुत्रैरष्टापदगिरेर्दर्शनम् ।	१६१–१६३
४६	सगरपुत्रैरष्टापदगिरेः परिखाविधानम् ।	१६४–१६५
४७	सगरात्मजानां नागराजेन भस्मीकरणम् ।	१६६–१६७
	षष्ठः सर्गः ।	
४८	सैन्यविलापः अन्तःपरीपरिदेवनं च ।	१६८

क्र.	विषयः ।	पृष्ठ क्र.
४९	सामन्तादीनां शोचनम् ।	१६९
५०	अपरिचितेन द्विजेन स्वपुत्रमरणमिषेण सगरादीनां बोधनम् ।	१७०–१७९
५१	सगरस्य विलापः ।	१८०–१८२
५२	सगरप्रतिबोधाय सुबुद्धिमन्त्र्युक्तं तान्त्रिकोदाहरणम् ।	१८३–१९३
५३	सगरप्रतिबोधाय द्वितीयमन्त्र्युक्तमपरमिन्द्रजालिकोदाहरणम् ।	१९४–२०३
५४	सगरस्य भवनिर्वेदः ।	२०४
५५	गङ्गाप्रवाहस्खलनाय भगीरथस्य गमनम् ।	२०५–२०८
५६	सगरपुत्राणां भगीरथस्य च पूर्वभवाः ।	२०९
५७	सगरस्य प्रव्रज्या ।	२१०–२१२
५८	सगरस्य केवलज्ञानम् ।	२१३
५९	अजितस्वामिसगरयोर्निर्वाणम् ।	२१४
६०	अजितप्रभुनिर्वाणमहोत्सवः ।	२१५–२१६

तृतीयपर्वणि विषयानुक्रमः ।

क्र.	विषयः ।	पृष्ठ क्र.
	प्रथमः सर्गः ।	
	श्रीसम्भवजिनचरितम् ।	
१	सम्भवजिनस्य पूर्वभवः ।	१–८
२	सम्भवजिनस्य गर्भावतरणं चतुर्दश च स्वप्नाः ।	९

क्र.	विषयः।	पृष्ठ क्र.
३	दिक्कुमारिकृतो जन्मोत्सवः ।	१०–१२
४	चतुःषष्टीन्द्रकृतो जन्मोत्सवः ।	१३–१४
५	शक्रकृता स्तुतिः ।	१५
६	सम्भवजिनस्य नामस्थापनम् ।	१६
७	सम्भवजिनस्य यौवनम् ।	१७–१८
८	सम्भवजिनस्य दीक्षा ।	१९–२३
९	सम्भवजिनस्य केवलज्ञानम् ।	२४
१०	सम्भवजिनस्य देशना ।	२५–२८
११	सम्भवजिनस्य परिवारः ।	२९
१२	सम्भवजिनस्य निर्वाणम् ।	३०–३१
	द्वितीयः सर्गः ।	
	श्रीअभिनन्दनजिनचरितम् ।	
१३	अभिनन्दनजिनस्य पूर्वभवचरितम् ।	३२–३३
१४	अभिनन्दनजिनस्य गर्भावतरणम् ।	३४–३६
१५	अभिनन्दनजिनस्य जन्मोत्सवः ।	३७
१६	अभिनन्दनजिनस्य नामकरणम् ।	३८
१७	अभिनन्दनजिनस्य दीक्षा ।	३९
१८	अभिनन्दनजिनस्य केवलज्ञानम् ।	४०
१९	अभिनन्दनजिनस्य देशना ।	४१–४२

क्र.	विषयः।	पृष्ठ क्र.
२०	अभिनन्दनजिनस्य परिवारः ।	४३
२१	अभिनन्दनजिनस्य निर्वाणोत्सवः ।	४४
	तृतीयः सर्गः ।	
	श्रीसुमतिजिनचरितम् ।	
२२	सुमतिजिनस्य पूर्वभवचरितम् ।	४५–५३
२३	सुमतिजिनस्य गर्भावतरणम् ।	५४
२४	सुमतिजिनस्य मात्रा विवादभञ्जनम् ।	५५–५६
२५	सुमतिजिनस्य जन्म ।	५७
२६	सुमतिजिनस्य विवाहः ।	५८
२७	सुमतिजिनस्य दीक्षा केवलज्ञानं च ।	५९
२८	सुमतिजिनस्य देशना ।	६०–६१
२९	सुमतिजिनस्य परिवारः ।	६२
३०	सुमतिजिनस्य निर्वाणम्	६३
	चतुर्थः सर्गः ।	
	श्रीपद्मप्रभजिनचरितम् ।	
३१	पद्मप्रभजिनस्य पूर्वभवः ।	६४–६५
३२	पद्मप्रभजिनस्य गर्भावतरणं जन्म च ।	६६
३३	पद्मप्रभजिनस्य जन्मोत्सवः ।	६७

क्र.	विषयः ।	पृष्ठ क्र.
३४	पद्मप्रभजिनस्य दीक्षा केवलज्ञानं च ।	६८–६९
३५	पद्मप्रभजिनस्य देशना तत्र च चतुर्गतिस्वरूपवर्णनम् ।	७०–७६
३६	पद्मप्रभजिनस्य परिवारः निर्वाणं च ।	७७–७८
	पञ्चमः सर्गः ।	
	श्रीसुपार्श्वजिनचरितम् ।	
३७	सुपार्श्वजिनस्य पूर्वभवः ।	७९
३८	सुपार्श्वजिनस्य जन्म ।	८०–८२
३९	सुपार्श्वजिनस्य दीक्षा ।	८३
४०	सुपार्श्वजिनस्य केवलज्ञानम् ।	८४–८५
४१	सुपार्श्वजिनस्य देशना ।	८६
४२	सुपार्श्वजिनस्य परिवारः निर्वाणं च ।	८७–८८
	षष्ठः सर्गः ।	
	श्रीचन्द्रप्रभजिनचरितम् ।	
४३	चन्द्रप्रभजिनस्य पूर्वभवः ।	८९
४४	चन्द्रप्रभजिनस्य जन्म ।	९०–९२
४५	चन्द्रप्रभजिनस्य दीक्षा ।	९३
४६	चन्द्रप्रभजिनस्य केवलज्ञानम् ।	९४
४७	चन्द्रप्रभजिनस्य देशना ।	९५–९६

क्र.	विषयः ।	पृष्ठ क्र.
४८	चन्द्रप्रभजिनस्य परिवारः निर्वाणं च ।	९७
	सप्तमः सर्गः ।	
	श्रीसुविधिजिनचरितम् ।	
४९	सुविधिजिनस्य पूर्वभवः ।	९८
५०	सुविधिजिनस्य जन्म ।	९९–१०१
५१	सुविधिजिनस्य दीक्षा केवलज्ञानं च ।	१०२–१०३
५२	सुविधिजिनस्य देशना ।	१०४–१०७
५३	सुविधिजिनस्य परिवारः निर्वाणं च ।	१०८
५४	तीर्थोच्छेदः ।	१०९–११०
	अष्टमः सर्गः ।	
	श्रीशीतलजिनचरितम् ।	
५५	शीतलजिनस्य पूर्वभवः ।	१११
५६	शीतलजिनस्य जन्मादि ।	११२–११४
५७	शीतलजिनस्य दीक्षा ।	११५
५८	शीतलजिनस्य केवलज्ञानम् ।	११६
५९	शीतलजिनस्य देशना ।	११७–११८
६०	शीतलजिनस्य परिवारः ।	११९
६१	शीतलजिनस्य निर्वाणम् ।	१२०

द्वितीयपर्वान्तर्गतानि सुभाषितानि ।

क्र.	सुभाषितम् ।	पृष्ठ क्र.
१	चिकित्स्यते हि निपुणैरङ्गोद्भवमपि व्रणम् ।	३
२	जन्मान्तरानुधावीनि कर्माणि ऋणवन्नृणाम् ।	५
३	स्वार्थभ्रंशो हि मूर्खता ।	५
४	निश्चिते कार्ये, नालसन्ति मनस्विनः ।	११
५	चक्षुष्मानपि किं कुर्यादन्धकारे प्रसृत्वरे ।	११
६	गुर्वाज्ञा हि कुलीनानां विचारमपि नाऽर्हति ।	१४
७	बालेऽपि हि सुते हन्त ! सिंही स्वपिति निर्भरम् ।	१४
८	गुर्वाज्ञाकरणं सर्वगुणेभ्यो ह्यतिरिच्यते ।	१४
९	तिष्ठन्त्येकत्र नर्षयः ।	१९
१०	महापुमांसो गर्भस्था अपि लोकोपकारिणः ।	३०
११	सर्वं हि शुभमेव स्याज्जन्मतोऽपि शुभात्मनाम् ।	३१
१२	देवतानां जन्मसिद्धाः खलु वैक्रियलब्धयः ।	३४
१३	जायते घृष्यमाणाद्धि दहनश्चन्दनादपि ।	३९
१४	निष्पद्यन्ते सुमनसां, मनसा हीष्टसिद्धयः ।	४४
१५	एकधाऽनेकधा च स्युः कामरुपा दिवौकसः ।	४६
१६	तापनीये ह्यलङ्कारे सुतरां द्योतते मणिः ।	५३

क्र.	सुभाषितम् ।	पृष्ठ क्र.
१७	सर्वसाधारणी वृष्टिर्वारिदस्योद्यतस्य हि ।	५९
१८	केसरिकिशोराणां पञ्जरे जात्ववस्थितिः ।	६४
१९	वयो गौणं महात्मनाम् ।	६४
२०	यथाव्याधि हि भेषजम् ।	६९
२१	विनयी हि लघुभ्राता, पुत्रादप्यतिरिच्यते ।	७०
२२	कोऽल्पहेतोर्बहु त्यजेत ?	७०
२३	राज्यादप्यतिसाम्राज्याच्चक्रवर्त्तिपदादपि । देवत्वादपि विदुषां, गुरुसेवा गरीयसी ॥	७०
२४	भावतोऽपि यतिर्यतिः ।	७०
२५	सतां ह्यलङ्घ्या गुर्वाज्ञा, मर्यादोदन्वतामिव ।	७०
२६	दासन्ति ह्यन्यमणयः, सर्वे चिन्तामणेः पुरः ।	७१
२७	पूज्यैरभक्तोऽपि शिशुः, शिष्यते न तु हीयते ।	७४
२८	गोपुच्छलग्नो हि तरेन्नदीं गोपालबालकः ।	७४
२९	बलवत् स्वाम्यवज्ञाभयं सताम् ।	८८
३०	आवश्यकविधिर्ह्यलङ्घ्यो महतामपि ।	९०
३१	न सर्वज्ञगिरोऽन्यथा ।	१२३
३२	निर्धनस्य सुभिक्षेऽपि दुर्भिक्षं परिपार्श्विकम् ।	१२३
३३	प्रायः प्रावृष ऊर्द्ध्वं न तिष्ठन्त्येकत्र संयताः ।	१२४
३४	धर्मे धर्मोपदेष्टारः साक्षिमात्रं शुभात्मनाम् ।	१२६
३५	स्वर्णीस्यातां सिद्धरसात् सीसकत्रपुणी अपि ।	१२६

क्र.	सुभाषितम् ।	पृष्ठ क्र.
३६	देवतीयन्ति यदस्त्राण्यस्त्रजीविनः ।	१२९
३७	पादचारेणोपस्थानं पूजातोऽप्यतिरिच्यते ।	१२९
३८	स्वाधिकारप्रमादित्वं भीतये ह्यधिकारिणाम् ।	१२९
३९	प्रयान्ति ह्युत्तमस्थाने भूषणान्यपि भूष्यताम् ।	१३१
४०	स्वामिदत्तमाहात्म्याः खलु सेवकाः ।	१३४
४१	भक्तेष्वीशा हि प्रतिपत्तिदाः ।	१३६
४२	महात्मनां महर्द्धीनामुत्सवा हि पदे पदे ।	१३८
४३	कृत्यं महान्तो न त्यजन्ति हि ।	१३९
४४	सेवनीयाश्चक्रिणो हि देवैरपि नरैरिव ।	१३९
४५	कृष्टाश्चैट्य इवाऽऽयान्ति, शक्त्या शक्तिमतां श्रियः ।	१४१
४६	प्रायस्तपोग्राह्या हि देवताः ।	१४१
४७	प्रणिपातावसानो हि कोपाटोपो महात्मनाम् ।	१४५
४८	नास्ति विदेशः कोऽपि दोष्मताम् ।	१४६
४९	तुष्यन्ति हि महीयांसः सेवामय्या गिराऽपि हि ।	१४७
५०	अनुत्सुकानां शक्तानां लीलापूर्वाः प्रवृत्तयः ।	१४९
५१	महात्मानः प्रणयिनां प्रणयं खण्डयन्ति न ।	१५३
५२	महत्सु याञ्चाऽन्यस्याऽपि न मुधा किं पुनस्तुकाम्।	१५९
५३	तज्ज्ञानामपि हि नृणां प्रमाणं भवितव्यता ।	१५९
५४	आत्मैव हि सुतत्वभाक् ।	१६०

क्र.	सुभाषितम् ।	पृष्ठ क्र.
५५	सामवागम्भः कोपाग्नेः शमनं सताम् ।	१६५
५६	नीयते यत्र तत्राऽम्भो गच्छत्यृजुपुमानिव ।	१६६
५७	लोके स्यादनुकम्पायै सागसामपि निग्रहः ।	१६७
५८	अभ्रादपि पतितानां, शरणं धरणी खलु ।	१६८
५९	पृथग्जाता अपि क्वाऽपि विपद्यन्ते सहैव हि ।	१७१
६०	बहवोऽपि विपद्यन्ते विपद्यन्तेऽल्पका अपि, सर्वेषामपि जीवानां यन्मृत्युः पारिपार्श्विकः ।	१७१
६१	कालो हि दुरतिक्रमः ।	१७७
६२	पितुर्मातुश्च तुल्यं हि दुःखं सुतवियोगजम् ।	१८०
६३	यत्राऽऽकृतिस्तत्र गुणा इत्यर्भा अप्यधीयते ।	१८३
६४	ज्ञानस्य प्रत्ययः फलम् ।	१८७
६५	न मायिनामृजूनां चाऽजर्यं शाश्वतवैरिवत् ।	१९४
६६	नारिपरिभवं सहन्ते पशवोऽपि न ।	१९५
६७	चन्दनास्पदमेको हि मलयः सानुमानिह ।	१९६
६८	विमृश्य हि विधातव्यमल्पीयोऽपि प्रयोजनम् ।	१९९
६९	नाऽलं दग्धुं कक्षमग्निर्विना वायुं ज्वलन्नपि ।	२०१
७०	न हि प्रमाणे प्रत्यक्षे प्रमाणान्तरकल्पना ।	२०३
७१	अदर्शिनपथं याति पयो ह्यन्धवदुत्पथे ।	२०५
७२	गुणप्रकर्षो विनयादशक्तस्याऽपि जायते ।	२०६
७३	निसर्गेण विनीतस्य शिक्षा सद्भित्तिचित्रवत् ।	२०६

क्र.	सुभाषितम् ।	पृष्ठ क्र.
७४	सोऽध्वा यो महदाश्रितः ।	२०८

तृतीयापर्वान्तर्गतानि सुभाषितानि ।

१	नदीवन्न नदीभर्तुरुत्सेकाय घनागमः ।	२
२	दुर्लङ्घ्या भवितव्यता ।	२
३	सरस्या हि सरोजानि विशिष्यन्ते शरत्क्षणे ।	१०
४	महतां पुण्यं पुण्यानुबन्धकम् ।	३२
५	प्रतिमायाः प्रभावोऽधिष्ठातृदेवोचितः खलु ।	४८
६	गृहवासो हि संसारतरोर्दोहदमुत्तमम् ।	५१
७	दैवस्य विषमा गतिः ।	५५
८	राज्ञा दृष्टः कुदृष्टो वा निर्णयो ह्यपुनर्भवः ।	५५
९	कोकिलायाः खल्वपत्यं काक्या पुष्टोऽपि कोकिलः ।	५७
१०	शिष्या गुरुणां कूपानामाहावा इव तत्क्रियाः ।	७६
११	अपि त्रिलोकनाथानां मान्यं हि पितृशासनम् ।	८३
१२	भगवन्तो हि कर्मच्छेदाय तत्पराः ।	८३
१३	निवृक्षे देशे क्रियते ह्येरण्डस्यापि वेदिका ।	१०९
१४	विहायसो महत्त्वे हि नोपमानं भवेत्परम् ।	११२

॥ अर्हम् ॥

कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविनिर्मितं

श्रीत्रिषष्टिशलाकापुरुषचरितम् ।



द्वितीयं पर्व



श्रीअजितस्वामि-सगरचक्रवर्त्तिचरितम् ।

प्रथमः सर्गः ।

जयन्त्यजितनाथस्य, जितशोणमणिश्रियः[1] । नम्रेन्द्रवदनादर्शाः, पादपद्मद्वयीनखाः ॥ १ ॥
कर्माहिपाशनिर्णाशजाङ्गुलीमन्त्रसन्निभम्[2] । अजितस्वामिदेवस्य, चरितं प्रस्तवीम्यतः ॥ २ ॥
नाभीसनाभेर्द्वीपानां[3], जम्बूद्वीपस्य मध्यगम् । दुःषमसुषमाप्रायं, विदेहक्षेत्रमस्ति तत् ॥ ३ ॥
अस्ति तत्र महानद्याः, सीताया दक्षिणे तटे । विजयो वत्स इत्याख्याविख्यातो विपुलर्द्धिकः ॥ ४ ॥
एकदेश इव स्वर्गप्रदेशस्य भुवं गतः । अभ्राजिष्ट स बिभ्राणो, रामणीयकमद्भुतम् ॥ ५ ॥
तत्रोपर्युपरि ग्रामं, ग्रामैरथ पुरं पुरैः । निवसद्भिर्यदि परं, नभस्येव हि शून्यता ॥ ६ ॥
सम्पदा निर्विशेषाणां, परस्परमतुच्छया । पूर्ग्रामाणां तत्र भेदो, राजाश्रयकृतो यदि ॥ ७ ॥
स्वच्छस्वादुजलास्तत्र, महावाप्यः पदे पदे । क्षीराम्भोनिधिनिर्गच्छत्सिराभिरिव पूरिताः ॥ ८ ॥
तत्र चाऽलब्धमध्यानि, स्वच्छानि च महान्ति च । स्थाने स्थाने तडागानि, मनांसीव महात्मनाम् ॥ ९ ॥
तत्राऽऽर्द्रवल्लीबहला, आरामाश्च पदे पदे । तन्वन्ति मेदिनीदेव्याश्चित्रपत्रलताभ्रमम् ॥ १० ॥
ग्रामे ग्रामे चेक्षुवाटास्तत्र[4] पान्थतृषाच्छिदः । महेक्षुभिः शोभमाना, रसाम्भस्कुम्भसन्निभैः ॥ ११ ॥

१ पद्मरागमणिः । २ कर्मनागपाशनाशे जाङ्गुलीमन्त्रसमम् । ३ नाभिसदृशस्य । ४ इक्षुक्षेत्राणि ।

तत्राऽनुगोकुलं गावः, प्लावयन्ति महीतलम् । क्षीरनद्य इवाऽङ्गिन्यः, प्रक्षरत्क्षीरनिर्झराः ॥ १२ ॥
तत्राऽऽसीनैः पथि पथि, पान्थद्वन्द्वैः फलद्रुमाः । विराजन्ते युगलिभिः, कुरुकल्पद्रुमा इव ॥ १३ ॥
तस्मिन्नवन्यास्तिलक[१]सनाभिः सम्पदां निधिः । यथार्थनामा नगरी, सुसीमेत्यस्ति विश्रुता ॥ १४ ॥
असाधारणया ऋद्ध्या, पुरीरत्नं चकास्ति तत् । आविर्भूतं भुवो मध्यात्, किञ्चित् पुरमिवाऽऽसुर[२]म् ॥ १५॥
तत्रैकाकिन्योऽपि नार्यः, सञ्चरन्त्यो गृहान्तरे । सत्सखीका इवाऽऽभान्ति, सङ्क्रान्ता रत्नभित्तिषु ॥ १६ ॥
परिखाम्भोधिपरिधिश्चित्ररत्नशिलामयः । जगत्यां जगतीवोच्चैः, प्राकारस्तत्र शोभते ॥ १७ ॥
सञ्चरद्भिर्गजैस्तत्र, प्रक्षरन्मदवारिभिः । प्रशान्तपांसवो रथ्या, नित्यं वर्षाजलैरिव ॥ १८ ॥
नीर[३]ङ्गीषु कुलस्त्रीणां, कुमुदिन्युदरेष्विव । लभन्ते यत्र सूर्यो[४]स्रा, नाऽवकाशं मनागपि ॥ १९ ॥
राजन्ते तत्र चैत्येषु, चलद्ध्वजपटाञ्चलाः । मा गाश्चैत्योपरीत्यर्कं, निषेधन्त इवाऽसकृत् ॥ २० ॥
श्यामीकृतनभांस्यम्भःप्लुतभूमीनि भूरिशः । उद्यानानि महीलग्नमेघस[५]ध्यञ्चि तत्र च ॥ २१ ॥
स्वर्णरत्नमयास्तत्र, क्रीडाशैलाः सहस्रशः । आरामरम्यकट[६]का, मेरोरिव कुमारकाः ॥ २२ ॥
सा च धर्मार्थकामानां, युगपत् सुहृदामिव । क्रीडार्थमेकसङ्केतनिकेतनमिवोच्चकैः ॥ २३ ॥
भोगावत्यमरावत्योरधऊर्ध्वस्थयोः पुरोः । सौ[७]दर्येवाऽन्तरे जाता, सा स[८]ध्रीची महर्द्धिभिः ॥ २४ ॥
नगर्यामभवत् तस्यां, राजा विमलवाहनः । विमलात्माऽतिविमलैर्गुणोस्रैश्चन्द्रमा इव ॥ २५ ॥

१ तिलकसदृशः । २ असुरसम्बन्धि । ३ लज्जावस्त्रेषु । ४ सूर्यकिरणाः। ५ सदृशानि । ६ समो मध्यप्रदेशः । ७ भगिनीव । ८ तुल्या ।

प्रपुष्णन् लालयन् वृद्धिं, प्रापयन् लम्भयन् गुणैः । स प्रजाः पालयामास, स्वापत्यानीव वत्सलः ॥ २६॥
अन्यायं स निजस्याऽपि, न सेहे न्यायनिष्ठुरः । चिकित्स्यते हि निपुणैरङ्गोद्भवमपि व्रणम् ॥ २७ ॥
लीलयैव महौजस्कः, स विश्वगवनीभुजाम् । शिरांसि नमयामास, समीर इव भूरुहाम् ॥ २८ ॥
त्रिवर्गं पालयामास, परस्परमबाधितम् । नानाविधं प्राणिगणं, महात्मेव तपोधनः ॥ २९ ॥
औदार्य-धैर्य-गाम्भीर्य-क्षान्तिप्रभृतयो गुणाः । तस्याऽन्योऽन्यमभूष्यन्तोपवनस्येव पादपाः ॥ ३० ॥
प्रसर्पन्तो गुणास्तस्य, सौभाग्यैकधुरन्धराः । कस्य न ह्यलगन् कण्ठे, चिरायातवयस्यवत् ? ॥ ३१ ॥
पर्वतारण्यदुर्गादिदेशेष्वपि महौजसः । सदागतेरिव गतिः, शासनं तस्य नाऽस्खलत् ॥ ३२ ॥
आक्रान्ताशेषदिक्कस्य, प्रसरच्चण्डतेजसः । लुलुठुर्भूभृतां मूर्ध्नि, पादास्तस्य रवेरिव ॥ ३३ ॥
सर्वज्ञो भगवान् स्वामि, यथा तस्य महामतेः । भूभुजामपि सर्वेषां, स एवैकस्तथाऽभवत् ॥ ३४ ॥
विसूत्रितामित्रबलः, सुत्रामेवैकविक्रमः । साधुभ्य एव स शिरो, नमयामास बाल्यतः ॥ ३५ ॥
यथा तस्याऽतुला शक्तिर्बाह्यानां द्विषतां जये । आन्तराणामपि तथा, बभूवैकविवेकिनः ॥ ३६ ॥
दुर्दमं दमयामास, बलादुत्पथगत्वरम् । यथेभ-वाजिप्रभृति, स इन्द्रियगणं तथा ॥ ३७ ॥
स ददौ दानशीलोऽपि, पात्र एव यथाविधि । पात्रे बहुफलं तद्धि, शुक्तावम्भोदवारिवत् ॥ ३८ ॥
विदधानः परपुरप्रवेशमिव सर्वतः । प्रजाः प्रवर्त्तयामास, धर्म्येऽध्वनि स धर्मवित् ॥ ३९ ॥
चरित्रेण पवित्रेण, सोऽवासयदिदं जगत् । मलयोर्वीं परिमलेनेव चन्दनपादपः ॥ ४० ॥

१ सर्वत्र । २ पवनस्य । ३ इन्द्रः । ४ क्रोधादीनाम् । ५ परकायप्रवेशमिव ।

द्विड्[1]जयादातुरत्राणादर्थिसम्पूरणादपि । युद्धवीरो दयावीरस्त्यागवीरश्च सोऽभवत् ॥ ४१ ॥
स एवं राजधर्मस्थः, स्थिरधीरप्रमद्वरः[2] । चिरं ररक्ष वसुधां, सुधामिव फणीश्वरः ॥ ४२ ॥
कृत्याकृत्यविदस्तस्य, सारासारं विविञ्चतः । अन्येद्युरेवमुत्पेदे, भववैराग्यवासना ॥ ४३ ॥
योनिलक्षमहावर्त्तनिपातक्लेशभीषणः । पारावार[3] इवाऽपारः, संसारो धिगसावहो ! ॥ ४४ ॥
इहेन्द्रजालवत् स्वप्नजालवच्च भवे हहा ! । क्षणाद् दृष्टैः क्षणान्नष्टैरर्थैर्मुह्यन्ति जन्तवः ॥ ४५ ॥
यौवनं पवनोद्धूतपताकाञ्चलचञ्चलम् । आयुः कुशाग्रविश्रान्तजलबिन्दुचलाचलम् ॥ ४६ ॥
अमुष्याऽप्यायुषो गर्भवासे नरकवासवत् । अत्यन्तदुःखाद् गच्छन्ति, मासाः पल्योपमोपमाः ॥ ४७ ॥
अथ जातस्य बालत्वेऽप्यायुर्भागः कियानपि । परप्रणेयस्य[4] सतो, मुधाऽन्धस्येव गच्छति ॥ ४८ ॥
इन्द्रियार्थरसस्वादुरसास्वादेन यौवने । मत्तस्येव वृथा गच्छत्यायुरंशः कियानपि ॥ ४९ ॥
त्रिवर्गसाधनाशक्तवपुषश्च वपुष्मतः । आयुः शेषं वृथा याति, प्रसुप्तस्येव वार्द्धके ॥ ५० ॥
इत्थं विदन्नपि भवी, भवायैव विचेष्टते । कामं रोगीव रोगाय, विषयास्वादलम्पटः ॥ ५१ ॥
यौवने विषयेभ्योऽसौ, यथा ह्युत्तिष्ठते भवी । तथोत्तिष्ठेत चेन्मुक्त्यै, किं हि न्यूनं तदा भवेत् ? ॥ ५२ ॥
स्वयङ्कृतैः[5] कर्मपाशैः, स्वं भवी वेष्टयत्यहो! । स्वलालातन्तुसन्तत्या, जालकार इव कृमिः ॥ ५३ ॥
अम्भोधौ युगशमिलाप्रवेशन्यायतो भवे । कथञ्चिन्मानुषं जन्म, लभ्यते पुण्ययोगतः ॥ ५४ ॥
तत्राऽपि चाऽऽर्यदेशेषु, जन्मिनो जन्म जायते । महतश्च कुलस्याऽऽप्तिः, सेवा गुरुकुलस्य च ॥ ५५ ॥

१ अरिजयात् । २ परापेक्षारहितः । ३ समुद्रः । ४ पराधीनस्य । ५ आत्मानम् ।

इति प्राप्याऽपि सामग्रीं, शिवाय यतते न यः । सम्पन्नायां रसवत्यां, स तिष्ठति बुभुक्षितः ॥ ५६ ॥
उभयोरपि चोर्ध्वाऽधोगत्योः स्वायत्तयोरिह[1] । धावत्यधोमुखं प्रायो, जडधीर्जलवज्जनः ॥ ५७ ॥
समये साधयिष्यामि, स्वार्थमित्याशयं वहन् । प्राप्यतेऽर्वाग् यमदूतैररण्ये तस्करैरिव ॥ ५८ ॥
कृत्वाऽघमपि यान् पुष्येत्, तेषां[2]मुत्पश्यतामपि । अत्राणो रङ्कवज्जन्तुः, कृष्ट्वा कालेन नीयते ॥ ५९ ॥
ततश्च नीतो नरके, लभतेऽनन्तवेदनाः । जन्मान्तरानुधावीनि, कर्माणि ऋणवन्नृणाम् ॥ ६० ॥
माताऽसौ मे पिता चाऽसौ, भ्राताऽसावङ्ग[3]भूरसौ । इति स्वबुद्धिर्मिथ्यैव, शरीरमपि न स्वकम् ॥ ६१ ॥
एषां पृथक् पृथक् स्थानादेयुँषामिह[4] केवलम् । एकत्राऽवस्थितिः स्थाने, पक्षिणामिव पादपे ॥ ६२ ॥
ततोऽप्यन्यत्र गच्छन्ति, पृथक् स्थानेषु देहिन : । नक्तमेकत्र शयिताः, पान्था इव निशात्यये ॥ ६३ ॥
अरघट्टघटीन्यायेनैहिरेयँाहिरामिह । कुर्वतां देहिनां हन्त!, कः स्वकः? कः परोऽथवा? ॥ ६४ ॥
तत् त्यक्तव्यं कुटुम्बादि, त्यक्तव्यं पुरतोऽप्यदः । स्वार्थायैव यतितव्यं, स्वार्थभ्रंशो हि मूर्खता ॥ ६५ ॥
एकान्तानन्तसुखदः, स्वार्थो निर्[5]वाणलक्षणः[6] । मूलोत्तरगुणैः स स्यात्, प्रकाशोऽर्ककरैरिव ॥ ६६ ॥
इति चिन्तयतो राज्ञश्चिन्तामणिरिव स्वयम् । श्रीमानरिन्दमो नामोद्याने सूरिः समाययौ ॥ ६७ ॥
तदागमनवार्तां च, समाकर्ण्य महीपतिः । पीतपीयूषगण्डूष, इव हर्षं समासदत् ॥ ६८ ॥
तं वन्दितुमथाऽऽनन्दादचालीद्[7]चलापतिः । मायूरपत्रातपत्रैः, कुर्वन् सा[8]ब्दमिवाऽम्बरम् ॥ ६९ ॥

१ स्वाधीनयोः । २ बन्धूनाम् । ३ पुत्रः । ४ आगतानाम् । ५ गमनागमनम् । ६ मोक्षलक्षणः । ७ राजा । ८ मेघसहितम् ।

लक्ष्मीदेव्या निपतद्भ्यां, कटाक्षाभ्यामिवोच्चकैः । स्पृश्यमानश्चामराभ्यामुभयोरपि पार्श्वयोः ॥ ७० ॥
तुरङ्गैः स्वर्णसन्नाहैः, स्वर्णपक्षैः खगैरिव । वेगिभिर्विजितश्वासै, रुन्धानः ककुभोऽखिलाः ॥ ७१ ॥
अञ्जनाचलचूलाभिर्जङ्गमाभिरिवाऽभितः । महास्तम्बेरमैर्भाराऽन्यञ्चयन्नवनीतलम् ॥ ७२ ॥
स्वयं समन्तात् सामन्तैर्भक्तितः परिवारितः । निजस्वामिमनोज्ञानान्मनःपर्ययिकैरिव ॥ ७३ ॥
बन्दिकोलाहलस्पर्द्धादिव प्रसृमरैर्दिवि । नादैर्मङ्गलतूर्याणां, दूरात् पिशुनितागमः ॥ ७४ ॥
करेणुकाधिरुढाभिर्वारस्त्रीभिः सहस्त्रशः । शृङ्गाररसवापीभिः, परितः परिवारितः ॥ ७५ ॥
सिन्धुरस्कन्धमारुढश्छायाकुलनिकेतनम् । उद्यानं नन्दनप्रायं, प्राप तद् भूमिवासवः ॥ ७६ ॥

॥ सप्तभिः कुलकम् ॥

उत्तीर्य कुञ्जरस्कन्धादवनीपतिकुञ्जरः । प्रविवेश तदुद्यानं, सिंहो गिरिगुहामिव ॥ ७७ ॥
वज्रसंवर्मितमिवाऽभेद्यं मन्मथपत्रिणाम् । रागरोगागदङ्कारं, द्वेषद्विषिद्विषन्तपम् ॥ ७८ ॥
क्रोधानलनवाम्भोदं, मानद्रुममहागजम् । मायोरगीगरुत्मन्तं, लोभशैलमहाशनिम् ॥ ७९ ॥
मोहान्धकारतरणिं, तपस्तेजोऽनलारणिम् । क्षमासर्वस्वधरणिं, बोधिबीजाम्बुसारणिम् ॥ ८० ॥
आराममिव धर्मद्रोरात्मारामं महामुनिम् । आरादरिन्दमाचार्यमद्राक्षीत् तत्र पार्थिवः ॥ ८१ ॥

॥ चतुर्भिः कलापकम् ॥

१ महागजैः । २ नम्रीकुर्वन् । ३ मनःपर्यायज्ञानिभिः । ४ सूचितागमनः । ५ छायाव्याप्तस्थानम् । ६ कामबाणानाम् । ७ वैद्यम् । ८ सूर्यम् ।

कांश्चिदुत्कटिकासीनान्, कांश्चित् पद्मासनस्थितान् । गोदोहिकासनान् कांश्चित्, कांश्चिद् वीरासनासितान् ॥८२॥
वज्रासनजुषः कांश्चित्, कांश्चिद् भद्रासनस्थितान् । कांश्चिद् दण्डासनासीनान्, कांश्चिद् वल्गुलिकासनान् ॥८३॥
कांश्चित् क्रौञ्चनिषदनान्, कांश्चिद्धंसासनस्थितान् । पर्यङ्कासनिनः कांश्चित्, कांश्चिदुष्ट्रासनस्थितान् ॥ ८४ ॥
कांश्चित् ताक्ष्र्यासनान् कांश्चित्, कपालीकरणस्थितान् । आम्रकुब्जासनान् कांश्चित्, कांश्चन स्वस्तिकासनान्॥ ८५॥
दण्डपद्मासनान् कांश्चित्, कांश्चित् सोपाश्रयासनान् । कायोत्सर्गस्थितान् कांश्चित्, कांश्चन स्वस्तिकासनान्॥८६॥
निरपेक्षान् शरीरेऽपि, निर्व्यूढस्वप्रतिश्रैवान्[1] । विविधेषूपसर्गेषु, समरेषु भटानिव ॥ ८७ ॥
अन्तरङ्गानरीन् जिष्णून्, सहिष्णूंश्च परीषहान् । तपोध्यानैरलम्भूष्णून्, साधूनपि ददर्श सः ॥ ८८ ॥
उपेत्याऽरिन्दमाचार्यान्, ववन्दे मेदिनीपतिः । बिभ्राणः पुलकव्याजाद्, भक्तिमङ्कुरितामिव । ८९ ॥
सूरिवर्योऽप्युपमुखं, विन्यस्तमुखवस्त्रिकः । धर्मलाभाशिषमदात्, सर्वकल्याणमातरम् ॥ ९० ॥
नरेश्वरोऽपि विनयात्, तनुं सङ्कोच्य कूर्मवत् । अवग्रहभुवं मुक्त्वा, निषसाद कृताञ्जलिः ॥ ९१ ॥
शुश्राव देशनां तस्मादाचार्यादवनीपतिः । ऐकतानमनास्तीर्थकरादिव पौरन्दरः[2][3] ॥ ९२ ॥
राज्ञस्तद्भववैराग्यं, धर्मदेशनया तया । व्यशिष्यताऽवदातत्वं[4][5], शरदेव हिमद्युतेः[6] ॥ ९३ ॥
आचार्यपादान् वन्दित्वा, रचिताञ्जलिसम्पुटः । गिरा विनयगर्भिण्येत्यभ्यधाद् वसुधाधवः ॥ ९४ ॥
अनन्तदुःखरूपाणि, फलान्यनुभवन्नपि । संसारविषवृक्षस्य, जनो वैराग्यभाग् न हि ॥ ९५ ॥
कथं संसारवैराग्यं, जातं भगवतामिह? । आलम्बनविभावेन, भवितव्यं हि केनचित् ॥ ९६ ॥

१ निर्वाहितस्वप्रतिज्ञान् । २ एकाग्रचित्तः । ३ इन्द्रः । ४ विशेषं जातम् । ५ उज्ज्वलत्वम् । ६ चन्द्रस्य ।

दन्तांशुज्योत्स्नया व्योमतलं धवलयन्नथ । एवामाचार्यचन्द्रोऽपि, सप्रसादमभाषत ॥ ९७ ॥
संसारे धीमतां सर्वमपि वैराग्यकारणम् । विशेषतस्तु वैराग्यहेतुः कस्यापि कश्चन ॥ ९८ ॥
अहं हि गृहवासस्थः, पुरा दिग्जयहेतवे । हस्त्यश्व-रथ-पादातचमूभिः सहितोऽचलम् ॥ ९९ ॥
मार्गान्तराले सततस्निग्धच्छायामनोरमम् । जगद्भ्रमणखिन्नाया, विश्रामौक इव श्रियः ॥ १००॥
नृत्यन्तमिव कङ्केल्लिलोलपल्लवपाणिभिः । हसन्तमिव विहसन्मल्लिकास्तबकोत्करैः ॥ १०१ ॥
रोमाञ्चितमिवोदञ्चत्कदम्बकुसुमोच्चयैः । वीक्ष्यमाणमिव स्मेरकेतकीकुसुमेक्षणैः ॥ १०२ ॥
सन्तापिनस्तपनांशून्, दूरादापततोऽपि हि । साल-तालद्रुमभुजैर्निषेधन्तमिवोच्छ्रितैः ॥ १०३ ॥
दत्तगुप्यद्गुरुमिवाऽध्वगार्थं वटपादपैः । सज्जीकृतपाद्यमिव, सारणीभिः पदे पदे ॥ १०४ ॥
शृङ्खलिताम्भोदमिव, महद्भिररघट्टकैः । गुञ्जन्मधुकरारावैराह्वयन्तमिवाऽध्वगान् ॥ १०५ ॥
तमाल-ताल-हिन्ताल-चन्दनैर्मध्यवर्त्तिभिः । दिवाकरकरत्रासात्, तिमिरैरिव सेवितम् ॥ १०६ ॥
चूत-चम्पक-पुन्नाग-नाग-केसरकेसरैः । जगत्येकातपत्रत्वं, तन्वानं सौरभश्रियः ॥ १०७ ॥
ताम्बूली-लवली-द्राक्षावितानैरतिसन्ततैः । पान्थयूनां विना यत्नं, तन्वन्तं रतिमण्डपान् ॥ १०८ ॥
भद्रशालमिवाऽऽयातं, मेरुशैलतलावनेः । भृशाभिराममारामं, तदाऽद्राक्षमहं व्रजन् ॥ १०९ ॥
चिरेण दिग्जयं कृत्वा, निवृत्तः पुनरप्यहम् । आरामस्याऽन्तिके तस्य, सह चम्वा समागमम् ॥ ११० ॥
उत्तीर्य वाहनेभ्योऽहं, कौतुकात् सपरिच्छदः । तदन्तः प्रविशन्नन्याद्दक्षमद्राक्षमग्रतः ॥ १११ ॥

१ विश्रामस्थानम् । २ उन्नतैः । ३ क्षुद्रनदीभिः । ४ सुगन्धलक्ष्म्याः ।

इति चाऽचिन्तयमहं, भ्रान्तोऽन्यत्र किमागमम्? । इदं किं वा परावृत्तमिन्द्रजालमथेदृशम्? ॥ ११२ ॥
यत् क्व पत्रलता साऽर्ककरप्रसरवारणी? । क्व वाऽसावातपस्यैकातपत्रत्वमपत्रता[१] ॥ ११३ ॥
क्व सा कुञ्जेषु विश्रान्तरमणीरमणीयता? । निद्रायमाणाजगरदारुणत्वमिदं क्व च? ॥ ११४ ॥
कलापिकलकण्ठादिमधुरालापिता[२] क्व सा? । विलोलकाकोलकुलरोलव्याकुलता[४] क्व च? ॥ ११५ ॥
प्रलम्बलम्बमानार्द्रशिम्बीबहलता क्व सा? । क्व चैषा शुष्कशाखाग्रदोलायितभुजङ्गता ॥ ११६ ॥
क्व च सा कुसुमामोदसुरभीकृतदिक्कता? । चिल्ली-कपोत-ध्वाङ्क्षादिविष्टादुर्गन्धता[५] क्व च? ॥ ११७ ॥
प्रसूनरसनिस्यन्दस्तीमितावनिता[६] क्व सा? । क्व ज्वलद्भ्राष्ट्रसिक्तातुल्यसन्तापपांसुता[७]? ॥ ११८ ॥
फलप्राग्भारभारावनम्रपादपता क्व सा? । मूलोपदेहिकाग्रस्तपतितद्रुमता[९] क्व च? ॥ ११९ ॥
अनेकवल्लीवलयलटभा[८] वृतयः क्व ताः? । क्व चैताः सर्पनिर्मुक्तास्तोकनिर्मोकदारुणाः[९]? ॥ १२० ॥
तले तरूणां प्रचुरः, प्रसूनप्रकरः क्व सः? । उद्भूतस्थलशृङ्गाटकण्टका[१०] उत्कटाः क्व च? ॥ १२१ ॥
मन्ये यथाऽयमारामो, जज्ञे सम्प्रत्यतादृशः । तथा संसारिणः सर्वे, संसारस्थितिरीदृशी ॥ १२२ ॥
सौन्दर्येण स्वकीयेन, य एव मदनायते । ग्रस्तो रोगेण घोरेण, कङ्कालति[११] स एव हि ॥ १२३ ॥
य एव छेकताभाजा, वाचा वाचस्पतीयते । कालान्मुहुःस्खलज्जिह्वः, सोऽपि मूकायतेतराम् ॥ १२४ ॥
चारुचङ्क्रमणशक्त्या, यो जात्यतुरगायते । वातादिभग्नगमनः[१३], पङ्गूयते स एव हि ॥ १२५ ॥

१ पत्रराहित्यम् । २ मयूरकोकिलादि । ३ काकपक्षिविशेषः । ४ कठोरध्वनिः । ५ काकः । ६ आर्द्रभूमिता । ७ कीटविशेषः । ८ मनोहराः । ९ सर्पकञ्चुकः । १० कण्टकवृक्षविशेषः । ११ अस्थिपञ्जरशेषवपुरिव भवति । १२ चातुर्ययुक्तया । १३ वातरोगनष्टपादः।

हस्तेनौजायमानेन, हस्तिमल्लायते च यः । रोगाद्यक्षमहस्तत्वात्, स एव हि कुणीयते[1] ॥ १२६ ॥
दूरदर्शनशक्त्या च, गृध्रायेत य एव हि । पुरोऽपि दर्शनाशक्तेरन्धायेत स एव हि ॥ १२७ ॥
क्षणाद् रम्यमरम्यं च, क्षणाच्च क्षममक्षमम् । क्षणाद् दृष्टमदृष्टं च, प्राणिनां वपुरप्यहो! ॥ १२८ ॥
इति चिन्तयतो धाराधिरूढमभवत् तदा । मम संसारवैराग्यं, जपतो मन्त्रशक्तिवत् ॥ १२९ ॥
महामुनीनामभ्यर्णे, कर्मकक्षहुताशनम्[2] । निर्वाणचिन्तामाणिक्यं, ततोऽहं व्रतमात्तवान् ॥ १३० ॥
पुनः प्रणम्य शिरसाऽऽचार्यवर्यमरिन्दमम् । विवेकवान् महीपालो, भक्तिमानभ्यधादिति ॥ १३१ ॥
निरीहा निर्ममाः सन्तः, पूज्यपादा अमी इमाम् । पुण्यैरस्मादृशामेव, विहन्ते वसुन्धराम् ॥ १३२ ॥
इहाऽतिघोरे संसारे, जनो वैषयिकैः सुखैः । अन्धकूपे तटतृणैश्छन्ने पतति गौरिव ॥ १३३ ॥
तस्माच्च प्राणिनस्त्रातुं, विधत्ते भगवानिह । कारुण्यवानहर्निरन्तरम्[3] घोषणामिव देशनाम् ॥ १३४ ॥
न श्रियो न कलत्राणि, न पुत्रा न च बान्धवाः । अस्मिन्नसारे संसारे, सारं गुरुगिरः परम् ॥ १३५ ॥
पर्याप्तं सम्पदा तन्मे, विद्युल्लेखाविलोलया । कृतमापातमधुरैर्विषयैर्विषसन्निभैः ॥ १३६ ॥
कलत्र-पुत्र-मित्राद्यैरिहलोकसखैरलम् । भवाब्धितारणतरीं, देहि दीक्षां प्रसीद मे ॥ १३७ ॥
यावत् कुमारं स्वे राज्ये, स्थापयित्वाऽभ्युपैम्यहम् । अलङ्कार्यमिदं स्थानं, तावत् पूज्यैः कृपापरैः ॥ १३८ ॥
आचार्योऽप्याललापैवं, प्रोत्साहनकृता गिरा । इच्छा तव महेच्छस्य, भूपते! साधु साध्वसौ ॥ १३९ ॥
राजन्! प्राग्जन्मसंस्काराज्ज्ञाततत्त्वः पुराऽप्यसि । हस्तालम्बो दृढस्येव, हेतुमात्रं तु देशना ॥ १४० ॥

१ कुण्ठितकरो भवति । २ कर्मवनेषु वह्निसमम् । ३ निरन्तरम् ।

प्रव्रज्या त्वादृशैरात्ता, फलत्यातीर्थकृच्छ्रियः । गौः पालकविशेषेण, कामं दुग्धे विशिष्यते ॥ १४१ ॥
स्थास्यामो वयमत्रैव, त्वदीहितचिकीर्षया । विहरामो वयं भव्योपकारायैव केवलम् ॥ १४२ ॥
उदीरिते सूरिणैवं, नृपसूरः[1] प्रणम्य तम् । उत्तस्थौ निश्चिते कार्ये, नालसन्ति मनस्विनः ॥ १४३ ॥
पार्थिवोऽरिन्दमाचार्यपादलग्नस्य चेतसः । हठादपि ययौ वेश्म, दुर्भगां गृहिणीमिव ॥ १४४ ॥
सिंहासने निषद्याऽथ, समाहूय च मन्त्रिणः । स्वराज्यभवनस्तम्भानित्यभाषिष्ट भूपतिः ॥ १४५ ॥
भो भो! गृहेऽत्र राजानो, वयमाम्नायतो[2] यथा । मन्त्रिणोऽपि तथा यूयं, स्वाम्यर्थैकमहाव्रताः ॥ १४६ ॥
युष्मन्मन्त्रबलेनैषाऽसाधि विद्येव मेदिनी । निमित्तमात्रं तत्राऽभूद्, दोर्बलोपक्रमस्तु नः ॥ १४७ ॥
भवन्तो बिभराञ्चक्रुर्भूमिभारं पुराऽपि मे । घनवात-घनाम्भोधि-तनुवाता इवाऽभितः ॥ १४८ ॥
अहं तु विविधक्रीडारसमग्नो दिवानिशम् । अतिष्ठं विषयासक्त्या, सुपर्वेव[3] प्रमद्वरः[4] ॥ १४९ ॥
मयाऽद्य तु प्रमादोऽयमनन्तभवदुःखदः । गुरुप्रसादेनाऽज्ञायि, निशि दीपेन गर्त्तवत् ॥ १५० ॥
अज्ञानाद् वञ्चितोऽस्माभिश्चिरमात्माऽऽत्मनैव हि । चक्षुष्मानपि किं कुर्यादन्धकारे प्रसृत्वरे? ॥ १५१ ॥
अहो! वयमियत्कालमदान्तैरेभिरिन्द्रियैः । उत्पथेनैव नीताः स्मः, शूकलैरिव[5] वाजिभिः[6] ॥ १५२ ॥
मया विषयसेवेयं, परिणत्यामनर्थदा । कृता बिभीतकतरुच्छायासेवेव दुर्धिया ॥ १५३ ॥
मया दिग्जययात्रायामन्यवीर्यासहिष्णुना । गजा गन्धगजेनेव, हताः क्ष्मापा निरागसः ॥ १५४ ॥
मम सन्ध्यादिषाड्गुण्यं, प्रयुञ्जानस्य राजसु । कियत्यवितथा वाणी, छाया तालतरोरिव ॥ १५५ ॥

१ राजा । २ कुलपरम्परातः । ३ देवः । ४ प्रमत्तः । ५ अवशीकृतैः । ६ उद्धतैः ।

आच्छिन्दता च राज्यानि, प्रसह्याऽन्यमहीभुजाम् । अदत्तादानमेवैकमाजन्माऽऽचरितं मया ॥ १५६ ॥
रतिसागरमध्यावगाढेन च निरन्तरम् । शिष्येणेव मन्मथस्याऽब्रह्मैवाऽनुष्ठितं मया ॥ १५७ ॥
प्राप्तैरर्थैरतृप्तस्याऽप्राप्यानर्थान् जिघृक्षतः । इयत्कालमहो! मोहान्मूर्च्छा मेऽभूद् बलीयसी ॥ १५८ ॥
हिंसादीनामेकतमोऽपि हि दुर्गतिकारणम् । स्पृष्ट एकोऽपि चण्डालः, स्यादस्पृश्यत्वकारकः ॥ १५९ ॥
ततः प्राणातिपातादिपञ्चकात् सकलादपि । विरतिं प्रतिपत्स्येऽद्य, वैराग्याद् गुरुसन्निधौ ॥ १६० ॥
कुमारे क्वचहरे, राज्यभारमिमं पुनः । निधास्यामि निजं तेजो, वह्नौ सायमिवार्यमा[1] ॥ १६१ ॥
भाव्यं मयीव युष्माभिः, कुमारेऽप्युरुभक्तिभिः । अनया शिक्षयाऽलं वा, जात्यानां शीलमप्यदः ॥ १६२ ॥
अथैवं मन्त्रिणोऽप्यूचुः, स्वामिन्नेवंविधा धियः । न ह्यनासन्नमोक्षाणां, भवन्ति भविनां क्वचित् ॥ १६३ ॥
युष्माकं पूर्वजन्मानो[2]ऽप्याजन्माखण्डशासनाः । अवनीं साधयामासुर्बिडौजस[3] इवौजसा ॥ १६४ ॥
राज्यमुत्सृज्य निष्ठ्यूतमिवाऽनिष्ठितशक्तयः । व्रतमाददिरे सर्वे, रत्नत्रयपवित्रितम् ॥ १६५ ॥
इमं देवोऽपि भूभारं, बभार स्वभुजौजसा । शोभाभूता वयं तत्र, रम्भास्तम्भा इवौकसि ॥ १६६ ॥
इदं देवस्य साम्राज्यं, यथाक्रमसमागतम् । सांवदानं[4] निर्निदानं[5], व्रतादानमिदं तथा ॥ १६७ ॥
लीलाकमलवद् वोढुं, क्षमाभारमसौ क्षमः । कुमारोऽपि हि देवस्य, द्वितीय इव चेतन[6]ः ॥ १६८ ॥
यदि गृह्णाति गृह्णातु, दीक्षां मोक्षफलां विभुः । आरोहत्युच्चकैः काष्ठां, स्वामिन्यस्माकमुत्सवः ॥ १६९ ॥
निशातन्यायनिष्ठेन[7], सत्वशौण्डीर्यशालिना । देवेनेव कुमारेणाऽप्यस्तु राजन्वती मही ॥ १७० ॥

१ सूर्यः । २ पूर्वजाः । ३ इन्द्रा । ४ सपराक्रमम् । ५ निदानरहितम् । ६ आत्मा । ७ तीक्ष्णः ।

अनुज्ञावचनैस्तेषां, मुदितो मेदिनीपतिः । शीघ्रमाह्वाययामास, कुमारं वेत्रधारिणा ॥ १७१ ॥
सलीलचरणन्यासं, कुर्वाणो राजहंसवत् । मूर्त्या देवो मार[1] इव, कुमारोऽपि समाययौ ॥ १७२ ॥
प्रणम्य नृपतिं भक्त्या, स पत्तिपरमाणुवत् । निषसाद यथास्थानं, तस्थौ च रचिताञ्जलिः ॥ १७३ ॥
अभिषिञ्चन्निव दृशा, पीयूषरससारया । पश्यन् कुमारं सानन्दं, व्याजहारेति भूपतिः ॥ १७४ ॥
अस्मद्वंश्या नृपाः पूर्वेऽप्युर्वीमेतामपालयन् । अगृध्नवो[2] दयाबुद्ध्या, गामिवैकाकिनीं वने ॥ १७५ ॥
क्षमीभूतेषु पुत्रेषु, क्षमाभारं क्रमेण ते । स्वयमारोपयामासुर्धौरेयवृषभेष्विव ॥ १७६ ॥
आतिष्ठमानाः सकलमप्यनित्यं जगत्त्रये । उत्तस्थिरे स्वयं तस्मै, शाश्वताय पदाय ते ॥ १७७ ॥
इयत्कालं न कोऽप्यस्थाद्, गृहवासेऽस्मदादिमः । अहो! गार्हस्थ्यमूढस्य, प्रमादोऽभूत् कियान्मम? ॥ १७८॥
राज्यभारं गृहाणेमं, ग्रहीष्यामो वयं व्रतम् । भवाम्भोधिं तरिष्यामो, निर्भारा भवता कृताः ॥ १७९ ॥
तया नृपगिरा म्लायन्, हिमेनाऽम्भोजकोशवत् । उदस्रनेत्रकमलः, कुमारोऽप्येवमब्रवीत् ॥ १८० ॥
अकाण्डेऽप्यप्रसादोऽयं, देव! केनाऽऽगसा मम? । पदातिमानिनि मयि, स्वामिन् ! यदिदमादिशः ॥ १८१॥
अपराधः कृतः कोऽपि, किं वा वसुधयाऽनया? । चिरत्राताऽपि तृणवद्, यदियं त्यज्यतेऽधुना ॥ १८२ ॥
तातपादैर्विना तात! राज्येनाऽपि कृतं मम । पूर्णेनाऽप्यब्जहीनेन, सरसा भ्रमरस्य किम्? ॥ १८३ ॥
प्रतिकूलमहो! दैवमहो! मे मन्दभाग्यता । तातो यदादिशत्येवं, त्यजन् मामिह लोष्ठवत् ॥ १८४ ॥
अहमेतां ग्रहीष्यामि, कथञ्चिदपि नो महीम् । प्रायश्चितं चरिष्यामि, गुर्वादेशाव्यतिक्रमे[3] ॥ १८५ ॥

१ कामदेवः । २ अनासक्ताः । ३ गुर्वाज्ञाया उल्लङ्घने ।

सूनोर्गिरा तया स्वाज्ञालोपिन्या सत्त्वसारया । विषण्णश्च प्रसन्नश्च, जगादेति महीपतिः ॥ १८६ ॥
मत्पुत्रोऽपि समर्थोऽसि, विद्वानसि विवेक्यसि । किन्त्वज्ञानात् स्नेहमूलादविचार्यैवमभ्यधाः ॥ १८७ ॥
गुर्वाज्ञा हि कुलीनानां, विचारमपि नाऽर्हति । युक्तियुक्तेति मद्वाणी, विचार्यापि विधीयताम् ॥ १८८ ॥
भारं वोढुं क्षमे पुत्रे, निराभारः पिता ननु । बालेऽपि हि सुते हन्त!, सिंही स्वपिति निर्भरम् ॥ १८९ ॥
किञ्च त्वामप्यनापृच्छ्य, मोक्षकामः क्षमामिमाम् । मोक्ष्यामि यदहं वत्स!, परतन्त्रस्त्वया न हि ॥ १९० ॥
विलुलन्तीमनाथां क्ष्मां, ततोऽपि त्वं धरिष्यसि । अतिरिक्तं तु ते भावि, मदाज्ञालङ्घनादघम् ॥ १९१ ॥
एवं वत्स! विचारेणाऽविचारेणाऽपि मद्वचः । अनुष्ठेयं त्वया भक्तिनिष्ठेन सुखदं मम ॥ १९२ ॥
जगदुर्मन्त्रिणोऽप्येवं, निसर्गेण[१] विवेकिनः । देवकीयकुमारस्य, समीचीनमिदं वचः ॥ १९३ ॥
तथाऽपि देवपादा यदादिशन्ति तदाचर । गुर्वाज्ञाकरणं सर्वगुणेभ्यो ह्यतिरिच्यते ॥ १९४ ॥
देवेनाऽपि पितृवचः, कृतं जानीमहे वयम् । पितृतः कः परो लोकेऽनुल्लङ्घ्यवचनो भवेत्? ॥ १९५ ॥
एवं मन्त्रिभिरप्युक्तः, कुमारो गद्गदस्वरम् । स्वाम्यादेशो मे प्रमाणमित्यूचे नतकन्धरः[२] ॥ १९६ ॥
कुमुदं कौमुदीनाथेनेवाऽब्देनेव[४] बर्हिणः[३] । कुमारेणाऽऽदेशकर्त्रा, महीपतिरमोदत ॥ १९७ ॥
अथ भूमिपतिः प्रीतः, स्वयमादाय पाणिना । कुमारमासयामासाऽभिषेकार्हे निजासने ॥ १९८ ॥
पवित्राणि पवित्राणि, धरित्रीभर्तुराज्ञया । आनिन्यिरे तीर्थपाथांस्यब्दैरिव[५] नियोगिभिः[६] ॥ १९९ ॥
वाद्यमानेषु मङ्गल्यतूर्येषूच्चैःस्वरेष्वथ । मूर्ध्नि मूर्धाभिषिक्तेन[७], कुमारः सिषिचे स्वयम् ॥ २०० ॥

१ स्वभावेन । २ नम्रग्रीवः । ३ चन्द्रेण । ४ मेघेन । ५ तीर्थजलानि । ६ अधिकारिभिः । ७ राज्ञा ।

उत्पत्योत्पत्य राजानोऽभ्यषिञ्चन्नपरेऽपि तम् । नवोदयमिवाऽऽदित्यं, नमश्चक्रुश्च भक्तितः ॥ २०१ ॥
नृपादेशेन सदृशान्यंशुकानि[1] स पर्यधात् । तैश्चाऽदभ्रैः शारदाभ्रैः, शुभ्रैर्गिरिरिवाऽऽबभौ ॥ २०२ ॥
गोशीर्षचन्दनैस्तस्याऽङ्गरागं वारयोषितः । सर्वाङ्गीणं[2] विदधिरे, ज्योत्स्नापूरैरिवाऽमलैः ॥ २०३ ॥
मुक्तामयानि सर्वाङ्गं, भूषणानि स पर्यधात् । निर्मितानि दिवः कृष्ट्वा, प्रोतैरुडुगणैरिव[3] ॥ २०४ ॥
ज्वलन्माणिक्यतेजस्कं, किरीटं तस्य मूर्धनि । स्वयं न्यवेशयद् राजा, स्वं प्रतापमिवोर्जितम् ॥ २०५ ॥
तस्य मूर्ध्नि धराधीशो, धारयामास निर्मलम् । सितच्छत्रं यश इव, प्रादुर्भूतं क्षणादपि ॥ २०६ ॥
पार्श्वतो वारनारीभिरवीज्यत स चामरैः । राज्यसम्पल्लतोद्भूतप्रसूनस्तबकैरिव ॥ २०७ ॥
चन्दनेन स्वयं भूपस्तद्भाले तिलकं व्यधात् । उदयाचलचूलास्थनिशाकरविडम्बिनम् ॥ २०८ ॥
राजा राज्ये निवेश्यैवं, कुमारं परया मुदा । लक्ष्म्या रक्षामन्त्रमिव, सम्यक् शिक्षां ददाविति ॥ २०९ ॥
क्षितेरसि त्वमाधारस्तवाऽऽधारो न कोऽपि तत् । त्यक्त्वा प्रमादमात्मानमात्मना वत्स! धारयेः ॥ २१० ॥
भ्रश्यत्याधारशैथिल्यादाधेयं ननु सर्वथा । विषयातिप्रसङ्गोत्थं, शैथिल्यं तस्य रक्ष तत् ॥ २११ ॥
यौवनं विभवो रूपं, स्वाम्यं[4]मेकैकमप्यतः । प्रमादकारणं विद्धि, बुद्धिमत्कार्यसिद्धिभित् ॥ २१२ ॥
कुलक्रमागताऽप्येषा, लक्ष्मीश्छलगवेषिणी[5] । दुराराधा छलयति, राक्षसीव प्रमद्वरम्[6] ॥ २१३ ॥
चिरवासभवस्नेहो, नाऽस्यां स्थैर्याय किन्त्वसौ । प्रयाति लब्धावसरा, शारिकेवाऽन्यतो द्रुतम् ॥ २१४ ॥
कुलटेवाऽपवादेभ्यो, भीरुतामादधत्यसौ । सुप्तवज्जाग्रतमपि, प्रमत्तं पतिमुज्झति ॥ २१५ ॥

१ वस्त्रप्रान्तसहितानि । २ सर्वाङ्गव्याप्तम् । ३ नक्षत्रसमूहैः । ४ स्वामिता । ५ छिद्रान्वेषिणी । ६ प्रमादिनम् ।

दाक्षिण्यं रक्षणभवं, नैतस्या जातु जायते । किन्तु क्षणात्[१] प्लवङ्गीवोत्प्लुत्य यात्याश्रयान्तरम् ॥ २१६ ॥
निर्लज्जता चपलता, निःस्नेहत्वमथाऽपरे । दोषाः प्रकृतिरेवाऽस्या, नीचैर्यानमिवाऽम्भसः ॥ २१७ ॥
निःशेषदोषमय्याऽपि, सर्वः कोऽपि श्रियैधते । शक्रोऽपि हि श्रिया शक्तः, किं पुनर्मानवो जनः? ॥ २१८ ॥
तस्याः प्राहरिक[३] इव, स्थिरीकरणकर्मणि । नय-विक्रमसम्पन्नो, जागरूकः सदा भवेः ॥ २१९ ॥
श्रीकाङ्क्षीणाऽपि भवता, भूः पाल्येयमगृध्नुना । अगृध्नोरनुगा[४] लक्ष्म्यः, सुभगस्येव योषितः ॥ २२० ॥
अतिचण्डत्वमालम्ब्य, निदाघस्थ इवाऽर्यमा । त्वं दुःसहकराक्रान्तां, पृथिवीं जातु मा कृथाः ॥ २२१ ॥
एकदाऽपि कृतान्यायं, जनं निजमपि त्यजेः । त्यज्यते वरवासोऽपि[५], मनागप्यग्निदूषितम् ॥ २२२ ॥
मृगया-द्यूत-पानानि[६], वारयेः सर्वतोऽपि यत् । तत्पापानां नृपो भागी, तपस्वितपसामिव ॥ २२३ ॥
अन्तरङ्गान् जयेः शत्रूंस्तेषामविजये सति । जिता अप्यजिता एव, शत्रवो यद् बहिर्भवाः ॥ २२४ ॥
धर्ममर्थं च कामं च, परस्परमबाधया । यथाकालं निषेवेथाः, पत्नीर्नेतेव[७] दक्षिणः ॥ २२५ ॥
तथा भजेस्त्रीन् पुमर्थान्, यथा हि समये सति । पुरुषार्थे चतुर्थेऽपि, नोत्साहो हीयते तव ॥ २२६ ॥
अभिधायेति तूष्णीकीभूते विमलवाहने । बद्धाञ्जलिः कुमारस्तत्, तथेति प्रत्यपद्यत ॥ २२७ ॥
सिंहासनादथोत्थाय, विनीतः[८] प्राग्वदेव सः । उत्तिष्ठासोर्व्रतकृते[९], हस्तालम्बं ददौ पितुः ॥ २२८ ॥
दत्तहस्तः स पुत्रेण, वेत्रितोऽप्यल्पमानिना । जगाम स्नपनागारं, भूरिभृङ्गारभूषितम्[१०] ॥ २२९ ॥

१ वानरीव । २ अधोगमनम् । ३ यामिकः । ४ अनुसारिण्यः । ५ श्रेष्ठवस्त्रम् । ६ सुरापानम् । ७ नायक इव । ८ विनयवान् । ९ उत्थातुमिच्छोः । १० बहुकलशभूषितम् ।

मकराननसौवर्णभृङ्गारलुठदम्बुभिः । जीमूतधाराभिरिव[१], स सस्नौ भूभृतां वरः ॥ २३० ॥
कोमलेन दुकूलेनोन्मृष्टाङ्गो नृपतिस्ततः । सर्वाङ्गमपि गोशीर्षचन्दनेन व्यलिप्यत ॥ २३१ ॥
नीलोत्पलदलश्यामः, शशिगर्भ इवाऽम्बुदः । पुष्पगर्भः केशपाशो[२], राज्ञस्तज्ज्ञैररच्यत ॥ २३२ ॥
विशाले निर्मले स्वच्छे, मनोहरगुणे स्ववत्[३] । संविव्यायाऽथ भूनाथो, मङ्गल्ये दिव्यवाससी ॥ २३३ ॥
ततः पुत्रोपनीतं स, नरेन्द्रमुकुटायितः । माणिक्यस्वर्णमुकुटं, धारयामास मूर्धनि ॥ २३४ ॥
हार-केयूर-ताडङ्कप्रभृतीन्यपराण्यपि । स सर्वाङ्गं भूषणानि, पर्यधाद् गुणभूषणः ॥ २३५ ॥
रत्नकाञ्चनरूप्याणि, वस्त्राण्यन्यदपीप्सितम् । अर्थिभ्यः स ददौ तत्र, कल्पद्रुम इवाऽपरः ॥ २३६ ॥
ततो नरशतोद्वाह्यां, शिबिकां नरकुञ्जरः । आरोहत् पुष्पकमिव, विमानं नरवाहनः ॥ २३७ ॥
राजन्[४] श्वेतातपत्रेण, चामराभ्यां च तत्क्षणात् । साक्षाद् रत्नत्रयेणेवाऽभ्यागतेन निषेवितः ॥ २३८ ॥
बन्दिकोलाहलेनोच्चैस्तारतूर्यरवेण च । सुहृद्भ्यामिव मिलद्भ्यां, मुदमुद्बोधयन् नृणाम् ॥ २३९ ॥
श्रीमद्भिर्नृपसामन्तैः, पृष्ठतः पार्श्वतोऽग्रतः । आपतद्भिः शोभमानो, ग्रहराजो ग्रहैरिव ॥ २४० ॥
आवृत्तवृन्तपद्माभवलद्ग्रीवेण सूनुना । आदेशकाङ्क्षिणा द्वाःस्थेनेवाऽग्रस्थेन शोभितः ॥ २४१ ॥
सम्पूर्णपात्रकुम्भाभिर्नागरीभिः पदे पदे । मङ्गलानि क्रियमाणानीक्षमाणो यथाक्रमम् ॥ २४२ ॥
चित्रमञ्चशताकीर्ण, पताकामालभारिणम् । पवित्रयन् राजमार्गं, यक्षकर्दमपङ्किलम्[६] ॥ २४३ ॥
मञ्चे मञ्चे च गन्धर्ववर्गसङ्गीतपूर्वकम् । प्रतीच्छन्[७] पण्यवनिताकृतारात्रिकमङ्गलम् ॥ २४४ ॥

१ मेघः । २ केशपाशविधिज्ञै । ३ आत्मवत् । ४ शोभमानः । ५ सूर्यः । ६ सुगन्धिद्रव्यविशेषः । ७ गृह्णन् ।

अदृष्टपूर्ववद् दूरात्, पौरैरुत्फुल्ललोचनैः । आलोक्यमानो निस्पन्दैरालेख्यलिखितैरिव ॥ २४५ ॥
लोकैर्मन्त्रबलाकृष्टैरिव कार्मणितैरिव । वाग्बद्धैरिव परितोऽन्वीयमानो भृशायितैः[1] ॥ २४६ ॥
उद्यानेऽरिन्दमाचार्यपादपद्मपवित्रिते । जगाम धाम पुण्यानां, राजा विमलवाहनः ॥ २४७ ॥
॥ दशभिः कुलकम् ॥
शिबिकातः समुत्तीर्य, पादाभ्यां मेदिनीपतिः । तत्र प्राविशदुद्याने, मनसीव तपस्विनाम् ॥ २४८ ॥
अथाऽऽभरणसम्भारं, विश्वं विश्वम्भरापतिः । अङ्गादुत्तारयामास, धराभारं भुजादिव ॥ २४९ ॥
कन्दर्पशासनमिव, चिराय शिरसा धृतम् । उज्झाञ्चकार स्रग्दाम, सद्यो वसुमतीपतिः ॥ २५० ॥
आचार्यवामपार्श्वस्थः, स कृत्वा चैत्यवन्दनाम् । तदृत्तमादत्त रजोहरणादि ऋषिध्वजम् ॥ २५१ ॥
केशानुत्पाटयामास, मुष्टिभिः पञ्चभिर्नृपः । सावद्यं सकलं योगं, प्रत्याख्यामीत्युदीरयन् ॥ २५२ ॥
तत्कालमप्युपात्तेन, व्रतिलिङ्गेन तेन तु । आबाल्यव्रतधारीव, शुशुभे स महामनाः ॥ २५३ ॥
प्रदक्षिणात्रयीपूर्वं, विधाय गुरुवन्दनाम् । स्थिते तस्मिन् गुरुरेवं, विदधे धर्मदेशनाम् ॥ २५४ ॥
अस्मिन्नपारे संसारे, कथञ्चिज्जन्म मानुषम् । अवाप्यते पयोराशौ, दक्षिणावर्तशङ्खवत् ॥ २५५ ॥
मानुष्यकेऽपि सम्प्राप्ते, बोधिबीजं सुदुर्लभम् । तत्रापि पुण्ययोगेन, परिव्रज्योपलभ्यते ॥ २५६ ॥
तावद् भुवोऽर्कसन्तापो, न यावत् प्रावृडम्बुदः । भङ्गो वनस्य हस्तिभ्यस्तावद् यावन्न केसरी ॥ २५७ ॥
तमोभिरान्ध्यं जगतस्तावद् यावन्न भास्करः । देहिनां पन्नगभयं, तावद् यावन्न पक्षिराट् ॥ २५८ ॥

१ अतिशयेन सम्मिलितैः ।

दारिद्र्यं प्राणिनां तावन्न यावत् कल्पपादपः । भविनां भवभिस्तावद्, यावन्नैवा ऽऽ प्यते व्रतम् ॥ २५९ ॥
आरोग्यं रूपलावण्ये, दीर्घायुष्यं महर्द्धिता । आज्ञैश्वर्यं प्रतापित्वं, साम्राज्यं चक्रवर्तिता ॥ २६० ॥
सुरत्वं सामानिकत्वमिन्द्रत्वमहमिन्द्रता । सिद्धत्वं तीर्थनाथत्वं, सर्वं व्रतफलं ह्यदः ॥ २६१ ॥
एकाहमपि निर्मोहः, प्रव्रज्यापरिपालकः । न चेन्मोक्षमवाप्नोति, तथापि स्वर्गभाग् भवेत् ॥ २६२ ॥
किं पुनः स महाभागस्त्यक्त्वा तृणमिव श्रियम् । यो गृह्णाति परिव्रज्यां, सुचिरं पालयत्यपि ॥ २६३ ॥
विधाय देशनामेवमरिन्दममहामुनिः । विहर्तुमन्यतोऽचालीत्, तिष्ठन्त्येकत्र नर्षयः ॥ २६४ ॥
ततो ग्राम-पुरारण्याकर-द्रोणमुखादिषु । स व्यहार्षीदविच्छिन्नं, छायेव गुरुणा सह ॥ २६५ ॥
लोकाक्रान्तेऽर्कभास्पृष्टे[1], जन्तुरक्षाकृते पथि । युगमात्रदत्तदृष्टिः, सोऽगादीर्यांविचक्षणः ॥ २६६ ॥
निरवद्यां मितां सर्वजनीनां[2] भारतीं च सः । महामुनिरभाषिष्ट, भाषासमितिकोविदः ॥ २६७ ॥
द्विचत्वारिंशता भिक्षादोषैरपरिदूषितम् । पारणेष्वाददे पिण्डमेषणानिपुणो हि सः ॥ २६८ ॥
आसनादीनि संवीक्ष्य, यत्नतः प्रतिलिख्य च । अग्रहीन्न्यक्षिपच्चाऽपि, स आदानविशारदः[3] ॥ २६९ ॥
कफ-मूत्र-मलप्रायं, निर्जन्तुजगतीतले । उत्ससर्ज महासाधुः, स प्राणिकरुणापरः ॥ २७० ॥
विमुक्तकल्पनाजालं, समत्वे सुप्रतिष्ठितम् । स गुणक्ष्मारुहाराम[4], आत्मारामं मनो व्यधात् ॥ २७१ ॥
मौनेन तस्थौ स प्रायः, संज्ञादिपरिहारतः । अनुग्राह्योपरोधेन, यद्यवोचत् तदा मितम् ॥ २७२ ॥
स्तम्भबुद्ध्या महिषाद्यैः, स्कन्धकण्डूयनेच्छुभिः । बाढमुद्घृष्यमाणोऽपि, कायोत्सर्गं जहौ न सः ॥ २७३ ॥

१ सूर्यकिरणैः स्पृष्टे। २ सर्वजनहिताम्। ३ आदाननिक्षेपणासमितिविशारदः। ४ गुणवृक्षोद्यानः।

शयनासननिक्षेपादानचङ्क्रमणादिषु । स्थाने च चेष्टानियमं, स चकार महामनाः ॥ २७४ ॥
इत्थं चारित्रगात्रस्य, जननत्राणशोधनैः । मातृभूताः स समितिगुप्तीरष्टाऽप्यधारयत् ॥ २७५ ॥
क्षुधार्त्तः शक्तिसम्पन्न, एषणामविलङ्घयन् । सोऽदीनोऽविह्वलो विद्वान्, यात्रामात्रोद्यतोऽचरत् ॥ २७६ ॥
पिपासितः पथिस्थोऽपि, तत्त्वविद् दैन्यवर्जितः । नैच्छच्छीतोदकं किन्तु, जग्राह प्रासुकोदकम् ॥ २७७ ॥
बाध्यमानोऽपि शीतेन, त्वग्वस्त्रत्राणवर्जितः । वासोऽकल्प्यं नाऽऽददे सोऽज्वालयज्ज्वलनं न च ॥ २७८ ॥
उष्णेन तप्तो नाऽनिन्ददुष्णं छायां च नाऽस्मरत् । वीजनं मज्जनं गात्राभिषेकादि च नाऽकरोत् ॥ २७९ ॥
दष्टोऽपि दंशैर्मशकैः, सर्वेषां भोज्यलौल्यवित् । त्रासं द्वेषं निरासं स, न चक्रेऽस्थादुपेक्षया ॥ २८० ॥
नाऽस्ति वासोऽशुभं चैतन्नेयेषोभयथाऽपि तत् । स नाग्न्यबाधितो जानन्, लाभालाभविचित्रताम् ॥ २८१ ॥
न कदाप्यरतिं चक्रे, धर्मारामरतिर्यतिः । गच्छंस्तिष्ठन्नथाऽऽसीनः, स्वास्थ्यमेव स शिश्रिये ॥ २८२ ॥
दुर्धावसङ्गपङ्कांश्च, मोक्षद्वारार्गलाः स्त्रियः । नाऽचिन्तयदसौ ता हि, धर्मनाशाय चिन्तिताः ॥ २८३ ॥
ग्रामाद्यनियतस्थायी, स्थानाबन्धविवर्जितः । चर्यामेकोऽपि चक्रे स, विविधाभिग्रहैर्युतः ॥ २८४ ॥
आसनादौ निषद्यायां, स्त्र्यादिकण्टकवर्जिते । इष्टानिष्टानुपसर्गान्, स सेहे निःस्पृहोऽभयः ॥ २८५ ॥
शुभाशुभायां शय्यायां, स विषेहे सुखासुखे । रागद्वेषावकुर्वाणः, प्रातस्त्याज्येति चिन्तयन् ॥ २८६ ॥
आक्रुष्टोऽपि स नाऽक्रोशत्, क्षमाश्रमणतां विदन् । किन्तु प्रत्युत मेनेऽसावाक्रोष्टुर्युपकारिताम् ॥ २८७ ॥

१ पञ्च समितयः तिस्रो गुप्तयः मिलित्वा अष्टौ भवन्ति । २ अग्निम् । ३ स्नानम् । ४ दुःक्षालसंसर्गकर्दमः ।

विषेहे हन्यमानोऽपि, न तु प्रतिजघान सः । जीवानाशात् क्रुधो दौष्ट्यात्, क्षमया च गुणार्जनात् ॥ २८८॥
नाऽयाचितं यतीनां यत्, परदत्तोपजीविनाम् । याञ्चादुःखं न चक्रे तन्नेयेष गृहितां च सः ॥ २८९ ॥
परात् परार्थं स्वार्थं वा, स लेभेऽन्नादिकं न वा । लाभेऽमाद्यन्न नाऽलाभेऽनिन्दत् स्वमथवा परम् ॥ २९०॥
स रोगेभ्यो नोद्विविजे, न चकाङ्क्ष चिकित्सितम् । शरीरादात्मभेदज्ञोऽसहताऽदीनमानसः ॥ २९१ ॥
अभूताल्पाणुचेलत्वे, संस्तृतेषु तृणादिषु । सेहे तत्स्पर्शजं दुःखमियेष न च तान् मृदून् ॥ २९२ ॥
ग्रीष्मातपपरिक्लिन्नात्, सर्वाङ्गीणमलादपि । न स उद्विविजे स्नातुं, नैच्छन्नाऽप्युदवर्त्तयत् ॥ २९३ ॥
अभ्युत्थानेऽर्चने दाने, न सोऽभूदभिलाषुकः । न व्यषीददसत्कारे, सत्कारेऽपि जहर्ष न ॥ २९४ ॥
प्रज्ञां प्रज्ञावतां पश्यन्नात्मन्यप्रज्ञतां विदन् । न व्यषीदन्न चाऽमाद्यत्, प्रज्ञोत्कर्षमुपागतः ॥ २९५ ॥
ज्ञान-चारित्रयुक्तोऽस्मि, च्छद्मस्थोऽहं तथाऽपि हि । इत्यज्ञानं विषेहे स, ज्ञानस्य क्रमलाभवित् ॥ २९६ ॥
जिनास्तदुक्तं जीवो वा, धर्माधर्मौ भवान्तरम् । परोक्षत्वान्मृषा नैव, स मेने शुद्धदर्शनः ॥ २९७ ॥
शारीरान् मानसानेवं, स्वपरप्रेरितान् मुनिः । परीषहान् विषेहे स, वाक्कायमनसां वशी ॥ २९८ ॥
ध्यानैकतानः सततं, स्वामिनां श्रीमदर्हताम् । चक्रे चैत्यायमानं स, चेतः स्थिरतरं निजम् ॥ २९९ ॥
सिद्धेषु गुरुषु बहुश्रुतेषु स्थविरेषु च । तपस्विषु श्रुतज्ञाने, सङ्घे चाऽभूत् स भक्तिमान् ॥ ३०० ॥
एवं च तीर्थकृत्कर्मोपार्जनान्यपराण्यपि । स्थानकानि सिषेवेऽसौ, दुर्लभान्यमहात्मनाम् ॥ ३०१ ॥
तप एकावलिं रत्नावलिं च कनकावलिम् । सिंहनिःक्रीडितं ज्येष्ठं, कनिष्ठं च चकार सः ॥ ३०२ ॥
मासोपवासादारभ्य, स कर्तुं कर्मनिर्जराम् । अष्टमासोपवासान्तमुपवासतपो व्यधात् ॥ ३०३ ॥

एवं तीव्रं तपस्तप्त्वा, कृत्वा संलेखनाद्वयम् । चक्राराऽनशनं प्रान्ते, समतैकपरायणः ॥ ३०४ ॥
स्मरन् पञ्चपरमेष्ठिनमस्कारं समाहितः । स देहत्यागमकरोन्निलयत्यागलीलया ॥ ३०५ ॥
अनुत्तरविमानेषु, विमाने विजयाभिधे । त्रयस्त्रिंशत्सागरायुः, सोऽमरः समजायत ॥ ३०६ ॥
हस्तमात्रतनुस्तत्र, निशाकरकरोज्ज्वलः । अहमिन्द्रोऽनहङ्कारश्चारुभूषणभूषितः ॥ ३०७ ॥
सर्वदा निःप्रतीकारः, सुखशय्यामधिष्ठितः । स्थानान्तरमगामी चाऽनिर्मितोत्तरवैक्रियः ॥ ३०८ ॥
आलोकयँल्लोकनालिमवधिज्ञानसम्पदा । निर्वाणसुखदेशीयं[१], सोऽन्वभूत् सुखमुत्तमम् ॥ ३०९ ॥

॥ त्रिभिर्विशेषकम् ॥

आयुःसागरसङ्ख्यैः[२] स, पक्षैर्निःश्वसितं व्यधात् । समासहस्रैस्तावद्भिर्विदधे भक्ष्यकामनाम्[३][४] ॥ ३१० ॥
आयुःशेषे मासषट्के, न मोहोऽपरदेववत् । प्रत्युतासन्नपुण्यत्वात्, तस्य तेजो व्यवर्धत ॥ ३११ ॥
स एवमद्वैतसुखप्रपञ्चे, सुधाह्रदे हंस इवाऽवगाढः ।
आयुस्त्रयस्त्रिंशतमम्बुराशीनेकाहवन्निर्गमयाम्बभूव[५] ॥ ३१२ ॥

इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये द्वितीये पर्वणि
श्रीअजितस्वामीपूर्वभववर्णनो नाम प्रथमः सर्गः ।

१ मोक्षसुखादीषन्न्यूनम् । २ त्रयस्त्रिंशता पक्षैः । ३त्रयस्त्रिंशद्वर्षसहस्रैः । ४ भोजनेच्छाम् । ५ एकदिनवत् ।

द्वितीयः सर्गः ।

इतोऽस्य जम्बूद्वीपस्य, द्वीपस्य भरते पुरी । अस्ति नाम्ना विनीतेति, शिरोमणिरिवाऽवनेः ॥ १ ॥
तस्यां च त्रिजगद्भर्तुरादितीर्थकृतः प्रभोः । ऋषभस्वामिदेवस्य, मोक्षकालादनन्तरम् ॥ २ ॥
सिद्धिं सर्वार्थसिद्धं च, निरवच्छिन्नभावतः । गतेष्विक्ष्वाकुवंश्येषु, सङ्ख्यातीतेषु राजसु ॥ ३ ॥
अभूदिक्ष्वाकुवंशस्य, विततच्छत्रसन्निभः । विश्वसन्तापहरणो, जितशत्रुर्महीपतिः ॥ ४ ॥

॥ त्रिभिर्विशेषकम् ॥

यशसा विशदेनोच्चैस्तस्योत्साहादयो गुणाः । प्रपेदिरे सनाथत्वं, धिष्ण्यानीव[1] हिमांशुना ॥ ५ ॥
सोऽलब्धमध्योऽब्धिरिव, शशीवाऽऽप्यायकोऽ[2] दृशाम् । वज्रौकः शरणेच्छूनां, श्रीवल्लीमण्डपोऽभवत् ॥ ६ ॥
स सर्वनरदेवानां, हृदयेषु पदं दधत् । एकोऽप्यनेकतां प्राप, जलेष्विव निशाकरः ॥ ७ ॥
अभूदाक्रान्तदिक्चक्रैस्तेजोभिरतिदुःसहैः । जगतोऽपि स मूर्धन्यो, माध्याह्निक इवार्यमा ॥ ८ ॥
वसुधां शासतस्तस्य, शासनं वसुधाधवाः । अनिशं धारयामासुः, किरीटमिव मूर्धनि ॥ ९ ॥
वसुधाया वसून्युच्चैराददे च ददे च सः । विश्वलोकोपकाराय, सलिलानीव वारिदः ॥ १० ॥
धर्मायाऽचिन्तयन्नित्यं, स धर्माय जगाद च । धर्माय व्यचरत्तस्य, सर्वं धर्मनिबन्धनम् ॥ ११ ॥
तस्याऽनुजन्मा नृपतेरसाधारणविक्रमः । सुमित्रविजयो नाम, यौवराज्यधरोऽभवत् ॥ १२ ॥

१ नक्षत्राणीव । २ आह्लादकः ।

सधर्मचारिणी[१] चाऽऽसीज्जितशत्रुमहीपतेः । श्रीमती विजयादेवी, देवीव भुवमागता ॥ १३ ॥
पाणिभ्यां चरणाभ्यां च, नेत्राभ्यां च मुखेन च । चकासामास विकचाम्भोजखण्डमयीव सा ॥ १४ ॥
पृथिव्या भूपणं साऽभूत्, तस्याः शीलं तु भूषणम् । अन्वभूषणभारस्तु, प्रक्रियामात्रहेतुकः ॥ १५ ॥
कलाकलापकलनाद्, विश्वशोभानिबन्धनात् । देवी सरस्वती वा साऽवतीर्णा कमलाऽथवा ॥ १६ ॥
स नरेषूत्तमो राजा सा नारीषु शिरोमणिः । सदृग्योगस्तयोरासीद्, गङ्गासागरयोरिव ॥ १७ ॥
इतश्च विजयाच्च्युत्वा, जीवो विमलभूभुजः । तस्याः श्रीविजयादेव्याः, कुक्षौ रत्नखनाविव ॥ १८ ॥
राधशुक्लत्रयोदश्यां[२], रोहिणीधिष्ण्यगे[३] विधौ । ज्ञानत्रयधरः पुत्ररत्नत्वेनोदपद्यत ॥ १९ ॥
प्रभावात् स्वामिनस्तस्य, गर्भवासमुपेयुषः । क्षणं सुखं समुत्पेदे, नारकप्राणिनामपि ॥ २० ॥
तस्या एव हि यामिन्यास्तुर्ये[४] यामेऽतिपावने । देव्या विजयया स्वप्ना, अदृश्यन्त चतुर्दश ॥ २१ ॥
आदौ तत्र मदामोदभ्रमद्भ्रमरमण्डलः । गर्जितेनाऽतिपर्जन्यो, गजः सुरगजोपमः ॥ २२ ॥
उत्तुङ्गशृङ्गरुचिरः, शरदम्भोदपाण्डुरः । रम्यपादोऽथ वृषभः, कैलास इव जङ्गमः ॥ २३ ॥
नखैरिन्दुकलावक्त्रैरतिकुङ्कुमकेसरैः । केसरैश्च भ्राजमानः, पञ्चाननयुवाऽपि च[५] ॥ २४ ॥
उदस्तपूर्णकुम्भाभ्यां, कुम्भिभ्यां[६] पार्श्वयोर्द्वयोः । क्रियमाणाभिषेका च, कमला कमलासना ॥ २५ ॥
विकासिकुसुमामोदाधिवासितदिगन्तरम् । दिवो ग्रैवेयकमिव, पुष्पदाम दिवि स्थितम् ॥ २६ ॥
सम्पूर्णमण्डलत्वेनाऽकाण्डे राकां[७] प्रदर्शयन् । ज्योत्स्नातरङ्गीतव्योमा, शीतधामा ततः परम् ॥ २७ ॥

१ पत्नी । २ वैशाखः । ३ रोहिणीनक्षत्रस्थिते । ४ रात्रेः । ५ सिंहः । ६ हस्तिभ्याम् । ७ पूर्णिमाम् ।

ध्वस्तान्धकारपटलः, प्रसरद्भिर्मरीचिभिः । रजन्यामपि तन्वानो, दिनं दिनमणिस्ततः ॥ २८ ॥
शाखा कल्पद्रुमस्येव, शृङ्गं रत्नगिरेरिव । अभ्रंलिहपताकाङ्कस्तथा रत्नमयध्वजः ॥ २९ ॥
विकस्वरनवश्वेतसरोजपिहिताननः । मङ्गलस्यैकनिलयः, पूर्णकुम्भोऽतिशोभनः ॥ ३० ॥
पङ्कजैरङ्कितो विश्वक्, श्रीदेव्या विष्टरैरिव[1] । पद्माकरोऽथ स्वच्छाम्भोलहरीभिर्मनोहरः ॥ ३१ ॥
उपर्युपरि कल्लोलं, कल्लोलैरम्बुधिस्तथा । नभःस्थितं चन्द्रमसमालिङ्गितुमना इव ॥ ३२ ॥
अनुत्तरविमानेभ्य, इवैकतमदागतम् । विचित्ररत्नरचितं, विमानप्रवरं तथा ॥ ३३ ॥
स्वरत्नसर्वस्वमिव, प्रसूतं रत्नगर्भया । अत्यद्भुतप्रभापुञ्जो, रत्नपुञ्जस्तथोच्चकैः ॥ ३४ ॥
तेजस्विनामशेषाणां, त्रैलोक्योदरवर्तिनाम् । तेजःपुञ्ज इवैकत्राऽऽहृतो निर्धूमपावकः ॥ ३५ ॥
एते च विजयादेव्या, परिपाट्याऽनया[2] निजे । प्रविशन्तो मुखाम्भोजेऽदृश्यन्त भ्रमरा इव ॥ ३६ ॥
सिंहासनप्रकम्पोऽभूत्, तदानीं च दिवस्पतेः । चक्षुःसहस्रादधिकं, चक्षुः प्रायुङ्क्त सोऽवधिम् ॥ ३७ ॥
अवधिज्ञानतोऽज्ञासीत्, तीर्थकृद्गर्भसम्भवम् । रोमाञ्चितवपुश्चैवं, चिन्तयामास वासवः ॥ ३८ ॥
असाविदानीं विजयादनुत्तरविमानतः । अच्योष्ट जगदानन्दनिदानं परमेश्वरः ॥ ३९ ॥
ततश्च जम्बूद्वीपाभिधाने द्वीपवरेऽधुना । याम्य[3]भारतवर्षार्धमध्यखण्डस्य मध्यतः ॥ ४० ॥
विनीतायां महापुर्यां, जितशत्रोर्महीपतेः । भार्याया विजयादेव्याः, कुक्षौ समवतीर्णवान् ॥ ४१ ॥
एतस्यामवसर्पिण्यां, करुणारससागरः । भगवांस्तीर्थनाथोऽयं, द्वैतीयीको भविष्यति ॥ ४२ ॥

१ आसनैरिव । २ इन्द्रस्य । ३ दक्षिणम् ।

चेतसा चिन्तयित्वैवं, शुनासीरः[1] ससम्भ्रमम् । सिंहासनं पादपीठं, पादुके अपि चाऽत्यजत् ॥ ४३ ॥
गत्वा पदानि सप्ताऽष्टान्युन्मुखं तीर्थकृद्दिशः । सद्यः कृतोत्तरासङ्गो, देवराजस्ततो भुवि ॥ ४४ ॥
विन्यस्य दक्षिणं जानुं, वामं च न्यञ्च्य किञ्चन । नमश्चक्रे शिरःपाणिसंस्पृष्टवसुधातलः ॥ ४५ ॥ ॥ युग्मम् ॥
अवन्दिष्ट जिनं शक्रः, शक्रस्तवपुरःसरम् । जगाम च विनीतायां, जितशत्रुनृपौकसि ॥ ४६ ॥
ज्ञात्वाऽर्हतोऽवतारं च, तदैवाऽऽसनकम्पतः । भक्त्या समाययुस्तत्राऽपरेऽपि पुरन्दराः ॥ ४७ ॥
तत्र चाऽऽमलकस्थूलैरमलैः समवर्तुलैः । अनर्घ्यैर्मौक्तिकगणैर्विन्यस्तस्वस्तिकाजिरम् ॥ ४८ ॥
शातकुम्भमयैः[2] स्तम्भैर्नीलपाञ्चालिकाङ्कितैः[3] । पत्रैर्मरकतमयैर्द्वारि रचिततोरणम् ॥ ४९ ॥
परितो रचितोल्लोचमखण्डैः सूक्ष्मतन्तुभिः । दिव्यांशुकैः पञ्चवर्णैः, सन्ध्यामेघैरिवाऽम्बरम् ॥ ५० ॥
सुवर्णधूपघटिकायन्त्रोद्यद्धूमवर्तिभिः । स्थापत्ययष्टिभिरिवोद्यताभिः[4] परिशोभितम् ॥ ५१ ॥
स्वामिन्या विजयादेव्याः, शय्यासदनमुच्चकैः । कल्याणीभक्तयोऽभ्येयुरिन्द्राः शक्रादयोऽथ ते ॥ ५२ ॥
॥ पञ्चभिः कुलकम् ॥
उन्नते पार्श्वतः किञ्चित्, किञ्चिन्निम्ने च मध्यतः । हंसरोमलतातूलपूर्णोच्छीर्षकशालिनि ॥ ५३ ॥
विशदाच्छादनास्तीर्णे, तत्र तल्पे मनोरमे । ददृशुः स्वामिनीं गङ्गापुलिने हंसिकामिव ॥ ५४ ॥ ॥ युग्मम् ॥
आत्मानं ज्ञापयित्वा ते, नत्वा च व्याचचक्षिरे । विजयायै स्वप्नफलं, तीर्थकृज्जन्मलक्षणम् ॥ ५५ ॥
आदिदेश ततः शक्रो, धनदं यदियं त्वया । ऋषभस्वामिराज्यादौ, रत्नाद्यैः पूरपूर्यत ॥ ५६ ॥

१ इन्द्रः । २ सुवर्णमयैः । ३ पुत्तलिका । ४ अन्तःपुररक्षकः ।

नवीकुरु पुरीमेतां, नूतनैस्तद्गृहादिभिः । मधुमास इवोद्यानं, प्रत्यग्रैः पल्लवादिभिः ॥ ५७ ॥
रत्नैः स्वर्णैर्धनैर्धान्यैर्वासोभिश्च समन्ततः । पूरयेमां पुरीं पृथ्वीं, जलैरिव बलाहकः ॥ ५८ ॥
इत्युक्त्वा सोऽपरेऽपीन्द्रा, मध्येनन्दीश्वरं ततः । गत्वा चक्रुः शाश्वतार्हत्प्रतिमाष्टाह्निकोत्सवम् ॥ ५९ ॥
ततो निजनिजं स्थानं, ययुः सर्वेऽपि वासवाः । यक्षोऽपि कृत्वेन्द्रादिष्टं, तत्पुर्याः स्वपुरीं ययौ ॥ ६० ॥
स्वर्णराशिभिरुत्तुङ्गैः, शृङ्गैर्मेरुगिरेरिव । क्लृप्तधौतोच्चयैरुच्चैर्वैताढ्यशिखरैरिव ॥ ६१ ॥
रत्नाकरस्य सर्वस्वेनेव रत्नोत्करैरपि । धान्यैश्च सप्तदशभिर्बीजैरिव जगन्मुदः ॥ ६२ ॥
वासोभिः कल्पवृक्षेभ्यः, सर्वतोऽप्याहृतैरिव । ज्योतिष्काणामिव रथैर्वाहनैश्चाऽतिसुन्दरैः ॥ ६३ ॥
नवीकृता प्रतिगृहं, प्रत्यापणचतुष्पथम् । अलकापतिना पूर्णा, साऽलकेव पुरी बभौ ॥ ६४ ॥
॥ चतुर्भिः कलापकम् ॥
सुमित्रस्याऽपि गृहिणी, स्वप्नांस्तानेव तन्निशि । वैजयन्ती निरैक्षिष्ट, यशोमत्यपराभिधा ॥ ६५ ॥
ततस्तद्रजनीशेषं, कुमुदिन्याविवोन्मुदौ । विजया-वैजयन्त्यौ ते, जाग्रत्यावेव निन्यतुः ॥ ६६ ॥
विजया स्वामिनी प्रातस्तान् स्वप्नान् जितशत्रवे । आचचक्षे वैजयन्ती, सुमित्रविजयाय तु ॥ ६७ ॥
तान् स्वप्नान् विजयादेव्या, विचार्य मनसर्जुना । आख्याति स्म स्वप्नफलमेवं वसुमतीपतिः ॥ ६८ ॥
एभिः स्वप्नैर्महादेवि!, यशोवृद्धिर्गुणैरिव । विशेषज्ञानसम्पत्तिरागमाभ्यसनैरिव ॥ ६९ ॥
जगदुद्योतनमिव, प्रद्योतनमरीचिभिः[२] । तत्र त्रिजगदुत्कृष्टो, नूनं सूनुर्भविष्यति ॥ ७० ॥
एवं स्वप्नफलं राज्ञो, यथाप्रज्ञं विविञ्चतः । सुमित्रविजयोऽभ्यागात्, प्रतीहारीनिवेदितः ॥ ७१ ॥

१ रूप्यराशिभिः । २ सूर्यकिरणैः ।

नृदेवं देववन्नत्वा, पञ्चाङ्गस्पृष्टभूतलः । निषसाद यथास्थानं, सुमित्रविजयस्ततः ॥ ७२ ॥
क्षणं स्थित्वा पुनर्नत्वा, भक्तितो वसुधापतिम् । एवं विज्ञपयामास, कुमारो रचिताञ्जलिः ॥ ७३ ॥
युष्मद्[१]ध्वा वैजयन्त्या, प्रहरेऽद्य निशोऽन्तिमे । निरीक्षाञ्चक्रिरे स्वप्नेऽमी मुखाब्जप्रवेशिनः ॥ ७४ ॥
तत्राऽऽदौ गज ऊर्जस्वी, गर्जिनिर्जितदिग्गजः । नदन्नुत्तुङ्ककुदः, ककुद्मान्[२] विशदाकृतिः ॥ ७५ ॥
उत्केसरततिर्व्यात्तानन: पञ्चाननोऽपि च । क्रियमाणाभिषेका श्रीर्हस्तिभ्यां पार्श्वयोर्द्वयोः ॥ ७६ ॥
पञ्चवर्णं च सुमनोदामैन्द्रमिव कार्मुकम् । सुधाकुण्डमिवाऽऽपूर्णं, शशी सम्पूर्णमण्डलः ॥ ७७ ॥
विश्वस्याऽप्याहूत इव, प्रतापस्तपनस्ततः । दिव्यरत्नमयः प्रेङ्खत्पताकश्च महाध्वजः ॥ ७८ ॥
पूर्णकुम्भो नवश्वेताम्भोरुहच्छादितानन: । सहस्राक्षमिव स्मेरैः, पद्मैः पद्मसरोऽपि च ॥ ७९ ॥
आपिप्लावयिषुरिव[३], द्यामप्यूर्मिभिरम्बुधिः । सामानिकविमानाभं, विमानं च महर्द्धिकम् ॥ ८० ॥
सारं रत्नाचलस्येव, रत्नपुञ्जः स्फुरत्प्रभः । धूमध्वजश्च निर्धूमः, शिखापल्लविताम्बरः ॥ ८१ ॥
एते ददृशिरे स्वप्नाः, फलमेषां तु तत्त्वतः । देव एव हि जानाति, फलभाग् देव एव च ॥ ८२ ॥
राजाऽप्युवाचाऽमी स्वप्ना, देव्या विजययाऽपि हि । अद्यैव यामे यामिन्यास्तुर्ये ददृशिरे स्फुटाः ॥ ८३ ॥
यद्यप्येते महास्वप्नाः, सामान्येन महाफलाः । आनन्दकारिणो राकानिशाकरकरा इव ॥ ८४ ॥
तथाऽपि तज्ज्ञाः प्रष्टव्याः, फलं ज्ञातुं विशेषतः । अमीषां कुमुदानन्दकृत्त्वं शशिरुचामिव ॥ ८५ ॥
आमित्युक्ते कुमारेण, राज्ञा सादरमीरितः[४] । आजुहाव प्रतीहारः, स्वप्नशास्त्रविचक्षणान् ॥ ८६ ॥

१ मम पत्न्या । २ वृषभः । ३ प्लावयितुमिच्छुः । ४ प्रेरितः ।

ते धौतश्वेतवसनावृताः स्नानामलत्विषः । पार्वणोडुपतिज्योत्स्नाच्छादितास्तारका इव ॥ ८७ ॥
दूर्वाङ्कुरैः शिरोन्यस्तैरवतंसधरा इव । सपुष्पकेशा नद्योघाः, सहंसेन्दीवरा इव ॥ ८८ ॥
गोरोचनाचूर्णकृतैस्तिलकैरलिकस्थितैः । अविम्लानज्ञानदीपशिखाभिरिव शोभिताः ॥ ८९ ॥
अनर्घ्यस्वल्परुचिरालङ्काराङ्कितविग्रहाः । सुगन्धिस्तोककुसुमा, इव चैत्रमुखद्रुमाः ॥ ९० ॥
नैमित्तिकाः पुरो राज्ञो, विज्ञप्ता वेत्रधारिणा । साक्षादिव ज्ञानशास्त्ररहस्यानि समाययुः ॥ ९१ ॥
ते मन्त्रानार्यवेदोक्तान्, विश्वकल्याणकारकान् । प्रत्येकं युगपदपि, पेठुरग्रे महीपतेः ॥ ९२ ॥
क्षेमङ्करं क्षितिपतेर्मूर्ध्नि दूर्वाक्षतादिकम् । प्रचिक्षिपुस्ते कुसुमान्युद्यानपवना इव ॥ ९३ ॥
भद्रासनेषु रम्येषु, द्वाःस्थसन्दर्शितेषु ते । अथाऽऽसाञ्चक्रिरे हंसाः, पद्मिनीच्छदनेष्विव ॥ ९४ ॥
जायां वधूं च तदनु, राजा यवनिकान्तरे । आसयामास शशभृल्लेखामिव धनान्तरे ॥ ९५ ॥
साक्षात् स्वप्नफलमिवाऽञ्जलौ पुष्पफले दधत् । जायावध्वोर्महास्वप्नांस्तेषामकथयन्नृपः ॥ ९६ ॥
जनान्तिकेन तत्रैव, पर्यालोच्य परस्परम् । स्वप्नशास्त्रानुसारात् ते, स्वप्नार्थं व्याचचक्षिरे ॥ ९७ ॥
देव! द्वासप्ततिः स्वप्नाः, स्वप्नशास्त्रे प्रकीर्तिताः । तेषु च त्रिंशदुत्कृष्टा, ज्योतिष्केषु ग्रहा इव ॥ ९८ ॥
स्वप्नानां त्रिंशतस्तेषां, मध्यादेते चतुर्दश । उदीर्यन्ते महास्वप्नाः, स्वप्नशास्त्रविशारदैः ॥ ९९ ॥
एतान् गर्भस्थिते तीर्थकरे चक्रधरेऽपि च । तन्माता क्रमशो रात्रितुर्ययामे निरीक्षते ॥ १०० ॥
मध्यादमीषां स्वप्नानां, सप्त मातेक्षते हरेः । चतुरः सीरिणो माता, मातैकं मण्डलेशितुः ॥ १०१ ॥

१ पूर्णिमाचन्द्रः । २ हंस-कमलसहिताः । ३ ललाटस्थितैः । ४ कमलिनीदलेषु । ५ चन्द्रलेखामिव । ६ एकान्ते । ७ वासुदेवस्य । ८ बलदेवस्य ।

न द्वौ युगपदर्हन्तौ, युगपच्चक्रिणौ न च । एकस्यास्तीर्थकृत् सूनुरन्यस्याश्चक्रभृत् ततः ॥ १०२ ॥
ऋषभे भरतश्चक्री, सौमित्रिः सगरोऽजिते । जितशत्रुसुते तीर्थङ्कर इत्यर्हदागमात् ॥ १०३ ॥
ज्ञातव्यो विजयादेव्याः, सूनुस्तीर्थकरः खलु । षट्खण्ड भरताधीशो, वैजयन्त्यास्तु नन्दनः ॥ १०४ ॥
परितुष्टस्ततस्तेषां, नृपतिः पारितोषिकम् । प्रददौ ग्रामखेटादि, वस्त्रालङ्करणादि च ॥ १०५ ॥
आजन्मदौ[1]:स्थ्यमगमत्, तेषां तज्जन्मशंसनात् । महापुमांसो गर्भस्था, अपि लोकोपकारिणः ॥ १०६ ॥
वस्त्रालङ्करणैः कल्पद्रुमा इव विराजिनः । ते राजानुज्ञया जग्मुस्ततः स्वं स्वं निकेतनम् ॥ १०७ ॥
विजया-वैजयन्त्यौ च, वासागारं निजं निजम् । जग्मतुर्मुदिते गङ्गा-सिन्धू इव पयोनिधिम् ॥ १०८ ॥
ततः पुरन्दरादेशान्नित्यं देवासुरस्त्रियः । सेवितुं विजयादेवीमेवमारेभिरे भृशम् ॥ १०९ ॥
स्वामिनीसदनात् पांसुतृणकाष्ठादि सर्वतः । सदाऽपनिन्यिरे वायुकुमाररमणीजनाः ॥ ११० ॥
गन्धोदकेन सिषिचुस्तद्वेश्माङ्गणभूमिकाम् । भुजिष्य[2]जनवन्मेघकुमारकमृगीदृशः ॥ १११ ॥
ववृषुः पञ्चवर्णानि, पुष्पाणि ऋतुदेवताः । प्रभोर्गर्भस्थितस्याऽपि, दातुमर्घमिवोद्यताः ॥ ११२ ॥
प्रकाशमुपनिन्युश्च, ज्योतिष्काणां पुरन्ध्रयः । यथासुखं यथाकालं, स्वामिन्या भाववेदिकाः ॥ ११३ ॥
वनदेव्यो दास्य इव, चक्रिरे तोरणादिकम् । ता मागधस्त्रिय इव, तुष्टुवुश्च सुरस्त्रियः ॥ ११४ ॥
देवताभिरिति स्वाधिदेवतेव ततोऽपि वा । अधिकेव प्रतिदिनं, विजयादेव्यसेव्यत ॥ ११५ ॥
कालिकेव[3]ांऽशुमद्बिम्बं, निधानमिव मेदिनी । विजया वैजयन्ती च, देवी गर्भमधारयत् ॥ ११६ ॥

१ आजन्मदारिद्र्यम् । २ दासीजनवत् । ३ मेघमाला ।

निसर्गेणाऽपि राजन्त्यौ, ते गर्भेणाऽतिरेजतुः । सरस्याविव सम्पूर्णे, मध्ये स्वर्णाम्बुजन्मना ॥ ११७ ॥
स्वर्णप्रभागौरमपि, तयोर्वदनपङ्कजम् । पाण्डिमानं दधौ दन्तिदन्तच्छेदच्छविस्पृशम् ॥ ११८ ॥
तयोः कर्णान्तविश्रान्ते, स्वभावादपि लोचने । अधिकं सविकासे चाऽजायेतां शरदब्जवत् ॥ ११९ ॥
तयोर्लवणिमा[1] तादृगवर्धिष्टाऽधिकाधिकम् । सद्यो मार्जितयोः कान्तिर्हैम्योरिव शलाकयोः ॥ १२० ॥
अग्रेऽपि मन्थरं यान्त्यौ, विशेषादतिमन्थरम् । देव्यौ सञ्चेरतू राजहंस्याविव मदालसे ॥ १२१ ॥
अतिगूढं ववृधाते, तयोर्गर्भौ सुखप्रदौ । नलिनीनालवन्नद्योः, शुक्त्योर्मौक्तिकरत्नवत् ॥ १२२ ॥
ततो नवसु मासेषु, दिनेष्वर्धाष्टमेषु च । गतेषु माघमासस्य, शुक्लाष्टम्यां शुभे क्षणे ॥ १२३ ॥
ग्रहेषूच्चस्थितेष्वृक्षे[2], रोहिण्यां गजलाञ्छनम् । असूत विजया सूनुं, पुण्यं सूनृतवागिव ॥ १२४ ॥
प्रसूतिदुःखं नो देव्या, न सूनोरप्यजायत । स एष तीर्थनाथानां, प्रभावो हि स्वभावजः ॥ १२५ ॥
जज्ञे तदानीमुद्योतः, क्षणं त्रिभुवनेऽपि हि । अकाण्डोद्भूतनिर्मेघविद्युदुद्योतसोदरः ॥ १२६ ॥
नारकाणामपि सुखं, तदा क्षणमजायत । अभ्रच्छायासुखमिव, पान्थानां शरदागमे ॥ १२७ ॥
शरद्यपामिव तदा, प्रसादः ककुभामभूत् । अत्युल्लासश्च लोकानां, कमलानामिवोषसि ॥ १२८ ॥
प्रदक्षिणोऽनुकूलश्च, भूमिसर्पी च मारुतः । मन्दं मन्दं ववौ सद्यो, भूतलादुद्भवन्निव ॥ १२९ ॥
सञ्जज्ञिरे समन्ताच्च, शकुनाः शुभसूचकाः । सर्वं हि शुभमेव स्याज्जन्मतोऽपि शुभात्मनाम् ॥ १३० ॥
तदा च दिक्कुमारीणामासनानि चकम्पिरे । उन्मनांसीवोत्पतितुं[3], जिनान्तिकयियासया[4] ॥ १३१ ॥

१ लावण्यम् । २ नक्षत्रे । ३ उत्सुकानीव । ४ जिनसमीपं जिगमिषया ।

चारुचूडामणिरुचिप्रसरव्यपदेशतः । रचितोदात्तकौसुम्भवस्त्रनीरङ्गिका इव ॥ १३२ ॥
शोभिताः स्वप्रभापूर्णान्तरैर्मौक्तिककुण्डलैः । सुधाकुण्डैरिव झलज्झलायितसुधोर्मिभिः ॥ १३३ ॥
ग्रैवेयकैः शोभमाना, विचित्रमणिनिर्मितैः । कुण्डलीकृतसुत्रामकोदण्डश्रीविडम्बिभिः[१] ॥ १३४ ॥
अधिस्तनतटामुक्तैर्मुक्ताहारैर्मनोहराः । रत्नशैलतटीचञ्चन्निर्झरश्रीमलिम्लुचैः ॥ १३५ ॥
माणिक्यचूडावलयैर्विराजद्भुजवल्लयः[२] । न्यासीकृतैरनङ्गेन, निषङ्गैरिव[३] चारुभिः ॥ १३६ ॥
अनर्घ्यरत्नरचितां, दधाना रसनालताम्[४] । जगज्जिगीषोः पञ्चेषोः[५], कृते ज्यामिव सज्जिताम् ॥ १३७ ॥
अङ्गांशुनिर्जितैः सर्वज्योतिष्काणामिवांऽशुभिः । लग्नैश्चरणपद्मेषु, शोभिता रत्ननूपुरैः ॥ १३८ ॥
काश्चिन्नीलाङ्गरुचयः, प्रियङ्गुलतिका इव । काश्चित् स्वभाभिस्तन्वन्त्यस्तालीवनमिवाऽम्बरे ॥ १३९ ॥
विकिरन्त्यो रुचीः काश्चिद्, बालारुणरुचीरिव । स्नपयन्त्यो रुचा काश्चित्, सितया ज्योत्स्नयेव खम् ॥१४०॥
काश्चिद् ददत्यः कनकसूत्राणीव दिशां रुचा । काश्चिच्च कान्त्या वैडूर्यरत्नपाञ्चालिका इव ॥ १४१ ॥
सर्वाः कुचाभ्यां वृत्ताभ्यां, सचक्रा[६] इव निम्नगाः । सर्वाः सलीलगामिन्यो, राजहंसाङ्गना इव ॥ १४२ ॥
सपल्लवा इव लताः, सर्वाः कोमलपाणयः । उन्निद्रपद्माः पद्मिन्य, इव सर्वाः सुलोचनाः ॥ १४३ ॥
सर्वा लावण्यपूरेण, सजला इव दीर्घिकाः । सर्वाः सौन्दर्यशालिन्यो, मन्मथस्येव देवताः ॥ १४४ ॥
सञ्जाताऽऽसनकम्पेन, किमेतदिति सम्भ्रमात् । षट्पञ्चाशदपि हि ताः, सद्यः प्रायुञ्जताऽवधिम् ॥ १४५ ॥
॥ पञ्चदशभिः कुलकम् ॥

१ इन्द्रधनुः । २ करकङ्कणैः । ३ तूणीरैः । ४ कटिमेखलाम् । ५ कामदेवस्य । ६ चक्रवाकसहिताः ।

तत्कालमवधिज्ञानाद्, युगपद् दिक्कुमारिकाः । विविदुर्विजयादेव्यां, तीर्थकृज्जन्म पावनम् ॥ १४६ ॥
एवं च चिन्तयामासुर्जम्बूद्वीप इहैव हि । याम्य भारतवर्षार्धमध्यखण्डस्य मध्यतः ॥ १४७ ॥
विनीतायां महापुर्यामिक्ष्वाकुकुलजन्मनः । विजयायां धर्मपत्न्यां, जितशत्रुमहीपतेः ॥ १४८ ॥
एतस्यामवसर्पिण्यां, भगवानेष तीर्थकृत् । ज्ञानत्रयधरः श्रीमान्, द्वितीय उदपद्यत ॥ १४९ ॥
विमृश्यैवं समुत्थायाऽऽसनेभ्यस्तां ससम्मदाः । ददुः पदानि सप्ताऽष्टान्युन्मुखं तीर्थकृद्दिशः ॥ १५० ॥
पुरस्कृत्येव मनसा, नमस्कृत्य जिनेश्वरम् । शक्रस्तवेन ताः सर्वा, अवन्दन्तोरुभक्तयः ॥ १५१ ॥
वलित्वा पुनरध्यास्य, रत्नसिंहासनानि ताः । इत्यादिशन्निजनिजानमरानाभियोगिकान् ॥ १५२ ॥
हंहो! गन्तव्यमस्माभिर्भरतार्धेऽद्य दक्षिणे । समुत्पन्नद्वितीयार्हत्सूतिकाकर्महेतवे ॥ १५३ ॥
ततो वितत[1]गर्भाणि, नानामणिमयानि च । विकुरुध्वं विमानानि, महामानानि नः कृते ॥ १५४ ॥
दन्तुराणि ततः कुम्भैः, शातकौम्भैः सहस्रशः । वैमानिकविमानानामुत्पत्राणीव केतुभिः ॥ १५५ ॥
रुचिराणि मणिस्तम्भैः, शालभञ्जीविराजितैः । ताण्डवश्रमविश्रान्तनर्त्तकीनिचयैरिव ॥ १५६ ॥
स्तम्बेरमानुकारी[2]णि, घण्टानिर्घोषडम्बरैः । प्रक्वणत्किङ्किणीजालैर्वाचालानि निरन्तरम् ॥ १५७ ॥
रम्याणि वज्रवेदीभिः, श्रियामिव महासनैः । रुक्सहस्रैः सहस्रांशुबिम्बानीव प्रसारिभिः ॥ १५८ ॥
ईहामृगै रत्नमयैर्ऋषभै[3]स्तुरगैर्नरैः । रुरु[4]भिर्मकरैर्हंसैः, शर[5]भैश्चमरैर्गजैः ॥ १५९ ॥
किन्नरैर्वनलताभिस्तथा पद्मलतोच्चयैः । अङ्कितान्यभितो भित्तिवलभीस्तम्भमूर्धसु ॥ १६० ॥

१ विस्तृतमध्यभागानि । २ हस्तिसदृशानि । ३ वृषभैः । ४ मृगैः । ५ अष्टापदैः ।

आदेशेन समं तासां, ते देवा आभियोगिकाः । विकृत्य दर्शयामासुर्विमानान्युरुशक्तयः ॥ १६१ ॥
॥ सप्तभिः कुलकम् ॥

अथाऽधोलोकवास्तव्यास्तास्वष्टौ दिक्कुमारिकाः । देवदूष्यनिवसनाः, पुष्पालङ्कृतकुन्तलाः ॥ १६२ ॥
भोगङ्करा भोगवती, सुभोगा भोगमालिनी । तोयधारा विचित्रा च, पुष्पमालाऽप्यनिन्दिता ॥ १६३ ॥
प्रत्येकं च सामानिकीचत्वारिंशच्छतावृताः । महत्तराभिः प्रत्येकं, तथा चतसृभिर्युताः ॥ १६४ ॥
प्रत्येकं च महानीकैः, सप्तभिः परिवारिताः । अनीकाधिपतिभिश्च, प्रत्येकमपि सप्तभिः ॥ १६५ ॥
आत्मरक्षीसहस्रैश्चैकैका षोडशभिर्युताः । अन्यैश्च व्यन्तरैर्देवैर्देवीभिश्च महर्द्धिभिः ॥ १६६ ॥
विमानानि समारुह्य, गीतनृत्तमनोहरम् । प्रति पूर्वोत्तरदिशं[1], सोत्कण्ठमुपचक्रमुः ॥ १६७ ॥
अथ कृत्वा समुद्घातं, वैक्रियं ताः क्षणादपि । योजनान्यसङ्ख्यानि[2], यावद् दण्डं विचक्रिरे ॥ १६८ ॥
रत्ने-वैडूर्य-वज्राणां, लोहिताक्षाङ्कयोरपि । अञ्जनाञ्जनपुलक-पुलकानां तथैव च ॥ १६९ ॥
ज्योतीरस-सौगन्धिक-रिष्टानां स्फटिकाश्मनाम् । जातरूपहंसगर्भरत्नानामपि सर्वतः ॥ १७० ॥
तथा मसारगल्लानां, मणीनां स्थूलपुद्गलान् । परितः शातयामासुर्जगृहुश्चाऽणुपुद्गलान् ॥ १७१ ॥
ततश्च चक्रिरे स्वं स्वं, रूपमुत्तरवैक्रियम् । देवतानां जन्मसिद्धाः, खलु वैक्रियलब्धयः ॥ १७२ ॥
उत्कृष्टया त्वरितया, चलया चण्डयाऽपि च । सिंहोद्धताभ्यां पतनाच्छेकाभ्यामथ दिव्यया ॥ १७३ ॥
देवगत्या तथा सर्वऋद्धा सर्वबलेन च । ययुः पुर्यामयोध्यायां, जितशत्रुनृपौकसि ॥ १७४ ॥

१ एशानीम् । २ असङ्ख्यातानि ।

ततो महाविमानैः स्वैर्ज्योतींषीवाऽमराचलम्[1] । तास्त्रिः प्रदक्षिणीचक्रुस्तीर्थकृत्सूतिकागृहम् ॥ १७५ ॥
चतुरङ्गुलमात्रेणाऽसंस्पृशन्त्यो महीतलम् । अस्थापयन् विमानानि, पूर्वोदीच्यां ततश्च ताः ॥ १७६ ॥
प्रविश्य सूतिकागारं, जिनेन्द्रं जिनमातरम् । त्रिस्ताः प्रदक्षिणीकृत्य, बद्धाञ्जल्येवमूचिरे ॥ १७७ ॥
नमस्तुभ्यं जगन्मातः!, कुक्षिणा रत्नधारिणि! । सर्वनारीसारभूते!, जगद्दीपप्रदायिनि! ॥ १७८ ॥
त्वं धन्याऽसि पवित्राऽसि, त्वं चाऽसि जगदुत्तमा । मनुष्यलोके चैतस्मिन्, जन्मेदं सफलं तव ॥ १७९ ॥
यत् त्वं पुरुषरत्नस्य, कारुण्यक्षीरनीरधेः । त्रैलोक्यवन्दनीयस्य, स्वामिनो धर्मचक्रिणः ॥ १८० ॥
जगद्गुरोर्जगद्बन्धोर्विश्वानुग्रहकारिणः । द्वितीयस्याऽवसर्पिण्यां, जिनेन्द्रस्य जनन्यसि ॥ १८१ ॥ ॥ युग्मम् ॥
मातर्वयमधोलोकवास्तव्या दिक्कुमारिकाः । कर्तुं तीर्थकृतो जन्ममहिमानमिहाऽऽगताः ॥ १८२ ॥
तद् युष्माभिर्न भेतव्यमित्युदीर्य प्रणम्य च । पूर्वोत्तरस्यां ककुभि तत्र ता व्यपचक्रमुः ॥ १८३ ॥
वैक्रियेण समुद्घातेनाऽथ ताः शक्तिसम्पदा । वातं संवर्त्तकं नाम, क्षणेनाऽपि विचक्रिरे ॥ १८४ ॥
शिवेन मृदुशीतेन, तेन तिर्यक्प्रवायिना । सर्वर्तुकुसुमाभोगगन्धसर्वस्ववाहिना ॥ १८५ ॥
मरुता सूतिकागारं, परितो योजनावधि । अपनीय तृणाद्युच्चैश्चोक्षीचक्रुः क्षमातलम् ॥ १८६ ॥
भगवद्भगवन्मात्रोरदूरवीयसि[2] तास्ततः । मङ्गल्यगीतं गायन्त्यो, हर्षवत्योऽवतस्थिरे ॥ १८७ ॥
अथोर्ध्वरुचकसंस्था, नन्दनोद्यानकूटगाः । दिव्यालङ्कारधारिण्य, इत्यष्टौ दिक्कुमारिकाः ॥ १८८ ॥
मेघङ्करा मेघवती, सुमेघा मेघमालिनी । सुवत्सा वत्समित्रा च, वारिषेणा बलाहका ॥ १८९ ॥

१ मेरुम् । २ अनतिदूरे ।

दिक्कुमारिका-कृतो जिन-जन्मोत्सवः ।

महत्तराभिः सामानिक्यङ्गरक्षीभिरेव च । अनीकानीकपतिभिः, पूर्ववत् परिवारिताः ॥ १९० ॥
एयुस्तत् सूतिकावेश्म, स्वामिजन्मपवित्रितम् । त्रिश्च प्रदक्षिणीचक्रुर्जिनेन्द्र-जिनमातरौ ॥ १९१ ॥
पूर्ववज्ज्ञापयित्वा स्वं, विजयायै प्रणम्य च । अभिष्टुत्य च तत्रोच्चैर्विचक्रुर्मेघदुर्दिनम् ॥ १९२ ॥
ततश्च भगवज्जन्मभवनाद् योजनावधि । नाऽतिस्तोकां नाऽतिबह्वीं, वृष्टिं गन्धोदकैर्व्यधुः ॥ १९३ ॥
तपसेवांऽहसां[1] राकाज्योत्स्नया तमसामिव । तया च रजसां शान्तिर्द्राग् वृष्ट्या समजायत ॥ १९४ ॥
ततो विचित्रमुन्निद्रं[2], पुष्पप्रकरमाशु ताः । तत्र रङ्गावनौ रङ्गाचार्या[3] इव विचक्रिरे ॥ १९५ ॥
घनसारागुरुप्रायधूपधूमेन चौच्चकैः । तां भुवं वासयामासुर्वासागारमिव श्रियः ॥ १९६ ॥
तीर्थकृत्तीर्थकृन्मात्रोरनत्यासन्नदूरतः । अथाऽमलान् स्वामिगुणांस्ता गायन्त्योऽवतस्थिरे ॥ १९७ ॥
अथ पूर्वरुचकाद्रिवास्तव्या दिक्कुमारिकाः । सहिताः सर्वया ऋद्ध्या, सकलेन बलेन च ॥ १९८ ॥
तत्र नन्दोत्तरानन्दे, आनन्दानन्दवर्धने । विजया वैजयन्ती च, जयन्ती चाऽपराजिता ॥ १९९ ॥
पूर्ववत् सपरीवारास्तदेयुः सूतिकागृहम् । त्रिश्च प्रदक्षिणीचक्रुस्ताः स्वामि-स्वामिमातरौ ॥ २०० ॥
स्वं ज्ञापयित्वा स्वामिन्यै, नत्वा स्तुत्वा च पूर्ववत् । तत्पूर्वतोऽस्थुर्गायन्त्यो, रत्नदर्पणपाणयः ॥२०१॥
अपाच्यरुचकशैलवास्तव्याश्चारुभूषणाः[4] । स्त्रग्विण्यो दिव्यवसना, इत्यष्टौ दिक्कुमारिकाः ॥ २०२ ॥
समहारा सुप्रदत्ता, सुप्रबुद्धा यशोधरा । लक्ष्मीवती शेषवती, चित्रगुप्ता वसुन्धरा ॥ २०३ ॥
प्राग्वत् परिच्छदभृतस्तस्मिन्नभ्येत्य वेश्मनि । नत्वा प्रदक्षिणापूर्वं, स्वामिन्यै स्वमजिज्ञपन् ॥ २०४ ॥

१ पापानाम् । २ विकसितम् । ३ सूत्रधाराः । ४ दाक्षिणात्यः ।

जिनेन्द्र-जिनजनन्योर्दक्षिणेन कलस्वनाः[१] । ता मङ्गलानि गायन्त्यस्तस्थुर्भृङ्गारपाणयः ॥ २०५ ॥
तथा प्रत्यग्रुचकाद्रिवास्तव्या दिक्कुमारिकाः । पूर्ववज्ज्ञापयित्वा स्वं, तावन्मात्रपरिच्छदाः ॥ २०६ ॥
इलादेवी सुरादेवी, पृथिवी पद्मवत्यपि । एकनासा नवमिका, भद्रा सीता च नामतः ॥ २०७ ॥
कृत्वा प्रदक्षिणापूर्वं, नतिं[२] जिन-जिनाम्बयोः । गायन्त्यः पश्चिमेनाऽस्थुश्चारुव्यजनपाणयः ॥ २०८ ॥
तथोदग्रुचकशैलवास्तव्या दिक्कुमारिकाः । निवेद्य प्राग्वदात्मानं, तथैव सपरिच्छदाः ॥ २०९ ॥
अलम्बुसा मिश्रकेशी, पुण्डरीका च वारुणी । हासा सर्वप्रभा चैव, ह्रीः श्रीरिति च नामतः ॥ २१० ॥
नत्वा प्रदक्षिणापूर्वं, पादान् जिन-जिनाम्बयोः । गायन्त्य उत्तरेणाऽस्थुश्चारुचामरपाणयः ॥ २११ ॥
विदिग्रुचकवास्तव्याश्चतस्रो दिक्कुमारिकाः । चित्रा चित्रकनका सतेरा सौत्रामणी तथा ॥ २१२ ॥
एत्य प्रदक्षिणापूर्वं, नमस्कारं विधाय च । जिनस्य जिनमातुश्च, स्वमायातं न्यवेदयन् ॥ २१३ ॥
स्वामिनः स्वामिमातुश्च, गायन्त्यो विपुलान् गुणान् । दीपिकापाणयस्तस्थुरैशान्यादिविदिक्षु ताः ॥ २१४॥
रुचकद्वीपमध्यस्थाश्चतस्रो दिक्कुमारिकाः । रूपा रूपांशिका चैव, सुरूपा रूपकावती ॥ २१५ ॥
प्रत्येकं पूर्ववत् सर्वपरिवारविराजिताः । महाविमानान्यारुह्याऽर्हज्जन्मगृहमाययुः ॥ २१६ ॥
तत् त्रिः प्रदक्षिणीचक्रुर्विमानेष्वेव ताः स्थिताः । अस्थापयन् विमानानि, देशे समुचिते ततः ॥ २१७ ॥
ततश्चरणचारिण्यो, जिनेन्द्र-जिनमातरौ । भक्त्या प्रदक्षिणीकृत्य, नत्वा चैवं बभाषिरे ॥ २१८ ॥
जय जीव चिरं नन्द, विश्वानन्दननन्दने! । सुमुहूर्त्तं जगन्मातरद्य त्वद्दर्शनेन नः ॥ २१९ ॥

१ मधुरस्वराः । २ नमस्कारम् ।

रत्नाकरो रत्नशैलो, रत्नगर्भा मुधा ह्यमी । त्वमेका रत्नभूः पुत्ररत्नं यत् सूतवत्यदः ॥ २२० ॥
वयं हि रुचकद्वीपमध्यस्था दिक्कुमारिकाः । अर्हतो जन्मकृत्यानि, कर्तुमत्र समागताः ॥ २२१ ॥
भवत्या तन्न भेतव्यमित्युक्त्वा परमेशितुः । चतुरङ्गुलवर्जं ता, नाभिनालमकल्पयन् ॥ २२२ ॥
खनित्वा विदरं[1] तत्र, नालं निधिमिव न्यधुः । विदरं पूरयामासू, रत्नैर्वज्रैश्च तं ततः ॥ २२३ ॥
बबन्धुस्तत्र पीठं ताः, सद्यः प्रोद्भूतदूर्वया । अप्युद्यानान्युद्भवन्ति, देवतानां प्रभावतः ॥ २२४ ॥
सूतिकावेश्मनस्तस्य, ककुप्सु[2] तिसृषु क्षणात् । विकुर्वन्ति स्म कदलीगृहाणि श्रीगृहाणि ताः ॥ २२५ ॥
प्रत्येकमेकं तन्मध्ये, चतुःशालं विचक्रिरे । मध्ये च तेषामेकैकं, रत्नसिंहासनं महत् ॥ २२६ ॥
ततश्च जगृहुस्तीर्थकरं करतलेन ताः । स्वामिनीं च भुजे निन्युश्चाऽपाच्यं[3] कदलीगृहे ॥ २२७ ॥
तत्र चाऽन्तश्चतुःशालं, रत्नसिंहासनोत्तमे । ताः सुखं स्वामिनं स्वामिमातरं च न्यवेशयन् ॥ २२८ ॥
स्वयं संवाहिकी[4]भूय, पाणिन्यासैर्यथासुखैः । शतपाकादिभिस्तैलैरभ्यङ्गं च तयोर्व्यधुः ॥ २२९ ॥
गन्धद्रव्यैः सुरभिभिः, सूक्ष्मपिष्टैः क्षणेन ताः । उद्वर्त्तनं विदधिरे, रत्नदर्पणवत् तयोः ॥ २३० ॥
जिनेन्द्रं करतलेन, जिनेन्द्रजननीं भुजे । गृहीत्वा निन्यिरे ताश्च, पौरस्त्ये[5] कदलीगृहे ॥ २३१ ॥
तत्र मध्ये चतुःशालं, रत्नसिंहासनोत्तमे । आसयामासुरथ ता, जिनेन्द्र-जिनमातरौ ॥ २३२ ॥
ताश्च गन्धोदकैः पुष्पोदकैः शुद्धोदकैरपि । द्वावपि स्नपयामासुस्तदिवाऽऽजन्मशिक्षिताः[6] ॥ २३३ ॥

१ गर्त्तम् । २ दिक्षु । ३ दक्षिणकदलीगृहे । ४ दासीभूय । ५ पूर्वदिक्सम्बन्धिनि । ६ जन्मत आरभ्य शिक्षिता इव ।

विचित्ररत्नालङ्कारांस्तास्ताभ्यां पर्यधापयन् । चिरात् स्वशक्तेस्तादृश्या, मन्यमानाः कृतार्थताम् ॥ २३४ ॥
जिनेन्द्र-विजयादेव्यौ, देव्योऽथाऽऽदाय पूर्ववत् । मनोहारिणि ता जग्मुरुदीच्ये कदलीगृहे ॥ २३५ ॥
तत्राऽऽसयंश्चतुःशालमध्यसिंहासने च ताः । तौ गृह्णन्तौ नगासीनसिंहीतत्सुतयोः[1] श्रियम् ॥ २३६ ॥
क्षणादानाययामासुस्त्रिदशैराभियोगिकैः । गोशीर्षचन्दनैधांसि, ताः[2] क्षुद्रहिमवद्गिरेः ॥ २३७ ॥
पावकं पातयामासुर्मथित्वाऽरणिदारुणी । जायते घृष्यमाणाद्धि, दहनश्चन्दनादपि ॥ २३८ ॥
समिधीकृत्य गोशीर्षचन्दनानि समन्ततः । एधयामासुरग्निं तं, देव्यस्ता आहिताग्निवत् ॥ २३९ ॥
ततस्तेनाऽग्निहोमेन, भूतिकर्म विधाय ताः । रक्षाग्रन्थिं जिनेन्द्रस्य, बबन्धुर्भक्तिबन्धुराः ॥ २४० ॥
पर्वतायुर्भवेत्युच्चैर्वदन्त्यो जिनकर्णयोः । मिथ आस्फालयामासू, रत्नपाषाणगोलकौ ॥ २४१ ॥
तीर्थङ्करं करतलेनाऽऽदाय विजयां भुजे । ताः सूतिकागृहे निन्युः, शय्यायां चाऽध्यरोपयन् ॥ २४२ ॥
ततश्च स्वामिनः स्वामिजनन्याश्चोज्ज्वलान् गुणान् । गायन्त्यो मञ्जु तास्तस्थुरनत्यासन्नदूरतः ॥ २४३ ॥
तदानीमेव सौधर्मे, कल्पेऽल्पेतरवैभवः[3] । आवृतो देवकोटीभिरप्सरोभिश्च कोटिशः ॥ २४४ ॥
कोटिशश्चारणवरैः, स्तूयमानपराक्रमः । गन्धर्ववर्गेणाऽखर्वं, गीयमानगुणोच्चयः ॥ २४५ ॥
पार्श्वतो वारनारीभिर्वीज्यमानश्च चामरैः । मूर्ध्नि श्वेतातपत्रेण, राजमानोऽतिहारिणा ॥ २४६ ॥
दत्तास्थानः सुधर्मायामास्थान्यां[4] प्राङ्मुखः सुखम् । शक्रो यावन्निषण्णोऽस्थाच्चकम्पे तावदासनम् ॥२४७॥
॥ चतुर्भिः कलापकम् ॥

१ पर्वतोपविष्टसिंहीतत्पुत्रयोः । २ अग्निः । ३ प्रभूतवैभवः । ४ सभायाम् ।

तेन चाऽऽसनकम्पेन, कोपाटोपविसंस्थुलः । कम्पमानाधरदलः, स्फुरज्ज्वाल इवाऽनलः ॥ २४८ ॥
उत्कटभ्रकुटीभीमो, व्योमेवोद्धूमकेतुकम् । आताम्रीभूतवदनो, मदाविष्ट इव द्विपः ॥ २४९ ॥
उत्तरङ्ग इवाऽम्भोधिस्त्रिवलीलाञ्छितालिकः[1] । वज्रमालोकयामास, वज्रभृद् वैरिघातकम् ॥ २५० ॥
॥ त्रिभिर्विशेषकम् ॥
तत्कोपमुपलक्ष्येत्थमुत्थायाऽग्रे कृताञ्जलिः । चमूपतिर्नैगमेषी, प्रोचे प्राचीनबर्हिषम्[2] ॥ २५१ ॥
कं प्रति स्वयमावेशो, मय्यप्यादेशकारिणि । सुरासुरमनुष्येषु, नाऽधिको न समश्च ते ॥ २५२ ॥
हेतुरासनकम्पस्य, यस्ते सम्प्रत्यजायत । विमृश्याऽऽज्ञापय स्वामिंस्तत्र मां दण्डकारिणम्[3] ॥ २५३ ॥
एवं च सेनापतिनाऽभिहितो दिविषत्पतिः[4] । कृत्वाऽवधानमवधिज्ञानं प्रायुङ्क्त तत्क्षणात् ॥ २५४ ॥
जैनप्रवचनेनेव, धर्मं दीपेन वस्त्विव । द्वितीयतीर्थकृज्जन्माऽज्ञासीदवधिना हरिः ॥ २५५ ॥
स दध्यौ चेत्यहो! जम्बूद्वीपे वर्षे च भारते । विनीतायां महापुर्यां, जितशत्रोर्महीपतेः ॥ २५६ ॥
जायाया विजयादेव्याः, सम्प्रत्ययमजायत । एतस्यामवसर्पिण्यां, द्वैतीयीको जिनेश्वरः ॥ २५७ ॥ ।युग्मम्॥
तेन चाऽऽसनकम्पोऽयं, धिग् धिग् दुश्चिन्तितं मया । ऐश्वर्येणोन्मदिष्णोर्मे[5], मिथ्यादुष्कृतमस्तु तत् ॥ २५८॥
चेतसा चिन्तयित्वैवं, रत्नसिंहासनं निजम् । पादपीठं पादुके च, त्यक्त्वोत्तस्थौ पुरन्दरः ॥ २५९ ॥
ससम्भ्रमः शतमखोऽभिमुखं तीर्थकृद्दिशः[6] । ददौ पदानि कतिचित्, प्रस्थानमिव साधयन् ॥ २६० ॥
न्यस्योर्व्यां दक्षिणं जानुमन्यं न्यञ्च्य च किञ्चन । क्ष्मां स्पृशन् पाणिशीर्षेण, ननाम स्वामिने हरिः ॥ २६१॥

१ ललाटम् । २ इन्द्रम् । ३ दण्डकारकम् । ४ इन्द्रः । ५ मत्तस्य । ६ इन्द्रः ।

शक्रस्तवेन वन्दित्वा, स्वामिनं पाकशासनः । वेलानिवृत्तोऽब्धिरिव, भेजे भूयः स्वभूमिकाम् ॥ २६२ ॥
अथ तत् तीर्थकृज्जन्म, सर्वान् ज्ञापयितुं सुरान् । तदुत्सवाय चाऽऽह्वातुं, गृहस्थः स्वजनानिव ॥ २६३ ॥
सद्यो रोमाञ्चितवपुर्वपुष्मानिव सम्मदः । आदिदेश शुनासीरः, सेनान्यं नैगमेषिणम् ॥ २६४ ॥ ॥ युग्मम् ॥
सादरं शिरसाऽऽदाय, पाकशासनशासनम् । सेनानीरपचक्राम, पीत्वेवाऽम्भः पिपासितः ॥ २६५ ॥
सुधर्मापरिषद्व्याः[1], कण्ठघण्टामिवोद्भटाम् । सोऽताडयत् सुघोषां त्रिर्घण्टां योजनमण्डलाम् ॥ २६६ ॥
तस्याश्च ताड्यमानाया, विश्वकर्णपथातिथिः । समुत्तस्थौ महान् नादो, मथ्यमानाम्बुधेरिव ॥ २६७ ॥
एकोनद्वात्रिंशल्लक्षा, घण्टा अन्या अपि स्फुटम् । प्रणेदुरथ तन्नादाद्, गोनादादिव तर्णकाः[2] ॥ २६८ ॥
तासां शब्देन घण्टानां, जृम्भमाणेन भूयसा । सौधर्मकल्पः सर्वोऽपि, शब्दाद्वैतमयोऽभवत् ॥ २६९ ॥
नित्यप्रमादिनस्तेषु, विमानेषु दिवौकसः । नादेन तेनाऽबुध्यन्त, सिंहा इव गुहाशयाः ॥ २७० ॥
आज्ञया द्युसदांराज्ञो, मन्ये केनाऽपि नाकिना । घोषणानाट्यनान्दीयं, सुघोषा वादिताऽधुना ॥ २७१ ॥
श्रोतव्या घोषणाऽवश्यं, वासवाज्ञाप्रकाशिनी । इत्याशयाद् दत्तकर्णमवातिष्ठन्त नाकिनः ॥ २७२ ॥ ॥युग्मम्॥
शान्ते सुघोषानिर्घोषे, कण्ठनादेन भूयसा । पुरन्दरस्य सेनानीश्चकाराऽऽघोषणामिति ॥ २७३ ॥
भो भोः! शृण्वन्तु गीर्वाणाः[3]!, सौधर्मस्वर्गवासिनः । समादिशति वः सर्वानसौ दिविषदांपतिः ॥ २७४ ॥
जम्बूद्वीपस्य भरतेऽयोध्यायां पुरि भूपतेः । जितशत्रोः सधर्मिण्यां, विजयायां जगद्गुरुः ॥ २७५ ॥
भाग्योदयेन विश्वस्य, विश्वानुग्रहकारकः । द्वितीयस्तीर्थनाथोऽद्य, प्रभुः समुदपद्यत ॥ २७६ ॥

१ सुधर्माख्यसभागव्याः । २ वत्साः । ३ हे देवाः! ।

तत् पावयितुमात्मानमस्माभिः सपरिच्छदैः । जिनजन्माभिषेकाय, गन्तव्यं तत्र सम्प्रति ॥ २७७ ॥
भवद्भिरपि सर्वर्द्ध्या, सर्वैः सर्वबलेन[1] च । तत्र गन्तुं मया सार्द्धमागन्तव्यमिह द्रुतम् ॥ २७८ ॥
तस्यैवमाघोषणया, स्तनितेनेव केकिनः[2] । कलयामासुरानन्दममन्दं त्रिदिवौकसः ॥ २७९ ॥
सद्यो विमानान्यारुह्य, पोतानिव[3] दिवौकसः । आक्रामन्तो नभोम्भोधिमाजग्मुः शक्रसन्निधौ ॥ २८० ॥
अन्तिके स्वामिनो गन्तुं, विमानं क्रियतामिति। आदिशत् पालकं नामाऽऽभियोगिकसुरं हरिः ॥ २८१ ॥
उद्विद्रुममिवाऽम्भोधिं, रत्नभित्तिमरीचिभिः । शातकुम्भमयैः[4] कुम्भैरुत्पद्ममिव मानसम् ॥ २८२ ॥
सर्वाङ्गीणं तिलक्तितमिव दीर्घैर्ध्वजांशुकैः । विचित्रै[6] रत्नशिखरैरुच्छेखरमिवोच्छ्रितैः ॥ २८३ ॥
रत्नस्तम्भैः श्रीकरेणोरिवाऽऽलानैर्मनोरमम्[5] । शालभञ्जीभिरन्याभिरप्सरोभिरिवाऽऽश्रितम्[7] ॥ २८४ ॥
आत्ततालं नटमिव, किङ्किणीजालमण्डितम् । सनक्षत्रं वियदिव, मौक्तिकस्वस्तिकाङ्कितम् ॥ २८५ ॥
ईहामृगाश्ववृषभैर्नरकिन्नरकुञ्जरैः । हंसैर्वनलतापद्मलताभिश्च मनोरमम् ॥ २८६ ॥
लक्षयोजनविस्तीर्णं, जम्बूद्वीपमिवाऽपरम् । पञ्चयोजनशत्युच्चं, विमानं विचकार सः ॥ २८७ ॥

॥ षड्भिः कुलकम् ॥

तिसृष्वाशासु तस्याऽऽसंस्तिस्रः सोपानपङ्क्तयः । महागिरेरवतरन्निर्झरोर्म्य इवाऽऽयताः ॥ २८८ ॥
अग्रे सोपानपङ्क्तीनामभूवन् रत्नतोरणाः । अखण्डाखण्डलधनुः श्रेणिश्रीसोदरा इव ॥ २८९ ॥

१ मेघगर्जितेन । २ मयूराः । ३ यानपात्राणि । ४ सुवर्णमयैः । ५ लक्ष्मीहस्तिन्याः । ६ बन्धनस्तम्भैः । ७ पुत्तलिकाभिः ।

आलिङ्गिपुष्करमुखादर्शदीपकमल्लिवत् । मध्यभागः[1] समतलस्तस्य मांसृण्यभागभूत् ॥ २९० ॥
सुस्पर्शैः सुप्रभैः पञ्चवर्णैश्चित्रैर्विचित्रितः । केकिपत्रैरिवाऽऽस्तीर्णो[2], भूमिभागो रराज सः ॥ २९१ ॥
अभवन्मध्यतस्तस्यैकः प्रेक्षागृहमण्डपः । क्रीडावेश्म श्रियामन्तर्नगर्या राजवेश्मवत् ॥ २९२ ॥
मध्य च तस्य विष्कम्भायामाभ्यामष्टयोजना । चतुर्योजनबाहल्या, बभूव मणिपीठिका ॥ २९३ ॥
तस्या उपर्येकमासीद्, रत्नसिंहासनोत्तमम् । महन्महत्यङ्गुलीये[3], माणिक्यमिव पावनम् ॥ २९४ ॥
तस्योपरिष्टादुल्लोचो, राजतोऽराजतोज्ज्वलः । स्त्यानीभूतशरज्ज्योत्स्नाप्रसरभ्रमदायकः[4] ॥ २९५ ॥
तन्मध्ये लम्बमानोऽभूदेको वज्रमयोऽङ्कुशः । तत्र प्रलम्ब्यभूदेकं, मुक्तादामैककुम्भिकम् ॥ २९६ ॥
तस्याऽनुजन्मान इव, ककुप्सु चतसृष्वपि । अर्धकुम्भप्रमैर्मुक्ताफलैर्हारस्रजोऽभवन् ॥ २९७ ॥
मन्दमान्दोल्यमानास्ते, वातेन मृदुनाऽद्युतन् । शुनासीरश्रियो लीलादोलालक्ष्मीमलिम्लुचाः ॥ २९८ ॥
महतस्तस्य शाक्रस्य, रत्नसिंहासनस्य तु । पूर्वोदीच्यामुदीच्यां चाऽपरोदीच्यां तथा दिशि ॥ २९९ ॥
चतुरशीतिसहस्रसामानिकदिवौकसाम् । भद्रासनानि तावन्ति, रत्नरम्याणि जज्ञिरे ॥ ३०० ॥
तत्राऽष्टानामिन्द्राणीनां, प्राच्यामष्टाऽऽसनानि च । कमलाकेलिमाणिक्यवेदिकासन्निभान्यभान् ॥ ३०१ ॥
दिशि दक्षिणपूर्वस्यां, तत्राऽभ्यन्तरपर्षदः । देवद्वादशसहस्र्या, अभवन्नासनानि तु ॥ ३०२ ॥
दक्षिणस्यां दिश्यभूवन्, मध्यायाः शक्रपर्षदः । चतुर्दशामरसहस्र्यासनानि निरन्तरम् ॥ ३०३ ॥
दिशि याम्यप्रतीच्यां च, बभूवुर्बाह्यपर्षदः । षोडशानां सहस्राणामासनानि दिवौकसाम् ॥ ३०४ ॥

१ मृदुताभाक् । २ मयूरपिच्छैः । ३ महत्यां मुद्रिकायाम् । ४ घनीभूतः ।

शक्रसिंहासनस्योच्चैस्तस्य पश्चिमतोऽभवन् । सप्तानामप्यनीकाधिपतीनामासनानि तु ॥ ३०५ ॥
शक्रासनस्य प्रत्येकं, ककुप्सु चतसृष्वपि । चतुरशीत्यात्मरक्षसहस्र्या आसनानि तु ॥ ३०६ ॥
ईदृग् विमानं शक्राज्ञासमकालमजायत । निष्पद्यन्ते सुमनसां, मनसा हीष्टसिद्धयः ॥ ३०७ ॥
सङ्क्रन्दनो विचक्रे च, जिनाभिगमनोत्सुकः । विचित्रभूषणधरं, रूपमुत्तरवैक्रियम् ॥ ३०८ ॥
लावण्यामृतवल्लीभिर्महिषीभिः सहाऽष्टभिः । नाट्यानीकेन गन्धर्वानीकेन च महीयसा ॥ ३०९ ॥
हृष्टः प्रदक्षिणीकृत्य, तद् विमानवरं हरिः । अध्यारुरोह पूर्वेण, रत्नसोपानवर्त्मना ॥ ३१० ॥ ॥ युग्मम् ॥
रत्नसिंहासने पूर्वाभिमुखस्तत्र वासवः । आसाञ्चक्रे शैलचूलाशिलायामिव केसरी ॥ ३११ ॥
स्वान्यासनान्यलञ्चक्रुर्महिष्योऽपि बिडौजसः । यथाक्रमं कमलिनीदलानीव मरालिकाः ॥ ३१२ ॥
चतुरशीतिः सहस्राः, सामानिकसुदिवौकसाम् । अध्यारोहन् विमानं तदुदक्सोपानवर्त्मना ॥ ३१३ ॥
तत्राऽऽसाञ्चक्रिरे स्वेषु, स्वेषु भद्रासनेषु ते । रूपधेयान्तराणीवाऽप्रतिरूपाणि वज्रिणः ॥ ३१४ ॥
अन्येऽपि देवा देव्यश्चाऽपाच्यसोपानवर्त्मना । तद् विमानं समारोहन्, निषेदुश्च यथासनम् ॥ ३१५ ॥
हरेः सिंहासनस्थस्य, पुरोऽभूदष्टमङ्गली । पत्नीभिरष्टाभिरिवैकैकमङ्गलकल्पनात् ॥ ३१६ ॥
तदनु च्छत्र-भृङ्गार-पूर्णकुम्भादयोऽभवन् । ते हि स्वाराज्यचिह्नानि, च्छायावत् सहचारिणः ॥ ३१७ ॥
सहस्रयोजनोत्सेधस्तदग्रेऽभून्महाध्वजः । युतो लघुध्वजशतैः, पल्लवैरिव पादपः ॥ ३१८ ॥
तदग्रे चाऽभवन् पञ्चाऽनीकाधिपतयो हरेः । आभियोगिकदेवाश्च, स्वाधिकाराप्रमादिनः ॥ ३१९ ॥

१ इन्द्रः । २ दक्षिणसोपानमार्गेण । ३ उन्नतः ।

इत्थं महर्द्धिभिः शक्रः, सुरकोटीभिरावृतः । चतुरैश्चारणगणैः, स्तूयमानमहर्द्धिकः ॥ ३२० ॥
नाट्यनीकेन गन्धर्वानीकेन च निरन्तरम् । प्रक्रान्तनाट्याभिनयसङ्गीतककुतूहलः ॥ ३२१ ॥
अनीकैः पञ्चभिश्चाऽग्रे, कृष्यमाणमहाध्वजः । पुरस्तूर्यनिनादेन, ब्रह्माण्डं स्फोटयन्निव ॥ ३२२ ॥
सौधर्मदेवलोकस्योदीचीने तिर्यगध्वनि । तेनाऽऽययौ विमानेनाऽवतितीर्षुर्महीतले ॥ ३२३ ॥

॥ चतुर्भिः कलापकम् ॥

आपूर्णो देवकोटीभिरवरोहन् व्यराजत । विमानः पालकः कल्पः, सौधर्म इव जङ्गमः ॥ ३२४ ॥
द्वीपाम्भोधीनसङ्ख्यातानलङ्घिष्ट क्षणादपि । तद् विमानवरं दिव्यं, वेगेनाऽतिमनोगति ॥ ३२५ ॥
सौधर्ममिव भूमिष्ठं, देवक्रीडानिकेतनम् । नन्दीश्वरमहाद्वीपं, तद् विमानमथाऽऽसदत् ॥ ३२६ ॥
तत्र दक्षिणपूर्वस्मिन्, शैले रतिकराभिधे । गत्वा पुरन्दरो वेगात्, तद् विमानं समक्षिपत् ॥ ३२७ ॥
सङ्क्षिपन् सङ्क्षिपन्नेवं, विमानं क्रमशो हरिः । जम्बूद्वीपस्य भरते, विनीतामाययौ पुरीम् ॥ ३२८ ॥
तत्र तेन विमानेन, स्वामिनः सूतिकागृहम् । स त्रिः प्रदक्षिणीचक्रे, स्वामिवत् स्वामिभूम्यपि ॥ ३२९ ॥
तस्योदक्पूर्वककुभि, स विमानमतिष्ठिपत् । हरिर्दूराद् यानमिव, सामन्तो राजवेश्मनि ॥ ३३० ॥
प्राविशत् सूतिकावेश्म, स्वामिनोऽथ पुरन्दरः । कुलीनकर्मकरवद्, भक्तितः सङ्कुचत्तनुः ॥ ३३१ ॥
तीर्थकृत्तीर्थकृन्मात्रोरप्यालोकितमात्रयोः । प्रणनाम सहस्राक्षो, धन्यमानी स्वचक्षुषाम् ॥ ३३२ ॥
तत्र प्रदक्षिणीकृत्य, स्वामिनं विजयां च सः । नमस्कृत्य च वन्दित्वा, चैवमूचे कृताञ्जलिः ॥ ३३३ ॥

१ सङ्क्षिप्तमकरोत् । २ कुलवान् किङ्कर इव ।

नमस्ते कुक्षिणा रत्नधारिके! विश्वपावनि! । जगन्मातः! सदालोकजगद्दीपप्रदायिनि! ॥ ३३४ ॥
मातस्त्वमेका धन्याऽसि, द्वितीयस्तीर्थकृद् यया । विश्वोपकारी सुषुवे, पृथिव्या कल्पवृक्षवत् ॥ ३३५ ॥
अहं हि सौधर्मपतिः, स्वामिजन्ममहोत्सवम् । कर्तुमत्राऽऽगमं मातर्न भेतव्यमतस्त्वया ॥ ३३६ ॥
इत्युदीर्य सहस्राक्षस्तदाऽवस्वापनीं ददौ । विकृत्य तीर्थकृद्रूपं, देव्याः पार्श्वे न्यधत्त च ॥ ३३७ ॥
ततः शक्रः क्षणाच्छक्रान्, विचक्रे चाऽऽत्मपञ्चमान् । एकधाऽनेकधा च स्युः, कामरूपा दिवौकसः ॥३३८॥
एकः सुरपतिस्तेषु, प्रोद्भिन्नपुलकाङ्कुरः । मनसेव शुचिर्भूत्वा, शरीरेणाऽपि भक्तितः ॥ ३३९ ॥
नमस्कृत्याऽनुजानीहीत्यभिधाय जिनेश्वरम् । गोशीर्षरसलिप्ताभ्यां, कराब्जाभ्यामुपाददे[1] ॥ ३४० ॥ ॥ युग्मम् ॥
द्वितीयः पृष्ठतः स्थित्वाऽऽतपत्रं स्वामिमूर्धनि । अधारयद् गिरिशिरः स्थितराकेन्दुविभ्रमम् ॥ ३४१ ॥
बिभराञ्चक्रतुरुभौ, पार्श्वतश्चामरे हरी । स्वामिदर्शनतः साक्षादात्तौ पुण्यचयाविव ॥ ३४२ ॥
एक उल्लालयन् वज्रं, प्रतीहार इवाऽग्रतः । ससर्प स्वामिनं पश्यन्, किञ्चिद् वलितकन्धरः ॥ ३४३ ॥
सामानिकाः पारिषद्यास्त्रायस्त्रिंशास्तथाऽपरे । परिवव्रुर्दिविषदः[2], प्रभुं पद्ममिवाऽलयः[3] ॥ ३४४ ॥
भुवनस्वामिनं यत्नात्, पाणिभ्यां धारयन् हरिः । मेरूशैलं प्रत्यचालीज्जन्मोत्सवविधित्सया ॥ ३४५ ॥
अनुस्वामि दधावेऽथ, पर्यस्यद्भिः परस्परम् । अहम्पूर्विकया देवैरनुगीतं मृगैरिव ॥ ३४६ ॥
स्वामिनं पश्यतां दूराद्, दृष्टिपातैर्दिवौकसाम् । फुल्लनीलोत्पलवनाकीर्णेव द्यौरजायत ॥ ३४७ ॥
भूयो भूयो भगवन्तमुपेत्योपेत्य दूरतः । निरीक्षाञ्चक्रिरे देवाः, स्वधनं तद्धना[4] इव ॥ ३४८ ॥

१ पूर्णिमा । २ देवाः । ३ भ्रमराः । ४ कृपणाः ।

सौधर्मेन्द्रेण
पञ्चरूपेण
प्रभोर्मेरौ
नयनम् ।

समापतन्तो[1] युगपत्, सम्मर्देन दिवौकसः । अन्योऽन्यमास्फलन्ति स्म, तरङ्गा इव वारिधेः ॥ ३४९ ॥
गगने शक्रयानेन, गच्छतः स्वामिनः पुरः । पुष्पप्रकरतां भेजुर्ग्रह-नक्षत्र-तारकाः ॥ ३५० ॥
पुरुहूतो[2] मुहूर्तान्तर्मेरुमूर्ध्नि ययौ शिलाम् । अतिपाण्डुकम्बलाख्यां, चूलादक्षिणतः स्थिताम् ॥ ३५१ ॥
रत्नसिंहासनोत्सङ्गे, स्वोत्सङ्गस्थापितप्रभुः । तत्र चोपाविशत् पूर्वाभिमुखः पूर्वदिक्पतिः ॥ ३५२ ॥
तदैवैशानकल्पेन्द्रोऽप्युद्धूतासनकम्पतः । अज्ञासीदवधिज्ञानाच्छ्रीमत्सर्वज्ञजन्म तत् ॥ ३५३ ॥
शक्रवत् सोऽपि सन्त्यज्य, रत्नसिंहासनादिकम् । दत्त्वा पदानि सप्ताऽष्टान्यनमज्जगदीश्वरम् ॥ ३५४ ॥
तस्याऽऽज्ञया च सेनानीर्नाम्नाऽलघुपराक्रमः । घण्टामास्फालयामास, महाघोषां महास्वनाम् ॥ ३५५ ॥
विमानलक्षास्तन्नादोऽष्टाविंशतिमपूरि सः । उद्वेलजलधिध्वानस्तटाचलदरीरिव[3] ॥ ३५६ ॥
देवास्तेषां विमानानां, तन्निनादेन चाऽबुधन् । प्रभातशङ्खध्वनिना, प्रसुप्ता ईव भूभुजः ॥ ३५७ ॥
शान्ते तस्मिन् महाघोषाघण्टाघोषे चमूपतिः । पर्जन्यधीरध्वनितः, स एवं घोषणां व्यधात् ॥ ३५८ ॥
जम्बूद्वीपस्य भरते, विनीतायां पुरि प्रभुः । विजया-जितशत्र्वोस्तु, द्वितीयोऽजनि तीर्थकृत् ॥ ३५९ ॥
तस्य जन्माभिषेकाय मेरौ यास्यति वः प्रभुः । तत्समं स्वामिना गन्तुं, त्वरध्वं हे दिवौकसः! ॥ ३६० ॥
इत्युच्चकैर्घोषणया, सर्वे देवास्तदैव हि । मन्त्राकृष्टा इवाऽऽजग्मुरैशानपतिसन्निधौ ॥ ३६१ ॥
शूलपाणिरथेशान, उत्तरार्धदिवस्पतिः । रत्नभूषणभृद् रत्नसानुमानिव[4] जङ्गमः ॥ ३६२ ॥
श्वेताम्बरधरः स्रग्वी, महावृषभवाहनः । सामानिकादिभिर्देवैः, कोटिशः परिवारितः ॥ ३६३ ॥

१ शक्रवाहनेन । २ इन्द्रः । ३ गिरिगुहा इव । ४ रत्नगिरिरिव ।

विमानं पुष्पकं नामाऽध्यारुह्य सपरिच्छदः । दक्षिणेनैशानकल्पस्याऽध्वना निरगाद् द्रुतम् ॥ ३६४ ॥
॥ त्रिभिर्विशेषकम् ॥
असङ्ख्यातान् समुल्लङ्घ्य, द्वीपाऽम्भोधीन् क्षणादपि । नन्दीश्वरमहाद्वीपं, प्रापैशानसुरेश्वरः ॥ २६५ ॥
तत्र चोत्तरपूर्वस्मिन्, शैले रतिकरे निजम् । सञ्चिक्षेप विमानादि, हेमन्त इव वासरम् ॥ ३६६ ॥
क्रमेण सङ्क्षिपंस्तत् तदकालक्षेपतो[1] ययौ । सुमेरावन्तवासीव[2], पादान्तं जगदीशितुः ॥ ३६७ ॥
सनत्कुमारो ब्रह्मा च, शुक्रश्च प्राणतः सुरैः । घण्टां सुघोषामास्फाल्य, बोधितैर्नैगमेषिणा ॥ ३६८ ॥
शक्रवद् वर्त्मनोदीचा, नन्दीश्वरमुपेत्य च । अपाक्पूर्वे रतिकरे, विमानादि समक्षिपन् ॥ ३६९ ॥
ययुश्च मेरुशिरसि, शक्रोत्सङ्गे निषेदुषः । सन्निधाने भगवतो, नक्षत्राणि विधोरिव ॥ ३७० ॥
महेन्द्रो लान्तकश्चापि, सहस्रारोऽच्युतोऽपि च । महाघोषाऽलघुपराक्रमाभ्यां बोधितामराः ॥ ३७१ ॥
ईशानवद् दक्षिणेन, पथा नन्दीश्वरं ययुः । उदक्पूर्वे रतिकरे, विमानादि समक्षिपन् ॥ ३७२ ॥ ॥ युग्मम् ॥
अधिस्वामि ततो जग्मुः, काञ्चनाचलमूर्धनि । पथिका इव सानन्दं, वनेऽधिफल[3]पादपम् ॥ ३७३ ॥
पूर्यां चमरचञ्चायां, दक्षिणश्रेणिभूषणे । सुधर्मायां चकम्पे च, चमरस्याऽऽसनं तदा ॥ ३७४ ॥
सोऽपि ज्ञात्वाऽवधिज्ञानात्, तीर्थकृज्जन्म पावनम् । गत्वा पदानि सप्ताष्टान्याननाम जिनेश्वरम् ॥ ३७५ ॥
आज्ञया तस्य सद्योऽपि, पत्त्यनीकपतिर्द्रुमः । घण्टामोघस्वरां नामाऽऽस्फालयामास सुस्वराम् ॥ ३७६ ॥
शान्ते चौघस्वराघोषे, तेन चाऽऽघोषणे कृते । असुराश्चमरं भेजुः, सायं द्रुमिव पक्षिणः ॥ ३७७ ॥

१ कालक्षेपं विना । २ शिष्य इव । ३ अधिकानि फलानि यत्रैतादृशं पादपं प्रति ।

आभियोगिकदेवश्च[1], चमरेन्द्रस्य शासनात् । योजनार्धलक्षमानं, विमानं व्यकरोत् क्षणात् ॥ ३७८ ॥
पञ्चयोजनशत्युच्चमहेन्द्रध्वजमण्डितम् । पोतः सकूपक इव, तद् विमानमराजत ॥ ३७९ ॥
चतुःषष्टिसहस्रैः स, समं सामानिकासुरैः । त्रयस्त्रिंशित्रायस्त्रिंशैश्चतुर्भिर्लोकपालकैः ॥ ३८० ॥
परिवारसमेताभिर्महिषीभिश्च पञ्चभिः । तिसृभिः परिषद्भिश्च, महानीकैश्च सप्तभिः ॥ ३८१ ॥
सप्तभिश्चानीकनाथैः, सामानिकचतुर्गुणैः । आत्मरक्षैस्तथाऽन्यैरप्यसुराणां कुमारकैः ॥ ३८२ ॥
तद् विमानं समारुह्य, क्षणान्नन्दीश्वरं ययौ । विमानं स्वे रतिकरे, सन्निक्षेप च शक्रवत् ॥ ३८३ ॥
प्रवाह इव जाह्नव्या, वेगात् पूर्वपयोनिधिम् । स ययौ स्वामिपादान्तं, मेरुपर्वतमूर्धनि ॥ ३८४ ॥
नगर्यां बलिचञ्चायामुत्तरश्रेणिमण्डने । बलिश्चाऽऽसनकम्पेनाऽर्हज्जन्माऽवधिनाऽबुधत् ॥ ३८५ ॥
तस्याऽऽदेशात् पत्त्यनीकपतिर्नाम्ना महाद्रुमः । द्राग् महौघस्वरां[2] नाम, घण्टां त्रिः पर्यताडयत् ॥ ३८६ ॥
घण्टानादे च विश्रान्ते, प्राग्वदाघोषणामसौ । अकार्षीदसुरश्रोत्रसुधाश्रोतःसहोदराम् ॥ ३८७ ॥
तया घोषणयाऽभ्येयुः, सर्वतोऽप्यसुरा बलिम् । अम्बुदस्येव नादेन, मानसं मानसौकसः[3] ॥ ३८८ ॥
पूर्वसङ्ख्यैर्महिष्याद्यैर्युक्तः सामानिकैः[4] पुनः । षष्टिसहस्रैस्तेभ्यश्चाऽऽत्मरक्षैस्तु चतुर्गुणैः ॥ ३८९ ॥
प्राग्मानेन विमानेन, प्राग्वदिन्द्रध्वजेन च । गत्वा नन्दीश्वररतिकरं मेरुशिरस्यगात् ॥ ३९० ॥
धरणेन्द्रो हरिर्वेणुदेवश्चाऽग्निशिखस्तथा । वेलम्ब-सुघोष-जलकान्ताः पूर्णोऽमितोऽपि च ॥ ३९१ ॥
नाग-विद्युत्-सुपर्णा-ऽग्नि-वायु-मेघ-सरस्वताम् । द्वीपानां च दिशां चेन्द्रा, दक्षिणश्रेणिगाः क्रमात् ॥३९२॥

१ सेवकस्थानीयो देवः । २ असुरकर्णामृतप्रवाहसदृशाम् । ३ हंसाः । ४ पञ्चभिरित्यादिभिः ।

उदक्श्रेणेस्त्वमी भूतानन्दो हरिशिखस्तथा । वेणुदारी तथा चाऽग्निमाणवश्च प्रभञ्जनः ॥ ३९३ ॥
महाघोषो जलप्रभो, वशिष्ठोऽमितवाहनः । सर्वेऽप्यासनकम्पेनाऽर्हज्जन्माऽवधिनाऽबुधन् ॥ ३९४ ॥
ततश्च धरणादीनां, भद्रसेनैश्चमूधवैः । भूतानन्दादीनां दक्षाभिधैर्घण्टास्त्रिराहताः ॥ ३९५ ॥
तत्र मेघस्वरा क्रौञ्च-हंस-मञ्जुस्वरास्तथा । नन्दिस्वरा नन्दिघोषा, सुस्वरा मधुरस्वरा ॥ ३९६ ॥
मञ्जुघोषा चेति घण्टा, नेदुस्तेषां यथाक्रमम् । नागादिकानां भवनपतीनां पक्षयोर्द्वयोः ॥ ३९७ ॥
द्वयोरपि ततः श्रेण्योः, सर्वे नागादयः क्षणात् । स्वं स्वमिन्द्रं समाजग्मुः, स्वस्थानमिव वाजिनः ॥ ३९८॥
तेषामप्याज्ञया स्वे स्वे, त्रिदशा आभियोगिकाः । रत्न-स्वर्णविचित्राणि, विमानानि तदैव हि ॥ ३९९ ॥
योजनानां पञ्चविंशिसहस्रान् विस्तृतानि च । सार्धद्वियोजनशतेन्द्रध्वजानि विचक्रिरे ॥ ४०० ॥
प्रत्येकं महिषीभिस्ते, षड्भिः सामानिकैस्तथा । षट्सहस्रैश्च तेभ्यश्चाऽङ्गरक्षैस्तु चतुर्गुणैः ॥ ४०१ ॥
अन्यैश्चमर-बलिवत्, त्रायस्त्रिंशादिभिर्वृताः । विमानानि समारुह्य, मेरौ स्वाम्यन्तिके ययुः ॥ ४०२ ॥
पिशाचानां च भूतानां, यक्षाणां रक्षसामपि । किन्नर-किम्पुरुषा-ऽहि-गन्धर्वाणामधीश्वराः ॥ ४०३ ॥
कालः सुरूपोऽथ पूर्णभद्रो भीमश्च किन्नरः । सत्पुरुषश्चाऽतिकायो, नाम्ना गीतरतिस्तथा ॥ ४०४ ॥
दक्षिणश्रेणिगा एते, ह्युत्तरश्रेणिगास्त्वमी । महाकालो गीतयशा, द्वयेऽप्यासनकम्पतः ॥ ४०५ ॥
महाभीमः किम्पुरुषो, महापुरुष एव च । महाकायो गीतयशा, द्वयेऽप्यासनकम्पतः ॥ ४०६ ॥
ज्ञात्वाऽर्हज्जन्म ते स्वैः स्वैः, सैन्यनाथैर्निजां निजाम् । मञ्जुस्वरां मञ्जुघोषां, घण्टामास्फालयन् क्रमात् ॥४०७॥
॥ पञ्चभिः कुलकम् ॥

शान्ते नादे च घण्टानां, सेनान्या घोषणे कृते । व्यन्तरास्ते पिशाचाद्या, एयुरिन्द्रान्निजान्निजान् ॥ ४०८ ॥
इन्द्राः परिवृता देवैरत्रायस्त्रिंश-लोकपैः । त्रायस्त्रिंश-लोकपा हि, नैषां चन्द्रा-ऽर्कयोरिव ॥ ४०९ ॥
सामानिकसहस्रैस्तु, ते चतुर्भिः पृथक् । सहस्रैरात्मरक्षाणां, वृताः षोडशभिस्तथा ॥ ४१० ॥
विकृतानि विमानानि, स्वैर्देवैराभियोगिकैः । तेऽधिरुह्य समाजग्मुर्मेरौ भगवदन्तिके ॥ ४११ ॥
तथाऽणपन्निकादीनां, दक्षिणश्रेणिवर्तिनाम् । उत्तरश्रेणिभाजां च, पिशाचादिसुरेन्द्रवत् ॥ ४१२ ॥
व्यन्तराष्टनिकायानां, सुरनाथाश्च षोडश । प्राग्वदासनकम्पेन, ज्ञात्वा जन्म जिनेशितुः ॥ ४१३ ॥
मञ्जुस्वरां मञ्जुघोषां, पृथगास्फाल्य सैन्यपैः[1] । घोषणां कारयित्वा च, स्वैः स्वैश्च व्यन्तरैर्युताः ॥ ४१४ ॥
अधिरुह्य विमानानि, विकृतान्याभियोगिकैः । सामानिकादिभिः प्राग्वत्, सम्भूयैयुर्जिनान्तिकम् ॥ ४१५ ॥
॥ चतुर्भिः कलापकम् ॥

चन्द्रा-ऽऽदित्यावसङ्ख्यातौ, तद्वदात्तपरिच्छदौ । आजग्मतुर्जिनं मेरौ, पितरं तनयाविव ॥ ४१६ ॥
एवमिन्द्राश्चतुःषष्टिः, स्वतन्त्राः परतन्त्रवत् । भक्त्या समापतन्ति स्म स्वामिजन्मोत्सवेच्छया ॥ ४१७ ॥
एकादश-द्वादशयोः, कल्पयोरथ वासवः । स्नात्रोपकरणायाऽऽभियोगिकानादिशत् सुरान् ॥ ४१८ ॥
तैर्दिश्युत्तरपूर्वस्यामपक्रम्याऽऽभियोगिकैः । विधायोच्चैः समुद्घातमेवं कुम्भा विचक्रिरे ॥ ४१९ ॥
सौवर्णा राजता रात्नाः, स्वर्णरूप्यमया[2] अपि । स्वर्णरत्नमयाश्चापि, रूप्यरत्नमया अपि ॥ ४२० ॥
स्वर्णरूप्यरत्नमयास्तथा मृत्स्नामया अपि । अष्टाधिकानि प्रत्येकं, शतानि दश सङ्ख्यया ॥ ४२१ ॥

१ सेनापतिभिः । २ मृण्मयाः ।

एतावन्तश्च भृङ्गारा, दर्पणा भाजनानि च । पात्र्यश्च सुप्रतिष्ठाश्च, तथा रत्नकरण्डकाः ॥ ४२२ ॥
पुष्पचङ्गेरिकाश्चापि, प्रत्येकं तैर्विचक्रिरे । अकालक्षेपतः कोशागारादिव समाहृताः ॥ ४२३ ॥
आदाय तांश्च ते देवाः, कलसानलसेतराः[१] । सरसीवाऽम्बुहारिण्यो, ययुः क्षीरोदसागरे ॥ ४२४ ॥
उद्बुद्बुदरवैः कुम्भैरुन्मङ्गलरवैरिव । स्वैरं क्षीरोदकं तत्र, तेऽगृह्णन् जलदा इव ॥ ४२५ ॥
पुण्डरीकाणि पद्मानि, कुमुदान्युत्पलानि च । सहस्रपत्राणि शतपत्राण्याददिरे च ते ॥ ४२६ ॥
उपेत्य पुष्करोदेऽपि, तेऽम्बुधौ पुष्करादिकम् । भृशायमाना जगृहुर्द्वीपे सांयात्रिका[२] इव ॥ ४२७ ॥
भरतैरवतक्षेत्रवर्तिनामुदकादिकम् । तीर्थानां मागधादीनामप्युपाददिरे सुराः ॥ ४२८ ॥
गङ्गादिषु ह्रदिनीषु, पद्मादिषु ह्रदेषु च । मृदम्भोजानि जगृहुः, सन्तप्ताः पथिका इव ॥ ४२९ ॥
सर्वतः कुलशैलेभ्यो, वैताढ्येभ्यश्च सर्वतः । सर्वतो विजयेभ्यश्च, वक्षारेभ्यश्च सर्वतः ॥ ४३० ॥
देवोत्तरकुरुभ्यश्च, सुमेरुपरिधिस्थितात् । भद्रशालान्नन्दनाच्च, सौमनसाच्च पाण्डकात् ॥ ४३१ ॥
पर्वतेभ्यश्च मलय-दर्दुरादिभ्य ओषधीः । गन्धान् पुष्पाणि सिद्धार्थांस्तेऽगृह्णंस्तुवराणि च ॥ ४३२ ॥
॥ त्रिभिर्विशेषकम् ॥
तानि द्रव्याणि सर्वाणि, मेलयन्ति स्म नाकिनः । भेषजानीव भिषजो, गन्धानिव च गान्धिकाः ॥ ४३३ ॥
तदुपादाय ते सर्वमुपस्वामि समाययुः । अच्युतेन्द्रस्य मनसा, स्पर्द्धमाना इवाऽऽदरात् ॥ ४३४ ॥
ततश्च भक्तिभागिन्द्र आरणा-ऽच्युतकल्पयोः । वृतः सहस्रैर्दशभिः, सामानिकदिवौकसाम् ॥ ४३५ ॥

१ अप्रमादिनः । २ नौव्यापारिणः ।

त्रयस्त्रिंशत्रायस्त्रिंशैश्चतुर्भिर्लोकपालकैः । पर्षद्भिस्तिसृभिः सैन्यैः, सैन्यनाथैश्च सप्तभिः ॥ ४३६ ॥
चत्वारिंशता सहस्रैश्चाऽऽत्मरक्षदिवौकसाम् । उत्तरासङ्गवानग्रे, विमुच्य कुसुमाञ्जलिम् ॥ ४३७ ॥
कृतचर्चांश्चन्दनेन, स्मेरा[1]ब्जपिहिताननान् । अष्टोत्तरं सहस्रं स, कुम्भान् देवैः सहाऽग्रहीत् ॥ ४३८ ॥
तान् कुम्भान् लोठयामास, स्वामिमूर्धन्यथाऽच्युतः । भक्तिप्रकर्षतः कुर्वन्नात्मवन्नमिताननान् ॥ ४३९ ॥
स्वामिसङ्गात् तदम्भोऽगात्, पुण्यमप्यतिपुण्यताम् । तापनीये[2] ह्यलङ्कारे, सुतरां द्योतते मणिः ॥ ४४० ॥
पानीयधारोद्गिरणान्[3]नदन्तः कलसाश्च ते । स्वामिस्नात्रविधौ मन्त्रान्, पठन्त इव रेजिरे ॥ ४४१ ॥
कुम्भेभ्यो निपतंस्तेभ्योऽम्भःप्रवाहो महांस्तदा । स्वामिलावण्यसरितावेणीसङ्गमतां ययौ ॥ ४४२ ॥
अङ्गेषु स्वामिनः स्वर्णगौरेषु प्रसरत् पयः । तद् गाङ्गं[4]मिव हैमेषु, पद्मखण्डेष्वराजत ॥ ४४३ ॥
आ सर्वाङ्गं प्रसरता, निर्मलेनाऽतिहारिणा । वारिणा शुशुभे तेन, स[5]संव्यान इव प्रभुः ॥ ४४४ ॥
तत्रेन्द्रेभ्यः सुरेभ्यश्च, केऽपि भक्तिभराकुलाः । उत्क्षिप्य स्नपयितृभ्यः, पूर्णकुम्भानुपानयन् ॥ ४४५ ॥
तस्थुश्छा[6]यावहाः केचित्, केचिच्चामरपाणयः । ऊर्द्धपदहनाः केचित्, पुष्पगन्धभृतोऽपरे ॥ ४४६ ॥
पेठुः स्नात्रविधिं केऽपि, केऽपि चक्रुर्जयारवम् । केचिच्च ताडयामासुर्दुन्दुभीन् को[7]णपाणयः ॥ ४४७ ॥
केऽप्युत्फुल्लकपोलास्यास्तारं शङ्खानपूरयन् । मिथ आस्फालयामासुः, कांस्यतालानथाऽपरे ॥ ४४८ ॥
आजघ्नुर्झल्लरीः केऽपि, रत्नदण्डैरखण्डितैः । केचिदुन्नादचण्डिम्नो, डिण्डिमान् पर्यताडयन् ॥ ४४९ ॥

१ विकसितकमलाच्छादितमुखान् । २ सौवर्णे । ३ शब्दायमानाः । ४ सुवर्णकमलेषु गङ्गावारीव । ५ उत्तरीयेण सहित इव । ६ छत्रधारिणः । ७ यष्टिपाणयः ।

नर्तकीवत् केऽप्यनृत्यन्नुच्चैस्तालललयानुगम् । ननृतुर्विकृतं केऽपि, हास्याय विटचेटवत्[१] ॥ ४५० ॥
गायनीवत्[२] केऽप्यगायन्, प्रबन्धैः करुणादिभिः । जगुर्गोपालवत् केचिदुच्छृङ्खलगलस्वरम् ॥ ४५१ ॥
द्वात्रिंशत्पात्रकं केऽपि, नाटकाभिनयं व्यधुः । केचिदप्युत्पतन्ति स्म, निपतन्ति स्म केचन ॥ ४५२ ॥
रत्नानि ववृषुः केऽपि, ववृषुः केऽपि काञ्चनम् । अवर्षन् भूषणान्येकेऽवर्षश्चूर्णानि केचन ॥ ४५३ ॥
ववृषुः केऽपि माल्यानि, पुष्पाणि च फलानि च । ववल्गुश्चतुरं केचित्, केचित् क्ष्वेडां[३] च चक्रिरे ॥ ४५४॥
हेषां[४] विदधिरे केऽपि, चक्रिरे केऽपि बृंहितम्[५] । रथघोषं व्यधुः केऽपि, नादांस्त्रीन् केऽपि चक्रिरे ॥ ४५५ ॥
केऽपि चाचालयन् पाददर्दरैर्मन्दराचलम्[६] । मेदिनी दलयामासुश्चपेटाभिश्च[७] केचन ॥ ४५६ ॥
केचिदानन्दबहलं, मुहुः कोलाहलं व्यधुः । भ्रमन्तो मण्डलीभूय, जगुः केऽपि च रासकान् ॥ ४५७ ॥
कृत्रिमं जज्वलुः केऽपि, प्रणेदुः केऽपि कौतुकात् । अगर्जन्नूर्जितं केऽपि, विद्युद्वत् केचिदद्युतन् ॥ ४५८ ॥
एवं विचित्रमानन्दाच्चेष्टमानेषु नाकिषु । अच्युतेन्द्रो भगवतोऽभिषेकमकरोन्मुदा ॥ ४५९ ॥
शिरस्यञ्जलिमुत्तंससन्निभं विरचय्य सः । व्याजहार जय जयेत्युच्चैरव्याजभक्तिभाक् ॥ ४६० ॥
वस्त्रेण देवदूष्येण, ममार्ज स्वामिनस्तनुम् । दक्षसंवाहक इव, सुखस्पर्शेन पाणिना ॥ ४६१ ॥
आनन्दं नाटयन्नुचैर्नाट्यं नट इवाऽच्युतः । पुरतस्त्रिजगद्भर्तुरभ्यनैषीत् सहामरैः ॥ ४६२ ॥
गोशीर्षचन्दनरसैः, स्वामिनोऽथ विलेपनम् । दिव्यैर्भौमैश्च कुसुमैरर्चां च विदधेऽच्युतः ॥ ४६३ ॥

१ हास्यकारकनटवत् । २ गायकीवत् । ३ सिंहनादम् । ४ अश्वनादम् । ५ हस्तिनादम् । ६ पादघातैः ७ करतलघातैः । ८ शिरोभूषणसदृशम् । ९ अङ्गसंवाहनकर्मणि चतुरः सेवक इव ।

कुम्भो भद्रासना-ऽऽदर्शो, श्रीवत्स-स्वस्तिकावपि । नन्द्यावर्तो वर्धमानो, मत्स्य इत्यष्टमङ्गलीम् ॥ ४६४ ॥
अत्यच्छै[1] रजतमयैरखण्डैरथ तण्डुलैः । आरणा-ऽच्युतकल्पेन्द्र, आलिलेखाऽग्रतः प्रभोः ॥ ४६५ ॥ ॥युग्मम्॥
भक्तिनिघ्नो जानु[2]दध्नं, कुसुमप्रकरं ततः । अमुञ्चत् पञ्चवर्णं स, सन्ध्याभ्रकणिकोपमम् ॥ ४६६ ॥
उत्तोरणामिव दिवं, कुर्वाणो धूमवर्तिभिः । ऊर्द्ध्वपदहनो धूपमधूपायदथाऽच्युतः ॥ ४६७ ॥
उत्क्षिप्यमाणे धूपे च, वाद्यमानाऽमरोत्तमैः । सङ्क्षिप्तेव महाघोषा, घण्टा तारस्वरा बभौ ॥ ४६८ ॥
हरिरुत्तारयामासाऽऽरात्रिकं स्वामिने स्वयम् । उच्छिखामण्डलं ज्योतिर्मण्डलश्रीविडम्बकम् ॥ ४६९ ॥
ततः पदानी सप्ताष्टान्यपक्रम्य प्रणम्य च । रोमाञ्चितोऽच्युतपतिः, स्तोतुमेवं प्रचक्रमे ॥ ४७० ॥
जात्यजाम्बू[3]नदच्छेदविच्छन्नभस्तल! प्रभो! तवाधौतशुचिः, कायः कमिव नाऽऽक्षिपेत्? ॥ ४७१ ॥
मन्दारदामवन्नित्यमवासितसुगन्धिनि । तवाऽङ्गे भृङ्गतां यान्ति, नेत्राणि सुरयोषिताम् ॥ ४७२ ॥
दिव्यामृतरसास्वादपोषप्रतिहता इव । समाविशन्ति ते नाथ!, नाऽङ्गे रोगोरगव्रजाः ॥ ४७३ ॥
त्वय्यादर्श[4]तलालीनप्रतिमाप्रतिरूपके । क्षरत्स्वेदविलीनत्वक्कथाऽपि वपुषः कुतः? ॥ ४७४ ॥
न केवलं रागमुक्तं, वीतराग! मनस्तव । वपुःस्थितं रक्तमपि, क्षीर[5]धारासहोदरम् ॥ ४७५ ॥
जगद्विलक्षणं किं वा, तवाऽन्यद् वक्तुमीश्महे? । यदविस्र[6]मबीभत्सं, शुभ्रं मांसमपि प्रभो! ॥ ४७६ ॥
जल-स्थलसमुद्भूताः, सन्त्यज्य सुमनः[7]स्रजः । तव निःश्वाससौरभ्यमनुयान्ति मधुव्रताः ॥ ४७७ ॥

१ अतिस्वच्छैः । २ जानुप्रमाणम् । ३ सुवर्णम् । ४ आदर्शतलप्रतिबिम्बितप्रतिमासदृशे । ५ दुग्धधारासदृशम् । ६ दुर्गन्धरहितम् । ७ कुसुममालाः ।

लोकोत्तरचमत्कारकरी तव भवस्थितिः । यतो नाऽऽहार-नीहारौ, गोचरश्चर्मचक्षुषाम् ॥ ४७८ ॥
इति स्तुत्वा प्रभुं किञ्चिदपक्रम्य कृताञ्जलिः । शुश्रूषातत्परस्तस्थावच्युतोऽच्युतभक्तिभाक् ॥ ४७९ ॥
इन्द्रा द्वाषष्टिरन्येऽपि, क्रमेण सपरिच्छदाः । अभिषेकं जगद्भर्तुश्चक्रुरच्युतनाथवत् ॥ ४८० ॥
तद्वत् स्तुत्वा नमस्कृत्याऽपक्रम्य च कृताञ्जलि । उपासाञ्चक्रिरे नाथं, तत्पराः किङ्करा इव ॥ ४८१ ॥
अथ सौधर्मकल्पेन्द्र, इव द्रागतिभक्तितः । विचक्रे पञ्चधाऽऽत्मानं, द्वितीयस्वर्गवासवः ॥ ४८२ ॥
अतिपाण्डुकम्बलायामर्धचन्द्रसमाकृतौ । ऐशानकल्पवत् सिंहासनमेकोऽथ शिश्रिये ॥ ४८३ ॥
शक्रोत्सङ्गान्निजोत्सङ्गं, रथादिव रथान्तरम् । स समारोपयामास, यतमानो जगद्गुरुम् ॥ ४८४ ॥
आतपत्रं दधारैको, विशदं स्वामिमूर्धनि । धारयामासतुश्चान्यौ, चामरे प्रभुपार्श्वयोः ॥ ४८५ ॥
पञ्चमः शूलपाणिः सन्, पुरस्तस्थौ जगत्पतेः । प्रतीहार इवोदारेणाऽऽकारेण मनोरमः ॥ ४८६ ॥
ततः सौधर्मकल्पेन्द्रोऽप्यमरैराभियोगिकैः । अभिषेकोपकरणद्रव्याण्यानाययद् द्रुतम् ॥ ४८७ ॥
दिक्षु प्रभोश्चतसृषु, स्फटिकाद्रीनिवाऽपरान् । स्फाटिकान् सोऽतिचतुरश्चतुरो व्यकरोद् वृषान् ॥ ४८८ ॥
तेषां वृषाणां शृङ्गेभ्योऽष्टभ्य उत्पेतुरुज्ज्वलाः । अष्टाम्बुधारा धवला, रश्मिदण्डा इवैन्दवाः ॥ ४८९ ॥
समुत्पत्य मिलन्ति स्म, पुरो नद्य इवैकतः । निपतन्ति स्म पयसां पत्याविव जगत्पतौ ॥ ४९० ॥
अभिषेकं जगद्भर्तुरेवङ्कारं चकार सः । भङ्ग्यन्तरेण कविवच्छक्राः स्वं ज्ञापयन्ति हि ॥ ४९१ ॥
मार्ष्टि विलेपनं पूजामष्टमङ्गलिकामपि । आरात्रिकं च विधिना, विदधे सोऽच्युतेन्द्रवत् ॥ ४९२ ॥

१ अतिदक्षः । २ समुद्रे । ३ मार्जनम् ।

शक्रस्तवेन वन्दित्वा, प्रणम्य च जगत्पतिम् । हर्षगद्गदया वाचा, स स्तोतुं प्रास्तवीदिति ॥ ४९३ ॥
जय त्रिभुवनाधीश!, जय विश्वैकवत्सल! । जय पुण्यलतोद्भेदनवाम्बुद! जगत्प्रभो! ॥ ४९४ ॥
स्वामिन्! विमानाद् विजयादवतीर्णोऽसि भूतले । इदं जगत् प्रीणयितुं, सरिदोघ इवाचलात् ॥ ४९५ ॥
बीजं मोक्षद्रुमस्येव, ज्ञानत्रितयमुज्ज्वलम् । स्वामिन्नाजन्मसिद्धं ते, शीतलत्वमिवाम्भसः ॥ ४९६ ॥
ये त्वां त्रिभुवनाधीश!, धारयन्ति सदा हृदि । सम्मुखीनाः श्रियस्तेषामादर्शप्रतिबिम्बवत् ॥ ४९७ ॥
उल्बणैर्बाध्यमानानां, कर्मरोगैः शरीरिणाम् । दिष्ट्या त्वमगदङ्कारप्रतीकारकरोऽभवः ॥ ४९८ ॥
त्वद्दर्शनसुधासारास्वादस्य त्रिजगत्पते! । मरुपान्था इव वयं, न तृप्यामो मनागपि ॥ ४९९ ॥
रथः सारथिनेवाऽद्य, कर्णधारेण नौरिव । पथा व्रजतु लोकोऽयं, त्वया नेत्रा जगत्पते! ॥ ५०० ॥
त्वत्पादपद्मशुश्रूषासमयाधिगमेन नः । भगवन्निदमैश्वर्यं, कृतार्थमधुनाऽभवत् ॥ ५०१ ॥
स्तुत्वैवमादिभिः श्लोकैरष्टोत्तरशतेन तम् । विचक्रे पञ्चधा रूपं, प्राग्वत् प्राचीनबर्हिषा[१] ॥ ५०२ ॥
नाथमेकोऽग्रहीच्छत्रमेको द्वावथ चामरे । वज्रपाणिः पुरस्तस्थावेकः शक्रस्तु पूर्ववत् ॥ ५०३ ॥
ततो मनोवत् स यथाकामी[२]नः सपरिच्छदः । विनीतात्मा[३] विनीतायां, जितशत्रुगृहं ययौ ॥ ५०४ ॥
तीर्थकृत्प्रतिरूपं स, संवव्रे तत्र तत्क्षणात् । विजयास्वामिनीपार्श्वे, तीर्थनाथं न्यधत्त च ॥ ५०५ ॥
उच्छीर्षे कुण्डलद्वन्द्वं, न्यधादर्केन्दुसोदरम् । देवदूष्यं च मसृणं[४], कोमलं शीतलं प्रभोः ॥ ५०६ ॥
दिवोऽवतरदर्काभं, स्वर्णप्राकारमण्डितम् । बबन्ध भर्तुरुल्लोचे, शक्रः श्रीदामगण्डकम् ॥ ५०७ ॥

१ इन्द्रेण । २ यथेच्छगामी । ३ नम्रात्मा । ४ स्निग्धम् ।

शक्रकृता प्रभोः स्तुतिः ।

मणि-रत्नयुता हारा, अर्धहाराश्च हारिणः[१] । हरिणा दधिरे तत्र, दृग्विनोदकृते प्रभोः ॥ ५०८ ॥
तत्राऽपस्वापनीं देव्या, विजयाया जहार सः । कुमुदिन्या इव शशी, पद्मिन्या इव चार्ऽर्यमा[२] ॥ ५०९ ॥
शक्रादिष्टवैश्रवणनिदेशेन दिवौकसः । जृम्भका नाम तत्रेयुर्जितशत्रुनिकेतने ॥ ५१० ॥
हिरण्य-स्वर्ण-रत्नानां, कोटीर्द्वात्रिंशतं पृथक् । ववृषुस्ते द्वात्रिंशतं, नन्दभद्रासनानि[३] च ॥ ५११ ॥
व्यधुर्भूषणवृष्टिं च, मण्यङ्गा इव शाखिनः । वस्त्रवृष्टिमथाऽनग्ना, इव कल्पमहीरुहाः ॥ ५१२ ॥
वनानि भद्रशालादीन्यवचित्येव सर्वतः । पत्रवृष्टिं पुष्पवृष्टिं, फलवृष्टिं च ते व्यधुः ॥ ५१३ ॥
विचित्रवर्णसुमनोमाल्यवृष्टिं महीयसीम् । वितेनिरे च चित्राङ्गनामकल्पद्रुमा इव ॥ ५१४ ॥
विदधुर्गन्धवृष्टिं च, चूर्णवृष्टिं च पावनीम् । उत्क्षिप्तैलादिकक्षोदा, इव दक्षिणमारुताः ॥ ५१५ ॥
अत्युदारां वसुधारावृष्टिं च परितेनिरे । वारिधारावृष्टिमिव, पुष्करावर्तवारिदाः ॥ ५१६ ॥
सौधर्मशासिनः पाकशासनस्याऽनुशासनात् । अथाऽऽभियोगिका देवा, इत्थामाघोषणां व्यधुः ॥ ५१७ ॥
आकर्णयन्तु सर्वेऽपि, भो भो वैमानिकाः सुराः! । भगवानधिपति-ज्योतिर्व्यन्तराश्चावधानतः[४] ॥ ५१८ ॥
अर्हतोऽर्हज्जनन्याश्च, योऽशुभं चिन्तयिष्यति । तन्मूर्धा सप्तधा गच्छत्वर्जकस्येव मञ्जरी ॥ ५१९ ॥
तदा च मेरुशिखरात्, सेन्द्राः सर्वे सुरा-ऽसुराः । द्वीपं कन्दलितानन्दा[५], नन्दीश्वरमुपाययुः ॥ ५२० ॥
भगवन्तं नमस्कृत्य, जितशत्रुनिकेतनात् । ययौ नन्दीश्वरद्वीपं, सौधर्मेन्द्रोऽपि तत्क्षणात् ॥ ५२१ ॥
तत्राञ्जनाद्रौ पूर्वस्मिन्, शाश्वतायतनेषु सः । शाश्वतार्हत्प्रतिमानां, चक्राराऽष्टाह्निकोत्सवम् ॥ ५२२ ॥॥

१ मनोहराः । २ सूर्यः । ३ सिंहासनविशेषाः । ४ सावधानतया । ५ पल्लवितानन्दाः ।

सौधर्मेन्द्रस्य चत्वारो, लोकपालाश्चतुर्ष्वपि । अष्टाह्निकोत्सवं हृष्टाश्चक्रुर्दधिमुखाद्रिषु ॥ ५२३ ॥
उत्तरस्मिन्नञ्जनाद्रौ, शाश्वतायतनेषु तु । ईशानेन्द्रः शाश्वतार्हत्प्रतिमाष्टाह्निकां व्यधात् ॥ ५२४ ॥
लोकपालाश्च तस्यापि, प्राग्वद् दधिमुखाद्रिषु । ऋषभादिप्रतिमानां, व्यधुरष्टाह्निकोत्सवम् ॥ ५२५ ॥
अष्टाह्निकां चमरेन्द्रश्चक्रेऽपाच्येऽञ्जनाचले । चतुर्षु तद्दधिमुखाद्रिषु तस्य तु लोकपाः ॥ ५२६ ॥
बलीन्द्रोऽष्टाह्निकां चक्रे, पश्चिमे त्वञ्जनाचले । तल्लोकपालाः शैलेषु, चक्रुर्दधिमुखेषु तु ॥ ५२७ ॥
ततश्च सङ्केतस्थानादिव द्वीपवरात् ततः । कृतकृत्या निजनिजं, स्थानं जग्मुः सुराऽसुराः ॥ ५२८ ॥
इतश्च तस्यां यामिन्यामन्वर्हद् वैजयन्त्यपि । सुखेन सुषुवे सूनुं, गङ्गेव कनकाम्बुजम् ॥ ५२९ ॥
जाया-वध्वोस्तु विजया-वैजयन्त्योः परिच्छदः । पुत्रोत्पत्तिंकिंवदन्त्या[1], जितशत्रुमवर्धयत् ॥ ५३० ॥
तया च वार्तया तुष्टो, राजाऽदात् पारितोषिकम् । तथा यथा तत्कुलेऽपि, श्रीरभूत् कामधेनुवत् ॥ ५३१ ॥
घनागमे सिन्धुरिव, सिन्धुराडिव पर्वणि । स्फारीबभूब वपुषा[2], तदानीं मेदिनीपतिः ॥ ५३२ ॥
उच्छ्वासं सह मेदिन्या, प्रसादं नभसा सह । आप्यायकत्वं[2] मरुता, सह भेजे महीपतिः ॥ ५३३ ॥
राज्ञा मुमुचिरे तेन, काराबन्धाद् द्विषोऽपि हि । अवाशिष्यत बन्धस्तु, तदेभादिषु केवलम् ॥ ५३४ ॥
चैत्येषु जिनबिम्बानां, पूजाश्च विदधेऽद्भुताः । शाश्वतार्हत्प्रतिमानामिव शक्रो नरेश्वरः ॥ ५३५ ॥
अर्थिनश्च स्वक-परानपेक्षं सोऽधिनोद्[3] धनैः । सर्वसाधारणी वृष्टिर्वारिदस्योद्यतस्य हि ॥ ५३६ ॥
उपाययुरुपाध्यायाः, पठन्तः सूतमातृकाम् । उल्ललद्भिः समं छात्रैर्वर्त्तसैः कीलोज्झितैरिव[4] ॥ ५३७ ॥

१ वृत्तान्तेन । २ तृप्तत्वम् । ३ अतर्पयत् । ४ कीलकबन्धान्मुक्तैः ।

ब्राह्मणानां गुरुर्वेदोदितमन्त्रध्वनिः क्वचित् । क्वचिल्लग्नादिविचारसारा मौहूर्तिकोक्तयः ॥ ५३८ ॥
क्वचिच्च कुलनारीणामुलूलध्वनिरुत्तमः । गीतध्वनिश्च मङ्गल्यः, क्वचिद् वारमृगीदृशाम् ॥ ५३९ ॥
कल्याणकल्पनाकल्पो, बन्दिकोलाहलः क्वचित् । क्वचित् पुनश्चारणानां, चारुद्विपथकाशिषः ॥ ५४० ॥
अन्योऽन्यं चेटवर्गाणां, हर्षोत्ताला गिरः क्वचित् । वेत्रिकोलाहलः क्वाऽपि, याचकाह्वानबन्धुरः ॥ ५४१ ॥
राजवेश्माङ्गणे प्राप, शब्द एकातपत्रताम् । नमस्तले गर्जितिरव, प्रावृषेण्याब्दसङ्कुले ॥ ५४२ ॥
॥ पञ्चभिः कुलकम् ॥
व्यलिप्यन्त क्वचिल्लोकाः, कुङ्कुमादिविलेपनैः । क्षौमादिभिर्निवसनैः, पर्यधाप्यन्त च क्वचित् ॥ ५४३ ॥
सम्मान्यन्ते स्म च क्वापि, दिव्यमाल्यविभूषणैः । कर्पूरमिश्रताम्बूलैरप्रीयन्त क्वचित् पुनः ॥ ५४४ ॥
कुङ्कुमेन व्यधीयन्त, सेचनानि गृहाङ्गणे । स्वस्तिकाश्च व्यरच्यन्त, मौक्तिकैः कुवलप्रमैः ॥ ५४५ ॥
प्रत्यग्रकदलीस्तम्भैस्तोरणाश्च बबन्धिरे । स्वर्णकुम्भा न्यधीयन्त, तोरणानां च पार्श्वयोः ॥ ५४६ ॥
सुमनोगर्भधम्मिल्लाः, पुष्पस्रग्मौलिवेष्टनाः । कण्ठावलम्बिदामानः, साक्षादिव ऋतुश्रियः ॥ ५४७ ॥
रत्नताडङ्क-केयूर-निष्क-कङ्कण-नूपुरैः । आरोचमाना रुचिरै, रत्नाद्रेरिव देवताः ॥ ५४८ ॥
उत्तरीयैरुभयतो, लम्बमानचलाञ्चलैः । श्रोणीबद्धपरिकराः, कल्पद्रुमलता इव ॥ ५४९ ॥

१ विवाहाद्युत्सवेषु स्त्रीणां हर्षावेदको ध्वनिविशेषः । २ वेश्यानाम् । ३ दासवर्गाणाम् । ४ गर्जनैव । ५ बदरप्रमाणैः । ६ नवीनकदलीस्तम्भैः । ७ केशपाशाः । ८ वक्षसि परिधानीयमाभूषणम् ।

पौरगन्धर्ववनितागीततालमनोरमम् । सङ्गीतकानि विदधुर्विबुधानामिव स्त्रियः ॥ ५५० ॥

॥ चतुर्भिः कलापकम् ॥

कौसुम्भेनोत्तरीयेण, चारुनीरङ्गिकाजुषः[१] । सन्ध्याभ्रच्छन्नपूर्वाशामुखलक्ष्मीमलिम्लुचाः ॥ ५५१ ॥
कौङ्कुमेनाङ्गरागेण, विशेषितवपुःश्रियः । विकस्वराम्भोजवनपरागेणेव निम्नगाः[२] ॥ ५५२ ॥
ईर्यासमितिशालिन्य, इव न्यङ्मुख-लोचनाः । स्वशीलेनेवामलेन, नेपथ्येन विराजिताः ॥ ५५३ ॥
पुष्प-दूर्वासनाथानि[३], पूर्णपात्राणि पाणिषु । बिभ्राणाश्चाऽऽययुस्तत्र, पौरेभ्यकुलयोषितः ॥ ५५४ ॥

॥ चतुर्भिः कलापकम् ॥

अक्षतैरिव मुक्ताभिः, पात्राण्यापूर्य चारुभिः । सामन्ताः केचिदाजग्मुर्मङ्गलाय महीपतेः ॥ ५५५ ॥
रत्नाभरणसम्भारानपरे परमर्द्धयः । जितशत्रोरुपनिन्युः, शतमन्योरिवाऽमराः[४] ॥ ५५६ ॥
महार्घाणि दुकूलानि, केचिदानिन्यिरे पुनः । व्यूतानि कदलीसूत्रैर्बिससूत्रैरिवाऽथवा ॥ ५५७ ॥
केचिच्च ढौकयामासुः, स्वर्णराशिं महीपतेः । जृम्भकामरनिर्मुक्तवसुधारासहोदरम् ॥ ५५८ ॥
दिग्गजानां युवराजानिव शौंडीर्यशालिनः । मत्तानेकपानेकेऽनेकशः[५] पर्यढौकयन् ॥ ५५९ ॥
बन्धूनिवोच्चैःश्रवसः, सूर्याश्चानामिवाऽनुजान् । आनिन्युर्वाजिनो वाजवरिष्ठानपरे नृपाः ॥ ५६० ॥
राज्ञो वेश्माङ्गणं जज्ञे, विशालमपि सङ्कटम् । नृपोपायनयानैस्तैर्हृदयं प्रमदैरिव ॥ ५६१ ॥
प्रतीयेषोपायनानि[६], तेषां च प्रीतये नृपः । किं हि न्यूनं तस्य यस्य, देवदेवः स्वयं सुतः? ॥ ५६२ ॥

१ अवगुण्ठनम् । २ नद्यः । ३ सहितानि । ४ इन्द्रस्य । ५ वेगोत्तमान् । ६ प्रतिजग्राह ।

आदेशाद् भूपतेस्तस्य, तस्यां, पुर्यां तु जज्ञिरे । स्थाने स्थाने महामञ्चा, विमानानीव नाकिनाम् ॥ ५६३ ॥
प्रत्यट्ट-गृहमासंश्च, तोरणा रत्नभाजनैः । स्थितैरायातदेवेभ्यो, ज्योतिष्कैरिव कौतुकात् ॥ ५६४ ॥
प्रतिरथ्यं रजःशान्त्यै, निषेकः कुङ्कुमाम्बुभिः । चक्रे विलेपनमिव, भुवो मङ्गलसूचकम् ॥ ५६५ ॥
पदे पदे नाटकानि, सङ्गीतानि पदे पदे । पदे पदे तूर्यनादाः, पौरैर्विदधिरे मुदा ॥ ५६६ ॥
अशुल्क-दण्डामभटप्रवेशामकरां च ताम् । महोत्सवमयीं राजा, दशाहं विदधे पुरीम् ॥ ५६७ ॥
शुभेऽहनि नरेन्द्रोऽथ, सुत-भ्रातृजयोस्तयोः । आदिशन्नामकरणोत्सवाय स्वनियोगिनः ॥ ५६८ ॥
पटैर्घनानेकपुटैस्तदाऽतन्यत मण्डपः । भानोः करैरनाविष्टः, पार्थिवाज्ञाभयादिव ॥ ५६९ ॥
स्तम्भे स्तम्भे च कदलीस्तम्भास्तत्राऽशुभन् भृशम् । पुष्पकोशैर्वितन्वानाः, पद्मखण्डमिवाऽम्बरे ॥ ५७० ॥
विचित्रैश्चक्रिरे तत्र, पुष्पैः पृष्पगृहाणि च । आश्रितानि श्रियाऽश्रान्तं, मधुकर्येव रक्तया ॥ ५७१ ॥
हंसरोमाञ्चितैस्तूलपूर्णैर्दारुमयैरपि । स आसनैः सनाथोऽभून्मण्डपः खमिवोडुभिः ॥ ५७२ ॥
मण्डपो नृपतेरेवं, सद्यश्चक्रेऽधिकारिभिः । विमानमिव शक्रस्य, त्रिदशैराभियोगिकैः ॥ ५७३ ॥
हर्षान्नराश्च नार्यश्च, मङ्गल्यद्रव्यपाणयः । तत्राऽऽयाता यथास्थानमुपावेश्यन्त वेत्रिभिः ॥ ५७४ ॥
कौङ्कुमेनाङ्गरागेण, ताम्बूलैः कुसुमैरपि । सच्चक्रिरे नियुक्तांस्तान्, स्वबन्धूनिव गौरवात् ॥ ५७५ ॥
नेदुर्मङ्गलतूर्याणि, वर्याणि मधुरैः स्वरैः । उच्चैरुर्मङ्गलगिरः, परितः कुलयोषिताम् ॥ ५७६ ॥
पवित्राः प्रादुरासंश्च, मन्त्रोद्गारा द्विजन्मनाम् । प्रारेभिरे च गन्धर्वैर्वर्द्धमानादिगीतयः ॥ ५७७ ॥

१ क्रेयवस्तुग्राह्यकरदण्डरहिताम् ।

वैतालिकैरनुत्तालैश्चक्रे जयजयारवः । उदारैस्तत्प्रतिरवैर्मण्डपोऽपि जगाविव ॥ ५७८ ॥
गर्भस्थितस्य माताऽस्य, नाऽक्षद्यूते जिता मया । इति सूनोरजित इत्यकार्षीन्नाम भूपतिः ॥ ५७९ ॥
महेन महता भ्रातुष्पुत्रस्याऽपि स्वपुत्रवत् । नरेश्वरः सगर इत्यकरोन्नाम पावनम् ॥ ५८० ॥
उत्कृष्टलक्षणशतैरुपलक्ष्यमाणौ, क्षोणीसमुद्धरणकर्मसहौ कुमारौ ।
राजा भुजाविव निजावपरौ प्रपश्यन्, पीयूषमग्न इव सौख्यमखण्डमाप ॥ ५८१ ॥

इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये द्वितीये पर्वणि
अजितस्वामितीर्थकर-सगरचक्रधरजन्मवर्णनो नाम द्वितीयः सर्गः ॥



卐



तृतीयः सर्गः

धात्रीभिः पञ्चभिः शक्रादिष्टाभिरजितप्रभुः । अपाल्यत नराधीशादिष्टाभिः सगरः पुनः ॥ १ ॥
स्वपाणिपङ्कजाङ्गुष्ठे, सुरसरङ्क्रमितां सुधाम् । पिबति स्माऽजितस्वामी, न ह्यर्हन्तः स्तनन्धयाः ॥ २ ॥
सगरस्तु यथाकालं, धात्रीस्तन्यमनिन्दितम् । अपिबत् सारणीनीरमिवाऽऽराममहीरुहः ॥ ३ ॥
वृद्धिं शाखे इव तरोर्दन्ताविव च दन्तिनः । दिने दिने प्रपेदाते, तौ कुमारौ नरेशितुः ॥ ४ ॥
क्रमेण युगपच्चापि, तावुत्सङ्गं महीपतेः । समारुरुहतुः पञ्चाननपोतौ गिरेरिव ॥ ५ ॥
नितान्तमुग्धैः पितरौ, सिष्मियाते स्मितैस्तयोः । विसिष्मियाते सौजस्कैः, पादचङ्क्रमणैः पुनः ॥ ६ ॥
धात्रीभिर्धार्यमाणावप्युत्सङ्गे तौ न तस्थतुः । न केसरिकिशोराणां[1], पञ्जरे जात्ववस्थितिः ॥ ७ ॥
स्वच्छन्दं विचरन्तौ तौ, रभसादनुधाविनीः । खेदयामासतुर्धात्रीर्वयो गौणं महात्मनाम् ॥ ८ ॥
क्रीडाशुक-मयूरादीनाददाते विहङ्गमान् । राज्ञः कुमारौ तौ वेगादतिवायुकुमारकौ ॥ ९ ॥
गते प्रस्खलयामासुर्धात्र्यो विविधचाटुभिः । स्वच्छन्दचारिणौ बालौ, तौ भद्रकलभाविव ॥ १० ॥
दिव्यघर्घरका रेजुर्द्वयोरपि कुमारयोः । झणज्झणितिकुर्वाणाः, पदाब्जेष्वलयो यथा ॥ ११ ॥
तयोः कण्ठे निबद्धाऽभात्, स्वर्णरत्नलैलन्तिका[2] । हृदि झलज्झलयन्ती, नभसीव तडिल्लता ॥ १२ ॥
तयोश्च क्रीडतोः स्वैरं, चले काञ्चनकुण्डले । दधतुर्वारिसङ्क्रान्तनूतनादित्यविभ्रमम् ॥ १३ ॥

१ सिंहकिशोरकौ । २ आनाभि लम्बमाना माला ।

चलतोश्चञ्चले चूले[1], चक्रासामासतुस्तयोः । कलापौ[2] नूतनोद्भिन्नाविव बालकलापिनोः ॥ १४ ॥
अङ्कादङ्कं कौतुकेन, निन्याते राजभिश्च तौ । पद्मात् पद्मान्तरं राजहंसाविव महोर्मिभिः ॥ १५ ॥
उत्सङ्गे हृदये दोष्णोः, स्कन्धदेशे शिरस्यपि । तौ समारोपयामास, रत्नाभरणवन्नृपः ॥ १६ ॥
मधुव्रत इवाऽम्भोजं, भूयो भूयः शिरस्तयोः । आजिघ्रन् प्रीतिविवशो, नाऽतृप्यत् पृथिवीपतिः ॥ १७ ॥
राज्ञस्तावङ्गुलीलग्नावुभयोरपि पार्श्वयोः । विचरन्तौ विरेजाते, मेरोरिव दिवाकरौ ॥ १८ ॥
सततं चिन्तयामास, परमानन्दसुन्दरम् । तावात्म-परमात्मानौ, योगीव जगतीपतिः ॥ १९ ॥
तौ ददर्श मुहुर्वेश्मोद्भूतौ कल्पद्रुमाविव । मुहुश्च भाषयामास, राजा राजशुकाविव ॥ २० ॥
सहाऽऽनन्देन भूभर्तुः, सहेक्ष्वाकुकुलश्रिया । क्रमेण प्रतिपेदाते, तौ वृद्धिमधिकाधिकाम् ॥ २१ ॥
तत्राशेषाः कला न्यायं, शब्दशास्त्रादि चापरम् । स्वयं जज्ञेऽजितस्वामी, त्रिज्ञाना हि स्वतो जिनाः ॥ २२ ॥
राज्ञा निर्दिष्टः सुदिने, महोत्सवपुरःसरम् । उपोपाध्यायमध्येतुमारेभे सगरः पुनः ॥ २३ ॥
शब्दशास्त्रादिशास्त्राणि, दिनैः कतिपयैरपि । अपिबत् सगरः सिन्धुसलिलानीव[3] सागरः ॥ २४ ॥
साहित्यशास्त्रसर्वस्वमुपाध्यायादयत्नतः । सौमित्रिरिवाददे[4] ज्योतिर्दीपो दीपान्तरादिव ॥ २५ ॥
साहित्यवल्लीकुसुमैः, काव्यैः कर्णरसायनैः । स वीतरागस्तवनैः, स्वां वाचमकृतार्थयत् ॥ २६ ॥
सम्यक् प्रमाणशास्त्राणि, स प्रज्ञाप्रतिभार्णवः । अग्रहीदविलम्बेन, स्वयंन्यस्तनिधानवत् ॥ २७ ॥
स्याद्वादवादोपन्यासैरमोघैः प्रतिवादिनः । विजिग्ये सगरः शत्रून्, जितशत्रुरिवेषुभिः ॥ २८ ॥

१ शिखे । २ पिच्छौ । ३ नदीनां जलानीव । ४ सगरः ।

षाड्गुण्योपायशक्त्यादिप्रयोगोर्मिभिराकुलम् । अगाहिष्ट स दुर्गाहमर्थशास्त्रमहोदधिम् ॥ २९ ॥
सर्वौषधीरस-वीर्य-विपाकज्ञानदीपकम् । अप्यायुर्वेदमष्टाङ्गमध्यैष्टाऽकृष्टमेव सः ॥ ३० ॥
चतुर्वाद्यं चतुर्वृत्ति, चतुर्धाभिनयात्मकम् । स तूर्यत्रयविज्ञाननिदानं शास्त्रमाददे ॥ ३१ ॥
दन्तघात-मदावस्था-ऽङ्गलक्षणचिकित्सितैः । विनोपदेशैश्चाऽऽपूर्णं, सोऽज्ञासीद् गजलक्षणम् ॥ ३२ ॥
स वाहनविधिं चाश्वलक्षणं सचिकित्सितम् । पाठतोऽनुभवतश्च, विदधे हृदयङ्गमम् ॥ ३३ ॥
धनुर्वेदमथाऽन्येषां, शस्त्राणामपि लक्षणम् । श्रुतमात्रं लीलयाऽपि, स स्वनामेव हृद्यधात् ॥ ३४ ॥
धनुषा फलका[1]-ऽसिभ्यां, छुर्या शल्येन पर्शुना । कुन्तेन भिन्दिपालेन, गदया कम्पणेन च ॥ ३५ ॥
दण्डेन शक्त्या शूलेन, हलेन मुशलेन च । यष्टि-पट्टिस-दुःस्फोट-मुषुण्ढी-गोफणैरपि ॥ ३६ ॥
कणयेन त्रिशूलेन, शङ्कुना चापरैरपि । शस्त्रैः शास्त्रानुमानेन, सोऽगात् सङ्ग्रामकौशलम् ॥ ३७ ॥
॥ त्रिभिर्विशेषकम् ॥

सोऽभूत् सर्वकलापूर्णः, शशाङ्क इव पार्वणः । भूषणैरिव च गुणैर्विनयाद्यैरभूष्यत ॥ ३८ ॥
श्रीमानजितनाथोऽपि, यस्मिंस्तस्मिन्नपि क्षणे । शक्रादिभिः सुरैर्भक्तिभाग्भिरेवमसेव्यत ॥ ३९ ॥
चिक्रीडुः केचिदागत्य, सवयोभूय नाकिनः । अजितस्वामिनस्तत्तल्लीलालोकनलालसाः ॥ ४० ॥
नर्मोक्तिभिर्विचित्राभिश्चाटुभिश्च मुहुर्मुहुः । तं केऽप्यभाषयंस्तद्वाक्सुधारसपिपासिताः ॥ ४१ ॥
आदेशाकाङ्क्षया भर्तुरसमादिशतः सतः । क्रीडाद्यूते पणीकृत्याऽऽदेशान् स्वयं केऽप्यहारयन् ॥ ४२ ॥

१ फलकं 'ढाल' इति लोके प्रसिद्धम् ।

प्रतीहार्यभवन् केचिन्मन्त्र्यभूवंश्च केचन । केऽप्युपानद्धर्यभूवंश्छत्र्यभूवंश्च केचन ॥ ४३ ॥[1]
स्थगीवाह्यभवन् केचित्, प्रेष्यभूवंश्च केचन । अस्त्रधार्यभवन् केचिदमराः क्रीडतः प्रभोः ॥ ४४ ॥[2]
पाठं पाठं च शास्त्राणि, सगरोऽपि दिने दिने । स्वनियोगं नियोगीवाऽजितेशाय व्यजिज्ञपत् ॥ ४५ ॥
उपाध्यायेनाऽप्यभग्नान्, संशयान् सगरः सुधीः । पप्रच्छ स्वामिनं नाभिनन्दनं भरतेशवत् ॥ ४६ ॥
मति-श्रुता-ऽवधिज्ञानैरजितस्वाम्यपि द्रुतम् । चिच्छेद तस्य सन्देहांस्तमांसीवेन्दुरंशुभिः ॥ ४७ ॥
त्रिभिर्यतैः[3] समाक्रामन्, दृढासनपरिग्रहः । प्रसार्याऽदर्शयत् तस्मै, स व्यालमपि हस्तिनम् ॥ ४८ ॥[4]
सपर्याणानपर्याणान्, शूकलानपि[5] वाजिनः । तत्पुरो वाहयामास, धाराभिरपि पञ्चभिः ॥ ४९ ॥
राधावेधं शब्दवेधं, जलान्तर्लक्षवेधनम् । चक्रमृत्पिण्डवेधं च, बाणैः सोऽदर्शयत् प्रभोः ॥ ५० ॥
अदर्शयत् पादगतिं, फलकाऽसिधरश्च सः । प्रविष्टः फलकमध्येऽभ्रमध्य इव चन्द्रमाः ॥ ५१ ॥
कुन्तं शक्तिं शर्वलां च, भ्रमयामास वेगतः । नभसि भ्राम्यदुद्दामविद्युल्लेखाभ्रमप्रदान् ॥ ५२ ॥
सर्वैरपि छुरीस्थानैः, सर्वचारीविचक्षणः । अदर्शयच्छुरीविद्यां, स नृत्यमिव नर्त्तकः ॥ ५३ ॥
अजितस्वामिनेऽन्येषां, शस्त्राणामपि कौशलम् । अदर्शयद् गुरुभक्त्या, तच्छिक्षादित्सया[6] च सः ॥ ५४ ॥
न्यूनं यत्किञ्चिदप्यासीत्, कलासु सगरस्य तु । स्वामी तदशिषत् तादृक्, तादृशस्य हि शिक्षकः ॥ ५५ ॥
एवमात्मानुरूपं तौ, चेष्टमानावुभावपि । आद्यं वयो ललङ्घाते, ग्रामसीमामिवाऽध्वगौ ॥ ५६ ॥
समानचतुरस्रेण, संस्थानेनोपशोभितौ । वज्रऋषभनाराचाख्येन संहननेन च ॥ ५७ ॥

१ छत्रधारका अभूवन् । २ ताम्बूलकरण्डकः स्थगीत्युच्यते । ३ ताडनैः । ४ दुष्टम् । ५ उद्धतान् । ६ तच्छिक्षाग्रहणेच्छया ।

हेमद्युती सार्धचतुर्धनुःशतसमुच्छ्रयौ । श्रीवत्सलाञ्छितोरस्कौ, रुचिरोष्णीषशालिनौ ॥ ५८ ॥
अथाऽऽपतुर्यौवनं तौ, वपुर्लक्ष्मीविशेषकम् । शरदं स्वप्रभाधिक्यकरीं सूर्य-विधू इव ॥ ५९ ॥
॥ त्रिभिर्विशेषकम् ॥
कुटिल-श्यामलैः केशैर्यमुनावीचिसोदरैः । तौ रेजाते ललाटेन, चाऽष्टमीचन्द्रबन्धुना ॥ ६० ॥
तयोः कपोलौ बभतुरादर्शौ काञ्चनाविव । नेत्रे च स्निग्ध-मधुरे, नीलोत्पलदलोपमे ॥ ६१ ॥
दृक्सरस्योरन्तराले, तयोः पालीव नासिका । शुशुभाते चोष्ठपुटे, युग्मबिम्बीफले इव ॥ ६२ ॥
तयोः श्रुती शुभावर्ते, रेजतुः शुक्तिके इव । रेखात्रयपवित्रश्च, कम्बुवत् कण्ठकन्दलः ॥ ६३ ॥
तयोश्च बाहुशिखरौ, कुम्भिकुम्भाविवोन्नतौ । अभातामायतौ पीनौ, भुजौ भुजगराजवत् ॥ ६४ ॥
तयोरुरःस्थलमपि, स्वर्णशैलशिलानिभम् । मनोवदतिगम्भीरा, नाभिश्च प्रत्यभासत ॥ ६५ ॥
कृशश्च कुलिशस्येव, मध्यदेशस्तयोरभूत् । महाकरिकराकारावूरू सरल-कोमलौ ॥ ६६ ॥
एणीजङ्घाप्रतिरूपे, जङ्घाकाण्डे पुनस्तयोः । ऋज्वङ्गुलिदलौ पादौ, स्थलपद्मानुहारिणौ ॥ ६७ ॥
निसर्गेणापि तौ रम्यौ, यौवनेन विशेषतः । बभूवतुर्मधुनेवाऽऽरामौ रामाजनप्रियौ ॥ ६८ ॥
सगरः सर्वमर्त्येभ्यः, सुरेभ्य इव वासवः । उदकृष्यत रूपेण, विक्रमादिगुणैरपि ॥ ६९ ॥
अजितेशः पुनः सर्वकल्पदेवेभ्य उच्चकैः । ग्रैवेयकनिवासिभ्योऽनुत्तरेभ्यश्च सर्वतः ॥ ७० ॥
आहारकशरीरादप्यत्यरिच्यत रूपतः । शैलेभ्य इव सर्वेभ्यो, मानतो मेरुपर्वतः ॥ ७१ ॥ ॥ युग्मम् ॥

१ शुशुभाते । २ राजकुम्भौ । ३ वज्रस्येव । ४ मृगीजङ्घासदृशे । ५ वसन्तेन ।

जितशत्रुर्नरेन्द्रोऽथ, महेन्द्रश्चाऽजितप्रभुम् । नीरागमपि वीवाहकर्मणे स्वयमूचतुः ॥ ७२ ॥
उपरोधात् तयोः स्वं च, कर्म भोगफलं विदन् । तद्वाचमजितस्वामी, तथेति प्रत्यपद्यत ॥ ७३ ॥
श्रियो मूर्त्यन्तराणीव, शतशोऽथ स्वयंवराः । तेन[१] राजा[२] राजकन्या, महर्द्ध्या पर्यणाययत् ॥ ७४ ॥
देवकन्योपमा राजकन्यकाः सगरेण च । पुत्रोद्वाहोत्सवातृप्त्योदवाहयदिलापतिः[३] ॥ ७५ ॥
अजितोऽपीन्द्रियै[४] रेमे, रामाभिरजितप्रभुः । भोग्यकर्म क्षपयितुं, यथाव्याधि[५] हि भेषजम् ॥ ७६ ॥
नानाविद्याभिः क्रीडाभिः, क्रीडास्थानेष्वनेकशः । रामाभिः सगरोऽरंस्त, करेणुभिरिव द्विषः ॥ ७७ ॥
समं भ्रात्रा भवोद्विग्नो, जितशत्रुनृपोऽन्यदा । सम्पूर्णाष्टादशपूर्वलक्षौ पुत्रावदोऽवदत् ॥ ७९ ॥
निर्वाणसाधने[६] हेतुभूतमाददिरे व्रतम् । तदेव हि निजं कार्यं, परकार्यमतः परम् ॥ ८० ॥
आवामपि ग्रहीष्यावः, कुमारौ! सम्प्रति व्रतम् । स्वकार्यस्य ह्ययं हेतुरेष वंशक्रमश्च नः ॥ ८१ ॥
ततो राज-युवराजावावामिव युवामिह । भवतं चाऽनुजानीतमद्य प्रव्रजनाय नौ ॥ ८२ ॥
अथोवाचाऽजितस्वामी, तात! युक्तमिदं हि वः । ममापि युज्यते विघ्नः, कर्म भोगफलं न चेत् ॥ ८३ ॥
अन्यस्यापि व्रतादाने, न विघ्नाय विवेकिनः । किं पुनस्तातमिश्राणामहं समयसाधिनाम्[७]? ॥ ८४ ॥
पितुः पुमर्थं तुर्यं यो, भक्त्याऽपि हि निषेधति । सुतव्याजाद् द्विषन्नेव, स हि तस्योदपद्यत ॥ ८५ ॥

१ अजितस्वामिना सह । २ जितशत्रुः । ३ राजा । ४ न जितः । ५ रोगानुरुपम् । ६ मोक्षसाधने । ७ सङ्केतितकाले आराधनाकारिणाम् । ८ पुत्रमिषात् ।

तथापि प्रार्थ्यसे तात!, लघुतातोऽस्तु राज्यभृत् । विनयी हि लघुभ्राता, पुत्रादप्यतिरिच्यते ॥ ८६ ॥
सुमित्रोऽप्यभ्यधादेवं, स्वामिपादानहं न हि । त्यजामि राज्यमादातुं, कोऽल्पहेतोर्बहु त्यजेत्? ॥ ८७ ॥
राज्यादप्यतिसाम्राज्याच्चक्रवर्तिपदादपि । देवत्वादपि विदुषां, गुरुसेवा गरीयसी ॥ ८८ ॥
अथोचेऽजितनाथस्तं, राज्यमादित्ससे न चेत् । तात! भावयतिर्भूत्वा, तथाप्यास्व सुखाय नः ॥ ८९ ॥
जितशत्रुरपि स्माऽऽह, बन्धो! निर्बन्धकारिणः । सूनोर्मन्यस्व वचनं, भावतोऽपि यतिर्यतिः ॥ ९० ॥
साक्षादयं तीर्थकरोऽस्यैव तीर्थे तवेप्सितम् । सेत्स्यतीति प्रतीक्षस्वाऽत्युत्सुको वत्स! मा स्म भूः ॥ ९१ ॥
एकस्य धर्मचक्रित्वं, चक्रित्वमपरस्य च । सूनोः पश्यन् लप्स्यसे त्वं, सुखं सर्वसुखाधिकम् ॥ ९२ ॥
व्रतोत्सुकोऽपि तद्वाचं, सुमित्रः प्रत्यपद्यत । सतां ह्यलङ्घ्या गुर्वाज्ञा, मर्यादोदन्वतामिव[1] ॥ ९३ ॥
जितशत्रुरथ प्रीत, उत्सवेन महीयसा । अजितस्वामिनो राज्याभिषेकमकरोत् स्वयम् ॥ ९४ ॥
मुमुदे मेदिनी सर्वा, तस्य राज्याभिषेकतः । विश्वत्राणक्षमे नेतर्यासे कः प्रीयते न हि? ॥ ९५ ॥
यौवराज्ये च सगरमजितस्वाम्यपि न्यधात् । द्वैतीयीकीमिव निजां, तनूमतनुसौहृदः[2] ॥ ९६ ॥
श्रीमानजितनाथोऽपि, जितशत्रोस्तदैव हि । ऋद्ध्या महत्या विधिवच्चक्रे निष्क्रमणोत्सवम् ॥ ९७ ॥
ऋषभस्वामितीर्थस्थस्थविराणामथान्तिके । जितशत्रुः परिव्रज्यां, शिश्रिये मुक्तिमातरम् ॥ ९८ ॥
बहिरङ्गानिव जयन्नन्तरङ्गानरींस्ततः । अखण्डितं राज्यमिव, पालयामास स व्रतम् ॥ ९९ ॥
उत्पन्नकेवलज्ञानः, शैलेशीध्यानमास्थितः । क्षीणाष्टकर्मा स प्राप, क्रमेण परमं पदम् ॥ १०० ॥

१ समुद्राणां मर्यादा इव । २ शरीरम्

इतिश्चाजितनाथोऽपि, सनाथैः[१] सकलर्द्धिभिः । सलीलं पालयामास, स्वापत्यमिव मेदिनीम् ॥ १०१ ॥
तस्यावतो वसुमतीमपि दण्डादिभिर्विना । ययुः प्रजा वर्त्मनैव, रथ्या[२] इव सुसारथेः ॥ १०२ ॥
धान्यानामेव निष्पेषः, पशूनामेव बन्धनम् । मणीनामेव वेधोऽपि, तूर्याणामेव ताडनम् ॥ १०३ ॥
स्वर्णानामेव सन्तापः, शस्त्राणामेव तेजनम् । शालीनामेवोत्खननं, स्त्रीभ्रुवामेव वक्रता ॥ १०४ ॥
शारीणामेव हननं, क्षेत्रोर्व्या एव दारणम् । पक्षिणामेव निक्षेपः, काष्ठपञ्जरमन्दिरे ॥ १०५ ॥
रुजामेव निग्रहश्चाऽब्जानामेव जडस्थितिः[३] । अगरोरेव दहनं, श्रीखण्डस्यैव घर्षणम् ॥ १०६ ॥
दधिष्वेव प्रमथनमिक्षुष्वेव निपीडनम् । अलिष्वेव मधुपता[४], गजेष्वेव मदोदयः ॥ १०७ ॥
प्रणयेष्वेव कलहोऽपवादेष्वेव भीरुता । गुणगणेष्वेव लोभः, स्वदोषेष्वेव चाऽक्षमा ॥ १०८ ॥
प्रजामयूरीपर्जन्ये, प्रार्थनाकल्पपादपे । समभूदजितस्वामिनृपे शासति मेदिनीम् ॥ १०९ ॥

॥ सप्तभिः कुलकम् ॥

भेजिरे भूभुजः पत्तिं[५]मानिनो मानि[६]नोऽपि तम् । दासन्ति ह्यन्यमणयः, सर्वे चिन्तामणेः पुरः ॥ ११० ॥
न दण्डनीतिं प्रायुङ्क्त, भ्रूभङ्गमपि न व्यधात् । वंशगा भूरभूत् तस्य, सुभगस्येव कामिनी ॥ १११ ॥
आचकर्ष श्रियो राज्ञां[७], स स्वैस्तेजोभिरूर्जितैः । किरणैरुष्णकिरणो[८], वारीणि सरसामिव ॥ ११२ ॥
तस्य वेश्माङ्गणभुवो, बभूवुः प्रतिवासरम् । नरेन्द्रोपायनेभानां, पङ्किला मदवारिभिः ॥ ११३ ॥

१ सहितः । २ अश्वाः । ३ अब्जपक्षे जले स्थितिः । ४ मद्यपानत्वम् । ५ आत्मानं पत्तिं मन्यमानाः । ६ मानयुक्ताः । ७ सूर्यपक्षे चन्द्राणाम् । ८ सूर्यः ।

चतुरं विक्रममाणैरीशितुस्तस्य वाज़िभिः । वाह्यालीभूमिवत् सर्वाः, समाचक्रमिरे दिशः ॥ ११४ ॥
अजितस्वामिनः[३] सैन्ये, पत्तीनामनसामपि । सङ्ख्यां कर्तुमलं कश्चिन्नोर्मीणामिव वारिधौ ॥ ११५ ॥
निषादिनः सादिनश्च, रथिनः पत्तयोऽपि च । बभूवुः प्रक्रियामात्रं, भर्तुर्दोर्वीर्यशालिनः ॥ ११६ ॥
अद्वैतेऽपि स ऐश्वर्ये, जातु नोत्सेकमादधे । न चाऽवलेपमकरोदतुलेऽपि हि दोर्बले ॥ ११७ ॥
रूपे चाप्रतिरूपेऽपि, नेशः सुभगमान्यभूत् । लाभेन विपुलेनापि, न भेजे चोन्मदिष्णुताम् ॥ ११८ ॥
अन्यैरपि मदस्थानैर्नाऽऽससाद मदं विभुः । तृणाय प्रत्युतामंस्त, सर्वं जानन्ननित्यताम् ॥ ११९ ।
॥ त्रिभिर्विशेषकम् ॥
एवं च पालयन् राज्यं, कौमारात् प्रभृति प्रभुः । त्रिपञ्चाशत्पूर्वलक्षीं, सुखमेवाऽत्यवाहयत् ॥ १२० ॥
विसृज्याऽन्येद्युरास्थानीं, रहःस्थानमुपेयिवान् । ज्ञानत्रयधरः स्वामी, स्वयमेवमचिन्तयत् ॥ १२१ ॥
अद्यापि हि कियद् भुक्तप्रायभोगफलैरपि । स्वकार्यविमुखैः स्थेयमस्माभिर्गृहवासिभिः? ॥ १२२ ॥
त्रातव्योऽयं मया देशो, रक्षणीयमिदं पुरम् । वासनीयास्त्वमी ग्रामाः, पालनीया इमे जनाः ॥ १२३ ॥
वर्द्धनीया हस्तिनोऽमी, पोषणीया इमे हयाः । भरणीया अमी भृत्यास्तर्प्याश्चामी वनीपकाः ॥ १२४ ॥
पोष्या अमी सेवकाश्च, रक्ष्याश्चामी शरण्यगाः । सम्भाष्याः पण्डिताश्चामी, सत्कार्याः सुहृदस्त्वमी ॥ १२५ ॥
अनुग्राह्या मन्त्रिणोऽमी, उद्धार्या बन्धवोऽप्यमी । रञ्जनीयास्त्वमी दारा, लालनीयास्त्वमी सुताः ॥ १२६ ॥
इति प्रतिक्षणमपि, परकार्यैः समाकुलः । क्षपयत्यखिलं जन्मी, मानुषं जन्म निष्फलम् ॥ १२७ ॥

१ रथानाम् । २ गजवाहाः । ३ अश्ववाराः । ४ अभिमानम् । ५ गर्वम् । ६ अनन्यसमाने । ७ सभाम् । ८ याचकाः।

पुमानेषां च कार्येण, युक्तायुक्तमचिन्तयन् । विमूढः पशुवन्नानापापानि विदधाति हि ॥ १२८ ॥
येषामर्थे च पापानि, विधत्ते मुग्धधीर्जनः । ते तं मृत्युपथे यान्तं, नानुयान्ति मनागपि ॥ १२९ ॥
इहैव तेऽवतिष्ठन्ते, यदि तिष्ठन्तु तन्ननु । अहो! शरीरमप्येतन्नाऽनुयाति पदात् पदम् ॥ १३० ॥
ततः शरीरकस्याऽपि, कृतघ्नस्य कृते मुधा । मुग्धैर्विधीयते हन्त!, पापकर्म शरीरिभिः ॥ १३१ ॥
एक उत्पद्यते जन्तुरेक एव विपद्यते । कर्माण्यनुभवत्येकः, प्रचितानि[1] भवान्तरे ॥ १३२ ॥
अन्यैस्तेनाऽर्जितं वित्तं, भूयः सम्भूय भुज्यते । स त्वेको नरकक्रोडे, क्लिश्यते निजकर्मभिः ॥ १३३ ॥
दुःखदावाग्निभीष्मेऽस्मिन्, विवते[2] भवकानने । बम्भ्रमीत्येक एवाऽसौ, जन्तुः कर्मवशीकृतः ॥ १३४ ॥
यद् दुःखं भवसम्बन्धि, यत् सुखं मोक्षसम्भवम् । एक एवोपभुङ्क्ते तन्न सहायोऽस्ति कश्चन ॥ १३५ ॥
यथैवेकस्तरन् सिन्धुपारं व्रजति तत्क्षणात् । न तु हृत्पाणि-पादादिसंयोजितपरिग्रहः ॥ १३६ ॥
तथैव धन-देहादिपरिग्रहपराङ्मुखः । स्वस्थ एको भवाम्भोधिपारमासादयत्यसौ ॥ १३७ ॥
इति चिन्तापरं नाथं, भवनिर्विण्णचेतसम् । सारस्वतादयो लोकान्तिका एत्याऽब्रुवन् सुराः ॥ १३८ ॥
स्वयं बुद्धोऽसि भगवन्नस्माभिर्न हि बोध्यसे । किन्त्विदं स्मार्यते विश्वनाथ! तीर्थं प्रवर्तय ॥ १३९ ॥
इत्युदीर्याऽजितस्वामिपादान् नत्वा च ते तदा । ब्रह्मलोकं ययुः सायं, स्वनीडमिव पक्षिणः ॥ १४० ॥
आत्मचिन्तानुकूलेन, तेन तद्वचसा प्रभोः । ववृधे भववैराग्यं, पौरस्त्यमरुता[3]ऽब्दवत् ॥ १४१ ॥
ततः सगरमाहूय, जगाद त्रिजगद्गुरुः । गृह्यतां राज्यभारो नः, संसाराब्धिं तीतीर्षताम् ॥ १४२ ॥

१ सञ्चितानि । २ पुनः पुनः भ्रमति । ३ पूर्वदिग्वायुना मेघो यथा वर्धते तद्वत् ।

इत्युक्तोऽजितनाथेन, श्यामास्योऽश्रूणि पातयन् । एकैकबिन्दुवर्षीव, वारिदः सगरोऽब्रवीत् ॥ १४३ ॥
अभक्तिः किं मया देव!, विदधे देवपादयोः । आत्मनो मां पृथक् कर्तुमद्य येनैवमादिशः? ॥ १४४ ॥
अभक्तिर्वाऽस्तु विहिता, नाऽप्रसादाय साऽपि हि । पूज्यैरभक्तोऽपि शिशुः, शिष्यते[1] न तु हीयते ॥ १४५ ॥
किं नामाऽभ्रंलिहेनाऽपि, छायाहीनेन शाखिना? । किं वा समुन्नतेनाऽपि, वृष्टिहीनेन वार्मुचा[2]? ॥ १४६ ॥
किं वा निर्झरहीनेन, तुङ्गेनाऽपि महीभृता? । किं वा लावण्यहीनेन, सुरूपेणाऽपि वर्ष्मणा[3]? ॥ १४७ ॥
किं वा गन्धविहीनेन, पुष्पेणाऽपि विकासिना? । अनेन त्वद्विहीनेन, राज्येनाऽपि हि किं मम? ॥ १४८ ॥

॥ त्रिभिर्विशेषकम् ॥

निर्ममस्य निरीहस्य, मुमुक्षोरपि ते सतः । प्रभो! पादौ न मोक्ष्यामि, का राज्यादानसङ्कथा? ॥ १४९ ॥
राज्यं पुत्राः कलत्राणि, मित्राण्यथ परिच्छदः । तृणवत् सुत्यजं सर्वं, त्वत्पादौ दुस्त्यजौ तु मे ॥ १५० ॥
राजीभवति नाथेऽहं, युवराज्यभवं यथा । त्वयि व्रतधरे शिष्यीभविष्याम्यधुना तथा ॥ १५१ ॥
गुरुपादाम्बुजोपास्तितत्परस्य दिवानिशम् । शैक्षस्य[4] भैक्षमपि हि, साम्राज्यादतिरिच्यते ॥ १५२ ॥
भवं तरिष्याम्यज्ञोऽपि, भवत्पादावलम्ब्यहम् । गोपुच्छलग्नो हि तरेन्नदीं गोपालबालकः ॥ १५३ ॥
दीक्षां सह त्वयाऽऽदास्ये, विहरिष्ये सह त्वया । दुःसहांश्च सहिष्येऽहं, त्वया सह परीषहान् ॥ १५४ ॥
त्वया सहोपसर्गांश्च, सहिष्ये त्रिजगद्गुरो! । कथञ्चिदपि न स्थास्याम्यहमत्र प्रसीद मे ॥ १५५ ॥
अथेत्थमजितस्वामी, सेवाबद्धैकसङ्गरम्[5] । सगरं व्याजहारातिपीयूषोद्गारया गिरा ॥ १५६ ॥

१ शिक्ष्यते । २ मेघेन । ३ शरीरेण । ४ शिष्यस्य । ५ सेवानिबद्धप्रतिज्ञम् ।

युक्त एवाऽऽग्रहो वत्स! संयमग्रहणं प्रति । किन्तु भोगफलं कर्म, क्षीयतेऽद्यापि ते न हि ॥ १५७ ॥
भुक्त्वा भोगफलं कर्माहमिव त्वमपि स्वयम् । मोक्षस्य साधकतमं, गृह्णीयाः समये व्रतम् ॥ १५८ ॥
युवराज! ततो राज्यं, गृहाणेदं क्रमागतम् । वयं संयमसाम्राज्यमुपादास्यामहे पुनः ॥ १५९ ॥
इत्युक्तः स्वामिना सोऽथ, मनस्येवमचिन्तयत् । भर्तुर्विरहभीराज्ञाभङ्गभीश्च दुनोति माम् ॥ १६० ॥
दुःखाय स्वामिविरहस्तदाज्ञातिक्रमश्च मे । इति द्वयं विमृशतो, गुर्वाज्ञापालनं वरम् ॥ १६१ ॥
इत्थं विचार्य मनसा, सगरो गद्गदस्वरः । तथेति स्वामिनो वाचं, प्रतिपेदे महामतिः ॥ १६२ ॥
ततो नरेश्वरवरः, सगरस्य महात्मनः । सद्यो राज्याभिषेकार्थमादिदेश नियोगिनः ॥ १६३ ॥
अथाऽऽनीयत पानीयं, स्नानीयं तीर्थसम्भवम् । कुम्भैरम्भोरुहच्छन्नैर्लद्यूभूतैर्द्रुदैरिव ॥ १६४ ॥
अभिषेकोपकरणद्रव्याण्यन्यान्यपि क्षणात् । व्यापारिभिरढौक्यन्त, प्राभृतानीव राजभिः ॥ १६५ ॥
प्रतापेष्विव मूर्त्तेषु[1], समायातेषु राजसु । आगतेषु च मन्त्रेणाऽतीन्द्रमन्त्रिषु मन्त्रिषु ॥ १६६ ॥
उपेतेषु चमूपालेष्वाशापालेष्विवाऽऽज्ञया[2] । मिलितेष्वेककालं च, हर्षोत्तालेषु बन्धुषु ॥ १६७ ॥
हस्त्यश्वसाधनाध्यक्षप्रभृतिष्वपरेष्वपि[3] । उपस्थितेषु युगपदुत्थायैकगृहादिव ॥ १६८ ॥
शङ्खेष्वापूर्यमाणेषु, नादनिर्झरसानुषु । आहतेषु मृदङ्गेषु,, मेघसब्रह्मचारिषु[4] ॥ १६९ ॥
कोणैराहन्यमानेषु, दुन्दुभिष्वानकेषु च । प्रतिशब्दैः सर्वदिशां, मङ्गलाध्यापकेष्विव ॥ १७० ॥
आस्फलत्सु मिथः कांस्यतालेषूर्मिष्विवाऽम्बुधेः । झणज्झणायमानासु, झल्लरीषु च सर्वतः ॥ १७१ ॥

१ अतिक्रान्तबृहस्पतिषु । २ दिक्पालेषु । ३ सेनापतिः । ४ मेघसदृशेषु ।

अपरेष्वपि तूर्येषु, पूर्यमाणेषु केषुचित् । केषुचित् ताड्यमानेष्वास्फाल्यमानेषु केषुचित् ॥ १७२ ॥
गन्धर्वेषु[1] च गायत्सु, शुद्धगीतानि सुस्वरम् । आशिषो भाषमाणेषु, ब्रह्मवैतालिकादिषु ॥ १७३ ॥
सौवस्तिकप्राग्रहरैरजितस्वामिशासनात् । राज्याभिषेको विधिवत्, सगरस्य व्यधीयत ॥ १७४ ॥
॥ नवभिः कुलकम् ॥
प्रणेमुः सगरं सर्वे, नृप-सामन्त-मन्त्रिणः । उदयन्तमिवाऽऽदित्यमुद्यताञ्जलयो जनाः ॥ १७५ ॥
उपेत्य पौरप्रवरा, वरोपायनपाणयः । भक्त्या तमुर्वीनेतारं[2], नवमिन्दुमिवाऽनमन् ॥ १७६ ॥
स्वामिना न वयं त्यक्ता, मूर्त्यन्तरमिदं निजम् । नेतारं कुर्वताऽस्माकमित्यूचुर्मुदिताः प्रजाः ॥ १७७ ॥
भगवानजितेशोऽपि प्रारेभेऽथ कृपार्णवः । प्रदातुं वार्षिकं दानं, वर्षाब्द इव वर्षितुम् ॥ १७८ ॥
आज्ञप्ता वासवेनाऽथ, प्रेरिता धनदेन च । तिर्यग्जृम्भकनामानस्तत्रोपेयुर्दिवौकसः ॥ १७९ ॥
अथ भ्रष्टानि नष्टानि, प्रक्षीणस्वामिकानि[3] च । परितो नष्टकेतूनि[4], प्रणष्टाधिपतीनि च ॥ १८० ॥
गिरिकन्दरवर्त्तीनि, श्मशानस्थानगानि च । भवनान्तरगुप्तानि, तत्राऽऽजह्रुर्धनानि ते ॥ १८१ ॥ ॥ युग्मम् ॥
शृङ्गाटेषु चतुष्केषु, चत्वरेषु त्रिकेषु च । प्रवेश-निर्गमोर्व्यां च, पुञ्जीचक्रुश्च तानि ते ॥ १८२ ॥
त्रिके त्रिके पथि पथि, चत्वरे चत्वरेऽपि च । एतद् गृह्णीत वस्त्वेवं, घोषणां स्वाम्यकारयत् ॥ १८३ ॥
यो यद् ययाचे तत् तस्मै, ददौ वसु जगत्पतिः । सूर्योदयात् समारभ्य, निषण्णो भोजनावधि ॥ १८४ ॥
कोटिरेका हिरण्यस्य, लक्षैः समधिकाऽष्टभिः । अर्थिभ्यो विश्वनाथेन, दीयते स्म दिने दिने ॥ १८५ ॥

१ पुरोहितश्रेष्ठैः । २ राजानम् । ३ नष्टस्वामिकानि । ४ नष्टचिह्नानि ।

ततश्चाऽदत्त वर्षेण, हेम्नः कोटिशतत्रयम् । अष्टाशीतिं तथा कोटीर्लक्षाशीतिं तथा प्रभुः ॥ १८६ ॥
अनुभावेन कालस्य, स्वामिनश्च प्रभावतः । यथेप्सितप्रदानेऽपि, नाऽधिकग्राहिणोऽभवन् ॥ १८७ ॥
कृपाधनो धिनोति स्म, धनैरेवं धरां प्रभुः । चिन्तामणिरिवाऽचिन्त्यमहिमा वत्सरावधि ॥ १८८ ॥
अथ वार्षिकदानान्ते, शक्रस्याऽचलदासनम् । अवधिज्ञानतोऽज्ञासीत्, स च दीक्षाक्षणं[1] विभोः ॥ १८९ ॥
चचाल च हरिर्देवैः[2], समं सामानिकादिभिः । दीक्षाक्षणे भगवतः, कर्तुं निष्क्रमणोत्सवम् ॥ १९० ॥
विमानै रचयन्नाशाः, सञ्चरन्मण्डपा इव । उत्तुङ्गैर्वारणवरैरुत्पतत्पर्वता इव ॥ १९१ ॥
आक्रामन् व्योम तुरगैस्तरङ्गैरिव सागरः । आघट्टयन् रविरथं, रथैरस्खलितस्यदैः[3] ॥ १९२ ॥
नभस्तलं तिलकयन्, किङ्किणीमालभारिभिः । ध्वजांशुकैश्च दिग्दन्तिकर्णतालानुहारिभिः ॥ १९३ ॥
गीयमानोऽमरैः कैश्चिद्, गान्धारग्रामबन्धुरम् । स्तूयमानस्तथा कैश्चित्, सत्काव्यकुलकैर्नवैः ॥ १९४ ॥
कैश्चिद् विज्ञप्यमानश्च, मुखदत्तपटाञ्चलैः । संस्मार्यमाणः कैश्चिच्च, प्राक्तनीस्तीर्थकृत्कथाः ॥ १९५ ॥
पवित्रितां स्वामिपादैर्मन्यमानोऽधिकां दिवः । दिवस्पतिरुपेयाय, विनीतानगरीं क्षणात् ॥ १९६ ॥
अन्येऽप्यासनकम्पेन, ज्ञात्वा दीक्षाक्षणं विभोः । सुरेन्द्रा असुरेन्द्राश्च, विनीतां तद्वदाययुः ॥ १९७ ॥
तत्राऽच्युताद्या देवेन्द्रा, नरेन्द्राः सगरादयः । दीक्षाभिषेकं विदधुः, क्रमेण परमेशितुः ॥ १९८ ॥
वाससा देवदूष्येण, वपुः स्नानजलाविलम्[4] । ममार्ज शक्रो माणिक्यमिव वैकटिकाग्रणीः[5] ॥ १९९ ॥
गन्धकार इवाऽऽयुक्तो, वज्रपाणिः स्वपाणिना । चर्चयामास रुचिरैरङ्गरागैर्जगद्गुरुम् ॥ २०० ॥

१ दीक्षासमयम् । २ इन्द्रः । ३ अकुण्ठितवेगैः । ४ आर्द्रम् । ५ मणिकारमुख्यः ।

देवदूष्याण्यदूष्याणि[१], जगन्नाथेन तत्क्षणे । वासांसि वासयामास, वासवो वासनावसुः[२] ॥ २०१ ॥
मुकुटं कुण्डले हारं, केयूरे कङ्कणे अपि । अपरानप्यलङ्कारान्, नाथेनाऽग्राहयद्धरिः ॥ २०२ ॥
प्रसूनदामभिर्दिव्यैः, सनाथीकृतकुन्तलः । तृतीयेनेव नेत्रेण, तिलकेनालिके[३] विभान् ॥ २०३ ॥
देवीभिर्दानवीभिश्च, मानवीभिश्च सर्वतः । विचित्रभाषामधुरं, गीतोपक्रान्तमङ्गलः ॥ २०४ ॥
सूतैरिव[४] स्तूयमानः, सुरा-ऽसुर-नरेश्वरैः । व्यन्तरैः कृतधूपार्घः, स्वर्णधूपघटीधरैः ॥ २०५ ॥
सकुरण्टकेन श्वेतातपत्रेण महीयसा । विराजमानः शिरसि, हृदेनेव हिमाचलः[५] ॥ २०६ ॥
वीज्यमानोऽमरैश्चारुचामरैः पार्श्वयोर्द्वयोः । वेत्रिणेव विनीतेन, दत्तहस्तो बिडौजसा ॥ २०७ ॥
हर्ष-शोकादिमूढेन, सगरेण महीभुजा । अनुकूलानिलेनेवाऽन्वीयमानोऽश्रुवर्षिणा ॥ २०८ ॥
परितः पावयन् पादैः, स्थलाम्भोजनिभैर्भुवम् । सहस्रवाह्यामारोहच्छिबिकां सुप्रभां प्रभुः ॥ २०९ ॥
॥ सप्तभिः कुलकम् ॥
उदासे शिबिका पूर्वं, नरैर्विद्याधरैस्ततः[६] । देवैस्तदनु खे खेटविमानभ्रमदायिनी[७] ॥ २१० ॥
तैरुत्क्षिप्ताऽम्बरतलेऽनुद्घातगतिशालिनी । यानपात्रमिवाऽम्भोधौ, सा स्वामिशिबिका बभौ ॥ २११ ॥
तत्र सिंहासनासीनं, चामराभ्यां जगत्प्रभुम् । वीजयामासतुरुभौ, सौधर्मेशानवासवौ ॥ २१२ ॥
प्रचचाल जगन्नाथो, विनीतामध्यवर्त्मना[८] । वरो वधूपाणिमिव, दीक्षामादातुमुत्सुकः ॥ २१३ ॥
चलन्तश्चलताडङ्काश्चलहाराश्चलाञ्चलाः[९] । शिबिकावाहिनो रेजुश्चलाः कल्पद्रुमा इव ॥ २१४ ॥

१ अदूषितानि । २ धर्मरूपा वासना एव वसुर्यस्य सः । ३ ललाटे । ४ बन्दिजनैः । ५ इन्द्रेण । ६ देवः । ७ प्रतिघातवर्जितया गत्या राजमाना। ८ चलकुण्डाः । ९ चलवस्त्राञ्चलाः ।

काश्चन प्रस्खलन्तीषु, सदा सहचरीष्वपि । काश्चिद् वक्षःस्थलास्फालाद्धारेषु प्रत्रुटत्स्वपि ॥ २१५ ॥
अंसाद् विस्रंसमानेषूत्तरीयेष्वपि काश्चन । काश्चिच्छून्यीभवद्द्वारेष्वपि गेहाङ्गणेषु च ॥ २१६ ॥
काश्चिद् देशान्तरादिष्टातिथिष्वभ्यागतेष्वपि । पुत्रजन्मोत्सवे सद्यः, समुत्पन्नेऽपि काश्चन ॥ २१७ ॥
काश्चित् तत्कालमुद्वाहलग्नकालेऽप्युपस्थिते । काश्चन स्नानोपनतेष्वपि स्नानीयवस्तुषु ॥ २१८ ॥
गृहीताचमनाः काश्चिदर्धभुक्तेऽपि भोजने । काश्चिदर्धोपयुक्तेऽपि, कालप्राप्ते विलेपने ॥ २१९ ॥
कुण्डलादिष्वलङ्कारेष्वर्धामुक्तेषु[1] काश्चन । स्वामिनिष्क्रमणोदन्तेऽर्धश्रुतेऽपि हि काश्चन ॥ २२० ॥
धम्मिल्लान्तः[2] काश्चिदर्धबद्धे कुसुमदामनि । अधिभालस्थलं काश्चित्, तिलकेऽर्धकृतेऽपि हि ॥ २२१ ॥
गृहकर्तव्यमन्त्रेषु[3], काश्चिदर्धोदितेष्वपि । काश्चिदर्धकृतेष्वेव, नित्यनैमित्तिकेष्वपि ॥ २२२ ॥
सम्भ्रमात् पादचारेण, यानेषूपस्थितेष्वपि । उपेयुः स्वामिनं द्रष्टुं, पौर्यो भक्तिपवित्रिताः ॥ २२३ ॥
॥ नवभिः कुलकम् ॥
क्षणमग्रे क्षणं पृष्ठे, क्षणं चोभयपार्श्वयोः । यूथपस्येव[4] कलभाः, पौरास्तस्थुर्जगत्प्रभोः ॥ २२४ ॥
अट्टानारुरुहुः केचित्, कुट्टिमानि च केचन । प्रासादाग्राणि केचित् तु, मञ्चाग्राणि च केचन ॥ २२५ ॥
केऽपि प्राकारशृङ्गाणि, केऽपि द्रुशिखराणि च । केऽप्युच्चैः सिन्धुरस्कन्धान्[5], स्वामिदर्शनकाम्यया ॥ २२६ ॥
॥ युग्मम् ॥
अञ्चलांश्चालयामासुः, काश्चिच्चामरलीलया । लाजान् प्रचिक्षिपुः काश्चिद्धर्मबीजमिवाऽवनौ ॥ २२७ ॥

१ अर्धपरिहितेषु । २ कबरीमध्ये । ३ गृहकार्यविचारेषु । ४ गजस्येव । ५ गजस्कन्धान् ।

आरात्रिकं सप्तशिखं, काश्चिद् वह्निमिवोद्दधुः । पूर्णपात्राण्यधुः काश्चिद्, यशांसीव पुरः प्रभोः ॥ २२८ ॥
पूर्णकुम्भान् दधुः काश्चिन्मङ्गलानां निधिनिव । खे सन्ध्याभ्रनिभं चक्रुः, काश्चिद् वस्त्रावतारणम् ॥ २२९ ॥
मङ्गलानि जगुः काश्चिन्नृत्यन्ति स्म च काश्चन । रुचिरं जहसुः काश्चिन्मुदिताः पौरयोषितः ॥ २३० ॥
॥ चतुर्भिः कलापकम् ॥
व्योमापि व्यानशे भक्तैर्विद्याधर-सुरा-ऽसुरैः । इतस्ततो धावमानैः, सौपर्णेय[1]कुलैरिव ॥ २३१ ॥
इन्द्राणां च चतुःषष्टेर्नाट्यानीकैरनेकशः । नाटकान्यभ्यनीयन्त, स्वाम्यग्रे धन्यमानिभिः ॥ २३२ ॥
सङ्गीतकानि गन्धर्वसैन्या अपि बिडौजसाम् । ओजायमाना युगपज्जायमानमुदो व्यधुः ॥ २३३ ॥
सगरानुजीविनोऽपि, जायाजीवा[2]ः पदे पदे । पात्रैर्विचित्रैर्नाट्यानि, दिविषत्स्पर्धया व्यधुः ॥ २३४ ॥
अयोध्यामण्डनं राजगन्धर्वरमणीजनाः । विश्वदृग्दृष्टिबन्धन्ति, प्रेक्षणीयानि चक्रिरे ॥ २३५ ॥
तदा च दिव्यैर्भौमैश्च, नाट्यसङ्गीतकस्वरैः । रोदःकुक्षिम्भरिरभूदुत्तालस्तुमुलध्वनिः ॥ २३६ ॥
अनेकनृप-सामन्त-महेभ्यानां प्रचारिणाम् । सम्मर्दत्रुटितैहारैरासन् शर्करि[3]ला भुवः ॥ २३७ ॥
दिव्यानामथ भौमानां, मत्तानां वरदन्तिनाम् । मदाम्भोभिरजायन्त, राजमार्गाश्च पङ्किलाः ॥ २३८ ॥
सुरा-ऽसुर-नरैः सर्वैर्मिलितैः स्वामिनोऽन्तिके । एकाधीशतया रेजे, त्रिलोक्यप्येकलोकवत् ॥ २३९ ॥
अत्यन्तदक्षिणो लोकदाक्षिण्येन जगत्पतिः । प्रतीयेष निरीहोऽपि, मङ्गलानि पदे पदे ॥ २४० ॥
सम्भूय गच्छतस्तत्र, सुरानपि नरानपि । समप्रसादया दृष्ट्याऽनुजग्राह जगद्गुरुः ॥ २४१ ॥

१ गरुडसमूहैः । २ नर्तकाः । ३ शर्करायुक्ताः ।

सुरा-ऽसुर-नरैरेवं, क्रियमाणमहोत्सवः । सहस्राम्रवणं नाम, प्रापोद्यानं क्रमात् प्रभुः ॥ २४२ ॥
कुसुमामोदमत्तालिश्रेणिदुःसञ्चरान्तरैः । परितः कृंतवृतिकं, सन्ततैः केतकीद्रुमैः ॥ २४३ ॥
वण्ठैरिव[२] महेभ्यानां, नागराणां कुमारकैः । रिरंसुभिर्मार्ज्यमानमहीरुहलतान्तरम् ॥ २४४ ॥
मुहुः कुरुबका-ऽशोक-बकुलादिमहीरुहाम् । क्रीडाप्रसङ्गात् पौरीभिः, पूर्यमाणोरुदोहदम् ॥ २४५ ॥
विद्याधरकुमारैश्च, निषद्य पथिकैरिव । आचम्यमानसुस्वादुसारणीवारि कौतुकात् ॥ २४६ ॥
अभ्रंलिहेषु वृक्षेषु, कृतास्पदमनेकशः । क्रीडया खेचरद्वन्द्वैर्विहङ्गमिथुनैरिव ॥ २४७ ॥
परागैर्दिव्यकर्पूर-कस्तूरीक्षोदसोदरैः । अकर्कशैर्[३]गुल्फदध्नैर्विश्वक् सिक्तिलावनि ॥ २४८ ॥
राजादन-नागरङ्ग-करुणक्ष्मारुहां तले । दुग्धेनोद्यानपालीभिः, पूर्यमाणालवालकम् ॥ २४९ ॥
विचित्रसन्दर्भविधौ, सस्पर्धाभिः परस्परम् । पुष्पैर्मालिं[४]कबालाभिरारब्धोद्दामदामकम् ॥ २५० ॥
दिव्यतल्पा-ऽऽसनामत्रेष्वपि सत्सु कुतूहलात् । शयाना-ऽऽसीन-भुञ्जानजनं रम्भादलेष्वलम् ॥ २५१ ॥
फलप्राग्भारभारावनम्रप्रालम्बमण्डलैः । चुम्ब्यमानावनितलं, विविधैरवनीरुहैः ॥ २५२ ॥
सहकाराङ्कुरास्वादादश्रान्तमवकोकिलम्[५] । दाडिमास्वादनोन्मत्तशुककोलाहलाकुलम् ॥ २५३ ॥
एकच्छायं क्षितिरुहैर्वर्षाभ्रैरिव सन्ततैः । प्रविवेश तदुद्यानं, भगवानजितप्रभुः ॥ २५४ ॥

॥ द्वादशभिः कुलकम् ॥

ततश्च शिबिकारत्नादुत्ततार जगद्गुरुः । रथादिव रथी सिन्धुमुत्तरीतुं भवं स्वयम् ॥ २५५ ॥

१ कृतवेष्टनम् । २ विना वेतनेन कार्यकरा वण्ठाः । ३ गुल्फप्रमाणैः । ४ मालाकारकन्याभिः । ५ अवक्रुष्टं कोकिलाभिः ।

उज्झाञ्चकार तदनु, रत्नालङ्करणादिकम् । रत्नत्रितयमादित्सुर्द्युसदामपि दुर्लभम् ॥ २५६ ॥
देवदूष्यं देवराजेनोपनीतमदूषितम् । सोपधिं धर्ममादेष्टुं, जगत्पतिरुपाददे ॥ २५७ ॥
कृतषष्ठतपा माघस्योज्ज्वले नवमीदिने । रोहिणीऋक्षगे चन्द्रे, सप्तच्छदतरोस्तले ॥ २५८ ॥
सायाहन्यजितस्वामी, मुष्टिभिः पञ्चभिः कचान् । स्वयमुत्पाटयामास, रागादीनिव सर्वतः ॥ २५९ ॥
॥ युग्मम् ॥
सौधर्मेन्द्रः प्रतीयेष, स्वोत्तरीयाञ्चलेन तान् । प्रसाददत्तार्थमिव, पुष्कलं वरिवस्यकः ॥ २६० ॥
सहस्राक्षः क्षणेनाऽपि, स्वामिनस्तान् शिरोरुहान् । क्षीरोदे प्राक्षिपत् पूजामिव सांयात्रिकः स्वयम् ॥ २६१ ॥
तत्रैत्य वेगात् तुमुलं, सुरा-ऽसुर-नृणां हरिः । न्यषेधन्मुष्टिसंज्ञातो, मौनमन्त्रमिव स्मरन् ॥ २६२ ॥
कृत्वा सिद्धनमस्कारं, सामायिकमुदीरयन् । प्रभुश्चारित्रमारोहन्मोक्षमार्गमहारथम् ॥ २६३ ॥
सोदर्यमिव दीक्षाया, युग्मजातं तदैव हि । ज्ञानं तुरीयमुत्पेदे, मनःपर्ययमीशितुः ॥ २६४ ॥
अपि नारकजन्तूनां, क्षणं सुखमभूत् तदा । जगत्त्रये च प्रद्योत, उद्योत इव वैद्युतः ॥ २६५ ॥
नृपाः सहस्रं जगृहुस्ततो दीक्षामनुप्रभु । स्वामिपादानुगमनव्रतानामुचितं ह्यदः ॥ २६६ ॥
अथ प्रदक्षिणीकृत्य, जगन्नाथं प्रणम्य च । एवमारेभिरे स्तोतुमच्युताद्याः पुरन्दराः ॥ २६७ ॥
पट्वभ्यासादरैः पूर्वं, तथा वैराग्यमाहरः । यथेह जन्मन्याजन्म, तत् सात्मीभावमागमत् ॥ २६८ ॥
दुःखहेतुषु वैराग्यं, न तथा नाथ! निस्तुषम् । मोक्षोपायप्रवीणस्य, यथा ते सुखहेतुषु ॥ २६९ ॥

१ ज्ञानदर्शनचारित्ररूपं । २ सवस्त्रमिति भावः । ३ नक्षत्रगे । ४ जग्राह । ५ सेवकः । ६ सहजातम् । ७ उज्ज्वलम् ।

विवेकशाणैर्वैराग्यशस्त्रं शातं[१] तथा त्वया । यथा मोक्षेऽपि तत् साक्षादकुण्ठितपराक्रमम् ॥ २७० ॥
यदा मरुन्नरेन्द्रश्रीस्त्वया[२] नाथोपभुज्यते । यत्र तत्र रतिर्नाम, विरक्तत्वं तदापि ते ॥ २७१ ॥
नित्यं विरक्तः कामेभ्यो, यदा योगं प्रपद्यसे । अलमेभिरिति प्राज्यं[३], तदा वैराग्यमस्ति ते ॥ २७२ ॥
सुखे दुःखे भवे मोक्षे, यदौदासीन्यमीशिषे । तदा वैराग्यमेवेति, कुत्र नाऽसि विरागवान्? ॥ २७३ ॥
दुःखगर्भे मोहगर्भे, वैराग्ये निष्ठिताः परे । ज्ञानगर्भं तु वैराग्यं, त्वय्येकायनतां गतम् ॥ २७४ ॥
औदासीन्येऽपि सततं, विश्वविश्वोपकारिणे । नमो वैराग्यनिघ्नाय[४], तायिने[५] परमात्मने ॥ २७५ ॥
जगद्गुरुमिति स्तुत्वा, नमस्कृत्य च सामराः । तेऽमरस्वामिनो जग्मुर्द्वीपं नन्दीश्वरं ततः ॥ २७६ ॥
जन्माभिषेकवत् तत्र, पर्वतेष्वञ्जनादिषु । शाश्वतार्हत्प्रतिमाष्टाह्निकां शक्रादयो व्यधुः ॥ २७७ ॥
नाथं कदा नु[६] भूयोऽपि, द्रक्ष्याम इति वादिनः । सदेवा देवपतयः, स्वं स्वं स्थानं ततो ययुः ॥ २७८ ॥
सगरोऽपि सभूपालः, प्रणम्य परमेश्वरम् । कृताञ्जलिर्गद्गदवागिति स्तोतुं प्रचक्रमे ॥ २७९ ॥
भगवन्नजितस्वामिन्!, विजयस्व जगद्गुरो! । त्रैलोक्यपद्मिनीखण्डविकासनदिवाकर! ॥ २८० ॥
मति-श्रुता-ऽवधि-मनःपर्ययैर्नाथ! शोभसे । ज्ञानैश्चतुर्भिरुद्दामैरर्णवैरिव मेदिनी ॥ २८१ ॥
त्वं हेलया[७]ऽपि कर्माणि, प्रोन्मूलयितुमीशिषे । अयं परिकर[८]स्ते तु, लोकानां मार्गदर्शकः ॥ २८२ ॥
भगवन्नन्तरात्मा त्वं, मन्येऽहं सर्वदेहिनाम् । तेषामद्वैतसौख्याय, यतसे कथमन्यथा? ॥ २८३ ॥

१ तीक्ष्णीकृतम् । २ देवेन्द्राणां राज्ञां च श्रीः । ३ अतिशयितम् । ४ वैराग्याधीनाय । ५ रक्षित्रे । ६ वितर्के । ७ क्रीडामात्रेण । ८ उपकरणम् ।

हित्वा कषायान् मलवत्, कृपाजलपरिप्लुतः । त्वमेवाऽसि विशुद्धात्मा, निर्लेपः पद्मपत्रवत् ॥ २८४ ॥
राज्येऽपि न्यायनिष्ठस्य, न स्वो न च परस्तव । प्राप्तावसरमेतत् तेऽधुना साम्यं किमुच्यते? ॥ २८५ ॥
वितर्कयामि भगवन्!, दानं यद् वार्षिकं तव । त्रैलोक्याभयदानोरुनाटकस्याऽऽमुखं[1] हि तत् ॥ २८६ ॥
धन्यास्ते विषया ग्रामा, नगर्यः पत्तनानि च । मलयानिलवद् यानि, प्रीणयन् विहरिष्यसे ॥ २८७ ॥
स्तुत्वेति स्वामिनं राजा, नमस्कृत्य च भक्तितः । मन्दं मन्दं ययौ बाष्पक्लिन्ननेत्रो निजां पुरीम् ॥ २८८ ॥
द्वितीयस्मिन् दिने स्वामी, ब्रह्मदत्तनृपौकसि । चकार षष्ठतपसः, परमान्नेन पारणम् ॥ २८९ ॥
ववृषुस्त्रिदशाः सार्धस्वर्णद्वादशकोटिकाम् । वसुधारां ब्रह्मदत्तनरेश्वरगृहाङ्गणे ॥ २९० ॥
उन्नमद्बाहवश्चेलाञ्चलानुच्चिक्षिपुः सुराः । अनिलान्दोलितलतापल्लवश्रीमलिम्लुचान् ॥ २९१ ॥
वेलाविलोलजलधिध्वानधीरध्वनिस्तथा । दध्वान दुन्दुभिर्व्योम्नि, सानन्दामरताडितः ॥ २९२ ॥
पर्यटत्स्वामियशसां, स्वेदवारिभ्रमप्रदाम्[2] । तत्र गन्धाम्बुवृष्टिं च, त्रिविष्टपसदो व्यधुः ॥ २९३ ॥
अन्वीयमानां परितो, मित्रैरिव मधुव्रतैः[3] । पञ्चवर्णपुष्पवृष्टिं, विदधुर्विबुधोत्तमाः ॥ २९४ ॥
अहो! दानं महादानं, सुदानमिदमस्य हि । प्रभावात् तत्क्षणं दाता, भवत्यतुलवैभवः ॥ २९५ ॥
मुच्यते च भवेऽत्रैव, कश्चित् कश्चित् तृतीयके । द्वितीये कल्पातीतेषु, कल्पेषूत्पद्यतेऽथवा ॥ २९६ ॥
एवं कोलाहलं व्योम्नि, चक्रुर्मुदितचेतसः । दिवौकसो जयजयारावपूर्वकमुच्चकैः ॥ २९७ ॥

॥ त्रिभिर्विशेषकम् ॥

१ प्रस्तावना । २ देवाः । ३ भ्रमरैः ।

दीयमानां प्रभोर्भिक्षां, ये प्रेक्षाञ्चक्रिरे जनाः । नीरोगास्ते समभवन्, वपुषा निर्जरा इव ॥ २९८ ॥
ब्रह्मदत्तनृपगृहाद्, भगवान् कृतपारणः । वारणः[१] सरसः पीतपानीय इव निर्ययौ ॥ २९९ ॥
मा स्म कश्चिदतिक्रामत्, पदानीति प्रभोः पदे । ब्रह्मदत्तनृपस्तत्र, पीठं रत्नैरकारयत् ॥ ३०० ॥
ब्रह्मदत्तनृपः पीठं, त्रिसन्ध्यं कुसुमादिभिः । पूजयामास तत्रस्थं, मन्यमानो जिनेश्वरम् ॥ ३०१ ॥
चर्चा-कुसुम-वस्त्राद्यैः, पीठे तस्मिन्नपूजिते । आत्तवेल[२] इव स्वामिन्यभुक्ते न ह्यभुक्त च ॥ ३०२ ॥
भगवानप्रतिबद्धगमनः पवमानवत्[३] । अखण्डितेर्यासमितिर्विजहार वसुन्धराम् ॥ ३०३ ॥
प्रतिलाभ्यमानः क्वचित्, प्रासुकैः पायसादिभिः । चर्च्यमानपदाम्भोजः, क्वाऽपि हृद्यैर्विलेपनैः ॥ ३०४ ॥
प्रतीक्ष्यमाणः कुत्राऽपि, श्राद्धैर्वन्दारुदारकैः[४] । अन्वीयमानः कुत्राऽपि, दर्शनातृप्तिभिर्जनैः ॥ ३०५ ॥
लोकैः क्वचित् क्रियमाणवस्त्रोत्तारणमङ्गलः । कुत्रचिद् दीयमानार्घो, दधि-दूर्वा-ऽक्षतादिभिः ॥ ३०६ ॥
स्ववेश्मनयनायोपरोध्यमानः क्वचिज्जनैः । क्वाऽपि भूलुठनागच्छज्जनेन प्रस्खलद्गतिः ॥ ३०७ ॥
मृज्यमानपदाम्भोजः, श्राद्धैः क्वाऽपि शिरोरुहैः । आदेशं याच्यमानश्च, मुग्धधीभिः क्वचिज्जनैः॥३०८ ॥
निर्ग्रन्थो निर्ममोऽनीहः, स्वामी ग्रामान् पुराणि च । तीर्थीकुर्वन् स्वसंसर्गाद्, विजहार वसुन्धराम् ॥ ३०९ ॥
॥ षड्भिः कुलकम् ॥
घूकघूत्कारघोरेषु, स्फारफेत्कारफेरुषु[५] । फणिफूत्कारराैद्रेषु, माद्यदुत्क्रोशदोतुषु[६] ॥ ३१० ॥
रटद्वृक्करालेषु, चमूरूत्क्रूरवृत्तिषु[७] । शार्दूलकुलबूत्कारप्रकारप्रतिनादिषु[८] ॥ ३११ ॥,

१ गजः । २ प्रतीक्षमाणः । ३ वायुवत् । ४ श्रावकाणां वन्दनशीलैः पुत्रैः । ५ शृगालः । ६ बिडालः । ७ मृगविशेषः । ८ गर्जना ।

महेभभज्यमानद्रुविद्रुतद्रोणराविषु[1][2] । सिंहपुच्छच्छटाच्छोटस्फोट्यमानाश्मभूमिषु ॥ ३१२ ॥
शरभोत्पिष्टदन्तीन्द्रकीकसाकुलवर्त्मसु[3][4] । मृगयाव्यग्रशबरधनुर्नादानुनादिषु ॥ ३१३ ॥
भल्लूककर्णग्रहणव्यग्रभिल्लार्भकेषु[5] च । अन्योऽन्यतरुशाखाग्रसङ्घर्षोच्छलदग्निषु ॥ ३१४ ॥
महागिरि-महारण्येष्वपि ग्राम-पुरेष्विव । निष्प्रकम्पमनाः कामं, व्यहार्षीदजितप्रभुः ॥ ३१५ ॥
॥ षड्भिः कुलकम् ॥

भूतलालोकमात्रेण, जायमानजनभ्रमौ । कदाचन गिरेर्मूर्ध्नि, शृङ्गान्तरमिव[6] स्थिरः ॥ ३१६ ॥
उत्फालमर्कटकुलभज्यमानास्थिसन्धिनि । कदाचन महासिन्धुरोधःसीमनि वृक्षवत् ॥ ३१७ ॥
क्रीडदुत्तालवेताल-पिशाच-प्रेतसङ्कुले । वात्यावर्तितधूलीके, श्मशाने च कदाचन ॥ ३१८ ॥
रौद्रेभ्योऽपि हि रौद्रेषु, स्थानेष्वन्येष्वपि प्रभुः । कायोत्सर्गं निसर्गैकधीरो व्यधित लीलया ॥ ३१९ ॥
॥ चतुर्भिः कलापकम् ॥

तपश्चतुर्थं कदाचित्, तपः षष्ठं कदाचन । तपोऽष्टमं कदाचिच्च, कदाऽपि दशमं तपः ॥ ३२० ॥
अन्यदा द्वादशतपश्चतुर्दशतपोऽन्यदा । अन्यदा षोडशतपस्तपोऽष्टादशमन्यदा ॥ ३२१ ॥
एकदा मासिकं च द्विमासिकं च त्रिमासिकम् । चतुः-पञ्च-षण्मासिकान्यप्यथो सप्तमासिकम् ॥ ३२२ ॥
तपोऽष्टमासिकं यावद्, भगवानजितप्रभुः । विदधे विहरन्नार्यदेशेष्वक्षीणशक्तिकः ॥ ३२३ ॥
॥ चतुर्भिः कलापकम् ॥

१ उड्डीनः । २ काकः । ३ अष्टापदः । ४ अस्थि । ५ ऋक्षः । ६ अन्यच्छिखरमिव ।

ललाटन्तपतपनातपे[1] ग्रीष्मऋतावपि । नाऽऽचकाङ्क्ष तरुच्छायामपि देहेऽपि निःस्पृहः ॥ ३२४ ॥
पतत्तुहिनसम्भारप्लुष्यमाणतरावपि । हेमन्ततौ प्रभुर्नैच्छद्, दीप्तपित्त इवाऽऽतपम् ॥ ३२५ ॥
झञ्झानिलोल्बणैर्धारासारैरपि पयोमुचाम् । मतङ्गजो[2] वारिचर, इव नोद्विविजे विभुः ॥ ३२६ ॥
परीषहानेवमन्यानपि सेहे सुदुःसहान् । सर्वंसहो धरणिवद्, धरणीतिलकः प्रभुः ॥ ३२७ ॥
उग्रैस्तपोभिर्विधैर्विविधाभिग्रहैरपि । परीषहसहोऽब्दानि, द्वादशाऽलङ्घयत् प्रभुः ॥ ३२८ ॥
खड्गीव स्वाम्यनासीनः, खड्गिशृङ्गमिवैककः । सुमेरुरिव निष्कम्पः, पञ्चानन इवाऽभयः ॥ ३२९ ॥
वायुरिवाऽप्रतिबद्धो, भुजङ्गम इवैकदृक् । वह्निना काञ्चनमिव, तपसाऽतिशयानरुक् ॥ ३३० ॥
वृतिभिर्वरशाखीव, तिसृभिर्गुप्तिभिर्वृतः । समितीः पञ्च बिभ्राणो, धन्वी हस्त (स्ते) शरानिव ॥ ३३१ ॥
आज्ञा-ऽपाय-विपाकानां, संस्थानस्य च चिन्तनात् । ध्यायंश्चतुर्विधं ध्येयं, ध्येयरूपः स्वयं विभुः ॥३३२॥
प्रतिग्रामं प्रतिपुरं, प्रत्यरण्यं च पर्यटन् । समाययावुपवनं, सहस्राम्रवणं क्रमात् ॥ ३३३ ॥
॥ पञ्चभिः कुलकम् ॥
तत्र च्छत्रायमाणस्य, सप्तच्छदतरोस्तले । तत्प्रकाण्डमिव[3]ऽकम्पस्तस्थौ प्रतिमया प्रभुः ॥ ३३४ ॥
अप्रमत्तसंयताख्यगुणस्थानात् तदा विभुः । अपूर्वकरणं भेजे, गुणस्थानकमष्टमम् ॥ ३३५ ॥
श्रौतादर्थाद् व्रजन् शब्दं, शब्दादर्थं व्रजन् ययौ । नानात्वश्रुतवीचारं, शुक्लध्यानमथाऽऽदिमम् ॥ ३३६ ॥
अनिवृत्तिबादराख्यं, परिणामानिवृत्तिकृत् । आरुरोह गुणस्थानं, ततश्च नवमं विभुः ॥ ३३७ ॥

१ सूर्यः । २ हस्ती । ३ वृक्षकाण्डम् ।

अथ लोभकषायस्य, किट्टीकरणतो ययौ । सूक्ष्मसम्परायं नाम, गुणस्थानं नवोत्तरम्[1] ॥ ३३८ ॥
अनन्तवीर्यस्त्रिजगत्सर्वकर्मक्षयक्षमः । क्षीणमोहं गुणस्थानं, प्राप मोहस्य सङ्क्षयात् ॥ ३३९ ॥
गुणस्थानस्य चैतस्य, द्वादशस्यान्तिमे क्षणे । एकत्वश्रुतमीशोऽगाच्छुक्लध्यानं द्वितीयकम् ॥ ३४० ॥
त्रिजगद्विषयं ध्यानेनाऽमुनाऽणौ दधौ मनः । सर्वाङ्गीणं विषं दंशे[2], मन्त्रेणेव जगत्प्रभुः ॥ ३४१ ॥
अपनीतेन्धनभरः, शेषस्तोकेन्धनोऽनलः । ज्वलितो निर्वाति यथा, निर्वाणं[3] तन्मनस्तथा ॥ ३४२ ॥
ततश्च तस्मिन् ध्यानाग्नौ, दीप्यमाने जिनेशितुः । हिमानीव व्यलीयन्त, घातिकर्माणि सर्वतः ॥ ३४३ ॥
अथ पौषस्य शुक्लैकादश्यां चन्द्रेऽधिरोहिणि । स्वामिनः कृतषष्ठस्योत्पेदे केवलमुज्ज्वलम् ॥ ३४४ ॥
ईक्षाञ्चक्रे जगन्नाथस्त्रिकालविषयानपि । त्रैलोक्यवर्तिनो भावान्, करोत्सङ्गगतानिव[4] ॥ ३४५ ॥
उत्पन्ने स्वामिनो ज्ञाने, स्वाम्यवज्ञाभयादिव । सौधर्माधिपतेः सद्यः, सिंहासनमकम्पत ॥ ३४६ ॥
तत्कारणज्ञानकृते, प्रायुङ्क्त मघवाऽवधिम् । रज्जुं जलाशयपयोमानं ज्ञातुमना इव ॥ ३४७ ॥
स्वामिनः केवलज्ञानमुत्पन्नमिति वासवः । अज्ञासीदवधिज्ञानाद्, दीपालोकात् पदार्थवत् ॥ ३४८ ॥
रत्नसिंहासनं रत्नपादुके च पुरन्दरः । उज्झाञ्चकार बलवत्, स्वाम्यवज्ञाभयं सताम् ॥ ३४९ ॥
ददौ पदानि सप्ताऽष्टान्यर्हद्दिक्सम्मुखं हरिः । गीतार्थः शिष्य इवाऽनुज्ञापितावग्रहावनौ ॥ ३५० ॥
सव्यं किञ्चिन्न्यञ्च्य जानुं, दक्षिणेन[5] च जानुना । पाणिभ्यां शिरसा च क्ष्मां, स्पृशन्ननमदद्रिभित्[6] ॥ ३५१ ॥
समुत्थाय व्यपक्रम्य, भूयोऽपि बलसूदनः । सिंहासनमलञ्चक्रे, गिरीन्द्रमिव केसरी ॥ ३५२ ॥

१ दशममित्यर्थः २ दंशस्थाने । ३ शान्तम् । ४ हस्तमध्यगतान् । ५-६ इन्द्रः ।

पुरुहूतः समाहूताशेषदेवः क्षणादपि । ऋद्ध्या महत्या भक्त्येव, जिनेन्द्राभ्यर्णमाययौ ॥ ३५३ ॥
सर्वेऽन्येऽप्यासनकम्पाद्, विज्ञातस्वामिकेवलाः । अहम्पूर्विकयेवेयुः, सममिन्द्रा जिनान्तिके ॥ ३५४ ॥
क्षेत्रे योजनमात्रे च, देवा वायुकुमारकाः । अपनिन्युः शर्करादि, ते यदत्राऽधिकारिणः ॥ ३५५ ॥
तत्र गन्धाम्बुवृष्टिं च, सुरा मेघकुमारकाः । रजोमात्रप्रशमनीं, शरद्वृष्टिनिभां व्यधुः ॥ ३५६ ॥
स्वर्ण-रत्नशिलास्तोमैर्मसृणैस्तन्महीतलम् । बबन्धुर्बन्धुरतरं, चैत्यमध्यमिवाऽमराः ॥ ३५७ ॥
स्मेराणि जानुदघ्नानि, पञ्चवर्णान्यृतुश्रियः । ववृषुस्तत्र पुष्पाणि, प्रत्यूषपवना इव ॥ ३५८ ॥
अन्तः कृत्वा मणिस्तूपं, परितस्तमधो व्यधुः । रौप्यं भवनपतयो, वप्रं रैकपिशीर्षकम् ॥ ३५९ ॥
वप्रं द्वितीयं ज्योतिष्काः, सरत्नकपिशीर्षकम् । विदधुः काञ्चनैरात्मज्योतिर्भिरिव पिण्डितैः ॥ ३६० ॥
प्राकारं चोपरितनं, वैमानिकदिवौकसः । रत्नैर्विरचयाञ्चक्रुर्माणिक्यकपिशीर्षकम् ॥ ३६१ ॥
वप्रे वप्रे च चत्वारि, जगत्यामिव जज्ञिरे । मनोविश्रामधामानि, चारुद्वाराणि तत्र च ॥ ३६२ ॥
पत्रैर्मारकतैरासन्, द्वारे द्वारे च तोरणाः । अम्बरे विचरच्चारुश्रेणीभूतशुकोपमाः ॥ ३६३ ॥
तोरणानुभयतश्च, कुम्भा मुखकृताम्बुजाः । न्यास्यन्त सिन्धूरभितश्चक्रा इव दिनात्यये ॥ ३६४ ॥
द्वारे द्वारेऽभवद् वापी, काञ्चनाम्भोजशालिनी । स्वच्छ-स्वादुपयःपूर्णा, मङ्गल्यकलशोपमा ॥ ३६५ ॥
धूपघट्यः प्रतिद्वारं, हैम्यो मुमुचिरेऽमरैः । धूपधूमैर्मारकतास्तन्वन्त्यस्तोरणानिव ॥ ३६६ ॥

१ स्निग्धैः । २ विकसितानि । ३ जानुप्रमाणानि । ४ ऋत्वधिष्ठायिका देव्यः । ५ मणिपीठम् । ६ सुवर्णमयकपिशीर्षकम् । ७ जम्बूद्वीपस्य दुर्गे । ८ नदीः ।

प्राकारे मध्यमे पूर्वोदीच्यां दिशि दिवौकसः । देवच्छन्दं विदधिरे, स्वामिविश्रामहेतवे ॥ ३६७ ॥
तृतीयवप्रमध्योर्व्यां, चैत्यद्रुं व्यन्तरा व्यधुः । चतुर्दशधनुःशत्याऽधिकां गव्यूतिमुन्नतम् ॥ २६८ ॥
ततः सिंहासनं देवच्छन्दकं चामरे अपि । छत्रत्रयं च रुचिरं, चक्रिरे व्यन्तरामराः ॥ ३६९ ॥
इत्थङ्कारं च समवसरणं विदधेऽमरैः । भवत्रस्तैकशरणं, हरणं निखिलापदाम् ॥ ३७० ॥
ततो जयजयारावकारिभिर्मागधैरिव । अमरैः कोटिसङ्ख्यातैः, परितः परिवारितः ॥ ३७१ ॥
सुरसञ्चार्यमाणेषु, सौवर्णेष्वम्बुजन्मसु[1] । नवसु क्रमशो न्यस्य, पादाम्भोजे जगत्पतिः ॥ ३७२ ॥
प्रविश्य पूर्वद्वारेण, चैत्यवृक्षप्रदक्षिणाम् । चकाराऽऽवश्यकविधिर्ह्यलङ्घ्यो महतामपि ॥ ३७३ ॥
नमस्तीर्थायेति गिरा, कृत्वा तीर्थनमस्क्रियाम् । तत्र सिंहासने पूर्वाभिमुखो न्यषदत् प्रभुः ॥ ३७४ ॥
स्वामिनः प्रतिरूपाणि, दिक्ष्वन्यास्वपि तत्क्षणम् । विचक्रुर्व्यन्तरास्ते हि, शेषकर्माधिकारिणः ॥ ३७५ ।
स्वामिरूपानुरूपाणि, तान्यासंस्तत्प्रभावतः । तादृंशि स्वामिबिम्बानि, न ते कर्तुं स्वयं क्षमाः ॥ ३७६ ॥
पृष्ठे भामण्डलं धर्मचक्र-शक्रध्वजौ पुरः । दिवि दुन्दुभिनादश्च, प्रादुरासंस्तदा क्षणात् ॥ ३७७ ॥
पूर्वद्वाराऽविशन् साधु-साध्वी-वैमानिकस्त्रियः । त्रिश्च प्रदक्षिणीकृत्य, नेमुस्त्रिभुवनेश्वरम् ॥ ३७८ ॥
पूर्वदक्षिणदिश्यासाञ्चक्रिरे तत्र साधवः । तत्पृष्ठे तस्थुरूर्द्ध्वास्तु, वैमानिक्योऽथ संयताः[2] ॥ ३७९ ॥
अपाग्द्वारैत्य[3] भवनेश-ज्योति-र्व्यन्तरस्त्रियः । प्रभुं प्रदक्षिणीकृत्योर्द्ध्वं नैर्ऋत्यां क्रमात् स्थिताः ॥ ३८० ॥
प्रत्यग्द्वारैत्य[4] भवनेश-ज्योति-र्व्यन्तराः प्रभुम् । नत्वा प्रदक्षिणापूर्वं, वायव्ये न्यषदन् क्रमात् ॥ ३८१ ॥

१ पद्मेषु । २ साध्व्यः । ३ दक्षिणद्वारेण । ४ पश्चिमद्वारेण ।

प्रविश्योदीच्यद्वारेण, सेन्द्रा वैमानिकाः प्रभुम् । नत्वा प्रदक्षिणापूर्वमैशान्यां न्यषदन् क्रमात् ॥ ३८२ ॥
नाथं भूयो नमस्कृत्य, शक्रो विरचिताञ्जलिः । भक्त्या रोमाञ्चितवपुः, स्तोतुमित्युपचक्रमे ॥ ३८३ ॥
सर्वाभिमुख्यतो नाथ!, तीर्थकृन्नामकर्मजात् । सर्वेषां सम्मुखीनस्त्वमानन्दयसि यत् प्रजाः ॥ ३८४ ॥
यद् योजनप्रमाणेऽपि, धर्मदेशनसद्मनि । सम्मान्ति कोटिशस्तिर्यग्नृ-देवाः सपरिच्छदाः ॥ ३८५ ॥
तेषामेव स्वस्वभाषापरिणाममनोहरम् । अप्येकरूपं वचनं, यत् ते धर्मावबोधकृत् ॥ ३८६ ॥
साग्रेऽपि योजनशते, पूर्वोत्पन्ना गदाम्बुदाः[1] । यदङ्गसा विलीयन्ते, त्वद्विहारानिलोर्मिभिः ॥ ३८७ ॥
नाविर्भवन्ति यद् भूमौ, मूषिकाः शलभाः शुकाः । क्षणेन क्षितिपक्षिप्ता, अनीतय इवेतयः[2] ॥ ३८८ ॥
स्त्री-क्षेत्र-पद्रादिभवो[3], यद् वैराग्निः प्रशाम्यति । त्वत्कृपापुष्करावर्तवर्षादिव भुवस्तले ॥ ३८९ ॥
त्वत्प्रभावे भुवि भ्राम्यत्यशिवोच्छेदडिण्डिमे । सम्भवन्ति न यन्नाथ!, मारयो[4] भुवनारयः ॥ ३९० ॥
कामवर्षिणि लोकानां, त्वयि विश्वैकवत्सले । अतिवृष्टिरवृष्टिर्वा, भवेद् यन्नोपतापकृत् ॥ ३९१ ॥
स्वराष्ट्र-परराष्ट्रेभ्यो, यत् क्षुद्रोपद्रवा द्रुतम् । विद्रवन्ति त्वत्प्रभावात्, सिंहनादादिव द्विपाः ॥ ३९२ ॥
यत् क्षीयते च दुर्भिक्षं, क्षितौ विहरति त्वयि । सर्वाद्भुतप्रभावाढ्ये, जङ्गमे कल्पपादपे ॥ ३९३ ॥
यन्मूर्ध्नः पश्चिमे भागे, जितमार्त्तण्डमण्डलम् । मा भूद् वपुर्दुरालोकमितीवोत्पिण्डितं महः ॥ ३९४ ॥
स एष योगसाम्राज्यमहिमा विश्वविश्रुतः । कर्मक्षयोत्थो भगवन्!, कस्य नाऽऽश्चर्यकारणम्? ॥ ३९५ ॥
अनन्तकालप्रचितमनन्तमपि सर्वथा । त्वत्तो नाऽन्यः कर्मकक्षमुन्मूलयति मूलतः[5] ॥ ३९६ ॥

१ व्याधय एव मेघाः । २ क्षेत्रपाकविघ्नकरा उपद्रवाः । ३ ग्रामः । ४ व्याधयः । ५ कर्मैव कक्षं वनम् ।

तथोपाये प्रवृत्तस्त्वं, क्रियासमभिहारतः । यथाऽनिच्छन्नुपेयस्य, परां श्रियमशिश्रियः ॥ ३९७ ॥
मैत्रीपवित्रपात्राय, मुदितामोदशालिने[१] । कृपोपेक्षाप्रतीक्ष्याय[२], तुभ्यं योगात्मने नमः ॥ ३९८ ॥
इतश्च समवसृतं, जिनेन्द्रमजितप्रभुम् । उद्यानपालका गत्वाऽऽचख्युः सगरचक्रिणे ॥ ३९९ ॥
प्रभोः समवसरणोदन्तेन मुमुदे तथा । चक्रवर्ती चक्ररत्नोत्पत्तावपि यथा न हि ॥ ४०० ॥
तेभ्यश्च तपनीयस्य[३], सार्धा द्वादशकोटयः । भूभुजा परितुष्टेन, ददिरे पारितोषिके ॥ ४०१ ॥
ततः स्नात्वा कृतप्रायश्चित्त-कौतुकमङ्गलः । उदाराकाररत्नालङ्कारस्त्रिदशराडिव ॥ ४०२ ॥
दृढिकृतस्कन्धहारः, कराभ्यां नर्तयन् सृणिम्[४] । सगरः कुञ्जरवरमासन्यारोहदग्रिमे ॥ ४०३ ॥ ॥ युग्मम् ॥
कुम्भिकुम्भस्थलेनोच्चेनाऽऽनाभि च्छन्नविग्रहः । अर्धोदित इवाऽऽदित्यो, दिद्युते मेदिनीपतिः ॥ ४०४ ॥
दिग्मुखप्रसृतैः शङ्ख-दुन्दुभिप्रभृतिस्वनैः । एयुः सैन्याः सुघोषादिघण्टाघोषैरिवाऽमराः ॥ ४०५ ॥
राज्ञां मुकुटबद्धानां, सहस्रैः परिवारितः । विरेजे वैक्रियानेकरूपधारीव चक्रभृत् ॥ ४०६ ॥
मूर्धाभिषिक्तमूर्धन्यो[५], मूर्ध्नि च्छत्रेण पाण्डुना । अशोभिष्ट नभोगङ्गावर्त्तभ्रमविधायिना ॥ ४०७ ॥
पार्श्वतः सञ्चरिष्णुभ्यां, चामराभ्यामरोचत । सगरश्चन्द्रबिम्बाभ्यामिव काञ्चनपर्वतः ॥ ४०८ ॥
वाजिभिः स्वर्णसन्नाहैः, स्वर्णपक्षैः खगैरिव । रथैस्तुङ्गध्वजस्तम्भैः, पोतैरिव[६] सकूपकैः ॥ ४०९ ॥
क्षरन्मदैर्गजवरैः, शैलैरिव सनिर्झरैः । उदस्रैः पत्तिभिः सिन्धुतरङ्गैरिव सोरगैः[७] ॥ ४१० ॥

१ प्रमोदभावनामोदशोभिताय । २ कृपा-माध्यस्थ्ययोः मुख्याय । ३ सुवर्णस्य । ४ अङ्कुशम् । ५ मूर्धाभिषिक्ता राजानस्तेषां मुख्यः । ६ प्रवहणैः । ७ ससर्पैः ।

परितश्छादयन्नुर्वीमुर्वीपतिरथ द्रुतम् । आससाद सहस्राम्रवणोपवनसन्निधिम् ॥ ४११ ॥

॥ त्रिभिर्विशेषकम् ॥

उद्यानद्वारसौवर्णवेद्यां सगरभूपतिः । उत्ततार द्विपात् तस्मान्मानादिव महामुनिः ॥ ४१२ ॥
उज्झाञ्चकार सगरः, स्वं छत्रं चामरे अपि । अप्यन्यराज्यचिह्नानि, विनीतानां[1] क्रमो ह्ययम् ॥ ४१३ ॥
पादाभ्यां न ह्यलञ्चक्रे, विनयादप्युपानहौ । हस्तावलम्बनमपि, वेत्रिदत्तमुपैक्षत ॥ ४१४ ॥
ततः समवसरणाभ्यर्णे सगरभूपतिः । पद्भ्यां चलितवान् पौरनर-नारीगणैः समम् ॥ ४१५ ॥
उदग्द्वारेण समवसरणं प्राविशत् तदा । नृपो मकरसङ्क्रान्तौ, व्योमाङ्गणमिवार्यमा[2] ॥ ४१६ ॥
तत्र प्रदक्षिणीकृत्य, त्रिर्नत्वा च जगद्गुरुम् । सगरः स्तोतुमारेभे, सुधामधुरया गिरा ॥ ४१७ ॥
मिथ्यादृशां युगान्तार्कः, सुदृशाममृताञ्जनम् । तिलकं तीर्थकृल्लक्ष्म्याः, पुरश्चक्रं तवैधते ॥ ४१८ ॥
एकोऽयमेव जगति, स्वामीत्याख्यातुमुच्छ्रिता । उच्चैरिन्द्रध्वजव्याजात्, तर्जनी जम्भविद्विषा[3] ॥ ४१९ ॥
यत्र पादौ पदं धत्तस्तव तत्र सुरा-ऽसुराः । किरन्ति पङ्कजव्याजाच्छ्रियं पङ्कजवासिनीम् ॥ ४२० ॥
दान-शील-तपो-भावभेदाद् धर्मं चतुर्विधम् । मन्ये युगपदाख्यातुं, चतुर्वक्त्रोऽभवद् भवान् ॥ ४२१ ॥
त्वयि दोषत्रयात् त्रातुं, प्रवृत्ते भुवनत्रयीम् । प्राकारत्रितयं चक्रुस्त्रयेऽपि त्रिदिवौकसः ॥ ४२२ ॥
अधोमुखाः कण्टकाः स्युर्धात्र्यां विहरतस्तव । भवेयुः सम्मुखीनाः किं, तामसास्तिग्मरोचिषः[3]? ॥ ४२३ ॥
केश-रोम-नख-श्मश्रु, तवाऽवस्थितमित्ययम्[4] । बाह्योऽपि योगमहिमा, नाऽऽप्तस्तीर्थकरैः परैः ॥ ४२४ ॥

१ नम्राणाम् । २ इन्द्रेण । ३ सूर्यस्य । ४ वृद्धिरहितम् ।

शब्द-रूप-रस-स्पर्श-गन्धाख्याः पञ्च गोचराः[१] । भजन्ति प्रातिकूल्यं न, त्वदग्रे तार्किका इव ॥ ४२५ ॥
त्वत्पादावृतवः सर्वे, युगपत् पर्युपासते । आकालकृतकन्दर्पसाहाय्यकभयादिव ॥ ४२६ ॥
सुगन्ध्युदकवर्षेण, दिव्यपुष्पोत्करेण च । भावित्वत्पादसंस्पर्शां, पूजयन्ति भुवं सुराः ॥ ४२७ ॥
जगत्प्रतीक्ष्य[२]! त्वां यान्ति, पक्षिणोऽपि प्रदक्षिणाम् । का गतिर्महतां तेषां, त्वयि ये वामवृत्तय[३]:? ॥४२८॥
पञ्चेन्द्रियाणां दौःशील्यं, क्व भवेद् भवदन्तिके? । एकेन्द्रियोऽपि यन्मुञ्चत्यनिलः प्रतिकूलताम् ॥ ४२९॥
मूर्ध्ना नमन्ति तरवस्त्वन्माहात्म्यचमत्कृताः । तत् कृतार्थं शिरस्तेषां, व्यर्थं मिथ्यादृशां पुनः ॥ ४३० ॥
जघन्यतः कोटिसङ्ख्यास्त्वां सेवन्ते सुरा-ऽसुराः । भाग्यसम्भारलभ्येऽर्थे, न मन्दा अप्युदासते ॥ ४३१॥
भगवन्तमिति स्तुत्वाऽपक्रम्य विनयक्रमात् । पृष्ठे मघवतस्तस्थौ, नर-नारीगणश्च सः ॥ ४३२ ॥
इत्थं समवसरणस्योर्द्ध्ववप्रान्तरावनौ । तस्थौ चतुर्विधः सङ्घो, ध्यानस्थ इव भक्तितः ॥ ४३३ ॥
द्वितीयवप्रमध्ये तु, भुजङ्ग-नकुलादयः । तिर्यञ्चोऽस्थुस्त्यक्तवैरा, मित्राणीव परस्परम् ॥ ४३४ ॥
तृतीयवप्रमध्ये च, स्वामिसेवार्थमेयुषाम् । सुरा-ऽसुर-मनुष्याणां, वाहनान्यवतस्थिरे ॥ ४३५ ॥
अथाऽऽयोजनगामिन्या[२], सर्वभाषास्पृशा गिरा । भगवानजितस्वामी, प्रारेभे धर्मदेशनाम् ॥ ४३६ ॥
असावसारः संसारः, सारबुद्ध्याऽवबुध्यते । काचो वैडूर्यवृद्ध्येव, धिगहो! मुग्धबुद्धिभिः ॥ ४३७ ॥
प्रतिक्षणभवैर्देहभाजां विविधकर्मभि[३]: । संवर्ध्यते च संसारः, पादपो दोहदैरिव[४] ॥ ४३८ ॥
कर्माभावेन संसाराभावो न्यायभवः खलु । कर्मध्वंसाय[५] सुधिया, यतितव्यं[६] ततः सदा ॥ ४३९ ॥

१ इन्द्रियविषयाः । २ हे जगत्पूज्य! । ३ प्रतिकूलवृत्तयः ।

कर्मध्वंसः शुभध्यानात्, तच्च ध्यानं चतुर्विधम् । आज्ञा-ऽपाय-विपाकानां, संस्थानस्य च चिन्तनात् ॥४४०॥
आज्ञा स्यादाप्तवचनं, सा द्विधैव व्यवस्थिता । आगमः प्रथमा तावद्धेतुवादोऽपरा पुनः ॥ ४४१ ॥
शब्दादेव पदार्थानां, प्रतिपत्तिकृदागमः[1] । प्रमाणान्तरसंवादाद्धेतुवादो निगद्यते ॥ ४४२ ॥
द्वयोरप्यनयोस्तुल्यं, प्रामाण्यमविगानतः[2] । अदुष्टकारणारब्धं, प्रमाणमिति लक्षणात् ॥ ४४३ ॥
दोषा राग-द्वेष-मोहाः, सम्भवन्ति न तेऽर्हति । अदुष्टहेतुसम्भूतं, तत् प्रमाणं वचोऽर्हताम् ॥ ४४४ ॥
नय-प्रमाणसंसिद्धं, पौर्वापर्याविरोधि च । अप्रतिक्षेप्यमपरैर्बलिष्ठैरपि[3] शासनैः ॥ ४४५ ।
अङ्गोपाङ्ग-प्रकीर्णादिबहुभेदापगाम्बुधि । अनेकातिशयप्राज्यसाम्राज्यश्रीविभूषितम् ॥ ४४६ ॥
सुदुर्लभं दूरभव्यैर्भव्यैस्तु सुलभं भृशम् । गणिपिटकतयोच्चैर्नित्यं स्तुत्यं नरा-ऽमरैः ॥ ४४७ ॥
इमामाज्ञां समालम्ब्य, स्याद्वादन्याययोगतः । द्रव्य-पर्यायरूपेण, नित्या-ऽनित्येषु वस्तुषु ॥ ४४८ ॥
स्वरूप-पररूपाभ्यां, सदसद्रुपशालिषु । यः स्थिरप्रत्ययो ध्यानं, तदाज्ञाविचयाह्वयम् ॥ ४४९ ॥
अस्पृष्टजिनमार्गाणामविज्ञातपरात्मनाम् । अपरामृष्टायतीनामपायाः[4] स्युः सहस्रशः ॥ ४५० ॥
माया-मोहा-ऽन्धतमसविवशीकृतचेतसा । किं किं नाऽकारि कलुषं?, कस्कोऽपायोऽप्यवापि न? ॥ ४५१ ॥
यद् यद् दुःखं नारकेषु, तिर्यक्षु मनुजेषु च । मयाऽप्रापि प्रमादोऽयं, ममैव हि विचेतसः ॥ ४५२ ॥
प्राप्याऽपि परमां बोधिं, मनो-वाक्कायकर्मजैः । दुश्चेष्टितैर्मयैवाऽऽत्मशिरसि ज्वालितोऽनलः ॥ ४५३ ॥
स्वाधीने मुक्तिमार्गेऽपि, कुमार्गपरिमार्गणैः । अहो! आत्मंस्त्वयैवैष, स्वात्माऽपायेषु पातितः ॥ ४५४ ॥

१ प्रतिपादकः । २ अविराधितया । ३ अबाध्यम् । ४ अविचारितोत्तरकालानाम् ।

यथा प्राप्तेऽपि सौराज्ये, भिक्षां भ्राम्यति बालिशः[१] । आत्मायत्ते तथा मोक्षे, भवाय भ्रान्तवानसि ॥ ४५५॥
एवं राग-द्वेष- मोहैर्जायमानान् विचिन्तयेत् । यत्राऽपायांस्तदपायविचयध्यानमिष्यते ॥ ४५६ ॥
विपाकः फलमाम्नातः[२], कर्मणां स शुभा-ऽशुभः । द्रव्य-क्षेत्रादिसामग्र्या, चित्ररूपोऽनुभूयते ॥ ४५७ ॥
शुभस्तत्राङ्गना-माल्य-खाद्यादिद्रव्यभोगतः । अशुभस्त्वहि-शस्त्रा-ऽग्नि-विषादिभ्योऽनुभूयते ॥ ४५८॥
क्षेत्रे सौध-विमानोपवनादौ वसनाच्छुभः । श्मशान-जाङ्गला-ऽरण्यप्रभृतावशुभः पुनः ॥ ४५९ ॥
काले त्वशीतला-ऽनुष्णे, वसन्तादौ रतेः शुभः । उष्णे शीते ग्रीष्म-हेमन्तादौ भ्रमणतोऽशुभः ॥ ४६० ॥
मनःप्रसाद-सन्तोषादिभावेषु शुभो भवेत् । क्रोधा-ऽहङ्कार-रौद्रत्वादिभावेष्वशुभः पुनः ॥ ४६१ ॥
सुदेवत्व[३]-भोगभूमिमनुष्यादिभवे शुभः । कुमर्त्य-तिर्यग्नरकादिभवेष्वशुभः पुनः ॥ ४६२ ॥
अपि च-उदय-क्षय-क्षयोपशमोपशमाः कर्मणां भवन्त्यत्र । द्रव्यं क्षेत्रं कालं, भावं च भवं च सम्प्राप्य॥४६३॥
इति द्रव्यादिसामग्रीयोगात् कर्माणि देहिनाम् । स्वं स्वं फलं प्रयच्छन्ति, तानि त्वष्टैव तद्यथा ॥ ४६४ ॥
जन्तोः सर्वज्ञरूपस्य, ज्ञानमाव्रियते सदा । येन चक्षुः पटेनेव, ज्ञानावरणकर्म तत् ॥ ४६५ ॥
मति-श्रुता-ऽवधि-मनःपर्यायाः केवलं तथा । पञ्चाऽऽव्रियन्ते ज्ञानानीत्येता ज्ञानावृतेर्भिदः[४] ॥ ४६६ ॥
पञ्च निद्रा दर्शनानां, चतुष्कस्याऽऽवृतिश्च या । दर्शनावरणीयस्य, विपाकः कर्मणः स तु ॥ ४६७ ॥
यथा दिदृक्षुः स्वामी स्वं, प्रतीहारनिरोधतः । न पश्यति तथाऽऽत्मापि, येन दृष्ट्यावृतिस्तु[५] तत् ॥ ४६८ ॥
मधुलिप्तासिधाराग्रास्वादाभं वेद्यकर्म यत् । सुख-दुःखानुभवनस्वभावं तत् प्रकीर्तितम् ॥ ४६९ ॥

१ मूर्खः । २ कथितः । ३ सुदेवत्वे भोगस्थानभूते मनुष्यादिभवे च । इदं आर्यावृत्तम् । ४ ज्ञानावरणस्य भेदाः । ५ दर्शनावरणम् ।

सुरापानसमं प्राज्ञा, मोहनीयं प्रचक्षते । यदनेन विमूढात्मा, कृत्या-ऽकृत्येषु मुह्यति ॥ ४७० ॥
तत्राऽपि दृष्टिमोहाख्यं, मिथ्यादृष्टिविपाककृत् । चारित्रमोहनीयं तु, विरतिप्रतिषेधकम् ॥ ४७१ ॥
नृ-तिर्यग्नारका-ऽमर्त्यभेदादायुश्चतुर्विधम् । स्वस्वजन्मनि जन्तूनां, धारकं गुप्तिसन्निभम्[१] ॥ ४७२ ॥
गति-जात्यादिवैचित्र्यकारि चित्रकरोपमम् । नामकर्म विपाकोऽस्य, शरीरेषु शरीरिणाम् ॥ ४७३ ॥
उच्चैर्नीचैर्भवेद् गोत्रं, कर्मोच्चैर्नीचगोत्रकृत् । क्षीरभाण्ड-सुराभाण्डभेदकारि कुलालवत् ॥ ४७४ ॥
दानादिलब्धयो येन, न फलन्ति विबाधिताः । तदन्तरायं कर्म स्याद्, भाण्डागारिकसन्निभम्[२] ॥ ४७५ ॥
इति मूलप्रकृतीनां, विपाकांस्तान् विचिन्वतः । विपाकविचयं नाम, धर्मध्यानं प्रवर्तते ॥ ४७६ ॥
अनाद्यन्तस्य लोकस्य, स्थित्युत्पत्ति-व्ययात्मनः । आकृतिं चिन्तयेद् यत्र, संस्थानविचयः स तु ॥ ४७७ ॥
कटिस्थकरवैशाखस्थानकस्थनराकृतिः[३] । द्रव्यैः पूर्णः स तु लोकः, स्थित्युत्पत्ति-व्ययात्मकैः ॥ ४७८ ॥
वेत्रासनसमोऽधस्तान्मध्यतो झल्लरीनिभः । अग्रे मुरजसङ्काशो लोकः स्यादेवमाकृतिः[४] ॥ ४७९ ॥
स च त्रिजगदाकीर्णो, भुवः सप्ताऽत्र वेष्टिताः । घनाम्भोधि-घनवात-तनुवातैर्महाबलैः ॥ ४८० ॥
जगत्त्रयं त्वधस्तिर्यगूर्ध्वलोकविभेदतः । अधस्तिर्यगूर्ध्वभावो, रुचकापेक्षया पुनः ॥ ४८१ ॥
मेर्वन्तर्गोस्तनाकारचतुर्व्योमप्रदेशकः । रुचकोऽधस्तादूर्ध्वमेवमष्टप्रदेशकः[५] ॥ ४८२ ॥
तिर्यग्लोकस्तु रुचकस्योपरिष्टादधोऽपि च । योजनानां नव नव, शतानि भवति स्फुटम् ॥ ४८३ ॥
तिर्यग्लोकस्य त्वधस्तादधोलोकः प्रतिष्ठितः । नवयोजनशत्यूनसप्तरज्जुप्रमाणकः ॥ ४८४ ॥

१ कारागृहसमानम् । २ कोशागारिकतुल्यम् । ३ दधिमथकस्यासनभेदः । ४ मृदङ्गसदृशः । ५ तादृक् चतुःप्रदेश इत्यर्थः ।

तत्राऽधोभागमासाद्याधोऽधःस्थाः सप्त भूमयः । यासु [1]नारकषण्ढानां, निवासाः सन्ति भीषणाः ॥४८५ ॥
रत्नशर्करावालुकापङ्कधूमतमःप्रभाः । महातमःप्रभा चाऽऽसां, [2]बाहल्ये लक्षयोजनी ॥ ४८६ ॥
अशीतिर्द्वात्रिंशदष्टाविंशतिर्विंशतिस्तथा । अष्टादश षोडशाऽष्टौ, सहस्राश्च क्रमेण तु ॥ ४८७ ॥
रत्नप्रभाभुवोऽधोऽधः, क्रमात् पृथुतराश्च ताः । त्रिंशल्लक्षाणि नरकावासानां [3]प्रथमावनौ ॥ ४८८ ॥
पञ्चविंशतिलक्षाणि, द्वितीयनरकावनौ । तृतीयायां पञ्चदश, तुरीयायां पुनर्दश ॥ ४८९ ॥
पञ्चम्यां त्रीणि पञ्चोनं, लक्षं षष्ठ्यां पुनर्भुवि । पञ्चैव नरकावासाः, सप्तम्यां नरकावनौ ॥ ४९० ॥
भुवां रत्नप्रभादीनामधस्ताच्च घनाब्धयः । मध्योत्सेधे योजनानां, सहस्राणि तु विंशतिः ॥ ४९१ ॥
तदधस्ताद् घनवाता, मध्योत्सेधे भवन्ति तु । योजनानामसङ्ख्यानि, सहस्राणि घनाब्धितः ॥ ४९२ ॥
तनुवातास्त्वसङ्ख्यानि, तानि स्युर्घनवाततः । आकाशं तनुवातेभ्योऽप्यसङ्ख्येयानि तानि च ॥ ४९३ ॥
मध्योत्सेधादमुष्मात् तु, हीयमानाः क्रमेण च । घनाम्भोध्यादयः प्रान्ते, वलयाकारधारिणः ॥ ४९४ ॥
रत्नप्रभाया मेदिन्याः, परिधिस्थितिशालिनः । घनाम्भोधिवलयस्य, विष्कम्भो योजनानि षट् ॥ ४९५ ॥
महावातस्य वलयविष्कम्भे योजनानि तु । सार्धानि चत्वारि तनुवायोः सार्धं तु योजनम् ॥ ४९६ ॥
रत्नप्रभाया वलयमानस्योपरि जायते । शर्कराया घनाम्भोधौ, त्रिभागो योजनस्य तु ॥ ४९७ ॥
महावाते च गव्यूतमेकं भवति निश्चितम् । गव्यूतस्य तृतीयांशस्तनुवातेऽपि वर्धते ॥ ४९८ ॥
शर्करावलयमानस्योपरि क्षेप एष च । तृतीयपृथ्वीवलयविष्कम्भेष्वपि जायते ॥ ४९९ ॥

१ जैनागमेषु नारकाणां नपुंसकत्वं स्वीकृतमित्येवं प्रयोगः । २ स्थूलत्वे । ३ रत्नप्रभावनौ ।

एवं च प्राक्प्राग्वलयमानोद्ध्वं क्षेप एष च । सप्तमीं पृथिवीं यावद्, वलयेषु विधीयते ॥ ५०० ॥
घनाम्भोधि-महावाता-ऽल्पवातवलयानि तु । स्वस्वपृथ्वीगतोत्सेधसमोत्सेधानि सर्वतः ॥ ५०१ ॥
इत्थं च भूमयः सप्त, घनाम्भोध्यादिधारिताः । तास्वेव नरकावासा, भोगस्थानं कुकर्मणाम् ॥ ५०२ ॥
यातना-रुक्शरीरा-ऽऽयु-र्लेश्या-दुःख[1]भयादिकम् । वर्धमानं विनिश्चेयमधोऽधःश्वभ्रभूमिषु ॥ ५०३ ॥
अथ रत्नप्रभाभूमेर्बाहल्ये जायते खलु । योजनानां लक्षमेकं, सहस्राशीतिसंयुतम् ॥ ५०४ ॥
त्यक्त्वा योजनसहस्रमेकमूद्ध्वर्वमधोऽपि च । तदन्तः सन्ति भवनपतीनां भवनानि तु ॥ ५०५ ॥
ते च भवनपतयो, दक्षिणोत्तरयोर्दिशोः । श्रेणीद्वयेन तिष्ठन्ति, राजमार्गेऽट्टपङ्क्तिवत् ॥ ५०६ ॥
तत्र चूडामणिचिह्ना, असुरा भवनाधिपाः । नागाः पुनः फणाचिह्ना, विद्युतो वज्रलाञ्छनाः ॥ ५०७ ॥
सुपर्णा गरुडचिह्ना, घटचिह्नाश्च वह्नयः । अश्वाङ्का वायवो वर्धमानाङ्काः[2] स्तनिताः[3] पुनः ॥ ५०८ ॥
मकराङ्का उदधयो, द्वीपाः केसरिलाञ्छनाः । भवन्ति दिक्कुमारास्तु, सर्वे कुञ्जरलाञ्छनाः ॥ ५०९ ॥
तत्राऽसुराणां द्वाविन्द्रौ, चमरो बलिरित्यपि । धरणो भूतानन्दश्च, नागानां तु पुरन्दरौ ॥ ५१० ॥
इन्द्रौ विद्युत्कुमाराणां, हरिर्हरिसहस्तथा । वेणुदेवो वेणुदारी, सुपर्णानां तु वासवौ ॥ ५११ ॥
ईशावग्निकुमाराणामग्निशिखा-ऽग्निमाणवौ । इन्द्रौ वायुकुमाराणां, वेलम्बोऽथ प्रभञ्जनः ॥ ५१२ ॥
सुघोषोऽथ महाघोषः, स्तनितानां तु वासवौ । इन्द्रावब्धिकुमाराणां, जलकान्त-जलप्रभौ ॥ ५१३ ॥
पूर्णो वशिष्ठश्च द्वीपकुमाराणामधीश्वरौ । अधिपौ दिक्कुमाराणाममिता-ऽमितवाहनौ ॥ ५१४ ॥

१ नरकभूमिषु । २ वर्द्धमानं सम्पुटकः । ३ मेघकुमाराः ।

रत्नप्रभाया उपरि, योजनानां सहस्रतः । उपरिष्टादधस्ताच्च, त्यक्त्वैकं शतयोजनीम् ॥ ५१५ ॥
वसन्ति योजनशतेष्वष्टस्वष्टविधाः खलु । दक्षिणोत्तरयोः श्रेण्योर्व्यन्तराणां निकायकाः ॥ ५१६ ॥
पिशाचव्यन्तरास्तत्र, कदम्बतरुलाञ्छनाः । भूताः सुलसवृक्षाङ्का, यक्षास्तु वटलाञ्छनाः ॥ ५१७ ॥
राक्षसास्तु खट्वाङ्गाङ्का, अशोकाङ्कास्तु किन्नराः । चम्पकाङ्काः किम्पुरुषा, नागद्रुवङ्का[1] महोरगाः ॥ ५१८ ॥
गन्धर्वव्यन्तराश्चारुतुम्बुरुद्रुमलाञ्छनाः । तत्र काल-महाकालौ, पिशाचानामधीश्वरौ ॥ ५१९ ॥
सुरूपोऽप्रतिरूपश्च, भूतानामधिपौ पुनः । यक्षाणां पूर्णभद्रश्च, माणिभद्रश्च वासवः ॥ ५२० ॥
राक्षसानां पुनर्भीमो, महाभीमश्च नायकः । किन्नराणामधीशौ किन्नर-किम्पुरुषौ पुनः ॥ ५२१ ॥
तथा सत्पुरुष-महापुरुषौ किम्पुरुषपौ । अतिकाय-महाकायौ, महोरगपुरन्दरौ ॥ ५२२ ॥
गन्धर्वाणां प्रभुर्गीतरतिर्गीतयशा अपि । इत्थङ्करं व्यन्तराणां, तत्रेन्द्राः सन्ति षोडश ॥ ५२३ ॥
रत्नप्रभायाः प्रथमे, योजनानां शते तथा । योजनानि परित्यज्य, दशाऽधो दश चोपरि ॥ ५२४ ॥
सन्त्यशीतौ योजनेषु, व्यन्तराष्टनिकायकाः । तत्राऽप्रज्ञप्तिकः पञ्चप्रज्ञप्तिर्ऋषिवादितः ॥ ५२५ ॥
भूतवादितः क्रन्दितो, महाक्रन्दित एव च । कूष्माण्डः पवकश्चेति, तेषु द्वौ द्वौ पुरन्दरौ ॥ ५२६ ॥
सन्निहितः समानश्च, तथा धातृ-विधातृकौ । ऋषिश्च ऋषिपालश्च, तथेश्वर-महेश्वरौ ॥ ५२७ ॥
सुवत्सक-विशालौ च, हास-हासरती तथा । तथा श्वेत-महाश्वेतौ, पवकः पवकाधिपः ॥ ५२८ ॥
रत्नप्रभातलादूर्द्ध्वं, योजनानां शतेषु च । अष्टासु दशहीनेषु, ज्योतिष्काणामधस्तलम् ॥ ५२९ ॥

१ नागद्रोः नागवृक्षस्य अङ्कं चिह्नं येषां ते नागद्रुवङ्काः ।

तदूर्द्धं दशयोजन्यां, सूर्यः सूर्यस्य चोपरि । भवत्यशीतियोजन्याः, प्रान्ते तुहिनदीधितिः[1] ॥ ५३० ॥
ततो विंशतियोजन्यां, प्रान्ते तारा ग्रहा इति । बाहल्ये योजनशतं, ज्योतिर्लोको दशोत्तरम् ॥ ५३१ ॥
एकविंशैर्योजनानामत्रैकादशभिः शतैः । द्वीपस्य जम्बूद्वीपस्य, मेरुशैलमसंस्पृशत् ॥ ५३२ ॥
आस्थितं मण्डलिकया, दिक्षु सर्वासु सन्ततम् । ज्योतिश्चक्रं बम्भ्रमीति, ध्रुव एकस्तु निश्चलः ॥ ५३३ ॥
योजनानामेकादशशतैरेकादशोत्तरैः । लोकान्तमस्पृशत् तद्धि, मण्डलेनाऽवतिष्ठते ॥ ५३४ ॥
अत्र सर्वोपरि स्वातिः, सर्वेषां भरणी त्वधः । सर्वेभ्यो दक्षिणो मूलोऽभीचिः सर्वोत्तरः पुनः ॥ ५३५ ॥
तत्र जम्बूद्वीपेऽमुष्मिन्, द्वौ चन्द्रौ द्वौ च भास्करौ । लवणोदे च चत्वारश्चन्द्रा दिनकरास्तथा ॥ ५३६ ॥
द्वादश धातकीखण्डे, चन्द्रा द्वादश भानवः । कालोदे द्विचत्वारिंशच्चन्द्रा दिनकरास्तथा ॥ ५३७ ॥
द्वासप्ततिः पुष्करार्धे, चन्द्राश्च रवयोऽपि च । एवं द्वात्रिंशमिन्दूनां, शतं दिनकृतां तथा ॥ ५३८ ॥
एकस्यैकस्य चन्द्रस्य, जायते च परिग्रहः[2] । अष्टाशीतिर्ग्रहाश्चैव, भान्यष्टाविंशतिस्तथा[3] ॥ ५३९ ॥
षट्षष्टिश्च सहस्राणि, तथा नव शतानि च । तारकाकोटिकोटीनां, पञ्चसप्ततिरेव च ॥ ५४० ॥
इन्दोर्विमानं विष्कम्भा-ऽऽयामयोर्योजनस्य तु । एकषष्ट्यंशीकृतस्य, स्युः षट्पञ्चाशदंशकाः ॥ ५४१ ॥
अष्टचत्वारिंशदंशा, विमाने तु विवस्वतः[4] । योजनार्धं ग्रहाणां तु, भानां[5] गव्यूतमेककम् ॥ ५४२ ॥
सर्वोत्कृष्टायुषस्तारकायाः क्रोशार्धमेव तु । सर्वजघन्यायुष्कायाः, पञ्च धन्वशतानि तु ॥ ५४३ ॥
पिण्डः[6] सर्वत्र दैर्घ्यार्धं, मर्त्यक्षेत्रे भवन्ति ते । पञ्चचत्वारिंशल्लक्षयोजनप्रमिते खलु ॥ ५४४ ॥

१ चन्द्रः । २ परिवारः । ३ नक्षत्राणि । ४ सूर्यस्य । ५ नक्षत्राणाम् । ६ स्थूलत्वम् ।

पुरः सिंहा दक्षिणतो, गजा अपरतो वृषाः । उत्तरतोऽश्वाश्चन्द्रादिविमानवाहनान्यमी ॥ ५४५ ॥
ते चाऽऽभियोगिकाश्चन्द्रार्कोः[1] सहस्राणि षोडश । ग्रह-नक्षत्र-ताराणामष्टौ चत्वार्युभे क्रमात् ॥ ५४६ ॥
चन्द्रादीनां गतिजुषां, स्वरसेनैव सन्ततम् । वाहनत्वेनाऽवतिष्ठन्त्याभियोग्येन कर्मणा ॥ ५४७ ॥
मानुषोत्तरपरतो, योजनानां सहस्रकैः । पञ्चाशतेन्दवोऽर्काश्च, तिष्ठन्त्यन्तरिता मिथः ॥ ५४८ ॥
मनुष्यक्षेत्रचन्द्रा-ऽर्कमानादर्धप्रमाणकाः । क्रमशः क्षेत्रपरिधिवृद्ध्या वर्धिष्णुसङ्ख्यकाः ॥ ५४९ ॥
सुलेश्या ग्रह-नक्षत्र-तारकापरिवारिताः । सङ्ख्याविवर्जिता एवं, घण्टाकारमनोहराः ॥ ५५० ॥
स्वयम्भूरमणाम्भोधिमवधीकृत्य ते सदा । तिष्ठन्ति योजनलक्षान्तरिताभिश्च पङ्क्तिभिः ॥ ५५१ ॥
मध्यलोके जम्बूद्वीप-लवणाद्याः शुभाभिधाः । द्विगुणद्विगुणाभोगा, असङ्ख्य द्वीप-सागराः ॥ ५५२ ॥
पूर्वपूर्वपरिक्षेपकृतो[2] वलयसन्निभाः । अन्त्यः स्वयम्भूरमणो, नाम तेषां महोदधिः ॥ ५५३ ॥
जम्बूद्वीपान्तरे मेरुः, काञ्चनस्थालवर्तुलः । अधो योजनसहस्रमवगाढो महीतले ॥ ५५४ ॥
नवनवतिं योजनसहस्राणि समुच्छ्रितः । योजनानां सहस्राणि, भूतले दश विस्तृतः ॥ ५५५ ॥
एकं योजनसहस्रमुपरिष्टाच्च विस्तृतः । त्रिकाण्डश्च त्रिभिर्लोकैः, प्रविभक्तवपुश्च सः ॥ ५५६ ॥
शुद्धपृथ्वी-ग्राव-वज्र-शर्कराबहुलं खलु । एकं योजनसहस्रं, सुमेरोः काण्डमादिमम् ॥ ५५७ ॥
जातरूप-स्फटिका-ऽङ्करजतैर्बहुलावनि । योजनानां सहस्राणि, त्रिषष्टिस्तु द्वितीयकम् ॥ ५५८ ॥
षट्त्रिंशच्च तृतीयं तु, जाम्बूनदशिलामयम् । वैडूर्यरत्नबहुला, चूलिका तस्य शोभना ॥ ५५९ ॥

१ चन्द्र-सूर्ययोः । २ पूर्वपूर्वद्वीप-समुद्रपरिवृताः एकान्तरिता द्वीप-समुद्राः ।

चत्वारिंशद्योजनानि, पुनस्तस्याः समुच्छ्रये[1] । मूलविष्कम्भमाने तु, तस्या द्वादशयोजनी ॥ ५६० ॥
अष्टौ तन्मध्यविष्कम्भे, चत्वार्युपरिविस्तृतौ । मेरोर्मूले भद्रशालं, वनं वलयसन्निभम् ॥ ५६१ ॥
भद्रशालात् पञ्चशतयोजन्यामधिमेखं[2]लम् । नन्दनं विस्तृतं पञ्च, योजनानां शतानि तु ॥ ५६२ ॥
सार्धद्विषष्टिसहस्रयोजनेष्वथ तादृशम् । मेखलायां द्वितीयस्यां, तावत् सौमनसं वनम् ॥ ५६३ ॥
वनात् सौमनसात् षट्त्रिंशद्योजनसहस्रतः । भवेदूर्द्ध्वं तृतीयस्यां, मेखलाभुवि सुन्दरम् ॥ ५६४ ॥
चतुर्नवत्यग्रचतुःशतयोजनविस्तृतम् । वलयाकारमुद्यानं, मेरोः शिरसि पाण्डकम् ॥ ५६५ ॥
जम्बूद्वीपे त्विह द्वीपे, सप्त वर्षाणि भारतम् । हैमवतं हरिवर्षं, विदेहं रम्यकं तथा ॥ ५६६ ॥
हैरण्यवतैरवते, अमून्या दक्षिणोत्तरम् । विभागकारिणोऽमीषाममी वर्षधराद्रयः ॥ ५६७ ॥
हिमवन्महाहिमवन्निषधा नील-रुक्मिणौ । शिखरी चेति मूलोद्धर्वतुल्यविस्तारशालिनः ॥ ५६८ ॥
तत्राऽवगाढो मेदिन्यां, पञ्चविंशतियोजनीम् । हेममयोऽद्रिर्हिमवानुच्छ्रितः शतयोजनीम्[3] ॥ ५६९ ॥
महाहिमवदद्रिस्तद्द्विगुणोऽर्जुन[4]निर्मितः । ततोऽपि द्विगुणस्तापनीयो निषधपर्वतः ॥ ५७० ॥
नीलस्तु निषधतुल्यो, गिरिर्वैडूर्यनिर्मितः । महाहिमवता तुल्यो, रुक्मी रजतनिर्मितः ॥ ५७१ ॥
तापनीयस्तु शिखरी, समो हिमवदद्रिणा, सर्वेऽपि पार्श्वभागेषु, विचित्रमणिशालिनः ॥ ५७२ ॥
सहस्रयोजनायामस्तदर्धेन तु विस्तृतः । अद्रौ क्षुद्रहिमवति, पद्मनामा महाह्रदः ॥ ५७३ ॥
महाहिमवदद्रौ तु, महापद्माभिधो ह्रदः । विद्यते पद्मह्रदतो, द्विगुणायाम-विस्तृतिः ॥ ५७४ ॥

१ उच्चत्वे । २ मेखलायाम् । ३ श्वेतसुवर्णनिर्मितः । ४ सुवर्णमयः ।

महापद्मात् तु द्विगुणस्तिङ्गिच्छिर्निषधे ह्रदः । तिङ्गिच्छितुल्यो नीलाद्रौ, ह्रदः केसरिसंज्ञकः ॥ ५७५ ॥
महापुण्डरीकेऽ महापद्मतुल्यस्तु रुक्मिणि । पद्मतुल्यः पुण्डरीकह्रदः शिखरिपर्वते ॥ ५७६ ॥
विकस्वराणि तिष्ठन्ति, पद्मादिषु ह्रदेषु तु । कमलान्यवगाढानि, जलान्तर्दशयोजनीम् ॥ ५७७ ॥
श्रीह्रीधृतिकीर्तिबुद्धिलक्ष्म्यः पल्यायुषोऽत्र तु । सामानिकपार्षद्याऽऽत्मरक्षानीकयुताः क्रमात् ॥ ५७८ ॥
तत्र च भरतक्षेत्रे, गङ्गा-सिन्धु महापगे । रोहिता-रोहितांशे तु, क्षेत्रे हैमवताभिधे ॥ ५७९ ॥
हरिद्धरिकान्ता नद्यौ, वर्षे तु हरिवर्षके । महाविदेहेषु शीता-शीतोदे सरिदुत्तमे ॥ ५८० ॥
नरकान्ता-नारीकान्ते, क्षेत्रे रम्यकनामनि । स्वर्णकूला-रूप्यकूले, हैरण्यवतवर्षके ॥ ५८१ ॥
नद्यौ तु रक्ता-रक्तोदे, क्षेत्र ऐरवताभिधे । आद्याः पूर्वाब्धिगामिन्यो, द्वितीयाः पश्चिमाब्धिगाः ॥ ५८२ ॥
आपगानां सहस्रैस्तु, चतुर्दशभिरुत्तमैः । गङ्गा-सिन्धू महानद्यौ, प्रत्येकं परिवारिते ॥ ५८३ ॥
द्विगुणद्विगुणनदीवृते द्वे द्वे परे अपि । यावच्च शीता-शीतोदे, उत्तरा दक्षिणोपमाः ॥ ५८४ ॥
प्रत्येकं ते पुनः शीता-शीतोदे परिवारिते । द्वात्रिंशत्सहस्राधिकैर्नदीलक्षैस्तु पञ्चभिः ॥ ५८५ ॥
भरतोरुत्वे षड्विंशा, पञ्चयोजनशत्यथ । एकोनविंशत्यंशस्य, योजनस्य षडंशकाः ॥ ५८६ ॥
ततो द्विगुणद्विगुणविष्कम्भाश्च यथोत्तरम् । विदेहान्ता वर्षधराचल-वर्षा भवन्ति तु ॥ ५८७ ॥
उत्तरे वर्षधराद्रि-वर्षास्तुल्यास्तु दक्षिणैः । वर्षधराद्रि-वर्षाणां, प्रमाणमिदमेव हि ॥ ५८८ ॥
निषधाद्रेरुत्तरतो, मेरोर्दक्षिणतोऽपि च । विद्युत्प्रभ-सौमनसौ, गिरी पश्चिम-पूर्वकौ ॥ ५८९ ॥

१ जलमध्ये दशयोजनपर्यन्तमवगाह्य स्थितानि । २ महानद्यौ । ३ भरतस्य पृथुत्वे ।

गजदन्ताकृती मूर्ध्ना, स्तोकादस्पृष्टमेरुकौ । अनयोरन्तरे देवकुरवो भोगभूमयः ॥ ५९० ॥
तद्विष्कम्भो योजनानामेकादश सहस्रकाः । द्विचत्वारिंशदधिका, योजनाष्टशती तथा ॥ ५९१ ॥
तत्र च शीतोदाभिन्नह्रदपञ्चकपार्श्वतः । स्वर्णशैला दश दश, ते मिथो मीलनाच्छतम् ॥ ५९२ ॥
तत्र नद्यः शीतोदायाः, पूर्वापरतटस्थितौ । शैलो विचित्रकूटश्च, चित्रकूटश्च नामतः ॥ ५९३ ॥
तयोः सहस्रमुत्सेधे[1], योजनानामधोऽपि च । तावानेव हि विस्तारस्तदर्धं चोर्द्धविस्तृतौ ॥ ५९४ ॥
मेरोरुत्तरतो नीलगिरेर्दक्षिणतो गिरी । गजदन्ताकृती गन्धमादनो माल्यवानपि ॥ ५९५ ॥
तयोरन्तः शीताभिन्नह्रदपञ्चकपार्श्वगैः । स्वर्णशैलैः शतेनाऽतिरम्याः कुरव उत्तराः ॥ ॥ ५९६ ॥
तेषु नद्याश्च शीतायास्तटयोर्यमकाभिधौ । सौवर्णौ विचित्रकूट-चित्रकूटसमौ गिरी ॥ ५९७ ॥
देवोत्तरकुरुभ्यः प्राक्[2], प्राग्विदेहाः[3] स्मृताश्च ते । पश्चिमेऽपरविदेहा, मिथः क्षेत्रान्तरोपमाः ॥ ५९८ ॥
परस्परमसञ्चारा, विभक्ताः सरिदद्रिभिः । चक्रिविजेया[4] विजयास्तेषु षोडश षोडश ॥ ५९९ ॥
तत्र कच्छो महाकच्छः, सुकच्छः कच्छवानपि । आवर्तो मङ्गलावर्तः, पुष्कलः पुष्कलावती ॥ ६०० ॥
प्राग्विदेहोत्तरा ह्येते, दक्षिणास्त्वथ वत्सकः । सुवत्सोऽथ महावत्सो, रम्यवान् रम्य-रम्यकौ ॥ ६०१ ॥
रमणीयो मङ्गलवानथाऽपरविदेहगाः । पद्मः सुपद्मोऽथ महापद्मः पद्मावती तथा ॥ ६०२ ॥
शङ्खः कुमुद-नलिने, नलिनवांश्च दक्षिणाः । वप्रः सुवप्रोऽथ महावप्रो वप्रावती तथा ॥ ६०३ ॥
अथ वल्गुः सुवल्गुश्च, गन्धिला गन्धिलावती । अपरेषु विदेहेषूत्तरस्था विजया अमी ॥ ६०४ ॥

१ उच्चत्वे । २ पूर्वस्यां दिशि । ३ पूर्वविदेहाः । ४ चक्रिणा विजेतुं योग्याः ।

मध्ये च भरतस्याऽपागुत्तरार्धविभागकृत् । वैताढ्याद्रिः [1]प्रागपरपयोधी यावदायतः ॥ ६०५ ।
षड् योजनानि सक्रोशान्युर्व्यां मग्नः स विस्तृतः । पञ्चाशतं योजनानि, तदर्धं पुनरुच्छ्रितः ॥ ६०६ ॥
भूमितो दशयोजन्यां, दक्षिणोत्तरपार्श्वयोः । तत्र विद्याधरश्रेण्यौ, दशयोजनविस्तृते ॥ ६०७ ॥
तत्राऽऽ[2]पाच्यां सराष्ट्राणि, पञ्चाशन्नगराणि तु । उत्तरस्यां पुनः षष्टिर्विद्याधरमहीभुजाम् ॥ ६०८ ॥
ऊर्द्ध्वं विद्याभृच्छ्रेणिभ्यां, दशयोजन्यनन्तरम् । उभे च व्यन्तरश्रेण्यौ, व्यन्तरावासशोभिते ॥ ६०९ ॥
उपरि व्यन्तरश्रेण्योर्योजनेषु तु पञ्चसु । कूटानि नव वैताढ्य, ईदृगैरवतेऽपि हि ॥ ६१० ॥
प्राकारभूता द्वीपस्य, जम्बूद्वीपस्य तिष्ठति । जगती वज्रमय्यष्टौ, योजनानि समुच्छ्रिता ॥ ६११ ॥
तस्याश्च मूले विष्कम्भमाने द्वादशयोजनी । मध्यभागे योजनानि, चाऽष्टौ चत्वारी मूर्धनि ॥ ६१२ ॥
तदूर्द्ध्वं जालकटको, गव्यूतद्वितयोच्छ्रयः । विद्याधराणामाक्रीडस्थानमेकं मनोहरम् ॥ ६१३ ॥
ततोऽपि जालकटकादूर्द्ध्वं पद्मवराभिधा । विद्यते वेदिका रम्या, भोगभूमिर्दिवौकसाम् ॥ ६१४ ॥
तस्या जगत्याः पूर्वादिदिक्षु द्वाराणि च क्रमात् । विजयं वैजयन्तं च, जयन्तमपराजितम् ॥ ६१५ ॥
अस्ति च क्षुद्रहिमवन्महाहिमवदन्तरे । शब्दापातीनामधेयाद्, वृत्तवैताढ्यपर्वतः ॥ ६१६ ॥
शैलस्तु विकटापाती, मध्ये शिखरि-रुक्मिणोः । गन्धापाती पुनर्महाहिमवन्निषधान्तरे ॥ ६१७ ॥
माल्यवानन्तराले च, शैलयोर्नील-रुक्मिणोः । सर्वेऽपि पल्याकृतयः, सहस्रयोजनोच्छ्रयाः ॥ ६१८ ॥
जम्बूद्वीपपरिक्षेपी, विस्तारे द्विगुणस्ततः । अवगाढो योजनानां, सहस्रमवनीतले ॥ ६१९ ॥

पञ्चनवतियोजनसहस्री च क्रमात् क्रमात् । उभयतोऽप्युच्छ्रयेण, वर्धमानजलस्तथा ॥ ६२० ॥
मध्ये च योजनदशसहस्रीप्रमविस्तृतौ । योजनानां सहस्राणि, षोडशोच्छ्रयवच्छिखः ॥ ६२१ ॥
कालद्वये तदुपरि, गव्यूतद्वितयावधि । ह्रास-वृद्धिधरो नाम्ना, लवणोदः पयोनिधिः ॥ ६२२ ॥
॥ चतुर्भिः कलापकम् ॥
पूर्वादिदिक्षु तत्रान्तः, प्रमाणे लक्षयोजनाः । वडवामुख-केयूप-यूपकेश्वरसंज्ञका ॥ ६२३ ॥
सहस्रयोजनीमानवज्रनिर्मितकुड्यकाः । योजनानां सहस्राणि, दशाऽधोऽन्ते[1] च विस्तृताः ॥ ६२४ ॥
वायुधृतत्र्यंशजला[2], महालिञ्जरसन्निभाः[3] । पातालकलसाः सन्ति, चत्वारः प्राक् क्रमादमी ॥ ६२५ ॥
तेषु कालो महाकालो, वेलम्बोऽथ प्रभञ्जनः । वसन्ति क्रीडावासेषु, क्रमेणैव दिवौकसः ॥ ६२६ ॥
सहस्रयोजनाश्चाऽन्ये, दशयोजनकुड्यकाः । अधस्ताच्च वदने[4] च, शतयोजनसम्मिताः[5] ॥ ६२७ ॥
वायूत्क्षिप्तमध्यमिश्रापाः[6] शतान्यष्टसप्ततिः । चतुरशीतिश्च क्षुद्रपातालकलसा इह ॥ ६२८ ॥
द्विचत्वारिंशत्सहस्रसङ्ख्या नागकुमारकाः । अन्तर्वेलाधारिणोऽस्मिन्नायुक्ता[7] इव[8] सर्वदा ॥ ६२९ ॥
बाह्यवेलाधारिणां तु, सहस्राणि द्विसप्ततिः । तथा षष्टिः सहस्राणि, शिखावेलाप्रधारिणाम् ॥ ६३० ॥
गोस्तूप उदकाभासः, शङ्खोऽप्युदकसीमकः । हैमा-ऽङ्क-रौप्य-स्फाटिका, वेलाधारीन्द्रपर्वताः ॥ ६३१ ॥
गोस्तूप-शिवक-शङ्ख-मनोहृदसुराश्रयाः । द्विचत्वारिंशत्सहस्रयोजन्यां दिग्भवाश्च ते ॥ ६३२ ॥

१ उपरि । २ तृतीयभागो वायुपूरितो भागद्वये च जलमस्तीति तात्पर्यम् । ३ अलिञ्जरो मृद्भाण्डविशेषः । ४ उपरि । ५ प्रमाणाः । ६ वायुनोत्क्षिप्ता मध्ये मिश्रा आपो येषां ते । ७ समुद्रे । ८ नियुक्ता इव ।

एकविंशसप्तदशशतयोजनिकोच्छ्रयाः । ते द्वाविंशयोजनानां, सहस्रं विस्तृतास्त्वधः ॥ ६३३ ॥
उपरिष्टाच्चतुर्विंशां, योजनानां चतुःशतीम् । तेषामुपरि सर्वेषां, प्रासादाः सन्ति शोभनाः ॥ ६३४ ॥
कर्कोटकः कार्दमकः, कैलाशश्चाऽरुणप्रभः । सर्वरत्नमयाश्चाणुवेलाधारीन्द्रपर्वताः ॥ ६३५ ॥
कर्कोटको विद्युज्जिह्वः, कैलाशोऽथाऽरुणप्रभः । वसन्ति देवतास्तेषु, सर्वदैव यथाक्रमम् ॥ ६३६ ॥
सहस्रेषु द्वादशसु, योजनानां विदिक्षु च । प्राच्यामिन्दुद्वीपौ तावद्विस्तारा-ऽऽयामशोभितौ ॥ ६३७ ॥
विद्येते सवितृद्वीपावपरेण च तावति । तथाऽस्ति गौतमद्वीपस्तावति सुस्थिताश्रयः[1] ॥ ६३८ ॥
अन्तर्बाह्यलावणकचन्द्रा-ऽर्काणां तथाऽऽश्रयाः । प्रासादास्तेषु लवणरसस्तु लवणोदधिः ॥ ६३९ ॥
लवणोदपरिक्षेपी, ततो द्विगुणविस्तृतिः । धातकीखण्ड इत्यस्ति, नाम्ना द्वीपो द्वितीयकः ॥ ६४० ॥
जम्बूद्वीपे च ये मेरु-वर्ष-वर्षधराद्रयः । धातक्यां द्विगुणास्ते तु, ख्यातास्तैरेव नामभिः ॥ ६४१ ॥
इष्वाकारपर्वताभ्यां, दीर्घाभ्यामुदग्याम्ययोः । विभक्ता जम्बूद्वीपस्थसङ्ख्याः पूर्वापरार्धयोः ॥ ६४२ ॥
चक्राराभा निषधोच्चाः, कालोद-लवणस्पृशः । वर्षधराः सेष्वाकारा, वर्षास्त्वरान्तरस्थिताः ॥ ६४३ ॥
धातकीखण्डद्वीपस्य, परिक्षेपी पयोनिधिः । कालोदाख्यो योजनानामष्टौ लक्षाणि विस्तृतः ॥ ६४४ ॥
धातक्यां सेष्वाकाराणां, मेर्वादीनामभाषि यः । सङ्ख्याविषयनियमः, पुष्करार्धे स एव हि ॥ ६४५ ॥
धातकीखण्डक्षेत्रादिविभागाद् द्विगुणः पुनः । क्षेत्रादिकविभागोऽत्र, पुष्करार्धे प्रकीर्तितः ॥ ६४६ ॥
चत्वारो मेरवः क्षुद्रा, धातकी-पुष्करार्धयोः । योजनानां पञ्चदशसहस्र्या मेरुतोऽणवः[2] ॥ ६४७ ॥

१ सुस्थिताभिधानस्य देवस्याश्रयः । २ लघवः ।

मेरोर्योजनषट्शत्या, हीनविष्कम्भकाः क्षितौ । तेषां च प्रथमं काण्डं, महामेरोरनूनकम्[१] ॥ ६४८ ॥
द्वितीयं सप्तभिर्न्यूनं, योजनानां सहस्रकैः । तृतीयमष्टभिर्मेरुवद् भद्रशाल-नन्दने ॥ ६४९ ॥
सहार्धपञ्चपञ्चाशसहस्रयोजनोपरि । पञ्चयोजनशत्या च, पृथु सौमनसं वनम् ॥ ६५० ॥
अष्टाविंशतिसहस्रा, योजनानामथोपरि । षड्नयोजनपञ्चशतविस्तारि पाण्डकम् ॥ ६५१ ॥
उपरिष्टादधस्ताच्च, विष्कम्भोऽथाऽवगाहनम् । महामेरुगिरेस्तुल्यं, तत्तुल्या चूलिकाऽपि च ॥ ६५२ ॥
तदेवं मानुषं क्षेत्रं, द्वीपावर्धतृतीयकौ । द्वावब्धी पञ्चत्रिंशच्च, वर्षाः पञ्च च मेरवः ॥ ६५३ ॥
त्रिंशद् वर्षधरा देवकुरवः पञ्च पञ्च च । उत्तराः कुरवः षष्ट्युत्तरं च विजयाः शतम् ॥ ६५४ ॥
ततः परं पर्वतोऽस्ति, नामतो मानुषोत्तरः । मर्त्यलोकपरिक्षेपी, पुरप्राकारवर्तुलः ॥ ६५५ ॥
निविष्टः पुष्करस्याऽर्धे सौवर्णः सैकविंशतिम् । योजनानां सप्तदशशतीं यावत् समुच्छ्रितः ॥ ६५६ ॥
चतुःशतीं योजनानां, त्रिंशां क्रोशं च भूमिगः । योजनानां सहस्रं द्वाविंशं विस्तीर्णवानधः ॥ ६५७ ॥
योजनानां सप्तशतीं, त्रयोविंशां च मध्यतः । उपरिष्टाच्चतुर्विंशां, योजनानां चतुःशतीम् ॥ ६५८ ॥
नोत्पद्यन्ते न म्रियन्ते, मर्त्यास्तत्परतः क्वचित् । न म्रियन्ते चारणाद्या, अपि तत्परतो गताः ॥ ६५९ ॥
मानुषोत्तरनामा च, तेनाऽयं परतोऽस्य च । बादराग्नि-मेघ-विद्युन्नदी-कालादयो न हि ॥ ६६० ॥
पञ्चत्रिंशति वर्षेषु, चैष्ववाग् मानुषोत्तरात् । मनुष्याः सान्तरद्वीपेषूत्पद्यन्ते ही जन्मतः ॥ ६६१ ॥
संहार-विद्य-र्द्धियोगान्मेर्वादिशिखरेषु च । द्वीपेष्वर्धतृतीयेषु, समुद्रद्वितये च ते ॥ ६६२ ॥

१ समानम् ।

ते च भारतका जम्बूद्वीप्या लावणका अपि । इत्येवमादयः क्षेत्र-द्वीपा-ऽम्भोधिविभागतः ॥ ६६३ ॥
द्विधाऽऽर्य-म्लेच्छभेदात् ते, तत्राऽऽर्याः षड्विधा इह । क्षेत्र-जाति-कुल-कर्म-शिल्प-भाषाविभेदतः ॥६६४॥
क्षेत्रार्याः पञ्चदशसु, जायन्ते कर्मभूमिषु । तत्रेह भारते सार्धपञ्चविंशतिदेशजाः ॥ ६६५ ॥
ते चाऽऽर्यदेशा नगरैरुपलक्ष्या इमे यथा । राजगृहेण मगधा, अङ्गदेशस्तु चम्पया ॥ ६६६ ॥
वङ्गाः पुनस्ताम्रलिप्त्या, वाराणस्या च काशयः । काञ्चनपुर्या कलिङ्गाः, साकेतेन च कोसलाः ॥ ६६७ ॥
कुरवो गजपुरेण, शौर्येण च कुशार्तकाः । काम्पील्येन च पञ्चाला, अहिच्छत्रेण जाङ्गलाः ॥ ६६८ ॥
विदेहास्तु मिथिलया, द्वारवत्या सुराष्ट्रकाः । वत्साश्च कौशाम्बीपुर्या, मलया भद्रिलेन तु ॥ ६६९ ॥
नान्दीपुरेण सन्दर्भा, वरुणाः पुनरच्छया । वैराटेन पुनर्मत्स्याः, शुक्तिमत्या च चेदयः ॥ ६७० ॥
दशार्णा मृत्तिकावत्या, वीतभयेन सिन्धवः । सौवीरास्तु मथुरया, सूरसेनास्तु पापया ॥ ६७१ ॥
भङ्ग्या मासपुरीवर्ताः, श्रावस्त्या च कुणालकाः । कोटीवर्षेण लाटाश्च, श्वेतव्या केतकार्धकम् ॥ ६७२ ॥
आर्यदेशा अमी एभिर्नगरैरुपलक्षिताः । तीर्थकृच्चक्रभृत्कृष्ण-बलानां जन्म येषु हि ॥ ६७३ ॥
इक्ष्वाकवो ज्ञात-हरि-विदेहाः कुरवोऽपि च । उग्रा भोजा राजन्याश्च, जात्यार्या एवमादयः ॥ ६७४ ॥
कुलार्यास्तु कुलकराश्चक्रिणो विष्णवो बलाः । तृतीयात् पञ्चमात् सप्तमाद् वा ये शुद्धवंशजाः ॥ ६७५ ॥
यजनैर्याजनैः शास्त्राध्ययना-ऽध्यापनैरपि । प्रयोगैर्वार्त्तया वृत्तिमन्तः कर्मार्यकाः स्मृताः ॥ ६७६ ॥
शिल्पार्याः स्वल्पसावद्यवृत्तयस्तन्तुवायकाः । तुन्नवायाः कुलालाश्च, नापिता देवलादयः[१] ॥ ६७७ ॥

१ देवाजीवाः ।

भाषार्या नाम ते शिष्टभाषानियतवर्णकम् । पञ्चानामपि चाऽऽर्याणां, व्यवहारं वदन्ति ये ॥ ६७८ ॥
म्लेच्छास्तु शाका यवनाः, शबरा बर्बरा अपि । काया मुरुण्डा उड्राश्च, गोड्राः पक्वणका अपि ॥ ६७९ ॥
अरपाकाश्च हूणाश्च, रोमकाः पारसा अपि । खसाश्च खासिका डौम्बिलिकाश्च लकुसा अपि ॥ ६८० ॥
भिल्ला अन्ध्रा वुक्कसाश्च, पुलिन्दाः क्रौञ्चका अपि । भ्रमररुताः कुञ्चाश्च, चीन-चञ्चुक-मालवाः ॥६८१॥
द्रविडाश्च कुलक्षाश्च, किराताः कैकया अपि । हयमुखा गजमुखस्तुरगाऽजमुखा अपि ॥ ६८२ ॥
हयकर्णा गजकर्णा, अनार्या अपरेऽपि हि । मर्त्या येषु न जानन्ति, धर्म इत्यक्षराण्यपि ॥ ६८३ ॥
॥ पञ्चभिः कुलकम् ॥

धर्मा-ऽधर्मोज्झिता म्लेच्छा, अन्तरद्वीपजा अपि । भवन्ति चाऽन्तरद्वीपाः, षट्पञ्चाशदमी यथा ॥ ६८४॥
तेऽर्धे क्षुद्रहिमवतः, पूर्वा-ऽपरविभागयोः । पूर्वोत्तराप्रभृतिषु, विदिक्षु चतसृष्वपि ॥ ६८५ ॥
पूर्वोदीच्यां दिशि तत्राऽवगाढो लवणोदधिः । त्रियोजनशतीं तावानायामे विस्तृतावपि ॥ ६८६ ॥
प्रथमोऽस्त्यन्तरद्वीप, एकोरुरिति नामतः । पुरुषा द्वीपनाम्नेह, सर्वाङ्गोपाङ्गसुन्दराः ॥ ६८७ ॥
न खल्वेकोरुका एव, द्वीपेष्वित्यपरेष्वपि । ज्ञातव्या वक्ष्यमाणेषु, द्वीपनाम्नैव पूरुषाः ॥ ६८८ ॥
आग्नेय्यादिषु तन्मात्रावगाहा-ऽऽयाम-विस्तृताः । द्वीपा आभाषिको लाङ्गूलिको वैषाणिकः क्रमात् ॥६८९॥
ततः परं योजनानामवगाह्य चतुःशतीम् । तावदायामसहितास्तावद्विष्कम्भशोभिनः ॥ ६९० ॥
ऐशान्यादिविदिक्ष्वन्तर्द्वीपाश्च हयकर्णकः । गजकर्णश्च गोकर्णः, शष्कुलीकर्णकः क्रमात् ॥ ६९१ ॥

ततः परं योजनानां, पञ्चशत्यवगाहिनः । तावदायाम-विष्कम्भा, अन्तरद्वीपका इमे ॥ ६९२ ॥
तत्राऽऽदर्शमुखो मेषमुखो हयमुखस्तथा । गजमुखश्च चत्वार, ऐशान्यादिषु पूर्ववत् ॥ ६९३ ॥
ततः षड्योजनशतावगाहा-ऽऽयाम-विस्तृताः । अश्वमुखो हस्तिमुखः, सिंह-व्याघ्रमुखावपि ॥ ६९४ ॥
योजनानां सप्तशतावगाहा-ऽऽयाम-विस्तृताः । अश्व-सिंह-हस्तिकर्णाः, कर्णप्रावरणः क्रमात् ॥ ६९५ ॥
ततोऽष्टयोजनशतीं, लवणोदेऽवगाहिनः । तावदायामसहितास्तावद्विष्कम्भशालिनः ॥ ६९६ ॥
द्वीपा उल्कामुखो विद्युज्जिह्वो मेषमुखोऽपि च । विद्युद्दन्तश्च चत्वार, ऐशान्यादिविदिक्क्रमात् ॥ ६९७ ॥
योजनानां नवशतीं, ततोऽपि लवणोदधेः । अवगाह्य स्थितास्तावद्विष्कम्भा-ऽऽयामशालिनः ॥ ६९८ ॥
नाम्ना गूढदन्तो घनदन्तकः श्रेष्ठदन्तकः । शुद्धदन्तश्च चत्वारोऽन्तरद्वीपा विदिक्क्रमात् ॥ ६९९ ॥
अष्टाविंशतिरेवं च, शिखरिण्यपि पर्वते । एकत्र मेलिताः सर्वे, षट्पञ्चाशद् भवन्ति ते ॥ ७०० ॥
मानुषोत्तरपरतः, पुष्करार्धं द्वितीयकम् । पुष्करस्य परिक्षेपी, द्विर्गुणः[1] पुष्करोदकः ॥ ७०१ ॥
ततोऽपि वारुणिवरौ, नाम्ना द्वीप-पयोनिधी । ततः परं क्षीरवरौ, नामतो द्वीप-सागरौ ॥ ७०२ ॥
ततो घृतवरौ द्वीपा-ऽम्बुधी इक्षुवरो ततः । ततो नन्दीश्वरो नाम्नाऽष्टमो द्वीपो द्यु[2]सन्निभः ॥ ७०३ ॥
एतद्वलयविष्कम्भे, लक्षाशीतिश्चतुर्युता । योजनानां त्रिषष्टिश्च, कोट्यः कोटिशतं तथा ॥ ७०४ ॥
असौ विविधविन्यासोद्यानवान् देवभोगभूः । जिनेन्द्रपूजासंसक्तसुरसम्पातसुन्दरः ॥ ७०५ ॥
अस्य मध्यप्रदेशे तु, क्रमात् पूर्वादिदिक्षु च । अञ्जनवर्णाश्चत्वारस्तिष्ठन्त्यञ्जनपर्वताः ॥ ७०६ ॥

१ पुष्करार्धाद् द्विगुणः । २ स्वर्गसदृशः ।

दशयोजनसहस्रातिरिक्तविस्तृतास्तले । सहस्रयोजनाश्चोर्द्ध्वं, क्षुद्रा मेरूच्छ्रयाश्च ते ॥ ७०७ ॥
तत्र प्राग् देवरमणो, नित्योद्योतश्च दक्षिणः । स्वयम्प्रभः प्रतीच्यस्तु, रमणीय उदक्स्थितः ॥ ७०८ ॥
शतयोजन्यायतानि, तदर्धं विस्तृतानि च । द्विसप्ततियोजनोच्चान्यर्हच्चैत्यानि तेषु च ॥ ७०९ ॥
पृथग्द्वाराणि चत्वार्युच्चानि षोडशयोजनीम् । प्रवेशे योजनान्यष्ट, विस्तारेऽप्यष्ट तेषु तु ॥ ७१० ॥
तानि देवाऽसुर-नाग-सुपर्णानां दिवौकसाम् । समाश्रयास्तेषामेव, नामभिर्विश्रुतानि च ॥ ७११ ॥
षोडशयोजनायामास्तावन्मात्र्यश्च विस्तृतौ । अष्टयोजनिकोत्सेधास्तन्मध्ये मणिपीठिकाः ॥ ७१२ ॥
सर्वरत्नमया देवच्छन्दकाः पीठिकोपरि । पीठिकाभ्योऽधिकायामोच्छ्रयभाजश्च तेषु तु ॥ ७१३ ॥
ऋषभावर्धमाना च, तथा चन्द्राननाऽपि च । वारिषेणा चेति नाम्ना, पर्यङ्कासनसंस्थिताः ॥ ७१४ ॥
रलमय्यो युताः स्वस्वपरिवारेण हारिणा । शाश्वतार्हत्प्रतिमाः प्रत्येकमष्टोत्तरं शतम् ॥ ७१५ ॥
द्वे द्वे नाग-यक्ष-भूत-कुण्डभृत्प्रतिमे पृथक् । प्रतिमानां पृष्ठतस्तु, च्छत्रभृत्प्रतिमैकिका ॥ ७१६ ॥
तेषु धूपघटी-दाम-घण्टा-ऽष्टमङ्गली-ध्वजाः । छत्र-तोरण-चङ्गेर्यः, पटलान्यासनानि च ॥ ७१७ ॥
षोडश पूर्णकलसादीन्यलङ्करणानि च । सुवर्णरुचिररजोवालुकास्तलभूमयः ॥ ७१८ ॥
आयतनप्रमाणेन, रुचिरा मुखमण्डपाः । प्रेक्षार्थमण्डपा अक्षवाटिका मणिपीठिकाः ॥ ७१९ ॥
रम्याश्च स्तूप-प्रतिमाश्चैत्यवृक्षाश्च सुन्दराः । इन्द्रध्वजाः पुष्करिण्यो, दिव्याः सन्ति यथाक्रमम् ॥ ७२० ॥
प्रत्येकमञ्जनाद्रीणां, ककुप्सु चतसृष्वपि । क्रमादमूः पुष्करिण्यो, मानतो लक्षयोजनाः ॥ ७२१ ॥
नन्दिषेणा चाऽमोघा च, गोस्तूपाऽथ सुदर्शना । तथा नन्दोत्तरा नन्दा, सुनन्दा नन्दिवर्धना ॥ ७२२ ॥

भद्रा विशाला कुमुदा, पुण्डरीकिणिका तथा । विजया वैजयन्ता च, जयन्ता चाऽपराजिता ॥ ७२३ ॥
प्रत्येकमासां योजनपञ्चशत्याः परत्र च । योजनानां पञ्चशतीं, यावद् विस्तारभाञ्जि तु ॥ ७२४ ॥
लक्षयोजनदीर्घाणि, महोद्यानानि तानि तु। अशोक-सप्तच्छदक-चम्पक-चूतसंज्ञया ॥ ७२५ ॥
मध्ये पुष्करिणीनां च, स्फाटिकाः पल्यमूर्त्तयः[1] । ललाम-वेद्युद्यानादिचिह्ना दधिमुखाद्रयः ॥ ७२६ ॥
चतुःषष्टिसहस्रोच्चाः, सहस्रं चाऽवगाहिनः । विस्तृता दशसहस्रीं, योजनानामुपर्यधः ॥ ७२७ ॥
अन्तरे पुष्करिणीनां, द्वौ द्वौ रतिकराचलौ । ततो भवन्ति द्वात्रिंशदेते रतिकराचलाः ॥ ७२८ ॥
शैलेषु दधिमुखेषु, तथा रतिकराद्रिषु । शाश्वतान्यर्हच्चैत्यानि, सन्त्यञ्जनगिरिष्विव ॥ ७२९ ॥
चत्वारो द्वीपविदिक्षु, तथा रतिकराचलाः । दशयोजनसहस्रायाम- विष्कम्भशालिनः ॥ ७३० ॥
योजनानां सहस्रं तु, यावदुच्छ्रयशोभिताः । सर्वरत्नमया दिव्या, झल्लर्याकारधारिणः ॥ ७३१ ॥
तत्र द्वयो रतिकराचलयोर्दक्षिणस्थयोः । शक्रस्यैशानस्य पुनरुत्तरस्थितयोः पृथक् ॥ ७३२ ॥
अष्टनां महादेवीनां, राजधान्योऽष्टदिक्षु ताः । लक्षाबाधा[2] लक्षमाना, जिनायतनभूषिताः ॥ ७३३ ॥
सुजाता सौमनसा चाऽर्चिमाली च प्रभाकरा । पद्मा शिवा शुच्यञ्जने, भूता भूतावतंसिका ॥ ७३४ ॥
गोस्तूपा-सुदर्शने अप्यमला-ऽप्सरसौ तथा । रोहिणी नवमी चाऽथ, रत्ना रत्नोच्चयाऽपि च ॥ ७३५ ॥
सर्वरत्ना रत्नसञ्चया वसुर्वसुमित्रिका । वसुभागाऽपि च वसुन्धरानन्दोत्तरे अपि ॥ ७३६ ॥
नन्दोत्तरकुरुर्देवकुरुः कृष्णा ततोऽपि च । कृष्णराजीरामारामरक्षिताः प्राक्क्रमादमूः ॥ ७३७ ॥

१ पल्याकृतयः । २ रतिकराल्लक्षयोजनदूरे ।

सर्वर्द्धयस्तासु[१] देवाः, कुर्वते सपरिच्छदाः । चैत्येष्वष्टाह्निकाः पुण्यतिथिषु श्रीमदर्हताम् ॥ ७३८ ॥
नन्दीश्वरपरिक्षेपी, ततो नन्दीश्वरोऽर्णवः । ततः परोऽरुणद्वीपोऽस्त्यरुणोदश्च सागरः ॥ ७३९ ॥
ततोऽरुणवरो द्वीपस्तन्नामा च पयोनिधिः । ततः परोऽरुणाभासोऽरुणाभासश्च सागरः ॥ ७४० ॥
ततश्च कुण्डलद्वीपः, कुण्डलोदश्च वारिधिः । ततश्च रुचकद्वीपो, रुचकश्च पयोनिधिः ॥ ७४१ ॥
एवं प्रशस्तनामानो, द्विगुणाद्विगुणाः क्रमात् । द्वीपाः समुद्रास्तेष्वन्त्यः, स्वयम्भूरमणोऽम्बुधिः ॥ ७४२ ॥
द्वीपेष्वर्धतृतीयेषु, देवोत्तरकुरून् विना । भरतैरावत-महाविदेहाः कर्मभूमयः ॥ ७४३ ॥
कालोदः पुष्करोदश्च, स्वयम्भूरमणस्तथा । पानीयरसा लवणरसस्तु लवणोदधिः ॥ ७४४
वारुणोदश्चित्रपानहृद्यः क्षीरोदधिः पुनः । खण्डमिश्र-धृतचतुर्भागगोक्षीरसन्निभः ॥ ७४५ ॥
घृतोदः सद्यःक्वथितगोघृताभोऽपरे पुनः । चतुर्जातकवत्पर्वान्तच्छिन्नेक्षुरसोपमाः ॥ ७४६ ॥
लवणोदोऽथ कालोदः, स्वयम्भूरमणोऽपि च । मत्स्य-कूर्मादिसङ्कीर्णाः, सागरा नाऽपरे पुनः ॥ ७४७ ॥
चत्वारस्तत्र तीर्थेशश्चक्रिणो विष्णवो बलाः । सदा भवन्ति द्वीपेऽस्मिन्, जम्बूद्वीपे जघन्यतः ॥ ७४८ ॥
उत्कर्षेण चतुस्त्रिंशज्जिनास्त्रिंशच्च पार्थिवाः । भवन्ति द्विगुणाश्चैते, धातकी-पुष्करार्धयोः ॥ ७४९ ॥
तिर्यग्लोकादितश्चोर्द्ध्वमूर्द्ध्वलोको महर्द्धिकः । नवयोजनशत्यूनसप्तरज्जुप्रमाणकः ॥ ७५० ॥
तत्र सौधर्म ईशानः, सनत्कुमार इत्यपि । माहेन्द्रो ब्रह्मलोकश्च, लान्तकः शुक्रसंज्ञकः ॥ ७५१ ॥
सहस्रारा-ऽऽनत-प्राणता-ऽऽरणा अच्युतोऽपि च । कल्पा[२] इति द्वादशाऽमी, नवग्रैवेयका इमे ॥ ७५२ ॥

१ राजधानीषु । २ देवलोकाः ।

आदौ सुदर्शनं नाम, सुप्रबुद्धं मनोरमम् । सर्वभद्रं सुविशालं, सुमनश्च ततः परम् ॥ ७५३ ॥
सौमनसं प्रीतिकरमादित्यमथ तत्परम् । अनुत्तराभिधानानि, पञ्च सन्ति ततः परम् ॥ ७५४ ॥
विजयं वैजयन्तं च, जयन्तं चाऽपराजितम् । प्राक्क्रमेण विमानानि, मध्ये सर्वार्थसिद्धकम् ॥ ७५५ ॥
ततो द्वादशयोजन्या, ऊर्द्ध्वं सिद्धिशिलाऽस्ति तु । पञ्चचत्वारिंशल्लक्षयोजनायाम-विस्तृता ॥ ७५६ ॥
ततोऽप्युपरि गव्यूतत्रितयात् समनन्तरम् । तुर्यगव्यूतषष्ठांशे, सिद्धा लोकाग्रतावधि ॥ ७५७ ॥
आ सौधर्मेशानकल्पं, सार्धा रज्जुः समावनेः । सनत्कुमार-माहेन्द्रौ, सार्धं रज्जुद्वयं पुनः ॥ ७५८ ॥
रज्जवश्चाऽऽ सहस्रारं, पञ्च षट् चाऽच्युतावधि । लोकान्तमवधीकृत्य, जायन्ते सप्त रज्जवः ॥ ७५९ ॥
सौधर्मेशानकल्पौ तु, चन्द्रमण्डलवर्तुलौ । दक्षिणार्धे तत्र शक्र, एशानश्चोत्तरार्धके ॥ ७६० ॥
सनत्कुमारमाहेन्द्रावप्येवं तत्समाकृती । सनत्कुमारोऽपाच्यार्धे, माहेन्द्रस्तूत्तरार्धके ॥ ७६१ ॥
लोकपुंस्कूर्परसमप्रदेशेऽतः परं पुनः । लोकमध्यभागे ब्रह्मलोको ब्रह्मा च तत्प्रभुः ॥ ७६२ ॥
प्रान्ते सारस्वता-ऽऽदित्या-ऽग्न्यरुण-गर्दतोयकाः । तुषिता-ऽव्याबाध-मरुद्रिष्टा लोकान्तिकामराः ॥ ७६३ ॥
तदूर्द्ध्वं लान्तकः कल्पस्तन्नामा तत्र वासवः । तस्योपरि महाशुक्र, इन्द्रस्तन्नामकोऽत्र च ॥ ७६४ ॥
तदूर्द्ध्वं च सहस्रारस्तन्नामा तत्र वासवः । सौधर्मेशानसंस्थानावानत-प्राणतौ ततः ॥ ७६५ ॥
तयोः प्राणतकल्पस्थः, प्राणताख्यः पुरन्दरः । तदूर्द्ध्वं च तदाकारौ, द्वौ कल्पावारणा-ऽच्युतौ ॥ ७६६ ॥
तयोरच्युतवास्तव्य, एक इन्द्रोऽच्युताभिधः । ग्रैवेयकाऽनुत्तरेषु, त्वहमिन्द्रा दिवौकसः ॥ ७६७ ॥

१ सौधर्मैशानकल्पसदृशौ ।

घनोदधिप्रतिष्ठानौ, कल्पौ तु प्रथमाविह । वायुकृतप्रतिष्ठानास्त्रयः कल्पास्ततः परम् ॥ ७६८ ॥
घनोदधि-घनवातप्रतिष्ठानास्ततस्त्रयः । ततस्तदूर्द्ध्वमाकाशप्रतिष्ठानाः सुरालयाः ॥ ७६९ ॥
इन्द्राः सामानिकास्त्रायस्त्रिंशाः पार्षद्य-रक्षकाः । लोकपाला अनीकानि, प्रकीर्णा आभियोगिकाः ॥ ७७० ॥
किल्बिषिकाश्चेति तेषु, दशभेदा दिवौकसः । इन्द्राः सामानिकादीनामधिपाः सर्वनाकिनाम् ॥ ७७१ ॥
सामानिकाश्चेन्द्रसमाः, परमिन्द्रत्ववर्जिताः । त्रायस्त्रिंशा मन्त्रि-पुरोहितप्राया हरेः पुनः ॥ ७७२ ॥
वयस्यप्राया: पार्षद्या, आत्मरक्षास्तु रक्षकाः । आरक्षकार्थनृचरस्थानीया[१] लोकपालकाः ॥ ७७३ ॥
तन्त्रप्रायाण्यनीकानि[२], प्रकीर्णा ग्राम्य-पौरवत् । दासप्राया आभियोग्याः, किल्बिषाश्चान्त्यजोपमाः ॥ ७७४ ॥
ज्योतिष्क-व्यन्तरास्त्रायस्त्रिंश-लोकपवर्जिताः[३] । विमानलक्षाः सौधर्मे, द्वात्रिंशत् त्रिदिवौकसाम् ॥ ७७५ ॥
एशान-सनत्कुमार-माहेन्द्र-ब्रह्मणामपि । अष्टाविंशतिर्द्वादशाऽष्टौ चत्वारः क्रमेण तु ॥ ७७६ ॥
लक्षार्धं लान्तके शुक्रे, चत्वारिंशत् सहस्रकाः । षट् सहस्राः सहस्रारे, युगले तु चतुःशती ॥ ७७७ ॥
त्रिशत्यारणा-ऽच्युतयोराद्ये ग्रैवेयकत्रिके । शतमेकादशाग्रं तु, मध्ये सप्तोत्तरं पुनः ॥ ७७८ ॥
विमानानां शतं त्वेकमन्त्यग्रैवेयकत्रिके । अनुत्तरविमानानि, पञ्चैव हि भवन्ति तु ॥ ७७९ ॥
एवं देवविमानानां, लक्षाशीतिश्चतुर्युता । सप्तनवतिः सहस्रास्त्रयोविंशतिरेव च ॥ ७८० ॥
अनुत्तरविमानेषु, चतुर्षु विजयादिषु । देवा द्विचरमा[४] एकचरमाः पञ्चमे पुनः ॥ ७८१ ॥

१ आरक्षकार्थं चारपुरुषसदृशाः । २ सेनासदृशानि । ३ लोकपालाः । ४ मनुष्यभवद्वयेन सिद्धिगामिनः ।

सौधर्मकल्पादारभ्य, सर्वार्थं यावदेषु च । स्थित्या दीप्त्या प्रभावेण, विशुद्ध्या लेश्यया सुखैः ॥ ७८२ ॥
इन्द्रियाणां विषयेणाऽवधिज्ञानेन चाऽमराः । भवन्ति पूर्वपूर्वेभ्योऽभ्यधिका उत्तरोत्तराः ॥ ७८३ ॥
परिग्रहा-ऽभिमानाभ्यां, वपुषा गमनेन च । हीनहीनतरा एते, भवन्ति तु यथाक्रमम् ॥ ७८४ ॥
जायते सर्वजघन्यस्थितीनां त्रिदिवौकसाम् । सप्तस्तोकान्त उच्छ्वास, आहारस्तु चतुर्थतः ॥ ७८५ ॥
पल्योपमस्थितीनां तु, भवति त्रिदिवौकसाम् । दिवसस्यान्तरुच्छ्वास, आहारोऽहःपृथक्त्वतः ॥ ७८६ ॥
यावन्तः सागरा यस्य, तावन्मासार्धकैः पुनः । उच्छ्वासस्तस्य तावद्भिराहारोऽब्दसहस्रकैः ॥ ७८७ ॥
देवाः सद्वेदनाः प्रायो, यद्यसद्वेदनाः पुनः । अन्तर्मुहूर्त्तकालं स्युर्मुहूर्त्तात् परतो न हि ॥ ७८८ ॥
आ एशानात् समुत्पत्तिर्देवीनां गतिराऽच्युतात् । उत्पद्यन्ते तापसास्तु, ज्योतिष्कत्रिदशावधि ॥ ७८९ ॥
आ ब्रह्मलोकाच्चरक-परिव्राजां तु सम्भवः । पञ्चेन्द्रियतिरश्चामा सहस्रारं पुनर्जनिः ॥ ७९० ॥
श्राद्धानामच्युतं मिथ्यादृशां तु जिनलिङ्गिनाम् । सामाचारीपालकानामन्त्यग्रैवेयकावधि ॥ ७९१ ॥
ब्रह्मलोकादिसर्वार्थसिद्धान्तं पूर्णपूर्विणाम्[१] । साधु-श्राद्धानां सौधर्मे, सद्व्रतानां जघन्यतः ॥ ७९२ ॥
आ एशानाच्च भवनवास्याद्यास्त्रिदिवौकसः । भवन्त्यङ्गप्रवीचारास्ते हि सङ्क्लिष्टकर्मकाः ॥ ७९३ ॥
तीव्रानुरागाः सुरते, लीयमाना मनुष्यवत् । सर्वाङ्गीणस्पर्शसुखात्, प्रीतिमासादयन्ति तु ॥७९४॥ ॥ युग्मम् ॥
शेषाः स्पर्श-रूप-शब्दप्रवीचारा द्वयोर्द्वयोः । मनःप्रवीचारभृतश्चतुर्षु चाऽऽनतादिषु ॥ ७९५ ॥
अमरेभ्यः प्रवीचारवद्भ्योऽनन्तसुखात्मकाः । अपरेष्वप्रवीचारा, देवा ग्रैवेयकादिषु ॥ ७९६ ॥

१ पूर्णचतुर्दशपूर्विणाम् ।

इत्यधस्तात् तिर्यगूर्द्ध्वभेदो लोकोऽस्य मध्यतः । त्रसनाड्यस्ति च चतुर्दशरज्जुप्रमाणिका ॥ ७९७ ॥
ऊर्द्ध्वा-ऽधोभागयो रज्जुप्रमाणायाम-विस्तृतिः । अन्तस्त्रसाः स्थावराश्च, स्थावरा एव तद्बहिः ॥ ७९८ ॥
विस्तारेऽधः सप्तरज्जुरेकरज्जुश्च मध्यतः । ब्रह्मलोके पञ्चरज्जुः, पर्यन्ते चैकरज्जुकः ॥ ७९९ ॥
सुप्रतिष्ठाकृतिर्लोको, न केनाऽपि कृतो धृतः । स्वयंसिद्धो निराधारो, व्योम्नि तिष्ठति किन्त्वसौ ॥ ८०० ॥
॥ युग्मम् ॥
अमुं लोकं समस्तं वा, व्यस्तं वाऽपि हि चिन्तयेत् । धीमान् शुभेतरध्यानप्रतिषेधनिबन्धनम् ॥ ८०१ ॥
धर्मध्याने भवेद् भावः, क्षायोपशमिकादिकः । लेश्याः क्रमविशुद्धाः स्युः, पीत-पद्म-सिताः पुनः ॥८०२॥
अस्मिन् नितान्तवैराग्यव्यतिषङ्गतरङ्गिते । जायते देहिनां सौख्यं, स्वसंवेद्यमतीन्द्रियम् ॥ ८०३ ॥
त्यक्तसङ्गास्तनुं त्यक्त्वा, धर्मध्यानेन योगिनः । ग्रैवेयकादिस्वर्गेषु, भवन्ति त्रिदशोत्तमाः ॥ ८०४ ॥
महामहिमसौभाग्यं, शरच्चन्द्रनिभप्रभम् । प्राप्नुवन्ति वपुस्तत्र स्रग्भूषा-ऽम्बरभूषितम् ॥ ८०५ ॥
विशिष्टवीर्यबोधाढ्यं, कामार्तिज्वरवर्जितम् । निरन्तरायं सेवन्ते, सुखं चाऽनुपमं चिरम् ॥ ८०६ ॥
इच्छासम्पन्नसर्वार्थमनोहारिसुखामृतम् । निर्विघ्नमुपभुञ्जाना, गतं जन्म न जानते ॥ ८०७ ॥
दिव्यभोगावसाने च, च्युत्वा त्रिदिवतस्ततः । उत्तमेन शरीरेणाऽवतरन्ति महीतले ॥ ८०८ ॥
दिव्यवंशे समुत्पन्ना, नित्योत्सवमनोरमान् । भुञ्जते विविधान् भोगानखण्डितमनोरथाः ॥ ८०९ ॥
ततो विवेकमाश्रित्य, विरज्याऽशेषभोगतः । ध्यानेन ध्वस्तकर्माणः, प्रयान्ति पदमव्ययम् ॥ ८१० ॥

१ सम्बन्धः । २ वैराग्यं प्राप्य ।

एवं विश्वजनीनेन[1], तीर्थनाथेन निर्ममे । त्रिजगत्कुमुदानन्दकौमुदी धर्मदेशना ॥ ८११ ॥
श्रुत्वा च देशनां भर्तुः, प्रतिबुद्धाः सहस्रशः । नरा नार्यश्च जगृहुर्दीक्षां मोक्षैकमातरम् ॥ ८१२ ॥
तदानीं च सुमित्रोऽपि, पिता सगरचक्रिणः । पुरा भावयतिर्दीक्षामाददे स्वामिनोऽन्तिके ॥ ८१३ ॥
ततश्च पञ्चनवतेर्गणभृन्नामकर्मणाम् । संयतानां सिंहसेनप्रभृतीनां सुमेधसाम् ॥ ८१४ ॥
उत्पत्ति-विगम-ध्रौव्यरूपामूचे पदत्रयीम् । सर्वागम[2]व्याकरणप्रत्याहारोपमां प्रभुः ॥ ८१५ ॥
तत्त्रिपद्यनुसारेण, द्वादशाङ्गीं सपूर्विकाम् । रेखानुसारेणाऽऽलेख्यमिव तेऽरचयन्नथ ॥ ८१६ ॥
चूर्णपूर्णमथ स्थालमादायोत्थाय वासवः । स्वामिनः पादपद्मान्ते, तस्थौ सुरगणावृतः ॥ ८१७ ॥
अथोत्थाय गणभृतां, चूर्णं मूर्धसु निक्षिपन् । क्रमेण सूत्रेणाऽर्थेन, तथा तदुभयेन[3] च । ८१८ ॥
द्रव्यैर्गुणैः पर्ययैश्च, नयैरपि जगत्पतिः । ददावनुयोगानुज्ञां, गणानुज्ञामपि स्वयम् ॥ ८१९ ॥
उपरिष्टाद् गणभृतां, वासक्षेपं दिवौकसः । नरा नार्यश्च विदधुर्दुन्दुभिध्वानपूर्वकम् ॥ ८२० ॥
पीयूषनिःस्यन्दमिव, रचिताञ्जलिसम्पुटाः । स्वामिवाचं प्रतीच्छन्तस्तस्थुर्गणधरा अपि ॥ ८२१ ॥
भेजे सिंहासनं पूर्वाभिमुखः पूर्ववत् पुनः । अनुशिष्टि[4]मयीं तेभ्यो, देशनां विदधे विभुः ॥ ८२२ ॥
अत्रान्तरे च प्रथमा, पर्यपूर्यत पौरुषी । पारयामास भगवानपि तां धर्मदेशनाम् ॥ ८२३ ॥
तदा विशालस्थालस्थश्चतुःप्रस्थप्रमाणकः । आपूर्णः शालिभिः शुद्धैः, पद्मसौरभशालिभिः ॥ ८२४ ॥
उपसंवर्गितामोदो[5], दिविषद्गन्धमुष्टिभिः । कारितः सगरराजेनोत्क्षिप्तो वरपूरुषैः ॥ ८२५ ॥

१ विश्वहितकारिणा । २ सर्वागमानां स्पष्टीकरणे प्रत्याहारसदृशीम् । ३ सूत्रार्थाभ्याम् । ४ शिक्षामयीम् । ५ मिश्रित आमोदो यस्मिन्सः ।

उद्दामदुन्दुभिध्वानध्वनिताशेषदिङ्मुखः । उलूलुमुखरैश्चाऽनुगम्यमानो वधूजनैः ॥ ८२६ ॥
विष्वक् परिवृतः पौरैः, पद्मकोश इवाऽलिभिः । बलिः समवसरणं, पूर्वद्वाराऽध्वनाऽविशत् ॥ ८२७ ॥
ततः प्रदक्षिणीकृत्य, जगत्त्रयपतिं बलिः । तैः पुरश्चिक्षिपे दिव्यपुष्पवृष्टिविडम्बकः ॥ ८२८ ॥
नभस्तः पततस्तस्याऽगृह्णन्नर्धं दिवौकसः । सगरो भूगतस्याऽर्धं, तच्छेषमपरे जनाः ॥ ८२९ ॥
बलेस्तस्य प्रभावेण, नश्यन्ति प्राग्भवा अपि । नोत्पद्यन्ते नूतनाश्च, षण्मासान् यावदामयाः ॥ ८३० ॥
सिंहासनात् समुत्थायाऽथोत्तरद्वारवर्त्मना । निर्वाणवर्त्मनोऽग्रेगूर्निर्जगाम जगत्पतिः ॥ ८३१ ॥
एशानदिश्यूर्ध्वमध्यवप्रयोरन्तरस्थिते । देवच्छन्दे देवदेवो, विशश्राम ततः किल ॥ ८३२ ॥
सगरेणोपनीतेऽथ, तत्र सिंहासने स्थितः । अकरोद् देशनां सिंहसेनो गणधराग्रणीः ॥ ८३३ ॥
भगवत्स्थानमाहात्म्यात्, स तत्र गणभृद्वरः । सङ्ख्यातीतान् भवानाख्यद्, यच्च पप्रच्छ कश्चन ॥ ८३४ ॥
स्वामिपर्षदि तस्यां तं, सन्देहापोहकं तथा । छद्मस्थ इति नाऽज्ञासीद्, विना केवलिनं जनः ॥ ८३५ ॥
गुरोः खेदविनोदश्च, प्रत्ययश्च द्वयोरपि । गुरु-शिष्यक्रमश्चेति, गणभृद्देशनागुणाः ॥ ८३६ ॥
पौरुष्यां च द्वितीयायां, सम्पूर्णायां गणाग्रणीः । व्यरंसीद् देशनातः स, पथिको गमनादिव ॥ ८३७ ॥
देशनाविरते तस्मिन्, प्रणम्य परमेश्वरम् । चेलुर्निजनिजस्थानं, प्रति सर्वे दिवौकसः ॥ ८३८ ॥
गत्वा नन्दीश्वरद्वीपं, पर्वतेष्वञ्जनादिषु । शाश्वतार्हत्प्रतिमानां, चक्रुस्तेऽष्टाह्निकोत्सवम् ॥ ८३९ ॥
भूयो भूयोऽपि भूयान्नो, यात्रेदृगिति भाषिणः । ययुर्निजनिजं धाम, स्वर्धामानो यथागतम् ॥ ८४० ॥

१ गीतादिध्वनिः । २ रोगाः । ३ अग्रेगामी । ४ सन्देहनाशकम् । ५ देवाः ।

भगवन्तं नमस्कृत्य, सगरश्चक्रवर्त्यपि । पुरं जगाम साकेतं, श्रीसङ्केतनिकेतनम् ॥ ८४१ ॥
ततश्च तीर्थे तत्रैवोत्पन्नो यक्षश्चतुर्मुखः । श्यामवर्णो गजरथो[1], महायक्षोऽभिधानतः ॥ ८४२ ॥
वरदेन मुद्गरिणा, साक्षसूत्रेण पाशिना । चतुर्भिर्दक्षिणैर्हस्तैर्वामैस्तावद्भिरेव च ॥ ८४३ ॥
बीजपूरधरेणाऽभीदायिना[3]ऽङ्कुशधारिणा । सशक्तिना शोभितोऽभूत्, स्वामिनः पारिपार्श्विकः ॥ ८४४ ॥
देवताऽजितबला च, तदोत्पन्ना सुवर्णरुक् । भान्ती दक्षिणबाहुभ्यां, वरदेनाऽथ पाशिना ॥ ८४५ ॥
बीजपूरा-ऽङ्कुशभृद्भ्यां, वामदोर्भ्यां च शोभिता । लोहासनस्था पार्श्वेऽस्थाद्, भर्तुः शासनदेवता ॥ ८४६॥
चतुस्त्रिंशदतिशयशोभितो भगवानपि । व्यहार्षीत् सिंहसेनादिपरिवारवृतो महीम् ॥ ८४७ ॥
बोधयन् भव्यभविनः, प्रतिग्राम-पुरा-ऽऽकरम् । कृपारत्नाकरः, प्राप कौशाम्बीं प्रभुरन्यदा ॥ ८४८ ॥
तस्यां पूर्वोत्तरदिशि, क्षेत्रे योजनमात्रके । प्रभोः समवसरणं, पूर्ववद् विदधे सुरैः ॥ ८४९ ॥
तत्राऽशोकतले सिंहासनासीनो जगत्पतिः । ससुरा-ऽसुर-मर्त्यायां, देशनां पर्षदि व्यधात् ॥ ८५० ॥
एकं द्विजन्ममिथुनमथैत्य त्रिजगद्गुरुम् । प्रदक्षिणीकृत्य नत्वा, यथास्थानमुपाविशत् ॥ ८५१ ॥
कथान्तरे[4] जगन्नाथं, द्विजन्ममिथुनाद् द्विजः । पप्रच्छ साञ्जलिरिदं, कथं नु भगवन्निति ॥ ८५२ ॥
शशंस प्रभुरप्येवं, सम्यक्त्वमहिमा ह्ययम् । सर्वानर्थनिषेधा-ऽर्थसिद्ध्योरेकं निबन्धनम् ॥ ८५३ ॥
तेन शाम्यन्ति वैराणि, वृष्ट्येव दववह्नयः । नश्यन्ति व्याधयोऽशेषाः, सर्पा इव गरुत्मता ॥ ८५४ ॥
दुष्कर्माणि विलीयन्ते, हिमानीवाऽहिमांशुना[6] । सिध्यत्यभीप्सितं चिन्तामणिनेव क्षणादपि ॥ ८५५ ॥

१ गजवाहनः । २ फलविशेषः । ३ अभयमुद्राङ्कितेन । ४ वार्त्ताप्रस्तावे । ५ महद् हिमम् । ६ सूर्येण ।

वार्येव[1] कुञ्जरवरो, देवायुःकर्म बध्यते । देवताः सन्निधीयन्ते, मन्त्रेणेव महौजसा ॥ ८५६ ॥
अथवा सर्वमप्येतत्, सम्यक्त्वफलमल्पकम् । महाफलं सिद्धिरपि, तीर्थकृत्त्वं च जायते ॥ ८५७ ॥
श्रुत्वेति मुदितो विप्रः, प्रणम्योचे कृताञ्जलिः । भगवन्नेवमेवेदं, न सर्वज्ञगिरोऽन्यथा ॥ ८५८ ॥
इत्युक्त्वा तत्र[2] तूष्णीके, स्थिते गणधराग्रणीः । जानन्नपि जनज्ञानकृतेऽपृच्छज्जगद्गुरुम् ॥ ८५९ ॥
किमनेन प्रभो! पृष्टं?, प्रभुणा कथितं च किम्? । सङ्केतवार्तासदृशमिदं बोधय नः स्फुटम् ॥ ८६० ॥
आचख्यौ प्रभुरप्यस्यां, पुर्यां अनतिदूरतः । अग्रहारो महानस्ति,, शालिग्रामाभिधानकः ॥ ८६१ ॥
तत्र दामोदरो नाम, वसति ब्राह्मणाग्रणीः । सधर्मचारिणी चाऽस्ति, तस्य सोमेति नामतः ॥ ८६२ ॥
शुद्धभट्टोऽभिधानेन, तयोश्च तनयोऽभवत् । दुहिता सिद्धभट्टस्य, तेन वोढा सुलक्षणा ॥ ८६३ ॥
सुलक्षणा-शुद्धभट्टौ, प्रतिपद्य च यौवनम् । बुभुजाते यथाकामं, भोगान् स्वविभवोचितान् ॥ ८६४ ॥
कालक्रमेण पितरौ, विपेदाते तयोरथ । परिक्षयमुपेयाय, विभवः सोऽपि पैतृकः ॥ ८६५ ॥
क्षपायां क्षुधितोऽशेत, सुभिक्षेऽपि कदाऽप्यसौ । निर्धनस्य सुभिक्षेऽपि, दुर्भिक्षं पारिपार्श्विकम्[3] ॥ ८६६ ॥
जीर्णवासःखण्डधारी, पर्याट च कदाचन । पुरि राजपथे देशान्तरकर्पटिकोपमः[4] ॥ ८६७ ॥
कदाचिच्चातक इव, चिरं तस्थौ पिपासितः । कदाचिन्मलमलिनः, पिशाच इव दुर्वपुः ॥ ८६८ ॥
लज्जितः सहवासिभ्योऽपीदृशेनाऽऽत्मना च सः । भार्याया अप्यनाख्याय, दुरं देशान्तरं ययौ ॥ ८६९ ॥
देशान्तरगतिं तस्य, भार्या कतिपयैर्दिनैः । वज्रपातसोदरया, जनश्रुत्याऽशृणोत् ततः ॥ ८७० ॥

१ गजबन्धनरज्जुना । २ विप्रे । ३ समीपस्थम् । ४ भिक्षुकः ।

पितृक्षया-ऽर्थक्षयाभ्यां, पत्युर्विगमनेन च । चिरं निर्लक्षणम्मन्या, ताम्यति स्म सुलक्षणा ॥ ८७१ ॥
उद्विग्ना यावदस्थात् सा, तावदागात् तपात्यये । गणिनी[१] विपुला नाम, तद्गृहे वसतीच्छया ॥ ८७२ ॥
अर्पयामास वसतिं, विपुलायाः सुलक्षणा । शुश्राव च प्रतिदिनं, तन्मुखाद् धर्मदेशनाम् ॥ ८७३ ॥
ययौ तस्याश्च मिथ्यात्वं, धर्मदेशनया तया । अम्लस्य मधुरद्रव्यसम्बन्धेनाऽम्लता यथा ॥ ८७४ ॥
ततः परं साऽनवद्यं, सम्यक्त्वं प्रत्यपद्यत । कृष्णपक्षमतिक्रम्य, नैर्मल्यमिव शर्वरी ॥ ८७५ ॥
जीवा-ऽजीवादिपदार्थान्, सर्वानपि यथास्थितान् । वैद्यो दोषानिवाङ्गोत्थान्, यथावत् प्रत्यपद्यत ॥ ८७६॥
धर्मं जैनं च जग्राह, संसारोल्लङ्घनक्षमम् । सांयात्रिकः पोतमिव, सागरोत्तारणोचितम् ॥ ८७७ ॥
तस्या विषयवैराग्यमुपशान्तकषायता । निर्वेदो जन्म-मरणेष्वविच्छिन्नेषु चाऽभवत् ॥ ८७८ ॥
साध्वीशुश्रूषया सैवं, वर्षाकालमजीगमत् । रसाढ्यया जागरूकः, कथया रजनीमिव ॥ ८७९ ॥
तस्या दत्त्वाऽणुव्रतानि, गणिनी साऽन्यतो ययौ । प्रायः प्रावृष ऊर्द्ध्वं न, तिष्ठन्त्येकत्र संयताः ॥ ८८० ॥
अर्जितद्रविणः सोऽपि, शुद्धभट्टो दिगन्तरात् । प्रियाप्रेमसमाकृष्टः, पारापत इवाऽऽययौ ॥ ८८१ ॥
उचे विप्रः प्रियामेवमसहिष्णाः कथं प्रिये! । असोढपूर्विणी मद्वियोगं हिममिवाऽब्जिनी? ॥ ८८२ ॥
सुलक्षणाऽप्याचचक्षे, श्रूयतां जीवितेश्वर! । मरुस्थले मरालीव, शफरीवाऽल्पवारिणि ॥ ८८३ ॥
राहुवक्त्रे चन्द्रलेखेवैणिकेव दवानले । मृत्युद्वारे त्वद्विरहे, दुःसहे पतिताऽस्म्यहम् ॥ ८८४ ॥
अन्धकारे दीपिकेव, नौरिवाऽपारवारिणि । मरुस्थले वृष्टिरिव, दृष्टिरान्ध्य इवाऽनघा ॥ ८८५ ॥

१ साध्वीसमूहाग्रेसरा ।

मम त्वद्विरहे तस्मिन्, पतितायाः समाययौ । गणिनी विपुला नाम, विपुलैकदयानिधिः ॥ ८८६ ॥
तद्दर्शनेन मे दुःखं, भवद्विरहजं ययौ । मया प्राप्तं च सम्यक्त्वं, फलं मानुषजन्मनः ॥ ८८७ ॥
शुद्धभट्टोऽप्यभाषिष्ट, सम्यक्त्वं किं नु भट्टिनि! । जन्मनो मानुषस्याऽस्य, फलभूतं यदुच्यते? ॥ ८८८ ॥
सुलक्षणाऽप्युवाचैवमार्यपुत्र! निशम्यताम् । कथनीयं तदिष्टानामभीष्टः प्राणतोऽप्यसि ॥ ८८९ ॥
या देवे देवताबुद्धिर्गुरौ च गुरुतामतिः । धर्मे च धर्मधीः शुद्धा, सम्यक्त्वमिदमुच्यते ॥ ८९० ॥
अदेवे देवबुद्धिर्या, गुरुधीरगुरौ च या । अधर्मे धर्मबुद्धिश्च, मिथ्यात्वं तद्विपर्ययात् ॥ ८९१ ॥
सर्वज्ञो जितरागादिदोषस्त्रैलोक्यपूजितः । यथास्थितार्थवादी च, देवोऽर्हन् परमेश्वरः ॥ ८९२ ॥
ध्यातव्योऽयमुपास्योऽयमयं शरणमिष्यताम् । अस्यैव प्रतिपत्तव्यं, शासनं चेतनाऽस्ति चेत् ॥ ८९३ ॥
ये स्त्री-शस्त्रा-ऽक्षसूत्रादिरागाद्यङ्ककलङ्किताः । निग्रहा-ऽनुग्रहपरास्ते देवाः स्युर्न मुक्तये ॥ ८९४ ॥
नाट्या-ऽट्टहास-सङ्गीताद्युपप्लवविसंस्थुलाः । लम्भयेयुः पदं शान्तं, प्रपन्नान् प्राणिनः कथम्? ॥ ८९५ ॥
महाव्रतधरा धीरा, भैक्षमात्रोपजीविनः । सामायिकस्था धर्मोपदेशका गुरवो मताः ॥ ८९६ ॥
सर्वाभिलाषिणः सर्वभोजिनः सपरिग्रहाः । अब्रह्मचारिणो मिथ्योपदेशा गुरवो न तु ॥ ८९७ ॥
परिग्रहारम्भमग्नास्तारयेयुः कथं परान्? । स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरः ॥ ८९८ ॥
दुर्गतिप्रपतत्प्राणिधारणाद् धर्म उच्यते । संयमादिर्दशविधः, सर्वज्ञोक्तो विमुक्तये ॥ ८९९ ॥
अपौरुषेयं वचनमसम्भवि भवेद् यदि । न प्रमाणं भवेद् वाचां, ह्याप्ताधीना प्रमाणता ॥ ९०० ॥

१ ज्ञानम् ।

मिथ्यादृष्टिभिराम्नातो, हिंसाद्यैः कलुषीकृतः । स धर्म इति वित्तोऽपि[1], भवभ्रमणकारणम् ॥ ९०१ ॥
सरागोऽपि हि देवश्चेद्, गुरुरब्रह्मचार्यपि । कृपाहीनोऽपि धर्मः स्यात्, कष्टं नष्टं हहा! जगत् ॥ ९०२ ॥
शम-संवेग-निर्वेदा-ऽनुकम्पा-ऽऽस्तिक्यलक्षणैः । लक्षणैः पञ्चभिः सम्यक्, सम्यक्त्वमुपलक्ष्यते ॥ ९०३॥
स्थैर्यं प्रभावना भक्तिः, कौशलं जिनशासने । तीर्थसेवा च पञ्चाऽस्य, भूषणानि प्रचक्षते ॥ ९०४ ॥
शङ्का काङ्क्षा विचिकित्सा, मिथ्यादृष्टिप्रशंसनम् । तत्संस्तवश्च पञ्चाऽपि, सम्यक्त्वं दूषयन्त्यलम् ॥ ९०५ ॥
व्याजहार ब्राह्मणोऽपि, दयिते! भाग्यवत्यसि । उपलब्धवती सम्यक्, सम्यक्त्वं यन्निधानवत् ॥ ९०६ ॥
शुद्धभट्टोऽपि तत्कालं, सम्यक्त्वं प्रत्यपद्यत । धर्मे धर्मोपदेष्टारः, साक्षिमात्रं शुभात्मनाम् ॥ ९०७ ॥
तौ सम्यक्त्वोपदेशेन, श्रावक्यभवतामुभौ[2] । स्वर्णीस्यातां सिद्धरसात्, सीसक-त्रपुणी अपि ॥ ९०८ ॥
तत्र ह्यग्रहारे साधुसंसर्गाभावतस्तदा । लोकोऽश्रावकधर्मोऽभून्मिथ्यादृष्टिः क्रमेण च ॥ ९०९ ॥
कुलक्रमागतं धर्ममिमौ सन्त्यज्य दुर्धियौ । श्रावक्यभूतामित्यासीदपवादो जने तयोः ॥ ९१० ॥
अपवादमवज्ञाय, श्राद्धत्वे तस्थुषोस्तयोः । जज्ञे कालक्रमात् पुत्रो, गार्हमेध्यतरोः फलम् ॥ ९११ ॥
शिशिरे ब्राह्मणोऽन्येद्युः, प्रातरादाय तं सुतम् । विप्रपर्षत्परिवृतां, धर्मार्थाग्निष्टिकां ययौ ॥ ९१२ ॥
श्रावकोऽसीति परतो, गच्छ गच्छेति सक्रुधः । प्रचण्डाश्चण्डालमिव, तं समाचुक्रुशुर्द्विजाः ॥ ९१३ ॥
तां धर्माग्निष्टिकां ते च, वेष्टयित्वा समन्ततः । तस्थुर्द्विजातयो जातिधर्मस्तेषां हि मत्सरः ॥ ९१४ ॥
ततो विलक्षः सङ्क्रुद्धो, विलक्षैर्वचनैः स तैः । समक्षं पर्षदस्तस्याश्चक्रे[3] सत्यापनामिति ॥ ९१५ ॥

१ ज्ञातोऽपि । २ श्रावकौ जातौ । ३ प्रतिज्ञाम् ।

जिनादिष्टो न चेद् धर्मः, संसाराम्भोधितारणः । आप्ता यदि न चाऽर्हन्तः, सर्वज्ञास्तीर्थकारिणः ॥ ९१६ ॥
ज्ञान-दर्शन-चारित्राण्यध्वा यदि न निर्वृतेः । सम्यक्त्वं भुवि चेन्नास्ति, तन्मे सूनुः प्रदह्यताम् ॥ ९१७ ॥
अथाऽस्ति सर्वमप्येतज्जवलनः प्रज्वलन्नपि । जलवच्छीतलस्तर्हि, मत्पुत्रस्य भवत्वसौ ॥ ९१८ ॥
इत्युदित्वा स रोषेण, ज्वलनोऽन्य इव ज्वलन् । ज्वलने तत्र चिक्षेप, पुत्रं राभंसिको[1] द्विजः ॥ ९१९ ॥
अनार्येणाऽमुना बालो, दग्धो दग्धो हहा! स्वकः । एवमाक्रोशिनी पर्षत्, तमाचुक्रोश सा तदा ॥ ९२० ॥
तत्रस्था देवता चैका, सम्यग्दर्शनशालिनी । सद्यश्चिक्षेप तं बालं, मध्येपद्मं द्विरेफवत् ॥ ९२१ ॥
ज्वालाजालकरालस्य, ज्वलतो ज्वलनस्य च । दाहशक्तिं जहाराऽऽशु, चित्रस्थमिव तं व्यधात् ॥ ९२२ ॥
पुरा विराद्धश्रामण्या[2], मृत्वा व्यन्तर्यभूद्धि सा । बोधिलाभं तया पृष्टो, व्याजहारेति केवली ॥ ९२३ ॥
भवत्याः सुलभा बोधिर्भवितव्यं त्वयाऽनघे! । सम्क्त्वभावनोद्योगनिष्ठया सुष्ठु तत्कृते ॥ ९२४ ॥
तद्वचो बिभ्रती नित्यं, हृदये हारयष्टिवत् । सम्यक्त्वमाहात्म्यकृते, सा जुगोप तमर्भकम् ॥ ९२५ ॥
प्रभावं तं तु सम्प्रेक्ष्य, विस्मयस्मेरचक्षुषः । जज्ञिरे ते द्विजन्मान, आजन्माद्दष्टपूर्विणः ॥ ९२६ ॥
गत्वा वेश्मन्याचचक्षे, ब्राह्मण्यै ब्राह्मणः स तम् । जातप्रमोदः सम्यक्त्वानुभावानुभवं तदा ॥ ९२७ ॥
विपुलागणिनीगाढसंसर्गेण विवेकिनी । ब्राह्मणीत्यब्रवीद् धिग्धिक्, किमिदं विदधे त्वया? ॥ ९२८ ॥
सम्यक्त्वभाजः कस्याश्चिद्, देवताया हि सन्निधेः । वक्रमप्यृजुतां प्राप्तमिदं ते कोपचापलम् ॥ ९२९ ॥
तदा हि देवता काऽपि, सम्यक्त्वैकप्रभाविका । सन्निधौ नाऽभविष्यच्चेत्, तदधक्ष्यत ते सुतः ॥ ९३० ॥

१ साहसिकः । २ संयमविरादिना

जिनप्रणीतो धर्मोऽयं, न प्रमाणं तदा किमु? । न प्रमाणमिति ब्रूयुस्ते तु पापा विशेषतः ॥ ९३१ ॥
बालिशोऽपीदृशं किंस्वित्, कुर्याद् यद् भवता कृतम्? । ईदृग् नाऽतः परं कार्यमार्यपुत्राविचारितम् ॥ ९३२॥
अभिधायेति सम्यक्त्वस्थिरीकरणहेतवे । इमं भर्तारमेषा स्वमनैषीदस्मदन्तिके ॥ ९३३ ॥
तदेतन्मनसिकृत्याऽनेन पृष्टं द्विजन्मना । सम्यक्त्वस्य प्रभावोऽयमित्यस्माभिश्च कीर्तितम् ॥ ९३४ ॥
आकर्ण्य तच्च भगवद्वचनं बहवोऽपरे । प्राणिनः प्रत्यबुध्यन्त, स्थिरधर्माश्च जज्ञिरे ॥ ९३५ ॥
शुद्धभट्टस्तु भट्टिन्या, समं भगवदन्तिके । परिव्रज्यामुपादत्त, क्रमेणाऽऽप च केवलम् ॥ ९३६ ॥
तां देशनां स भगवानपि पारयित्वा, स्थानात् ततो जगदनुग्रहणैकतानः ।
चक्रेण चक्रभृदिवाऽग्रचरेण धर्मचक्रेण भान्[1] वसुमतीं विजहार नाथः ॥ ९३७ ॥

इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते
महाकाव्ये द्वितीये पर्वणि अजितस्वामिदीक्षाकेवलज्ञानवर्णनो नाम
तृतीयः सर्गः ।

१ शोभमानः ।



चतुर्थः सर्गः

इतश्च सगरस्याऽस्त्रमन्दिरे मेदिनीभुजः । सुवर्णमयनेमीकं[१], लोहिताक्षमयारकम्[२] ॥ १ ॥
विचित्र-स्वर्णमाणिक्यघण्टिकाजालमालितम् । सनान्दीघोषम[३]ममलमणि-मौक्तिकमण्डितम् ॥ २ ॥
वज्रनिर्मितनाभीकं, किङ्किणीश्रेणिशोभितम् । सर्वर्तुकुसुमस्रग्भिरर्चितं सविलेपनम् ॥ ३ ॥
अन्तरिक्षस्थितं यक्षसहस्रसमधिष्ठितम् । नाम्ना सुदर्शनं चक्ररत्नं समुदपद्यत ॥४॥ ॥ चतुर्भिः कलापकम् ॥
ज्वालामालाकरालं तच्चण्डांशोरिव मण्डलम् । आविर्भूतं प्रेक्ष्य चक्रमायुधागारिकोऽनमत् ॥ ५ ॥
अथ तच्चक्रमर्चित्वा, विचित्रैः पुष्पदामभिः । शशंस मुदितो गत्वा, सत्वरं सगराय सः ॥ ६ ॥
सिंहासनं पादपीठं, पादुके अपि तत्क्षणम् । उज्झाञ्चकार सगरो, गुरुसन्दर्शनादिव ॥ ७ ॥
पदानि कतिचिद् दत्त्वा, चक्रं मनसिकृत्य सः । ननाम देवतीयन्ति, यदस्त्राण्यस्त्रजीविनः ॥ ८ ॥
सिंहासने स आसित्वा, चक्रोत्पत्तिनिवेदिने । सर्वं ददौ स्वाङ्गलग्नं, भूषणं पारितोषिकम् ॥ ९ ॥
ततश्च पावनैर्नीरैर्विधाय स्नानमङ्गलम् । दिव्यालङ्कार-वस्त्राणि, पर्यधत्त महीपतिः ॥ १० ॥
पद्भ्यां चचाल भूपालश्चक्ररत्नमथार्चितुम् । पादचारेणोपस्थानं[४], पूजातोऽप्यतिरिच्यते ॥ ११ ॥
धावद्भिः प्रस्खलद्भिश्च, पतद्भिश्चाऽतिसम्भ्रमात् । सोऽन्वगामिनृपैः पादचारिभिः किङ्करैरिव ॥ १२ ॥
सोऽनुसस्रेऽप्यनाहूतैः, पूजाद्रव्यकरैर्नरैः । स्वाधिकारप्रमादित्वं, भीतये ह्यधिकारिणाम् ॥ १३ ॥

१ सुवर्णमयधारम् । २ रत्नविशेषः । ३ माङ्गल्यशब्दः । ४ समीपगमनम् ।

विमानमिव देवेन, दीव्यदुद्दामतेजसा । सनाथं तेन चक्रेणाऽस्त्रागारं सगरो ययौ ॥ १४ ॥
ननामाऽऽलोकमात्रेऽपि, पञ्चाङ्गस्पृष्टभूतलः । चक्ररत्नं नभोरत्नतुल्यं[१] वसुमतीपतिः ॥ १५ ॥
सोऽमार्जद्धस्तविन्यस्तरोमहस्तस्तदङ्गसा[२] । हस्त्यारोहो हस्तिवरमिव तल्पसमुत्थितम्[३][४] ॥ १६ ॥
आनीयाऽऽनीय पानीयकुम्भैः पुम्भिः समर्पितैः । स चक्रं स्नपयामास, देवताप्रतिमामिव ॥ १७ ॥
चन्दनस्थासकांस्तत्र, स्थापयामास पार्थिवः । तदूरीकारदत्तस्वहस्तलक्ष्मीविडम्बिनः ॥ १८ ॥
नृपतिश्चक्ररत्नस्य, विचित्रैः पुष्पदामभिः । जयलक्ष्मीपुष्पगृहोपमां पूजां चकार च ॥ १९ ॥
गन्धांश्च चूर्णवासांश्च, चक्रे चिक्षेप चक्रभृत् । प्रतिमायामिवाऽऽचार्यः, प्रतिष्ठासमये स्वयम् ॥ २० ॥
देवतार्हैर्महामूल्यैर्वस्त्रालङ्करणैरपि । अलञ्चक्रे चक्ररत्नमात्मानमिव पार्थिवः ॥ २१ ॥
लिलेखाऽष्टौ मङ्गलानि, पुरोऽष्टाशाजयश्रियाम्[५] । आकर्षणायाऽभिचारमण्डलानीव भूपतिः ॥ २२ ॥
अकरोदग्रतस्तस्य, कुसुमैः पञ्चवर्णकैः । सारगन्धैरुपहारं, राजर्तुरिव सप्तमः ॥ २३ ॥
घनसारा-ऽगुरुसारं, धूपं तस्याऽग्रतोऽदहत् । धूमैर्नरेन्द्रः कस्तूरीविलेपनमिवाऽऽदधत् ॥ २४ ॥
तत्रिः प्रदक्षिणीकृत्य, सोऽपसृत्य च किञ्चन । चक्रं चक्री नमश्चक्रे, जयश्रीजन्मसागरम् ॥ २५ ॥
विदधेऽष्टाह्निकां तस्य, चक्ररत्नस्य तत्र सः । देवताया इव नवप्रतिष्ठाया महीपतिः ॥ २६ ॥
ऋद्ध्या महत्या चक्रस्य, चक्रे पूजामहोत्सवः । पौरैरपि पुरीपद्मदेवताया इवाऽखिलैः ॥ २७ ॥
ततो वसुमतीनाथः, स्वं जगाम निकेतनम् । चक्रेणाऽऽमन्त्रित इव, दिग्यात्रायै समुत्सुकः ॥ २८ ॥

१ सूर्यतुल्यम् । २ हस्तधृतमयूरपिच्छमार्जनिकः । ३ हस्तिपकः । ४ सुप्तोत्थितम् । ५ अष्टदिग्जयलक्ष्मीणाम् ।

गत्वा स्नानगृहे स्नानं, पानीयैः पावनैरथ । चकार सगरो गङ्गास्रोतसीवेन्द्रकुञ्जरः ॥ २९ ॥
रत्नस्तम्भ इवोन्मृष्टदेहो दिव्येन वाससा । पर्यधाद् वसुधाधीशो, विशदे दिव्यवाससी ॥ ३० ॥
गोशीर्षचन्दनरसैरच्छैर्ज्योत्स्नारसैरिव । अङ्गरागं नरपतेर्विदधुर्गन्धकारिकाः ॥ ३१ ॥
अलङ्कारानलञ्चक्रे, स्वाङ्गसङ्गेन भूपतिः । प्रयान्ति ह्युत्तमस्थाने, भूषणान्यपि भूष्यताम् ॥ ३२ ॥
राजा मुहूर्ते मङ्गल्ये, पुरोधःकृतमङ्गलः । दिग्यात्रायै गजरत्नमारुरोहाऽसिरत्नभृत् ॥ ३३ ॥
अश्वरत्नं समारुह्य, दण्डरत्नं च पाणिना । बिभ्रत् सेनापतिरत्नं, प्रतस्थे भूपतेः पुरः ॥ ३४ ॥
सर्वोपद्रवनीहारहरणे दिनरत्नवत् । पुरोधोरत्नमवनीनाथेन सह चाऽचलत् ॥ ३५ ॥
भोज्यदानक्षमः सैन्ये, प्रत्यावासं गृहाधिपः । सहाऽचलच्चित्ररसकल्पद्रुरिव जङ्गमः ॥ ३६ ॥
सद्यः पुरादिनिर्माणालङ्कर्मीणपराक्रमः । सहाऽगाद् विश्वकर्मेव, रत्नभूतोऽस्य वर्धकिः ॥ ३७ ॥
विस्तारिणी करस्पर्शाद्, रत्ने च च्छत्र-चर्मणी । अनुकूलानिलस्पर्शादभ्रवत् सह चेलतुः ॥ ३८ ॥
रत्ने च मणि-काकिण्यौ, तमिस्रक्षपणक्षमे । सहेयतुर्लघूभूतौ, जम्बूद्वीपरवी इव ॥ ३९ ॥
बहुदासीपरीवारं, स्त्रीराज्यत इवाऽऽगतम् । अन्तःपुरं सहाऽचालीद्, देहच्छायेव चक्रिणः ॥ ४० ॥
ककुभो द्योतयद् दूरादूरीकृतककुब्जयम् । पुरोऽगात् प्राङ्मुखं चक्रं, प्रताप इव भूपतेः ॥ ४१ ॥
पुष्करावर्तकाम्भोदघटानिनदसोदरैः । यात्रातूर्यनिनादैर्दिग्गजानुत्कर्णतालयन् ॥ ४२ ।
चक्रं विक्रममाणाश्वखुरोत्खातैश्च पांसुभिः । एकीकुर्वन् द्यावा-भूमी, द्राक् सम्पुटपुटाविव ॥ ४३ ॥

१ हिमम् । २ सूर्यवत् ।

रथ-द्विप-ध्वजाग्रस्थपाठीन[1]-मकरादिभिः । विदधानः सयादस्कमिव व्योममहार्णवम् ॥ ४४ ॥
सप्तधाप्रक्षरद्दानजलासारविराजिभिः । मतङ्गजघटास्तोमैर्दुर्दिनं दर्शयन्निव ॥ ४५ ॥
उत्साहादुत्प्लवमानैर्द्यामिवाऽध्यारुरुक्षुभिः । पदातिभिः कोटिसङ्ख्यैस्तिरयन्नभितो भुवम् ॥ ४६ ॥[2]
अविषह्यप्रतापेन, सर्वत्राऽकुण्ठशक्तिना । सेनान्येव पुरोगेण, चक्ररत्नेन राजितः ॥ ४७ ॥
सेनान्या दण्डरत्नेन, स्थलादिस्थपुटामपि[3] । मतेनेव क्षेत्रमहीं, वसुधां कारयन् समाम् ॥ ४८ ॥
एकयोजनमानेन, प्रयाणेन दिने दिने । भद्रद्विप इवाऽध्वानमाक्रामन् गतिलीलया ॥ ४९ ॥
दिनैः कतिपयैः प्राच्यां, तुल्यः प्राचीनबर्हिषा[4] । गङ्गामुखैकतिलकं, मागधक्षेत्रमासदत् ॥ ५० ॥

॥ नवभिः कुलकम् ।

अभ्रंलिहेभशालाभिर्विशालाभिरनेकशः । महागुहासोदराभिर्मन्दुराभि[5]ः सहस्रशः ॥ ५१ ॥
विमानमानिभिर्हर्म्यैर्मेघंमन्यैश्च मण्डपैः । अट्टैः समान[6]संस्थानैरेकबिम्बकृतैरिव ॥ ५२ ॥
शृङ्गाटकादिरचनाराजिराजपथस्थितिम् । नवयोजनविस्तारं, दैर्घ्यं द्वादशयोजनम् ॥ ५३ ॥
स्कन्धावारं चक्रभृतः, सगरस्याऽऽज्ञया ततः । चकार वर्धकीरत्नं, विनीताया इवाऽनुजम् ॥ ५४ ॥

॥ चतुर्भिः कलापकम् ।

तत्र पौषधशालायां, चक्रेऽष्टमतपस्ततः । मागधतीर्थकुमारं, कृत्वा मनसि भूपतिः ॥ ५५ ॥
स मुक्ताशेषनेपथ्यः, कुशसंस्तरसंश्रयः । मुक्तशस्त्रो ब्रह्मचारी, प्रतिजाग्रदवास्थित ॥ ५६ ॥

१ मत्स्यविशेषः । २ छादयन् । ३ विषमाम् । ४ इन्द्रेण । ५ अश्वशालाभिः । ६ समानाकृतिभिः ।

महीपतिः परिणमत्यष्टमे च तपस्यथ । निर्गत्य पौषधगृहात्, सस्नौ पुण्येन वारिणा ॥ ५७ ॥
सपाण्डुरध्वज-च्छत्रं, नानाप्रहरणाकुलम् । सहडिण्डीर-यादस्कमधिपं सरितामिव ॥ ५८ ॥
दिव्यघण्टाचतुष्केण, लम्बमानेन पार्श्वतः । चन्द्रा-ऽऽदित्यचतुष्केण, सुमेरुमिव शोभितम् ॥ ५९ ॥
उच्चैरुच्चैःश्रवःकल्पैरश्वैरुद्धुरकन्धरैः । सनाथं पृथिवीनाथोऽध्यारुरोह महारथम् ॥ ६० ॥
॥ त्रिभिर्विशेषकम् ॥
सेनया हस्त्यश्व-रथ-पदातिचतुरङ्गया । विराजमानो नीत्येव, स्वया चतुरुपायया ॥ ६१ ॥
राजंश्छत्रेण शिरसि, चामराभ्यां च पार्श्वतः । जगत्त्रयव्यापियशोवल्लीकन्दैरिव त्रिभिः ॥ ६२ ॥
आततज्यधनुःपाणिः, सगरः सागरं ततः । रथचक्रनाभिदघ्नं,जलं यावदगाहत ॥ ६३ ॥
जयश्रीनाटिकानान्दीं, पाणिना ज्यामवीवदत् । निषङ्गाच्च चकर्षेषुं, राजा रत्नं निधेरिव ॥ ६४ ॥
निदधे च धनुर्मध्ये, तमिषुं पृथिवीपतिः । धातकीखण्डमध्यस्थेष्वाकाराद्रिविडम्बकम् ॥ ६५ ॥
आचकर्ष तमाकर्णं, यान्तं कर्णावतंसताम् । काञ्चनं निजनामाङ्कं, भूपतिर्बाणमुल्बणम् ॥ ६६ ॥
सूत्कारिपक्षमुखरं, नवं ताक्ष्र्यमिवाम्बरे । अधिमागधतीर्थेशं, विससर्ज शरं नृपः ॥ ६७ ॥
योजनानि द्वादशाब्धेः, समुल्लङ्घ्य निमेषतः । मागधतीर्थकुमारसभायां निपपात सः ॥ ६८ ॥
तडिद्दण्डमिवाऽकाण्डे, काण्डं तं प्रेक्ष्य तत्क्षणात् । चुकोप मागधपतिभृकुटीभङ्गभीषणः ॥ ६९ ॥
किञ्चिद् विमृश्य तं शरमुत्थाय स्वयमाददे । तत्रेक्षाञ्चक्रे सगरचक्रिनामाक्षराणि च ॥ ७० ॥

१ पूर्णे सति । २ समुद्रफेनजलजन्तुसहितम् । ३ राजनीत्या सामदामदण्डभेदरूपया । ४ विस्तारिता । ५ वादयामास । ६ तूणीरात ।

आसाञ्चक्रे धृतशरो, भूयः सिंहासने निजे । गिरा गम्भीरया स्वस्यां, पर्षद्येवमुवाच च ॥ ७१ ॥
द्वीपस्य जम्बूद्वीपस्य, क्षेत्रे भरतनामनि । द्वितीयश्चक्रभृज्जज्ञे, सगरो नाम सम्प्रति ॥ ७२ ॥
अवश्यकृत्यं भूतानां, भाविनां च सतां[1] तथा । मागधाधिपतीनां हि, प्राभृतं चक्रवर्तिषु ॥ ७३ ॥
स इत्युदीर्य निभृतं, प्राभृतैर्भृतकायितः[2] । उपतस्थे सविनयः, सगरं चक्रवर्तिनम् ॥ ७४ ॥
तं शरं हार-केयूर-ताडङ्क-कटकादिकम् । नेपथ्यं देवदूष्याणि, राज्ञेऽदात् स नभःस्थितः ॥ ७५ ॥
अम्भो मागधतीर्थीयं, स मागधकुमारकः । नरेन्द्रस्याऽर्पयामास, रसेन्द्रमिव[3] वार्तिकः[4] ॥ ७६ ॥
अञ्जलिं रचयित्वोच्चैः, पद्मकोशविडम्बकम् । उवाच मागधपतिर्वसुधाधिपतिं ततः ॥ ७७ ॥
एतस्मिन् भरतक्षेत्रे, प्राच्यां दिशि तवाऽस्म्यहम् । प्रान्तवर्त्येकसामन्त, इवाऽऽदेशकरः सदा ॥ ७८ ॥
भृत्यत्वेन प्रतीयेष, ततस्तमवनीपतिः । विससर्ज च सत्कृत्य, दुर्गपालमिव स्वकम् ॥ ७९ ॥
उदयन्निव मार्तण्डः, सगरः सागराम्भसः । निर्जगाम निजेनोच्चै, रुन्धानस्तेजसा दिशः ॥ ८० ॥
गत्वा च शिबिरं स्नान-देवार्चनपुरःसरम् । विदधे सपरीवारः, पारणं राजवारणः ॥ ८१ ॥
अथ मागधतीर्थाधिपतेरष्टाह्निकोत्सवम् । चक्रे चक्री स्वामिदत्तमाहात्म्याः खलु सेवकाः ॥ ८२ ॥
सर्वदिग्विजयश्रीणामर्पणप्रतिभूसमम्[5] । चक्ररत्नं चक्रिणोऽथ, प्रतस्थे दक्षिणां प्रति ॥ ८३ ॥
अपाक्पश्चिममार्गेण, चक्री चक्रानुगस्ततः । प्रचचालाऽचलां[6] सैन्यैः, साचलां[7] चलयन्निव ॥ ८४ ॥
कानप्युन्मूलयन् राज्ञस्तरूनिव समीरणः । शालिस्तम्बानिवोत्खाय, कानपि प्रतिरोपयन् ॥ ८५ ॥

१ वर्तमानानाम् । २ भृत्य इवाचरितः । ३ सिद्धरसम् । ४ सिद्धपुरुषः । ५ साक्षी । ६ वसुधाम् । ७ पर्वतसहिताम् ।

नवानारोपयन् कांश्चित्, कीर्तिस्तम्भानिवोच्चकैः । कांश्चिन्मुञ्चन् नमयित्वा, नद्योघो वेतसानिव ॥ ८६ ॥
कुर्वन् कृत्ताङ्गुलीन्[1] कांश्चित्, कांश्चिद् रत्नानि दण्डयन् । हस्त्यश्वं त्याजयन् कांश्चित्, कांश्चिच्छत्राणि मोचयन्॥८७॥
क्रमादासादयामास, रोधो दक्षिणवारिधेः । सर्वदिग्जयनिर्माणे, सगरोदृढसङ्गरः[2] ॥ ८८ ॥
अवतीर्य करिस्कन्धात्, स्कन्धावारे क्षणात् कृते । विमाने वज्रभृदिवोवासवेश्मनि[3] चक्रभृत् ॥ ८९ ॥
तत्र पौषधशालायां, कृताष्टमतपा नृपः । उद्दिश्य वरदामानं, तस्थौ स्वीकृतपौषधः ॥ ९० ॥
सगरोऽष्टमभक्तस्य, प्रान्ते पारितपौषधः । आच्छिन्नमिव[4] मार्तण्डादारुरोह महारथम् ॥ ९१ ॥
नाभिदघ्नो रथो यावदगाहत महोदधिम् । रथेन सगरस्तेन, मथेव दधिमन्थनीम् ॥ ९२ ॥
अधिरोप्य धनुर्मूर्ध्नि, ज्यां टङ्कारमकारयत् । आकर्ण्यमानं न्यत्कर्णैर्यादोभिस्त्रासविह्वलैः ॥ ९३ ॥
अथेषुमिषुधेर्मध्याद्[5], भीषणोभ्योऽपि भीषणम् । अग्रहीदवनीनाथो, वार्तिकोऽहिं[6] बिलादिव ॥ ९४ ॥
विधाय लस्तकन्यस्तं[7], तं कर्णाभ्यर्णमानयत् । विज्ञप्तिकार्थिनमिव[8], सेवकं सायकं नृपः ॥ ९५ ॥
वरदामपतेर्धाम, प्रतीषुं विससर्ज तम् । चक्रभृद् वज्रभृदिव, वज्रं प्रति शिलोच्चयम् ॥ ९६ ॥
वरदामकुमारस्य, सभायां तस्थुषः पुरः । निपपात शरोऽकाण्डमुद्गराघातसन्निभः ॥ ९७ ॥
अकाले कस्य कालेनोत्क्षिप्तं पत्रमिति ब्रुवन् । वरदामपतिर्बाणमुत्थाय स्वयमाददे ॥ ९८ ॥

१ छिन्नाङ्गुलीन् । २ दृढप्रतिज्ञः । ३ इन्द्रः । ४ गृहीतम् । ५ तूणीरस्य । ६ गारुडिकः । ७ धनुर्मध्यदेशः । ८ विज्ञापनाचिकीर्षुम् ।

दृष्ट्वा सगरराजस्य, तत्र नामाक्षराणि सः । शशाम नागदमनीमवलोक्येव पन्नगः ॥ ९९ ॥
आख्यच्च पर्षदे स्वस्यै, जम्बूद्वीपस्य भारते । चक्रभृत् सगरो नाम, द्वितीय उदपद्यत ॥ १०० ॥
वस्त्रैश्चित्रैर्महामूल्यै रत्नालङ्करणैरपि । ततश्च पूजनीयोऽयं, देवतेव गृहागतः ॥ १०१ ॥
सोऽभिधायैवमुपदामुपादाय च सत्वरम् । उपतस्थेऽन्तरिक्षस्थो, रथस्थं पृथिवीपतिम् ॥ १०२ ॥
किरीट-रत्न-मुक्तास्रक्केयूर-कटकादि सः । कोशागारिकवद् राज्ञेऽर्पयामास शरं च तम् ॥ १०३ ॥
वरदामाधिपोऽथैवमूचे स्थास्याम्यतः परम् । तवाऽऽदेशकरः शक्रदेश्यदेशे निजेऽपि हि ॥ १०४ ॥
तत्प्राभृतमुपादाय, तद्वचः प्रतिपद्य च । तं सत्कृत्य च कृत्यज्ञो, विससर्ज महीपतिः ॥ १०५ ॥
ततश्च ववले चक्री, चक्रमार्गानुगस्तथा । हेषमाणस्यन्दनाश्वो, जलवाजिविलोकनात् ॥ १०६ ॥
स्कन्धावारमुपेत्याऽथ, स रथादवरुह्य च । स्नात्वा कृत्वा जिनार्चां च, चकाराऽष्टमपारणम् ॥ १०७ ॥
वरदामकुमारस्योद्दाममष्टाह्निकोत्सवम् । चकार सगरो भक्तेष्वीशा हि प्रतिपत्तिदाः ॥ १०८ ॥
ततः प्रतस्थे पृथ्वीशश्चक्ररत्नपथानुगः । पश्चिमाभिमुखं मुष्णन्नुष्णांशुं सैन्यरेणुभिः ॥ १०९ ॥
पन्नगानिव पक्षीन्द्रो, द्रविडान् द्रावयन् द्रुतम् । तेजसाऽऽध्मानन्धीकुर्वन्नुलूकानिव भास्करः ॥ ११० ॥
त्याजयन् राज्यलिङ्गानि, त्रिकलिङ्गैरसूनिव । कुर्वन् विदर्भान् निःसत्त्वान्, दर्भसंस्तरणानिव ॥ १११ ॥
त्यक्तराष्ट्रान् महाराष्ट्रान्, कुर्वन् कर्पटिकानिव । कुर्वाणः कौङ्कणान् बाणैरङ्कितांस्तुरगानिव ॥ ११२ ॥
ललाटस्थाञ्जलींल्लाटान्, घटयन् सातपानिव । विष्वक् सङ्कोचयन् कच्छानतुच्छान् कच्छपानिव ॥ ११३ ॥

सगरस्य दिग्विजयः ।

१ ओषधिभेदः । २ प्राभृतम् । ३ इन्द्रसदृशदेशे । ४ गौरवकारिणः । ५ सूर्यम् । ६ देशविशेषैः । ७ भिक्षुकानिव ।

सुराष्ट्रान् नांष्ट्रवत्[1] क्रूरान्, विदधानो वशंवदान् । पश्चिमाम्भोनिधे रोधः, क्रमेण प्राप पार्थिवः ॥ ११४ ॥
॥ पञ्चभिः कुलकम् ॥

स्कन्धावारमधिष्ठाय, प्रभासमधिकृत्य सः । कृताष्टमोऽथ जग्राह, पौषधं पौषधौकसि ॥ ११५ ॥
अष्टमान्ते रविरिवाऽऽरुह्य राजा महारथम् । नाभिदघ्नं जलं यावज्जगाहे लवणोदधिम् ॥ ११६ ॥
तत्राधिज्यं धनुः कृत्वा, ज्यानिर्घोषं ततान सः । बाणप्रयाणकल्याणजयातोद्यरवोपमम् ॥ ११७ ॥
अधिप्रभासतीर्थेशनिवासमथ सायकम् । स्वनामाङ्कं स सन्देशहरं दूतमिवाऽमुचत् ॥ ११८ ॥
अन्ते द्वादशयोजन्याः, प्रभाससुरसद्मनि । स तत्र न्यपतत् पत्री[2], पतत्रीव[3] महाद्रुमे ॥ ११९ ॥
सोऽपि तं पत्रिणं प्रेक्ष्य, प्रेक्षापूर्वकृतां वरः । अवाचत् तत्र नामवर्णान् सगरचक्रिणः ॥ १२० ॥
उपात्तोपायनः सोऽथ, तमुपादाय सायकम् । भक्त्याऽतिथिं गुरुमिवाऽभ्यागमत् सगरं नृपम् ॥ १२१ ॥
चूडामणिं निष्कोरस्के, कटकान् कटिसूत्रकम् । केयूरे चाऽऽर्पयद् राज्ञे, तं चेषुं स नभःस्थितः ॥ १२२ ॥
स विनीतो विनीतेशमित्यूचे विषयेऽत्र हि । चक्रवर्तिंस्त्वदादेशवर्ती वत्स्याम्यतः परम् ॥ १२३ ॥
उपायनमुपादाय, समालप्य च सादरम् । विससर्जाऽऽयुक्तमिव[4], प्रभासं भूमिवासवः ॥ १२४ ॥
सगरः शिबिरं गत्वा, स्नात्वा कृतजिनार्चनः । चकाराऽष्टमभक्तान्ते, पारणं सपरिच्छदः ॥ १२५ ॥
प्रभासतीर्थाधिपतेर्वरदामपतेरिव । अष्टाह्निकोत्सवं चक्रे, प्रीतो वसुमतीपतिः ॥ १२६ ॥
अनुचक्रं ततश्चक्री, सिन्धोर्दक्षिणरोधसा । प्रतीपगामिसिन्ध्वेव, सेनया प्राङ्मुखो ययौ ॥ १२७ ॥

१ राक्षसवत् । २ शरः । ३ पक्षीव । ४ भृत्यमिव ।

सिन्धुदेवीसद्मनश्चाऽदूरतः शिबिरं न्यधात् । सद्योऽवतीर्णगन्धर्वपुरोपममिलापतिः ॥ १२८ ॥
सिन्धुदेवीं च मनसि, कृत्वाऽष्टमतपो नृपः । चकार सिन्धुदेव्याश्च, रत्नासनमकम्पत ॥ १२९ ॥
विदाञ्चकाराऽवधिना, सा च चक्रिणमागतम् । उपायनकरा भक्तिपराऽथ तमुपाययौ ॥ १३० ॥
अष्टोत्तरं रत्नकुम्भसहस्रं निधिसोदरम् । मणि-रत्नविचित्रं च, स्वर्णभद्रासनद्वयम् ॥ १३१ ॥
केयूर-कटकादीनि, रत्नालङ्करणानि च । देवदूष्याणि[1] च ददौ, भूभुजे सा नभस्थिता ॥१३२॥ ॥ युग्मम् ॥
इत्यभाषिष्ट सा देवी, नरदेववराऽधुना । भवद्विषयवास्तव्या, किङ्करीवाऽस्मि शाधी माम् ॥ १३३ ॥
अतिपीयूषगण्डूषैर्वचोभिः प्रतिभाष्य ताम् । विससर्ज महीनाथश्चक्रे चाऽष्टमपारणम् ॥ १३४ ॥
विदधे सिन्धुदेव्याश्च, प्राग्वदष्टाह्निकोत्सवम् । महात्मनां महर्द्धीनामुत्सवा हि पदे पदे ॥ १३५ ॥
चक्रमायुधशालायाः, स्वशालाया इव द्विपः । निर्जगाम श्रियां धाम, कक्कुभोत्तरपूर्वया[2] ॥ १३६ ॥
नृपस्तदनुगच्छंश्च, दिनैः कतिपयैरपि । नितम्बं दक्षिणं प्राप, वैताढ्यस्य महागिरेः ॥ १३७ ॥
निधाय तत्र शिबिरं[3], विद्याधरपुरोपमम् । अधिवैताढ्यकुमारं, सोऽष्टमं विदधे तपः ॥ १३८ ॥
महीपतेः परिणमत्यष्टमे च तपस्यथ । वैताढ्याद्रिकुमारस्य, सिंहासनमकम्पत ॥ १३९ ॥
वैताढ्याद्रिकुमारोऽपि, बुबुधेऽवधिना ततः । भरतार्धावधावभ्युपेतं[4] सगरचक्रिणम् ॥ १४० ॥
सोऽभ्येत्य राज्ञे रत्नानि, दिव्यानि वसनानि च । ददौ नभःस्थितो भद्रासन-वीरासनानि च ॥ १४१ ॥
चिरं जीव चिरं नन्द, चिरं जय जयेति च । सौवस्तिक[5] इव स्माऽऽह, स हृष्टः पृथिवीपतिम् ॥ १४२ ॥

१ त्वद्देशवासिनी । २ दिशया । ३ पूर्णे । ४ भरतार्धस्य सीमनि । ५ स्वस्तिवाचको द्विजः ।

स्वं बान्धवमिवाऽभीष्टं, तमाभाष्य सगौरवम् । सगरो विससर्जाऽथ, चकाराऽष्टमपारणम् ॥ १४३ ॥
वैताढ्याद्रिकुमारस्य, चक्रे चाऽष्टाह्निकोत्सवम् । निजप्रसादप्रासादसुवर्णकलसोपमम् ॥ १४४ ॥
ततश्चक्रानुगो गत्वा, तमिस्रां निकषा गुहाम् । पञ्चानन इवोवास, निधाय शिबिरं नृपः ॥ १४५ ॥
कृतमालाभिधं तत्र, देवं मनसिकृत्य सः । चक्रेऽष्टमतपः कृत्यं, महान्तो न त्यजन्ति हि ॥ १४६ ॥
राज्ञोऽष्टमे परिणमत्यकम्पत तदासनम् । तादृशामभियोगे[1] हि, कम्पन्ते पर्वता अपि ॥ १४७ ॥
ज्ञात्वाऽवधिप्रयोगेण, कृतमालोऽपि चक्रिणम् । उपस्थितं प्रभुमिवोपतस्थे गगनस्थितः ॥ १४८ ॥
स्त्रीरत्नयोग्यं तिलकचतुर्दशमदत्त सः[2] । नेपथ्यजातं वस्त्राणि, गन्ध-चूर्ण-स्रगादि च ॥ १४९ ॥
देवो जय जयेत्युक्त्वा, स सेवां प्रत्यपद्यत । सेवनीयाश्चक्रिणो हि, देवैरपि नरैरिव ॥ १५० ॥
प्रसादपूर्वमालप्य, नृपतिर्विससर्ज तम् । चक्रे च सपरीवारोऽष्टमभक्तान्तपारणम् ॥ १५१ ॥
देवस्य कृतमालस्य, सादरः सगरस्ततः । अष्टाह्निकोत्सवं चक्रे, देवानां प्रीतिदं ह्यदः ॥ १५२ ॥
अष्टाह्निकान्ते सगरः, पश्चिमं सिन्धुनिष्कुटम् । विजेतुमर्धसैन्येन, सैन्यनाथं समादिशत् ॥ १५३ ॥
अथ तन्मेदिनीभर्तुः, शासनं रचिताञ्जलिः । शिरसा प्रतिजग्राह, मालामिव चमूपतिः ॥ १५४ ॥
विख्यातो भारते वर्षे, महाबल-पराक्रमः । नभस्वानिव[3] विवस्वानिव[4] चोग्रेण तेजसा ॥ १५५ ॥
समस्तम्लेच्छभाषाज्ञः, समस्तलिपिपण्डितः । विचित्रचारुभाषी च, सरस्वत्या इवाऽऽत्मजः ॥ १५६ ॥
निष्कुटानामशेषाणां, भरतक्षेत्रवर्तिनाम् । जल-स्थलजदुर्गाणां, विज्ञाताऽऽगम-निर्गमौ ॥ १५७ ॥

१ उद्योगे । २ स्वीकृतवान् । ३ वायुः । ४ सूर्यः ।

अस्त्रवेदः[1] शरीरीव, सर्वायुधविचक्षणः । कृतस्नानः कृतप्रायश्चित्त-कौतुकमङ्गलः ॥ १५८ ॥
सितपक्ष[2] इव स्वल्पनक्षत्रमणिभूषणः । शरासनधरो धीरः, सेन्द्रचाप इवाम्बुदः ॥ १५९ ॥
सविद्रुमवितानोऽब्धिरिव चर्माख्यरत्नभृत् । सरोवत् पुण्डरीकेणोद्दण्डेनोपरि शोभितः ॥ १६० ॥
भांश्च[3]मराभां श्रीखण्डस्थासकाभ्यामिवांसयोः । तूर्यनादैर्नादयन् द्यां, स्तनितैरिव वारिदः ॥ १६१ ॥
सैन्येन चतुरङ्गेण, सेनानीः परिवारितः । आरुह्योभवरं सिन्धुप्रवाहाभ्यर्णमाययौ ॥ १६२ ॥

॥ अष्टभिः कुलकम् ॥

अथ पस्पर्श सेनानीश्चर्मरत्नं स्वपाणिना । तदन्तःसिन्धु ववृधे, नावाकारं बभूव च ॥ १६३ ॥
तेनोत्ततार तां सिन्धुं, सह चम्वा चमूपतिः । अपारमिव संसारं, योगीन्द्रो योगलीलया ॥ १६४ ॥
सिन्धुतीरादथ स्तम्भादिव मत्तमतङ्गजः । प्रससार महासारोऽस्खलितं पृतना[4]पतिः ॥ १६५ ॥
सिंहलकान् बर्बरकांष्टङ्कणानितरानपि । द्वीपं च यवनद्वीपमाचक्राम चमूपतिः ॥ १६६ ॥
कालमुखान्जोनकांश्च, तथा वैताढ्यसंश्रिताः । नानाविधाम्लेच्छजातीः, स स्वच्छन्दमदण्डयत् ॥ १६७ ॥
समस्तदेशप्रवरं, कच्छदेशं च लीलया । महोक्ष इव सेनानीरुपदुद्राव विक्रमी ॥ १६८ ॥
तदन्तात् प्रतिनिवृत्य, तस्यैवोर्वीतले समे । अवतस्थे चमूनाथोऽम्भःक्रीडोत्तीर्णहस्तिवत् ॥ १६९ ॥
म्लेच्छा मडम्ब-नगर-ग्रामादीनामधीश्वराः । तं तत्रेयुः सर्वतोऽपि, पाशाकृष्टा इव द्रुतम् ॥ १७० ॥
भूषणानि विचित्राणि, रत्नानि वसनानि च । रजतं च सुवर्णं च, तुरङ्गान् कुञ्जरानपि ॥ १७१ ॥

१ धनुर्वेदः । २ शुक्लपक्षः । ३ शोभमानः । ४ सेनापतिः ।

स्यन्दनान्यन्यदपि यत्, प्रकृष्टं वस्तु किञ्चन । सेनान्ये तदुपनिन्युर्न्यासार्पितमिवाऽथ ते ॥ १७२ ॥ ॥युग्मम् ॥
कुटुम्बिका इव वयं, करदा वशगाश्च वः । स्थास्यामोऽत्रेति सेनान्यं, ते बद्धाञ्जलयोऽवदन् ॥ १७३ ॥
तत्प्राभृतमुपादाय, व्यसृजत् तांश्चमूपतिः । एत्योत्ततार सिन्धुं च, चर्मरत्नेन पूर्ववत् ॥ १७४ ॥
गत्वोपनिन्ये तत्सर्वं, सगराय स भूभुजे । कृष्टाश्चेट्य[1] इवाऽऽयान्ति, शक्त्या शक्तिमतां श्रियः ॥ १७५ ॥
दूरदूरादेत्य भूपैः, सरिद्भिरिव सागरः । उपास्यमानः सगरस्तत्राऽस्थाच्छिबिरे चिरम् ॥ १७६ ॥
तमिस्रादक्षिणद्वारकपाटोद्घाटनाय सः । सेनान्यमन्यदाऽऽदिक्षद्, बिभ्राणं दण्डकुञ्जिकाम् ॥ १७७ ॥
स गत्वोपतमिस्रं च, कृतमालामरं प्रति । चक्रेऽष्टमतपः प्रायस्तपोग्राह्या हि देवताः ॥ १७८ ॥
अष्टमान्ते कृतस्नानः, शुचिवस्त्रविलेपनः । उपात्तधूपदहनोऽगाद् गुहां देवतामिव ॥ १७९ ॥
कृत्वा प्रणाममालोकमात्रेऽपि पृतनापतिः । तस्या द्वारे द्वास्थ इव, दण्डपाणिरवास्थित ॥ १८० ॥
विधायाऽष्टाह्निकां तस्या, लिखित्वा चाऽष्टमङ्गलीम् । दण्डरत्नेन सेनानीस्तत्कपाटावताडयत् ॥ १८१ ॥
सरत्सरिति[2] संरावं, कुर्वाणौ तत्क्षणादथ । व्यघटेतां तत्कपाटौ, शुष्कशिम्बापुटाविव ॥ १८२ ॥
कपाटोद्घाटनं तच्च, शशंस सगराय सः । सरत्सरिति निर्घोषकथितं पुनरुक्तवत् ॥ १८३ ॥
हस्तिरत्नं समारुह्य, चतुरङ्गचमूवृतः । दिक्पालानामेकतम, इव तत्राऽऽययौ नृपः ॥ १८४ ॥
निदधे दक्षिणे कुम्भे, कुम्भिरत्नस्य भूपतिः । मणिरत्नं मल्लिकायां[3], प्रदीपमिव भासुरम् ॥ १८५ ॥

१ दास्यः । २ सर सर इतिरूपं शब्दम् । ३ दीपिकायाम् ।

ततश्चक्रानुगश्चक्री, केसरीवास्खलद्गतिः । पञ्चाशद्योजनायामां, तमिस्रां प्राविशद् गुहाम् ॥ १८६ ॥
गोमूत्रिकाक्रमेणाऽथ, गुहाभित्त्योर्द्वयोरपि । पञ्चधन्वशतीभाञ्जि, विष्कम्भा-ऽऽयाममानयोः ॥ १८७ ॥
योजनान्तरितान्येकहीनां पञ्चाशतं नृपः । ध्वान्तनाशाय काकिण्या, मण्डलान्यालिखन् ययौ ॥ १८८ ॥
उद्घाटितं गुहाद्वारं, गुहान्तर्मण्डलानि च । तावत् तान्यपि तिष्ठन्ति, यावज्जीवति चक्रभृत् ॥ १८९ ॥
मानुषोत्तरसीमस्थचन्द्र-सूर्यपरम्पराम् । विडम्बयद्भिरुद्द्योतो, गुहान्तस्तैरजायत ॥ १९० ॥
निर्यान्त्यौगुहाप्राग्भित्तेः, प्रत्यग्भित्तेश्चमध्यतः । प्रापोन्मग्ना-निमग्नाख्ये, निम्नगे[1] सोऽथ सिन्धुगे ॥ १९१ ॥
उन्मग्नायां विनिक्षिप्ता, प्रोन्मज्जति[2] शिलाऽपि हि । निमग्नायां पुनः क्षिप्तमलाब्वपि[3] निमज्जति ॥ १९२ ॥
सद्यौ वर्धकिरत्नेन, बद्धया पद्यया च ते[4] । अलङ्चक्त गृहस्रोतोलीलया सबलो नृपः ॥ १९३ ॥
स क्रमेण तमिस्राया, उत्तरं द्वारमासदत् । व्यघटेतां तत्कपाटे, स्वयमेवाऽब्जकोशवत् ॥ १९४ ॥
निर्जगाम गुहामध्यादब्धिमध्यादिवाऽर्यमा । सगरः सपरिवारो, वारणस्कन्धमाश्रितः ॥ १९५ ॥
न्यत्कारकारिणं[5] भानोः, सर्वतोऽप्यस्त्रदीप्तिभिः । भूरजोभिः खेचरीणां, दृग्निमेषविशेषदम् ॥ १९६ ॥
सैन्यप्राग्भारभारेण, भूमिकम्पविधायिनम् । दिवस्पृथिव्योस्तुमुलध्वानैर्बाधिर्यदायिनम्[6] ॥ १९७ ॥
अप्यकाण्डे काण्डपटमध्यादिव विनिर्गतम् । नभस्तलादिवाऽऽयातं, पातालादिव चोत्थितम् ॥ १९८ ॥
अनन्तसैन्यगहनं, पुरश्चक्रेण भीषणम् । सगरं सागरमिवाऽऽपतन्तं प्रेक्ष्य तत्क्षणात् ॥ १९९ ॥

१ नद्यौ । २ तरति । ३ तुम्बिका । ४ नद्यौ । ५ तिरस्कारकारिणम् । ६ बधिरत्वदायिनम् ।

आपाता नाम दुष्पातः[1], किराता दोर्मदोद्धुराः । सक्रोधं सोपहासं चाऽन्योऽन्यमेवं बभाषिरे ॥ २०० ॥

॥ पञ्चभिः कुलकम् ॥

भो भोः सर्वेऽपि दोष्मन्तो, ब्रूत देशेऽत्र सम्प्रति । कोऽप्रार्थितप्रार्थकोऽयं[2], श्रीह्रीधीकीर्त्तिवर्जितः ॥ २०१ ॥

निर्लक्षणो वीरमानी, मानेनान्धम्भविष्णुकः । कासरो[3] हा! प्रविशति, वने केसर्यधिष्ठिते? ॥ २०२ ॥

॥ युग्मम् ॥

इत्युदीर्य महावीर्या, अग्रानीकमुपाद्रवन् । म्लेच्छराजाश्चक्रपाणेर्वज्रपाणेरिवाऽसुराः ॥ २०३ ॥

नष्टद्विपं हतहयं, भग्नाक्षस्यन्दनं तथा । क्षणात् परावृत्तमिव, तदनीकमजायत ॥ २०४ ॥

स्वसैन्यं चक्रिसेनानीः, किरातैः प्रेक्ष्य विद्रुतम् । वैवस्वत[4] इव कुद्धोऽध्यारोहद् रत्नवाजिनम् ॥ २०५ ॥

असिरत्नं समाकृष्य, धूमकेतुमिवोद्गतम् । प्रभञ्जन[5] इवौजस्वी, प्रति म्लेच्छमधावत ॥ २०६ ॥

कानप्युन्मूलयामास, निष्पिपेष च कानपि । कानप्यपातयन्मलेच्छान्, स वनेभ इव द्रुमान् ॥ २०७ ॥

तेन भग्नाः किरातास्ते, निःस्थामानोऽपचक्रमुः । बहूनि योजनान्याशु, पवनोद्धूततूलवत् ॥ २०८ ॥

दूरे गत्वाऽथ सम्भूय, सिन्धुनद्यास्तटावनौ । वालुकास्तरेष्वस्थुरुत्ताना मुत्तवाससः ॥ २०९ ॥

देवान् मेघमुखान् नागकुमारान् कुलदेवताः । उद्दिश्याऽष्टमभक्तानि, जगृहुस्तेऽत्यमर्षणाः ॥ २१० ॥

तदष्टमान्ते देवानामासनानि चकम्पिरे । दृशेवाऽवधिनाऽपश्यन्, किरातांस्ते तथास्थितान् ॥ २११ ॥

कृपया पितृवत् तेषामर्त्त्या[5] जातार्त्तयोऽथ ते । तानुपेत्यान्तरिक्षस्थाः, प्रोचुर्मेघमुखा इति ॥ २१२ ॥

१ दुःखदः पातो येषां ते । २ महिषः । ३ यमः । ४ वायुरिव । ५ पीडया ।

हे वत्सा! हेतुना केन, यूयमेवं हि तिष्ठथ? । अविलम्बेन तं ब्रूत, यथा वः प्रतिकुर्महे ॥ २१३ ॥
ततः किराता इत्यूचुः, कोऽप्यसौ विषयेऽत्र नः । प्राविशद् दुःप्रवेशेऽपि, पयोधाविव वाडवः ॥ २१४ ॥
वयं तेन पराभूता, युष्मान् शरणमाश्रिताः । स यथा याति भूयोऽपि, नाऽऽयाति च तथाऽस्तु नूः ॥२१५॥
तेऽप्यभ्यधुः सुरा एवं, कृशानोः[1] शलभा इव । यूयमस्याऽनभिज्ञाः स्थ, तेनेदमभिधत्थ भोः! ॥ २१६ ॥
अयं हि सगरो नाम, चक्रवर्ती महाभुजः । सुराणामसुराणां चाऽविजय्यः शक्रविक्रमः ॥ २१७ ॥
शस्त्रा-ऽग्नि-विष-मन्त्रा-ऽम्बु-तन्त्र-विद्याद्यगोचरः । उपद्रोतुं वज्र इव, नहि केनाऽपि शक्यते ॥ २१८॥
तथापि वोऽनुरोधेन, चक्रिणोऽस्य महौजसः । मशकाः कुञ्जरस्येव, करिष्याम उपद्रवम् ॥ २१९ ॥
इत्युदित्वा तिरोभूय, ते मेघवदनाः[2] सुराः । स्कन्धावारोपरि स्थित्वा[3], तेनिरे घोरदुर्दिनम् ॥ २२० ॥
नीरन्ध्रेणान्धकारेणाऽपूर्यन्त ककुभस्तथा । जनुषाऽन्धलवद् रूपं, नोपलेभे यथा जनः ॥ २२१ ॥
धाराभिस्तेऽथ मुसलमानाभिः[4] शिबिरोपरि । सप्तरात्रं प्रववृषुरनिर्विण्णाः समीरवत्[6] ॥ २२२ ॥
अरिष्टवृष्टिमच्छिन्नां[5], प्रेक्ष्य तां चक्रवर्त्यपि । स्वयं पाणिसरोजेन, चर्मरत्नं परामृशत् ॥ २२३ ॥
स्कन्धावारप्रमाणेन, ववृधे तत् क्षणादपि । तच्च तिर्यक् समास्तीर्णं[7], ततार सलिलोपरि ॥ २२४ ॥
महापोतमिवाऽऽरोहत्, ससैन्यस्तन्नरेश्वरः । छत्ररत्नं च संस्पृश्याऽतानयच्चर्मरत्नवत् ॥ २२५ ॥
चक्रे चर्मोपरि च्छत्रं, सोऽभ्रं भुव इवोपरि । मणिरत्नं न्यधाच्छत्रदण्डान्ते द्योतहेतवे ॥ २२६ ॥
छत्र-चर्मान्तरे तस्थौ, तद् राज्ञः शिबिरं सुखम् । असुर-व्यन्तरगण, इव रत्नप्रभान्तरे ॥ २२७ ॥

१ अग्नेः । २ दिशः । ३ जन्मान्धवत् । ४ मुसलप्रमाणाभिः । ५ अखण्डाम् । ६ पस्पर्श । ७ विस्तारितम् । ८ विस्तारयामास ।

सर्वधान्यानि शाकांश्च, फलादि च गृहाधिपः । प्रातरुप्त्वा ददौ सायं, रत्नमाहात्म्यमीदृशम् ॥ २२८ ॥
अखण्डिताभिर्धाराभिर्वर्षति स्म निरन्तरम् । तथैव ते मेघमुखा, दुर्वाग्भिरिव दुर्मुखाः । २२९ ॥
क एते मामुपद्रोतुं, प्रवृत्ता हन्त! दुर्धियः । एवं सकोपः सगरश्चिन्तयामास चेतसि ॥ २३० ॥
सान्निध्यकारिदेवानां, सहस्राः षोडशापि ते । कुपिता वर्मिताः सास्त्रास्तानुपेत्यैवमभ्यधुः[1] ॥ २३१ ॥
अरे वराकाः! किमिमं, सगरं चक्रवर्तिनम् । देवादीनामप्यजय्यं, न जानीथाऽल्पमेधसः? ॥ २३२ ॥
अपसर्पत तत् तूर्णं, चेदात्मकुशलेच्छवः । अन्यथा खण्डयिष्यामो, युष्मान् कूष्माण्डवद् वयम् ॥ २३३ ॥
इत्युक्तास्तैर्मेघमुखा, मेघान् संहृत्य तत्क्षणम् । त्रस्तास्तिरोदधुः क्वापि, शफरा[2] इव वारिणि ॥ २३४ ॥
तदापातकिरातानां, गत्वा मेघमुखाः सुराः । आदिशंश्चक्रवर्त्येष, न जय्योऽस्माद्दशामिति ॥ २३५ ॥
ततः किरातास्ते भीताः, स्त्रीवत् परिहितांशुकाः । रत्नोपायनमादाय, सगरं शरणं ययुः ॥ २३६ ॥
पतित्वा पादयोश्चक्रवर्तिनो वशवर्तिनः । आबद्धाञ्जलयो मूर्ध्नि, ते किराता व्यजिज्ञपन् ॥ २३७ ॥
स्वामिन्नस्माभिरज्ञानात्, त्वां प्रतीदमनुष्ठितम् । शरभैः[3] प्रति पर्जन्यं, फालकर्मेव दुर्मदैः ॥ २३८ ॥
अविमृश्यविधायित्वं, तत् तितिक्षस्व नः प्रभो! । प्रणिपातावसानो हि, कोपाटोपो महात्मनाम् ॥२३९ ॥
कुटुम्बिनः पत्तयो वा, सामन्ता वा त्वदाज्ञया । अतः परं भविष्यामस्त्वदधीना हि नः स्थितिः ॥ २४० ॥
चक्र्यप्युवाच तानेवं, मदीयीभूय तिष्ठत । अपाग्भरतवर्षार्धसामन्ता इव दण्डदाः ॥ २४१ ॥
एवमालप्य सत्कृत्य, किरातान् व्यसृजन्नृपः । सेनान्यं चाऽऽदिशज्जेतुं, सिन्धोः पश्चिमनिष्कुटम् ॥ २४२ ॥

१ अस्त्रसहिताः । २ मत्स्याः । ३ अष्टापदैः ।

चर्मणा पूर्ववत् सिन्धुमुत्तीर्य पृतनापतिः । गिरि-सागरमर्यादानजयत् सिन्धुनिष्कुटान् ॥ २४३ ॥
म्लेच्छानां दण्डमादाय, दण्डेशश्चण्डविक्रमः । आययौ सगरं वारिसम्पूर्ण इव वारिदः ॥ २४४ ॥
भोगान् विचित्रान् भुञ्जानः, सोऽर्च्यमानो महीश्वरैः । तत्रैवाऽस्थाच्चिरं नास्ति, विदेशः क्वोऽपि[1] दोष्मताम् ॥ २४५ ॥
अन्यदा चक्रिणश्चक्रं, निश्चक्रामाऽऽयुधौकसः । मार्गेणोत्तरपूर्वेण, ग्रीष्मे बिम्बमिवोष्णगोः ॥ २४६ ॥
गच्छंश्चक्रानुगो राजा, क्षुद्रस्य हिमवद्गिरेः । नितम्बं दक्षिणं प्राप, दत्तावासोऽध्युवास च ॥ २४७ ॥
उद्दिश्य क्षुद्रहिमवत्कुमारं तत्र सोऽकरोत् । तपोऽष्टमं पौषधं चोपाददे पौषधौकसि ॥ २४८ ॥
पौषधान्ते रथारूढोऽगात् क्षुद्रहिमवद्गिरिम् । जघान च रथाग्रेण, स त्रिर्दन्तेन दन्तिवत् ॥ २४९ ॥
नियम्य तुरगांस्तत्र, कृत्वाऽधिज्यं शरासनम् । निजनामाङ्कितं बाणं, विससर्ज नरेश्वरः ॥ २५० ॥
द्वासप्ततिं योजनानि, गत्वा क्रोशमिव क्षणात् । सोऽपतत् क्षुद्रहिमवत्कुमारस्य पुरो भुवि ॥ २५१ ॥
क्षणं चुक्रोप बाणेन, बाणनामाक्षरैः पुनः । क्षणादशाम्यत् स क्षुद्रहिमाचलकुमारकः ॥ २५२ ॥
गोशीर्षचन्दनं सर्वौषधीः पद्महृदोदकम् । देवदूष्याणि तं बाणं, रत्नालङ्करणानि च ॥ २५३ ॥
देवद्रुपुष्पमालाश्चोपनिन्ये[2] सगराय सः । प्रत्यपद्यत सेवां च, जयेत्युक्त्वा नभःस्थितः ॥ २५४ ॥
तं विसृज्य ततो राजा, वालयित्वा निजं रथम् । ययावृषभकूटाद्रिं, त्रिर्जघान तथैव तम् ॥ २५५ ॥
अश्वान् नियम्य काकिण्या, प्राग्भागे तस्य भूभृतः । द्वितीयः सगरश्चक्रीत्यक्षराणि लिलेख सः ॥ २५६ ॥
ततो रथं वालयित्वा, स्कन्धावारमुपेत्य च । विदधेऽष्टमभक्तान्तपारणं पृथिवीपतिः ॥ २५७ ॥

१ सूर्यस्य । ३ कल्पवृक्षपुष्पमालाः ।

हिमाचलकुमारस्य, चक्रेऽष्टाह्निकोत्सवम् । ऋद्ध्या महत्या सगरः, पूर्णदिग्जयसङ्गरः[१] ॥ २५८ ॥
मार्गेणोत्तरपूर्वेण, चक्ररत्नानुगस्ततः । गङ्गादेवीभवनाभिमुखं सुखमगान्नृपः ॥ २५९ ॥
निदधे शिबिरं गङ्गासद्मनोऽनतिदूरतः । विदधेऽष्टमभक्तं च, गङ्गामुद्दिश्य भूपतिः ॥ २६० ॥
सिन्धुदेवीव गङ्गाऽपि, विज्ञायाऽऽसनकम्पतः । उपतस्थेऽन्तरिक्षस्थाऽष्टमान्ते चक्रवर्तिनम् ॥ २६१ ॥
सहस्रं रत्नकुम्भानामष्टोत्तरमदत्त च । स्वर्ण-माणिक्यचित्रं च, रत्नसिंहासनद्वयम् ॥ २६२ ॥
विसृज्य गङ्गां सगरो, विदधेऽष्टमपारणम् । अष्टाह्निकोत्सवं चाऽस्याः, प्रीतये प्रीतमानसः ॥ २६३ ॥
चक्रादिष्टेन मार्गेण, दिशा दक्षिणया ततः । सोऽखण्डविक्रमः खण्डप्रपाताभिमुखं ययौ ॥ २६४ ॥
आरात् खण्डप्रपातायाः, स्कन्धावारं न्यधत्त सः । नाट्यमालकमुद्दिश्याऽष्टमभक्तं चकार च ॥ २६५ ॥
अष्टमान्ते नाट्यमालो, विज्ञायाऽऽसनकम्पतः । सोपायन उपागच्छद्, ग्रामेश इव भूपतिम् ॥ २६६ ॥
नानाविधानलङ्कारान्, स ददौ चक्रवर्तिनः । प्रत्यपद्यत सेवां च, विनीतो मण्डलेशवत् ॥ २६७ ॥
विसृज्य तं च सगरः, पारणानन्तरं मुदा । अष्टाह्निकां तस्य चक्रे, कृतप्रतिकृतोपमाम् ॥ २६८ ॥
अथ चक्रधरादेशात्, सेनानीरर्धसेनया । सिन्धुनिष्कुटवद् गाङ्गं, प्राग्निष्कुटमसाधयत् ॥ २६९ ॥
वैताढ्यपर्वतश्रेणिद्वयविद्याधरानथ । पर्वतीयानिव नृपान्, सगरस्तरसाऽजयत् ॥ २७० ॥
रत्नालङ्कार-वासांसि, हस्तिनस्तुरगांश्च ते । चक्रनाथस्य ददिरे, सेवां च प्रतिपेदिरे ॥ २७१ ॥
विद्याधरान् धराधीशः, सत्कृत्य विससर्ज तान् । तुष्यन्ति हि महीयांसः, सेवामय्या गिराऽपि हि ॥ २७२ ॥

१ प्रतिज्ञा ।

नृपादेशेन सेनानीरष्टमादिपुरःसरम् । तमिस्रावद् गुहां खण्डप्रपातामुदघाटयत् ॥ २७३ ॥
सगरो गजमारुह्य, तत्कुम्भे दक्षिणे मणिम् । मेरुशृङ्ग इवाऽऽदित्यं, न्यस्य तां प्राविशद् गुहाम् ॥ २७४ ॥
मण्डलान्यालिखन् प्राग्वत्, काकिण्या पार्श्वयोर्द्वयोः । उत्तीर्ण प्राग्वदुन्मग्ना-निमग्ने निम्नगे अपि । २७५ ॥
गुहाया मध्यतस्तस्या अपाग्द्वारेण भूपतिः । स्वयमुद्घाटितेनाऽथ, नद्योघ इव निर्ययौ ॥ २७६ ॥
गङ्गायाः पश्चिमे कूले, स्कन्धावारं न्यधान्नृपः । उद्दिश्य निधिरत्नानि, विदधे चाऽष्टमं तपः ॥ २७७ ॥
तदन्ते नैसर्प-पाण्डू, पिङ्गलः सर्वरत्नकः । महापद्मः काल-महाकालौ माणव-शङ्खकौ ॥ २७८ ॥
इत्येते नव निधयः, कृतसन्निधयोऽमरैः । सहस्रसङ्ख्यैः प्रत्येकं, नरेन्द्रमुपतस्थिरे ॥ २७९ ॥
इत्यूचुस्ते वयं गङ्गामुखमागधवासिनः । आगतास्त्वां महाभाग!, त्वद्भाग्येन वशीकृताः ॥ २८० ॥
यथाकाममविश्रान्तमुपभुङ्क्ष्व प्रयच्छ च । अपि क्षीयेत पाथोऽब्धौ, न तु क्षीयामहे वयम् । २८१ ॥
नवभिर्यक्षसहस्रैः, किङ्करैरिव तावकैः । आपूर्यमाणाः सततं, चक्राष्टकप्रतिष्ठिताः ॥ २८२ ॥
द्वादशयोजनायामा, नवयोजनविस्तृताः । भूमध्ये सञ्चरिष्यामो, देव! त्वत्पारिपार्श्विकाः ॥ २८३ ॥
॥ चतुर्भिः कलापकम् ॥
तद्वाचमनुमन्याऽथ, भूपतिः कृतपारणः । अष्टाह्निकोत्सवं तेषामकार्षीदातिथेयवत् ॥ २८४ ॥
सेनानीः सगरादेशाद्, द्वितीयमपि निष्कुटम् । प्राचीनं जाह्नवीदेव्याः, साधयामास खेटवत् ॥ २८५ ॥
चतुर्भिर्निष्कुटैर्गङ्गा-सिन्ध्वोर्मध्यस्थितेन च । खण्डद्वयेन षट्खण्डं, भारतं वर्षमित्यदः ॥ २८६ ॥

१ क्षुद्रग्रामवत् ।

द्वात्रिंशताऽब्दसहस्रैः, सगरस्तदशात् सुखम् । अनुत्सुकानां शक्तानां, लीलापूर्वाः प्रवृत्तयः ॥ २८७ ॥
चतुर्दशमहारत्नपतिर्नवनिधीश्वरः । द्वात्रिंशता सहस्रैश्च, सेव्यमानो महीभुजाम् ॥ २८८ ॥
जायानां राजपुत्रीणां, [1]तैः सहस्रैः समन्वितः । सहस्रैर्जानपदीनां, स्त्रीणां तावद्भिरन्वितः ॥ २८९ ॥
द्वात्रिंशतो जनपदसहस्राणामधीश्वरः । द्वासप्ततेः पुरवरसहस्राणां च शासिता ॥ २९० ॥
एकसहस्रोनद्रोणमुखलक्षस्य चाऽधिपः । पत्तनाष्टचत्वारिंशत्सहस्राणामधीश्वरः ॥ २९१ ॥
कर्बटानां मडम्बानां चतुर्विंशिसहस्रपः । चतुर्दशसहस्राश्च सम्बाधानामपीश्वरः ॥ २९२ ॥
खेटकानां सहस्राणि, षोडशाऽपि च रक्षिता । तथाऽऽकरसहस्राणां, विंशतेरेक ईशिता ॥ २९३ ॥
पञ्चाशतः कुराज्यानामेकोनायाश्च नायकः । [2]अन्तरोदकषट्पञ्चाशतश्च परिपालकः ॥ २९४ ॥
प्राप्तः षण्णवतिग्रामकोटीनां स्वामितां च ताम् । पत्तीनां षण्णवत्या च, कोटिभिः परिवारितः ॥ २९५ ॥
कुञ्जराणां वाजिनां च, रथानां च पृथक् पृथक् । लक्षाभिश्चतुरशीत्या, छादितावनिमण्डलः ॥ २९६ ॥
ततो निववृते चक्री, चक्ररत्नपथानुगः । ऋद्ध्या महत्या सम्पूर्णः, पोतो द्वीपान्तरादिव ॥ २९७ ॥

॥ दशभिः कुलकम् ॥

ग्रामेशैर्दुर्गपालैश्च, मण्डलेशैश्च वर्त्मनि । क्रियमाणोचितार्घश्रीर्द्वितीयाचन्द्रमा इव ॥ २९८ ॥
प्रसारिभिरभिव्योम, पुरतः सैन्यरेणुभिः । शस्यमानागमो दूराद्, वर्धापकनरैरिव ॥ २९९ ॥
हेषितैर्बृंहितैर्बन्दिघोषैस्तूर्यारवैरपि । स्पर्धयेव प्रसृमरैर्दिशो बधिरयन्निव ॥ ३०० ॥

१ द्वात्रिंशता । २ अन्तरद्वीपः ।

दिने दिने योजनिकैः, प्रयाणैः सुखमापतन् । सगरो नगरीं प्राप, विनीतां दयितामिव ॥ ३०१ ॥
॥ चतुर्भिः कलापकम् ॥

विनीतायाः परिसरे, सरित्पतिरिवावधौ । निवेश्य शिबिरं राजाऽवतस्थे स्थेमपर्वतः[1] ॥ ३०२ ॥
तत्राऽपरेद्युः सगरो, वाह्याल्यां[2] वाहकेलये[3] । एकं सूक्लमारुह्य[4], ययौ सर्वकलानिधिः[5] ॥ ३०३ ॥
तत्र विक्रमयामास, चतुरं तं तुरङ्गमम् । उत्तरोत्तरधारासु, क्रमेणाऽऽरोपयच्च सः ॥ ३०४ ॥
आरूढः पञ्चमीं धारामुत्पपात नभस्तले । वल्गादिसंज्ञानभिज्ञीभूतो भूतैरिवाश्रितः ॥ ३०५ ॥
सगरं सोऽपहृत्याऽश्वोऽश्वरूप इव राक्षसः । महारण्ये प्रचिक्षेप, कालाक्षेपेण रंहसा ॥ ३०६ ॥
वल्गां सामर्षमाकृष्योरुभ्यां चाऽऽक्रम्य पार्श्वयोः । दधार सगरोऽश्वं तं, झम्पां दत्त्वोत्ततार च ॥ ३०७ ॥
विधुरस्तुरगः सोऽपि, पपात पृथिवीतले । पृथ्वीनाथोऽपि पादाभ्यामेव गन्तुं प्रचक्रमे ॥ ३०८ ॥
यावत् किञ्चिद् ययौ तावद्, ददर्शैकं महासरः । आदित्यकरपर्यस्तां, भूभ्रष्टामिव चन्द्रिकाम् ॥ ३०९ ॥
तत्र श्रमापनोदाय, सस्त्रौ वन्य इव द्विपः । स्वादु स्वच्छं पद्मगन्धि, शीतं च स पयः पपौ ॥ ३१० ॥
निर्ययौ सरसस्तस्मात्, स तस्थौ तीरसीमनि । ददर्श चैकां युवतिं, जलदेवीमिवाऽग्रतः ॥ ३११ ॥
तां नवाम्भोजवदनां, नीलोत्पलविलोचनाम् । तरङ्गायितलावण्यजलां चक्रयुगस्तनीम् ॥ ३१२ ॥
स्मेरकोकनदोद्दामपाणिपादमनोरमाम्[6] । शरीरिणीं सरोलक्ष्मीं, स पश्यन्नित्यचिन्तयत् ॥ ३१३ ॥
अप्सराः किं? व्यन्तरी किं?, किमथो नागकन्यका? । विद्याधरी वा किमियं?, न सामान्येदृशी भवेत् ॥३१४॥

१ पराक्रमगिरिः । २ अश्वक्रीडाभूमौ । ३ अश्वक्रीडायै । ४ उद्धताश्वम् । ५ अविलम्बेन । ६ रक्तकमलम् ।

न तथा हृदयानन्दं, करोति सरसीजलम् । यथा दर्शनमेतस्याः, सुधावृष्टिसहोदरम् ॥ ३१५ ॥
तयाऽपि दृष्टे राजा, राजीवदल[1]चक्षुषा । ततः संवरितेनेवाऽनुरागेण तदैव हि ॥ ३१६ ॥
सद्योऽपि काम[2]विधुरा, सा सखीभिः कथञ्चन । संस्थाप्याऽऽनीयताऽऽवासे, म्लाना सायमिवाऽब्जिनी ॥३१७॥
सगरोऽपि सरस्तीरे, शनैर्गच्छन् स्मरातुरः । एत्य कञ्चुकिना नत्वा, चैवमूचे कृताञ्जलिः ॥ ३१८ ॥
स्वामिन्निहैव भरतक्षेत्रवैताढ्यपर्वते । वल्लभं सम्पदामस्ति, पुरं गगनवल्लभम् ॥ ३१९ ॥
विद्याधरपतिस्तत्र, ख्यातो नाम्ना सुलोचनः । त्रि[3]लोचनसखः पुर्यामलकायामिवाऽभवत् ॥ ३२० ॥
सहस्रनयनो नाम, तस्याऽस्ति तनयो नयी । सुकेशा दुहिता चेयं, विश्वस्त्रै[4]णशिरोमणिः ॥ ३२१ ॥
नैमित्तिकेन चैकेन, जातमात्राऽपि वर्णिता । स्त्रीरत्नमेषा महिषी, भवित्री चक्रवर्तिनः ॥ ३२२ ॥
इतश्च पूर्णमेघेन, रथनुपुरभूभुजा । भूयो भूयो याचितेयमुद्वोढुमनुरागिणा ॥ ३२३ ॥
तां पितर्यददाने च, हर्तुकामो हठादपि । पूर्णमेघो मेघ इव, गर्जन् योद्धुमुपाययौ ॥ ३२४ ॥
पूर्णमेघश्चिरतरं, योधयित्वा सुलोचनम् । चक्रे दीर्घभुजो दीर्घनिद्रामुद्रितलोचनम् ॥ ३२५ ॥
स्वधनं तद्धन इवोपादाय भगिनीमिमाम् । सहस्रनयनोऽत्राऽऽगान्महात्मन्! सपरिच्छदः ॥ ३२६ ॥
सरोवरे तया चेह, क्रीडन्त्या त्वमसीक्षितः । शिक्षिता चाऽऽशु कामेन, विकारं[5] वेदनामयम् ॥ ३२७ ॥
घर्मार्त्तेव स्वेदवती, स्तब्धा पाञ्चालिकेव सा । शीतार्तेव सरोमाञ्चा, श्लेष्मलेव स्खलत्स्वरा ॥ ३२८ ॥
भीते वेपथुमती, विवर्णा रोगभागिव । उदश्रुः शोकमग्नेव, योगिनीव लयस्थिता ॥ ३२९ ॥

१ कमलपत्रनेत्रया । २ कामार्दिता । ३ कुबेरः । ४ स्त्रीणां समूहः स्त्रैणम् । ५ श्लेष्मवतीव ।

क्षणादवस्थावैचित्र्यं, प्रपेदे तव दर्शनात् । तत् त्रायस्व जगत्रातर्न यावत् सा विपद्यते[1] ॥ ३३० ॥
सौविदल्ले[2] वदत्येवं, सहस्रनयनोऽपि सः । आययौ नभसा तत्र, नमश्चक्रे च चक्रिणम् ॥ ३३१ ॥
सोऽनुमान्य निजावासेऽनैषीत् सगरचक्रिणम् । स्त्रीरत्नस्य सुकेशाया, दानाच्च तमतोषयत् ॥ ३३२ ॥
ततश्च तौ विमानेन, सहस्रेक्षण-चक्रिणौ । वैताढ्यशैले ययतुः, पुरं गगनवल्लभम् ॥ ३३३ ॥
निवेश्य पैतृके राज्ये, सहस्रनयनं ततः । सर्वविद्याधराधीशं, व्यधत्त धरणीधवः ॥ ३३४ ॥
स्त्रीरत्नं तदुपादाय, सगरश्चक्रवर्त्यथ । जगाम साकेतपुरं, पुरन्दरपराक्रमः ॥ ३३५ ॥
समुद्दिश्य विनीतां च, चक्रेऽष्टमतपो नृपः । पौषधं पौषधागारे, प्रपेदे च यथाविधि ॥ ३३६ ॥
अष्टमान्ते च निष्क्रम्य, पौषधागारतस्ततः । समं परिजनैश्चक्रे, पारणं धरणीधवः ॥ ३३७ ॥
पदे पदे तोरणिनीं, भ्रूविकारवतीमिव । मुक्तास्वस्तिकसन्दोहकान्तिभिः सस्मितामिव ॥ ३३८ ॥
अदृश्शोभापताकाभिर्नर्तनायोद्धुजामिव । धूपघट्युत्थधूमाल्या, कृतपत्रलतामिव ॥ ३३९ ॥
मञ्चस्थरत्नपात्रीभिर्नेत्रविस्तारिणीमिव । मञ्चैर्विचित्रैरचितशयनीयामिवोच्चकैः[3] ॥ ३४० ॥
विमानकिङ्किणीक्वाणैर्मङ्गलोद्गायनीमिव । पुरीं वासकसज्जां तां, प्रविवेश विशांपतिः ॥ ३४१ ॥
॥ चतुर्भिः कलापकम् ॥
उत्तोरणमुत्पताकमुद्वैतालिकमङ्गलम् । विमानमिव शक्रः स्वं, गृहाङ्गणमगान्नृपः ॥ ३४२ ॥
सान्निध्यभाजां देवानां, स सहस्राणि षोडश । द्वात्रिंशतं सहस्राणि, तथा वसुमतीभुजाम् ॥ ३४३ ॥

१ म्रियते । २ कञ्चुकिनी । ३ प्रियसमागमवासरे सज्जाम् ।

महारत्नानि सेनानी-पुरोधो-गृहि-वर्धकीन् । त्रीणि त्रिषष्टियुक्तानि, सूपकारशतानि च ॥ ३४४ ॥
श्रेणिप्रश्रेणिका अष्टादश चाऽन्यानपि क्रमात् । दुर्गपाल-श्रेष्ठि-सार्थवाहादीन् व्यसृजत् स्वयम् ॥ ३४५ ॥
॥ त्रिभिर्विशेषकम् ॥

सान्तःपुरपरीवारः, स्त्रीरत्नेन समन्वितः । सतां मन इवोदारं, राजा वेश्माऽविशन्निजम् ॥ ३४६ ॥
तत्र स्नानगृहे स्नात्वा, देवतावसरौकसि । कृतदेवार्चनो राजा, बुभुजे भोजनौकसि ॥ ३४७ ॥
सङ्गीतकैर्नाटकैश्च, विनोदैरपरैरपि । ततश्चाऽरंस्त सगरः, साम्राज्यश्रीलताफलैः ॥ ३४८ ॥
एत्याऽपरेद्युः सगरं, देवाद्या एवमभ्यधुः । विदधे भारतं क्षेत्रं, वशंवदमिदं त्वया ॥ ३४९ ॥
युष्माकं चक्रवर्तित्वाभिषेकमधुना वयम् । करिष्यामोऽर्हतो जन्माभिषेकमिव वासवाः ॥ ३५० ॥
अनुजज्ञे च तांश्चक्री, लीलोन्नमितया भ्रुवा । महात्मानः प्रणयिनां, प्रणयं खण्डयन्ति न ॥ ३५१ ॥
अथाऽऽभियोगिका देवाः, पुर्या उत्तरपूर्वतः । विचक्रुरभिषेकाय, मण्डपं रत्नमण्डितम् ॥ ३५२ ॥
समुद्र-तीर्थ-ह्रदिनी-ह्रदेभ्यः पावनीरपः । गिरिभ्यश्चौषधीर्दिव्यास्तत्राऽऽनिन्युर्दिवौकसः ॥ ३५३ ॥
अथ सान्तःपुरः सस्त्रीरत्नश्चक्रधरोऽविशत् । तं रत्नमण्डपं रम्यं, रत्नाचलगुहामिव ॥ ३५४ ॥
समृगेन्द्रासनं तत्र, स्नानपीठं मणीमयम् । नृपः प्रदक्षिणीकृत्याऽऽहिताग्निरिव पावकम् ॥ ३५५ ॥
सान्तःपुरस्तदारुह्य, पूर्वसोपानवर्त्मना । सिंहासनमलञ्चक्रे, प्राङ्मुखः पृथिवीपतिः ॥ ३५६ ॥
द्वात्रिंशद्राजसहस्राण्युदक्सोपानवर्त्मना । आरुह्य तत्र न्यषदन्, हंसाः कमलषण्डवत् ॥ ३५७ ॥
स्वस्वभद्रासनासीना, बद्धाञ्जलिपुटाश्च ते । तस्थुः स्वामिनि दत्ताक्षाः, शक्रे सामानिका इव ॥ ३५८ ॥

सेनापतिर्गृहपतिः, पुरोधा वर्धकिस्तथा । अपरे बहवः श्रेष्ठि-सार्थवाहादयोऽपि हि ॥ ३५९ ॥
स्नानपीठं तदारुह्याऽपाच्यसोपानवर्त्मना । निषेदुः स्वस्वस्थानेषु, ज्योतींषीव नभस्तले ॥३६०॥ ॥ युग्मम् ॥
तस्मिन् शुभे दिने वारे, नक्षत्रे करणेऽपि च । योगे चन्द्रे च लग्ने च, सर्वग्रहबलान्विते ॥ ३६१ ॥
अभिषेकं महीभर्तुश्चक्रुर्देवादयः क्रमात् । सौवर्णैः राजतैः रात्नैः, कलशैः कमलाननैः ॥ ३६२ ॥ ॥ युग्मम् ॥
वाससा देवदूष्येण, राज्ञोऽङ्गं ममृजुश्च ते । हस्तेन मृदुना सौधभित्तिं चित्रकरा इव ॥ ३६३ ॥
दर्दर-मलयभवैरथ गन्धैः सुगन्धिभिः । राज्ञोऽङ्गं छुरयामासुर्ज्योत्स्नयेव नभस्तलम् ॥ ३६४ ॥
दिव्यं च सुमनोदामोद्दामगन्धर्द्धिबन्धुरम् । स्वानुरागमिव दृढं, बबन्धुर्मूर्ध्नि भूपतेः ॥ ३६५ ॥
वासांसि देवदूष्याणि, रत्नालङ्करणानि च । ततस्तदुपनीतानि, पर्यधाद् वसुधाधवः ॥ ३६६ ॥
ततश्चक्रधरस्तत्र, मेघध्वनितधीरया । गिरा स्वनगराध्यक्षं, समादिक्षदिति स्वयम् ॥ ३६७ ॥
अदण्ड-शुल्कामभटप्रवेशामकरामिमाम् । महोत्सवां कुरु पुरीं, यावद् द्वादशवत्सरीम् ॥ ३६८ ॥
इत्याज्ञां नगराध्यक्षो, हस्त्यारूढैर्निजैर्नरैः । पुर्यामाघोषयामास, सद्यो डिण्डिमिकैरिव ॥ ३६९ ॥
इत्थं चक्रिपदाभिषेकपिशुनः षट्खण्डपृथ्वीपतेस्तस्य स्वर्नगरीविलासविभवस्तेयव्रतायां पुरि ।
प्रत्यट्टं प्रतिमन्दिरं प्रतिपथं चाऽऽनन्दमुन्मुद्रयन्नुच्चैर्द्वादश वत्सराणि समभूत् तस्यां महानुत्सवः ॥ ३७० ॥

इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये द्वितीये पर्वणि सगरदिग्जयचक्रवर्तित्वाभिषेकवर्णनो नाम चतुर्थः सर्गः ।

पञ्चमः सर्गः ।

अथ साकेतनगरोद्यानेऽजितजिनेश्वरः । भगवान् समवासार्षीत्, सेव्यमानः सुरा-ऽसुरैः ॥ १ ॥
वासवादिषु देवेषु, सगरादिषु राजसु । आसीनेषु यथास्थानं, विदधे देशनां विभुः ॥ २ ॥
तदा च वैताढ्यगिरौ, पूर्णमेघं सहस्रदृक् । स्मरन् पितृवधं क्रुद्धोऽवधीत् तार्क्ष्य इवोरगम् ॥ ३ ॥
पूर्णमेघात्मजस्तस्मान्नष्टोऽथ घनवाहनः । तत्राऽऽजगाम समवसरणे शरणेच्छया ॥ ४ ॥
स त्रिः प्रदक्षिणीकृत्य, भगवन्तं प्रणम्य च । उपपादमुपाविक्षदुपवृक्षमिवाऽध्वगः[1] ॥ ५ ॥
समाकृष्याऽपि पातालाद्, भ्रंशयित्वा दिवोऽपि तम् । बलीयसो वा शरणात्, कृष्ट्वा हन्मीति विब्रुवन् ॥६॥
तस्याऽनुपदमेवाऽथ, सहस्राक्ष उदायुधः । आगात् समवसरणेऽपश्यच्च घनवाहनम् ॥ ७ ॥
प्रशान्तकोपस्त्यक्तास्त्रः, प्रभावात् परमेशितुः । नत्वा प्रदक्षिणापूर्वं, यथास्थानमुपाविशत् ॥ ८ ॥
सगरश्चक्रभृदथ, पप्रच्छ परमेश्वरम् । किं वैरकारणं स्वामिन्!, पूर्णमेघ-सुनेत्रयोः ॥ ९ ॥
आचख्यौ भगवानेवमादित्याभे पुरे पुरा । अभवद् भावनो नाम, द्रव्यकोटीश्वरो वणिक् ॥ १० ॥
स्वसूनोर्हरिदासस्य, सोऽर्पयित्वाऽखिलं धनम् । देशान्तरं वणिज्यायै, जगाम श्रेष्ठिभावनः ॥ ११ ॥
विदेशे द्वादशाब्दानि, स्थित्वोपार्ज्य महद् धनम् । अययौ भावनश्रेष्ठी, तस्थौ च नगराद् बहिः ॥ १२ ॥
तत्र मुक्त्वा परीवारमेकाक्यपि हि भावनः । निश्याययौ निजे सद्मन्युत्कण्ठा हि बलीयसी ॥ १३ ॥

१ वृक्षसमीपम् ।

प्रविशन् हरिदासेन, चौरोऽसाविति शङ्क्या । निहतः खड्गद्यातेन, विमर्शः[१] क्वाऽल्पमेधसाम्? ॥ १४ ॥
स्वस्य व्यापादकं ज्ञात्वा, तदानीमपि भावनः । तत्कालकलितद्वेषः, कालधर्ममुपाययौ ॥ १५ ॥
स ज्ञात्वा पितरं पश्चात्, पश्चात्तापकदर्थितः । चकार प्रेतकार्याणि, सशल्यस्तेन[२] कर्मणा ॥ १६ ॥
विपेदे हरिदासोऽपि, गते काले कियत्यपि । दुःखदान् द्वावपि ततो, भ्रेमतुः कतिचिद् भवान् ॥ १७ ॥
किञ्चिच्च सुकृतं कृत्वा, जीवोऽभूद् भावनस्य तु । पूर्णमेघो हरिदासजीवस्त्वासीत् सुलोचनः ॥ १८ ॥
इति प्राग्जन्मसंसिद्धं, पूर्णमेघ-सुनेत्रयोः । वैरं प्राणान्तिकं राजन्नैहिकं त्वानुषङ्गिकम् ॥ १९ ॥
भूयोऽपि सगरोऽपृच्छत्, तत्सून्वोरनयोर्मिथः । को वैरहेतुः? स्नेहश्च, सहस्राक्षे कुतो मम? ॥ २० ॥
स्वाम्यूचे दानशीलस्त्वं, परिव्राड् रम्भकाभिधः । प्राग्भवेऽभूस्तवाऽभूतां, शिष्यौ शश्यावली त्विमौ ॥ २१ ॥
अभूच्चाऽतिविनीतत्वादावलिस्तेऽतिवल्लभः । गोधेनुमेकामक्रीणादन्यदा द्रविणेन सः ॥ २२ ॥
भेदं गोस्वामिनः कृत्वा, कठोरहृदयः शशी । अन्तराले पतित्वैव, तां क्रीणाति स्म धेनुकाम् ॥ २३ ॥
केशाकेशि मुष्टामुष्टि, दण्डादण्डि तयोस्ततः । युद्धं प्रववृते घोरं, शशिना चाऽऽवलिर्हतः ॥ २४ ॥
शशी चिरं भवं भ्रान्त्वा, जज्ञेऽसौ मेघवाहनः । आवलिस्तु सहस्राक्षस्तदिदं वैरकारणम् ॥ २५ ॥
भ्रान्त्वा दानप्रभावेण, रम्भकोऽपि गतीः शुभाः । चक्र्यभूस्त्वं सहस्राक्षे, स्नेहः प्राग्जन्मभूश्च ते ॥ २६ ॥
अथ रक्षःपतिर्भीमो, निषण्णस्तत्र पर्षदि । उत्थायाऽऽलिङ्ग्य रभसान्मेघवाहनमब्रवीत् ॥ २७ ॥
पुष्करद्वीपभरतक्षेत्रे वैताढ्यपर्वते । प्राग्भवे काञ्चनपुरे, विद्युद्दंष्ट्रो नृपोऽभवम् ॥ २८ ॥

१ विचारः । २ दुःखसहितः ।

तस्मिन् भवे ममाऽभूस्त्वं, तनयो रतिवल्लभः । अत्यन्तवल्लभो वत्स!, साधु दृष्टोऽसि सम्प्रति ॥ २९ ॥
तदेवं सम्प्रत्यपि मे, पुत्रोऽसि परिगृह्यताम् । सैन्यं मदीयं त्वदीयमथाऽन्यदपि यन्मम ॥ ३० ॥
लवणोदे पयोराशौ, दुर्जयो द्युसदामपि । योजनानां सप्तशतीं, दिक्षु सर्वासु विस्तृतः ॥ ३१ ॥
राक्षसद्वीप इत्यस्ति, सर्वद्वीपशिरोमणिः । तदन्तरे त्रिकूटाद्रिर्भूमिनाभौ सुमेरुवत् ॥ ३२ ॥
महर्द्धिर्वलयाकारो, योजनानि नवोन्नतः । पञ्चाशतं योजनानि, विस्तीर्णोऽस्त्यतिदुर्गमः ॥ ३३ ॥
तस्योपरिष्टात् सौवर्णप्राकार-गृह-तोरणा । मया लङ्केति नाम्ना पूरधुनैवाऽस्ति कारिता ॥ ३४ ॥
षड् योजनानि भूमध्यमतिक्रम्य चिरन्तनी । शुद्धस्फटिकवप्राङ्का, नानारत्नमयालया ॥ ३५ ॥
सपादयोजनशतप्रमाणा प्रवरा पुरी । मम पातालल्लङ्केति, विद्यते चाऽतिदुर्गमा ॥ ३६ ॥
पुरद्वयमिदं वत्साऽऽदत्स्व तन्नृपतिर्भव । भवत्वद्यैव ते तीर्थनाथदर्शनजं फलम् ॥ ३७ ॥
इत्युक्त्वा राक्षसपतिर्माणिक्यैर्नवभिः कृतम् । ददौ तस्मै महाहारं, सद्यो विद्यां च राक्षसीम् ॥ ३८ ॥
भगवन्तं नमस्कृत्य, तदैव घनवाहनः । आगत्य राक्षसद्वीपे, राजाऽभूल्लङ्क्योस्तयोः ॥ ३९ ॥
राक्षसद्वीपराज्येन, राक्षस्या विद्ययाऽपि च । तदादि तस्य वंशोऽपि, ययौ राक्षसवंशताम् ॥ ४० ॥
एवं स्थिते च सर्वज्ञो, विहरन्नन्यतो ययौ । स्वं स्वं स्थानं ययुस्तेऽपि, सुरेन्द्र-सगरादयः ॥ ४१ ॥
इतः पुनश्चतुःषष्टिसहस्रस्त्रीभिरन्वितः । रतिसागरनिमग्नो[१], नाकीवाऽरंस्त[२] चक्रभृत् ॥ ४२ ॥
तस्याऽन्तःपुरसम्भोगजन्मा म्लानिरपास्यत[३] । स्त्रीरत्नभोगादध्वन्यश्रमोऽपाच्यनिलादिव[४] ॥ ४३ ॥

१ कामक्रीडासक्तः । २ देवः । ३ ननाश । ४ दक्षिणपवनात् ।

एवं सुखं वैषयिकं, तस्याऽनुभवतोऽनिशम् । जह्नुप्रभृतयः षष्टिसहस्रा जज्ञिरे सुताः ॥ ४४ ॥
धात्रीभिः पाल्यमानास्ते, क्रमाद् ववृधिरे सुताः । उद्यानपालीभिरिवोद्यानजाता महीरुहाः ॥ ४५ ॥
ते कलाग्रहणं चक्रुः, शनै रजनिजानिवत्[1] । वपुःश्रीवल्ल्युपवनं, यौवनं च प्रपेदिरे ॥ ४६ ॥
ते निजं दर्शयामासुरस्त्रविद्यासु कौशलम् । ददृशुः परकीयं च, न्यूनाधिकदिदृक्षया ॥ ४७ ॥
वाह्याल्यां भ्रमिमानीय, समुद्रावर्त्तलीलया । दुर्दमानप्यदमयन्, शूकलांस्ते कलाविदः ॥ ४८ ॥
द्रुपत्रस्याऽप्यसहनान्, स्कन्धदेशविवर्त्तिनः । व्यालानपि[2] वशीचक्रुः, कुञ्जरांस्तेऽतिनिर्जरान्[3] ॥ ४९ ॥
उद्यानादिषु ते स्वैरं, रेमिरे सवयोवृताः[4] । अवन्ध्यशक्तयो विन्ध्याटव्यां मदकला[5] इव ॥ ५० ॥
अथ चक्रिणमन्येद्युः, सगरं सदसि स्थितम् । इति विज्ञपयामासुस्ते कुमारा महौजसः ॥ ५१ ॥
अमरो मागधपतिः, प्राचीमुखविभूषणः । दक्षिणाशैकतिलको, वरदामपतिस्तथा ॥ ५२ ॥
पश्चिमाशाकिरीटश्रीः, प्रभासाधिपतिः स च । भुजे इव भुवो गङ्गा-सिन्धू अपि सरिद्वरे ॥ ५३ ॥
वैताढ्याद्रिकुमारश्च, भरताम्भोजकर्णिका । कृतमालस्तमिस्राद्वाःक्षेत्रपाल इवोच्चकैः ॥ ५४ ॥
भरतावधिभूस्तम्भो, हिमाचलकुमारकः । खण्डप्रपाताधिष्ठानो, नाट्यमालः स चोत्कटः ॥ ५५ ॥
नैसर्पप्रमुखास्ते च, नवाऽपि निधिदेवताः । दिवौकसोऽप्येवममी, नृवत् तातेन साधिताः ॥ ५६ ॥

॥ पञ्चभिः कुलकम् ॥

षट्खण्डमरिषड्वर्गवदिदं वसुधातलम् । स्वयमेव पराजिग्ये, तातेनाऽमिततेजसा ॥ ५७ ॥

१ चन्द्रवत् । २ दुष्टान् । ३ देवेभ्योऽप्यधिकाः । ४ मित्रैर्वृताः । ५ मत्तगजाः

कृत्यशेषं न ते किञ्चिदस्ति दोर्विक्रमोचितम् । त्वत्पुत्रत्वं ज्ञापयामो, यत्[१] कृत्वा देव! सम्प्रति ॥ ५८ ॥
तातेन साधितेऽमुष्मिन्, भूतले सकलेऽपि तत् । स्वेच्छाविहरणेनैव, तात! पुत्रत्वमस्तु नः ॥ ५९ ॥
ततस्तातप्रसादेन, भवनाङ्गणवद् भुवि । वयं विहर्तुमिच्छामः, स्वच्छन्दं वनहस्तिवत् ॥ ६० ॥
प्रणयप्रार्थनां तां च, स तेषां प्रत्यपद्यत । महत्सु याञ्चाऽन्यस्याऽपि, न मुधा किं पुनस्तुकाम्[२]? ॥ ६१ ॥
अथ ते पितरं नत्वा, निजावासानुपेत्य च । दुन्दुभींस्ताडयामासुर्यात्रामङ्गलसूचकान् ॥ ६२ ॥
धीराणामपि सङ्क्षोभदायीन्यशुभदानि च । उत्पाताशकुनान्येषां, तदानीमिति जज्ञिरे ॥ ६३ ॥
मार्तण्डमण्डलं केतुशताकुलमजायत । रसातलद्वारमिव, महोरगकुलाकुलम् ॥ ६४ ॥
सञ्जातमध्यच्छिद्रं च, रजनीकरमण्डलम् । अदृश्यत नवोत्कीर्णदन्ताडङ्कसन्निभम् ॥ ६५ ॥
वातान्दोलितवल्लीव, चकम्पे च वसुन्धरा । शिलाशकलवृष्ट्याभा, जाताः करकवृष्टयः ॥ ६६ ॥
अजायत रजोवृष्टिः, शुष्काभ्रक्षोदसोदरा । सम्मुखो वायुरुद्दण्डो, रुष्टो रिपुरिवाऽभवत् ॥ ६७ ॥
अशिवाश्च[३] शिवाः कामं, दक्षिणस्था ववाशिरे । तत्स्पर्द्धयेव तत्रस्थाश्चुक्रुशुः कौशिका अपि ॥ ६८ ॥
चिल्लाश्च मण्डलीभूय, भ्रेमुर्नभसि नीचकैः । उच्चकैरापत्कालतचक्रक्रीडापरिस्पृशः ॥ ६९ ॥
अजायन्त च तत्कालं, गन्धेभा अपि निर्मदाः । स्रोतस्विन्य इव ग्रीष्मकाले निर्जलताजुषः ॥ ७० ॥
हयानां हेषमाणानां धूमलेखा मुखान्तरात् । निर्ययुर्भीषणतरा, बिलेभ्य इव पन्नगाः ॥ ७१ ॥
तान्यवाजीगणन्[४] सर्वाण्युत्पाताशकुनानि ते । तज्ज्ञानामपि हि नृणां, प्रमाणं भवितव्यता ॥ ७२ ॥

१ यत् कार्यं कृत्वा वयं त्वत्पुत्रा इति ज्ञापयामः । २ अपत्यानाम् । ३ अशुभसूचकाः । ४ अवगणयाञ्चक्रुः ।

कृतस्नानाः कृतप्रायश्चित्त-कौतुकमङ्गलाः । चक्रिणः सर्वसैन्येन, ते कुमाराः प्रतस्थिरे ॥ ७३ ॥
स्त्रीरत्नवर्जं रत्नानि, सर्वाण्यपि महीपतिः । प्रजिघाय[1] सुतैः सार्धमात्मैव हि सुतत्वभाक् ॥ ७४ ॥
केचिद् गजवरारूढा, दिक्पालाकारधारिणः । अश्वानधिष्ठिताः केचिदतिरेवन्तमूर्त्तयः[2] ॥ ७५ ॥
अध्यासीना रथान् केचिदादित्याद्या इव ग्रहाः । किरीटधारिणः सर्वेऽप्यधीशा द्युसदामिव ॥ ७६ ॥
वक्षः स्थललुलद्धाराः, ससरित्का इवाऽद्रयः । देवता इव भूप्राप्ता, विविधायुधपाणयः ॥ ७७ ॥
छत्रलाञ्छितमूर्धानो, द्रुमाङ्का व्यन्तरा इव । आत्मरक्षैः परिवृता, वेलाधारैरिवाऽब्धयः ॥ ७८ ॥
अविह्वस्तोदस्तहस्तैः[3], स्तूयमानाश्च मागधैः । वसुन्धरां दारयन्तस्तुरङ्गमखुरैः[4] खरैः[5] ॥ ७९ ॥
तूर्यप्रणादैर्बधिरीकुर्वाणाः सर्वतो दिशः । अन्धीकुर्वन्त उत्क्षिप्तैर्भूरजोभिश्च भूरिभिः ॥ ८० ॥
उद्यानेषु विचित्रेषूद्यानानामिव देवताः । गिरिप्रस्थेषु च गिरिकुमारा इव हारिणः[6] ॥ ८१ ॥
सरित्पुत्रा इव सरित्पुलिनेषु च चारुषु । स्वच्छन्दं रममाणास्ते, बभ्रमुर्भरतावनौ ॥८२॥ ॥ अष्टभिः कुलकम्॥
ग्रामा-ऽऽकर-पुर-द्रोणमुख-खेटादिषु व्यधुः । जिनार्चां विचरन्तस्ते, माला विद्याधरा इव ॥ ८३ ॥
भुञ्जाना बहुधा भोगान्, ददाना बहुधा धनम् । सुहृज्जनान् प्रीणयन्तो, विनिघ्नन्तोऽसुहृज्जनान्[6] ॥ ८४ ॥
दर्शयन्तः पथि चलल्लक्षपातनकौशलम् । भृशमन्यापतच्छस्त्रग्रहणस्य च नैपुणम् ॥ ८५ ॥
शस्त्राशस्त्रिकथाश्चित्रास्तास्ता नर्मकथा[7] अपि । यानाधिरूढैः कुर्वाणाः, सवयोभिः समं नृपैः ॥ ८६ ॥
अप्यालोकनमात्रेण, क्षुत्तृषाहरणौषधम् । तेऽन्यदाऽष्टापदं प्रापुरास्पदं पुण्यसम्पदाम् ॥ ८७ ॥

१ प्राहिणोत् । २ सूर्यपुत्राधिकरूपाः । ३ अव्याकुलोद्धूर्वकरैः । ४ कठोरैः । ५ मनोहराः । ६ शत्रून् । ७ हास्यकथाः ।

महासरोभिः पीयूषनिधानमिव नाकिनाम् । उपात्तनीलसंव्यानमिव[1] सान्द्रार्द्रपादपैः ॥ ८८ ॥
महापक्षधरमिव, पयोदैः पारिपार्श्विकैः । लम्बमानपताकाङ्कमिव निर्झरवारिभिः ॥ ८९ ॥
विद्याधरविलासौको, वैताढ्यमिव नूतनम् । गायन्तमिव मुदितमयूरादिकलस्वनैः ॥ ९० ॥
चैत्यं सशालभञ्जीकमिव खेचर्यधिष्ठितम्[2] । किरीटमिव मेदिन्या, रत्नोपलविनिर्मितम् ॥ ९१ ॥
नन्दीश्वरद्वीपमिव, चैत्यवन्दनकाम्यया । अभीयमानं सततं, चारणश्रमणादिभिः ॥ ९२ ॥
तं दृष्ट्वा नित्यपर्वाणं[3], पर्वतं स्फाटिकोपलम् । ते पप्रच्छुः स्वसचिवान्, सुबुद्धिप्रभृतीनिति ॥ ९३ ॥
वैमानिकानां स्वर्गस्थक्रीडाद्रिभ्य इवैककः । अवतीर्णो वसुमतीमयं को नाम पर्वतः? ॥ ९४ ॥
केन चाऽभ्रंलिहमिह, विदधे चैत्यमद्भुतम् । इदं हिमवदद्रिस्थशाश्वतायतनोपमम्? ॥ ९५ ॥
अथ ते मन्त्रिणोऽप्यूचुः, पुराऽभूदृषभः प्रभुः । युष्मद्वंशस्याऽऽदिकरस्तीर्थस्याऽप्यत्र भारते ॥ ९६ ॥
तत्सूनुर्नवनवतेर्भ्रातॄणामग्रजोऽभवत् । भरतो नाम षट्खण्डभरतक्षेत्रशासिता ॥ ९७ ॥
क्रीडागिरिरयं तस्य, चक्रिणोऽष्टापदाभिधः । अनेकाश्चर्यसदनं, सुमेरुरिव वज्रिणः ॥ ९८ ॥
साधूनां दशसाहस्र्या, सहेह च महीधरे । भगवानृषभस्वामी, जगाम पदमव्ययम् ॥ ९९ ॥
ऋषभस्वामिनिर्वाणानन्तरं भरतेश्वरः । चैत्यं सिंहनिषद्याख्यं, चक्रे रत्नोपलैरिह ॥ १०० ॥
ऋषभस्वामिनो बिम्बमर्हतां भाविनामपि । स त्रयोविंशते रत्नग्रावभिर्दोषवर्जितैः ॥ १०१ ॥
स्वस्यप्रमाणसंस्थानवर्णलाञ्छनभाञ्जि तु । बिम्बानि भक्त्या परया, व्यधत्तेह यथाविधि ॥१०२॥॥युग्मम्॥

१ उत्तरीयवस्त्रम् । २ अभिगम्यमानम् । ३ नित्योत्सवम् ।

चारणश्रमणैस्तानि, बिम्बानि प्रत्यतिष्ठिपत् । बाहुबल्यादिबन्धूनां, स्तूपान् मूर्तींश्च सोऽकृत ॥ १०३ ॥
स्थितोऽत्र वृषभस्वामी, तीर्थकृच्चक्रि-केशवान् । प्रतिकेशव-रामांश्च, भाविनस्तमजिज्ञपत् ॥ १०४ ॥
सोपानभूतानि पदान्यष्टाऽमुं परितो व्यधात् । भरतो येन तेनाऽयमष्टापद उदीर्यते ॥ १०५ ॥
असावस्मत्पूर्वजानामिति प्रादुर्भवन्मुदः । तं तेऽथाऽऽरुरुहुः शैलं, कुमाराः सपरिच्छदाः ॥ १०६ ॥
तत्र सिंहनिषद्यायां, चैत्ये प्रविविशुश्च ते । दूरादालोकमात्रेऽपि, नेमुश्चाऽऽदिजिनेश्वरम् ॥ १०७ ॥
अजितस्वामिबिम्बं च, बिम्बान्यन्यार्हतामपि । तुल्यया श्रद्धया नेमुर्गर्भश्राद्धा हि ते खलु ॥ १०८ ॥
अथ गन्धोदकैः शुद्धैर्मन्त्राकृष्टैरिव क्षणात् । कुमाराः स्नपयामासुर्बिम्बानि श्रीमदर्हताम् ॥ १०९ ॥
केऽप्यद्रिर्बिभराञ्चक्रुः, कलसान् केचिदार्पयन् । केचिच्च लोठयामासुः, प्रतीषुः[1] केऽपि रेचितान्[2] ॥ ११० ॥
केऽपि स्नात्रविधिं पेठुर्जगृहुः केऽपि चामरान् । सौवर्णधूपदहनान्युपाददत चाऽपरे ॥ १११ ॥
चिक्षिपुर्धूपदहनेष्वपरे धूपमुत्तमम् । केऽपि शङ्खादितूर्याणि, वादयामासुरुच्चकैः ॥ ११२ ॥
स्नानगन्धोदकैस्तैश्च, पतद्भिस्तत्र वेगतः । अष्टापदगिरिर्जज्ञे, तदा द्विगुणनिर्झरः ॥ ११३ ॥
पक्ष्मलैः कोमलै रूक्षैर्देवदूष्योपमैः पटैः । तेऽमार्जन् रत्नबिम्बानि, तानि वैकटिका[3] इव ॥ ११४ ॥
गोशीर्षचन्दनरसैश्चक्रुस्तेषां विलेपनम् । तेऽतिसैरन्ध्रयः स्वैरं, निर्भरं भक्तिशालिनः ॥ ११५ ॥
अर्चयामासुरर्चास्ता, विचित्रैः पुष्पदामभिः । रत्नालङ्करणैर्दिव्यैर्वस्त्रैरपि मनोहरैः ॥ ११६ ॥
पुरतः स्वामिबिम्बानामिन्दुरुपविडम्बिनः । अखण्डैस्तण्डुलैः पट्टेष्वालिखंस्तेऽष्टमङ्गलीम् ॥ ११७ ॥

१ जगृहुः । २ रिक्तान् । ३ मणिकारा इव ।

आरात्रिकमथो चक्रुर्दिव्यकर्पूरवर्तिभिः । तेऽर्चित्वोत्तारयामासुर्दिवाकरसहोदरम् ॥ ११८ ॥
शक्रस्तवेन वन्दित्वा, रचिताञ्जलयोऽथ ते । जिनेन्द्रानृषभस्वामिप्रभृतीनिति तुष्टुवुः ॥ ११९ ॥
अपारघोरसंसारपारावारतरीसमाः! । निर्वाणकारणीभूता, भगवन्तः! पुनीत नः ॥ १२० ॥
स्याद्वादवादप्रासादप्रतिष्ठासूत्रधारताम् । नय-प्रमाणैर्बिभ्रद्भ्यो, युष्मभ्यमनिशं नमः ॥ १२१ ॥
आयोजनं गामिनीभिर्वाणीसारणिभिर्भृशम् । अशेषजगदुद्यानाप्यायकेभ्यो नमोऽस्तु वः ॥ १२२ ॥
युष्मद्दर्शनतोऽस्माभिरपि सामान्यजीवितैः । अवाप्तमापञ्चमारजीवितव्यफलं परम् ॥ १२३ ॥
कल्याणकैर्गर्भ-जन्म-प्रव्रज्या-ज्ञान-मुक्तिभिः । नारकाणामपि सुखप्रदेभ्यो वो नमो नमः ॥ १२४ ॥
मेघानामिव वायूनामिव चन्द्रमसामिव । अर्काणामिव भवतां, साधारण्यं श्रियेऽस्तु नः ॥ १२५ ॥
अष्टापदगिरावत्र, धन्यास्ते पक्षिणोऽपि हि । निरन्तरायाः पश्यन्ति, भवतो ये दिने दिने ॥ १२६ ॥
जीवितं चरितार्थं नः, कृतार्थो विभवश्च नः । युष्मदालोकना-ऽर्चाभिश्चिररात्राय सम्प्रति ॥ १२७ ॥
इति स्तुत्वा नमस्कृत्य, भूयोऽपि श्रीमदर्हतः । प्रासादान्निर्ययुस्तस्मान्मुदिताः सगरात्मजाः ॥ १२८ ॥
ववन्दिरे ते भरतभ्रातॄस्तूपांश्च पावनान् । किञ्चिद् ध्यात्वा ततो जह्नुरुवाचाऽवरजानिति ॥ १२९ ॥
अष्टापदसमं स्थानं, मन्ये क्वाऽपि न विद्यते । कारयामो वयमत्र, चैत्यमेतदिवाऽपरम् ॥ १३० ॥
मुक्तोऽपि भरतक्षेत्रं, भुङ्क्ते भरतचक्र्यहो! । गिरौ भरतसारेऽत्र, चैत्यव्याजादवस्थितः ॥ १३१ ॥
एतदेव कृतं चैत्यमस्माभिश्चेद् विधीयते । भाविभिर्लुप्यमानस्य, चैत्यस्याऽमुष्य रक्षणम् ॥ १३२ ॥

१ प्रीणयद्भ्यः । २ साम्यभावः । ३ निर्विघ्नाः । ४ चिरम् । ५ लघुभ्रातॄन् ।

प्रवृत्ते दुःषमाकाले, भविष्यन्ति नरा यतः । अर्थलुब्धा हीनसत्त्वाः कृत्याकृत्याविचारकाः ॥ १३३ ॥
प्रत्यग्रधर्मस्थानस्य, करणादधिकं ततः । चिरन्तनानां हि धर्मस्थानानां परिरक्षणम् ॥ १३४ ॥
आमित्युक्ते कनीयोभिर्दण्डरत्नमुपाददे । ततो जह्नुः सहस्त्रांशुरिव तेजोभिरुल्बणैः ॥ १३५ ॥
अष्टापदं पुरमिव, परितः[1] परिखाकृते । स क्ष्मां खनितुमारेभे, दण्डरत्नेन सानुजः ॥ १३६ ॥
सहस्रयोजनां चोले, परिखां सगरात्मजाः । चख्नुस्तेऽथ तया नागसद्मानि च बभञ्जिरे ॥ १३७ ॥
नागलोकोऽखिल उपद्रूयमाणेषु सद्मसु । चुक्षोभ यादसां[2] चक्रं, मथ्यमान इवाम्बुधौ ॥ १३८ ॥
परचक्र इवाऽऽयाते, प्रदीपन इवोद्यते । महावात इवोद्धूते, नागास्त्रेसुरितस्ततः[3] ॥ १३९ ॥
आकुलं नागलोकं चाऽऽलोकयामास तं तथा । क्रुधा ज्वलज्ज्वलनवन्नागराड् ज्वलनप्रभः ॥ १४० ॥
दारितां चाऽवनीं प्रेक्ष्य, किमेतदिति सम्भ्रमात् । ततो निर्गत्य सगरकुमारानाजगाम सः ॥ १४१ ॥
उद्दामभ्रकुटीभीम, उत्तरङ्ग इवार्णवः । प्रकोपस्फुरदधर, उदर्चिरिव पावकः ॥ १४२ ॥
तप्तायस्तोमरश्रेणीरिव ताम्रा दृशः क्षिपन् । स्फारयन् नासिकारन्ध्रे, वज्राग्निधमनीनिभे ॥ १४३ ॥
कृतान्त इव सङ्क्रुद्धो, दुरीक्षः प्रलयार्कवत् । ज्वलनप्रभनागेन्द्र, इत्यूचे सगरात्मजान् ॥ १४४ ॥
आः! किमेतदुपक्रान्तमहो! विक्रान्तमानिभिः । दुर्मदैर्दण्डरत्नाप्त्या, दुर्गाप्त्या शबरैरिव? ॥ १४५ ॥
शाश्वतानामप्यधुना, भवनाधिपवेश्मनाम् । अकार्युपद्रवः कोऽयमप्रेक्षापूर्वकारिभिः[4]? ॥ १४६ ॥
अजितस्वामिनो भ्रातुष्पुत्रैरपि किमीदृशम् । भवद्भिर्विदधे कर्म, पिशाचैरिव दारुणम्? ॥ १४७ ॥

१ परित इत्यर्थः । २ जलजन्तूनाम् । ३ अग्निवत् । ४ अविचारितकारिभिः ।

अथोचे जह्नुना नागराजेदं युक्तमभ्यधाः । अमुना वेश्मभङ्गेनास्मदुपज्ञेन[1] पीडितः ॥ १४८ ॥
वेश्मनां युष्मदीयानां, भङ्गोऽस्त्विति मनीषया । वसुन्धरा न खातेयमस्माभिर्दण्डपाणिभिः ॥ १४९ ॥
किन्त्वष्टापदतीर्थस्याऽमुष्य रक्षणहेतवे । परिखारूपतोऽस्माभिरियं खाता वसुन्धरा ॥ १५० ॥
अत्र ह्यस्मद्वंशकन्दश्चक्रे भरतचक्रभृत् । चैत्यं रत्नमयं रत्नप्रतिमाश्चाऽर्हतां शुभाः ॥ १५१ ॥
भविष्यत्कालदोषेण, लोकेभ्यस्तदुपद्रवम् । शङ्कमानैः प्रयत्नोऽयमस्माभिर्विहितः खलु ॥ १५२ ॥
भङ्गो युष्मद्वेश्मनां तु, दूरत्वान्न हि शङ्कितः । दण्डशक्तिरमोघेयं, हन्त! तत्राऽपराध्यति ॥ १५३ ॥
अविमृश्यविधायित्वेनाऽर्हद्भक्त्या च यत् कृतम् । तत् सहस्वाऽतः परं तु करिष्यामो न हीदृशम् ॥ १५४ ॥
एवं जह्नुकुमारेणाऽनुनीतो नागराडपि । शशाम सामवागम्भः[2] कोपाग्नेः शमनं सताम् ॥ १५५ ॥
मा स्म कृद्ध्वं पुनर्यूयमीदृगित्यभिधाय सः । नागलोकं ययौ नागराजः सिंहो गुहामिव ॥ १५६ ॥
नागराजे गते जह्नुर्व्याजह्रे सोदरानिति । परिखा विहिता तावदष्टापदगिरेरियम् ॥ १५७ ॥
किन्तु पातालगम्भीराऽप्यम्भोरिक्ता[3] न भात्यसौ । बुद्धिशून्या देहभाजो महत्यप्याकृतिर्यथा ॥ १५८ ॥
किञ्च सम्भाव्यतेऽमुष्या, रजोभिरपि पूरणम् । स्थलीभवन्त्येव गर्ता, अपि कालेन गच्छता ॥ १५९ ॥
पूरणीया ततोऽवश्यमियं नीरेण भूरिणा । उत्तरङ्गं विना गङ्गां, तच्च कर्तुं न पार्यते ॥ १६० ॥
साधु साध्विति सोदर्यैर्व्याहृतो जह्नुरग्रहीत् । अमोघं दण्डरत्नं तद्, यमदण्डमिवाऽपरम् ॥ १६१ ॥
दण्डरत्नेन तेनाऽथ,गङ्गातटमदारयत् । जह्नुर्वज्रीव वज्रेण, महाशिखरिणस्तटीम् ॥ १६२ ॥


१ अस्मत्कृतेन । २ सामवाक्यमेव जलम् । ३ जलशून्या ।

दण्डदारणमार्गेण, चचालाऽथ सरिद्वरा । नीयते यत्र तत्राऽम्भो, गच्छत्यृजुपुमानिव ॥ १६३ ॥
उत्क्षिप्तशैलशिखरेवाऽभ्रंलिहमहोर्मिभिः । दृढास्फालिततूर्येव, तटास्फालननिस्वनैः ॥ १६४ ॥
द्विगुणं दण्डभेदं च, कुर्वाणा स्वाम्बुरंहसा । अष्टापदाद्रिपरिखां, गङ्गा प्रापसमुद्रवत् ॥ १६५ ॥
॥ युग्मम् ॥
योजनसहस्रंदघ्नीं[1], पातालमिव भीषणाम् । सा प्रवृत्ता पूरयितुं, परिखां परितोऽपि ताम् ॥ १६६ ॥
अष्टापदाद्रिपरिखापूरणार्थमकृष्यत । जह्नुना यत् ततो गङ्गा, ततः प्रभृति जाह्नवी ॥ १६७ ॥
परिखां पूरयित्वा च, भूरिभिर्विवरैर्जलम् । धारायन्त्रैरिवाऽविक्षन्नागानां भवनेष्वथ ॥ १६८ ॥
पयोभिः पूर्यमाणेषु, बिलवत् फणिवेश्मसु । फूत्कुर्वन्तः प्रतिदिशं, फणिनस्त्रेसुराकुलाः ॥ १६९ ॥
नागलोकस्य सङ्क्षोभं, दृष्ट्वा भूयोऽपि सोऽहिराट् । अकुप्यद् विकटाकार, आरास्पृष्ट[2] इव द्विपः ॥ १७० ॥
अवोचच्च सगरजाः, पितृवैभवदुर्मदाः । न सामयोग्यास्ते किन्तु, दण्डार्हा[3] रासभा इव ॥ १७१ ॥
एकोऽपराधो भवनभ्रंशरुपो व्यषह्यत । मयाऽकारि न शिक्षा यत्, तैस्तन्मन्तूयितं पुनः ॥ १७२ ॥
आरक्ष इव दस्यूनां, तेषां शिक्षां करोम्यहो! । अहमित्युद्भटं जल्पन्ननल्पाटोपभीषणः ॥ १७३ ॥
अकाल इव कालग्निरुद्भ्रान्तो दीप्तिदारुणः । जगद् दग्धुमना वार्धेरौर्वाग्निरिव[4] निर्गतः ॥ १७४ ॥
वज्रानल इवोज्ज्वालः, स निर्गत्य रसातलात् । तत्राऽऽजगाम वेगेन, समं नागकुमारकैः ॥ १७५ ॥
॥ त्रिभिर्विशेषकम् ॥

१ योजनसहस्रप्रमाणाम् । २ शस्त्रविशेषः । ३ अपराद्धम् । ४ वडवाग्निः ॥

ईक्षाञ्चक्रे च तान् मङ्क्षु, दृष्ट्या दृष्टिविषाधिपः । भस्मराशीबभूवुस्ते, वह्निना तृणपूलवत् ॥ १७६ ॥
जज्ञे हाहारवस्तत्र, रोदःकुक्षिम्भरिर्महान् । लोके स्यादनुकम्पायै, सागसामपि निग्रहः ॥ १७७ ॥
षष्टिं सहस्रान् सगरात्मजानां, स तान् कथाशेषतया विधाय ।
रसातलं नागपतिः सनागो, ययौ विवस्वानिव वासरान्ते ॥ १७८ ॥

इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये द्वितीये पर्वणि सगरपुत्रनिधनो नाम पञ्चमः सर्गः ।



षष्ठः सर्गः ।

चक्रिसैन्येऽथ सैन्यानामाक्रन्द उदभून्महान् । महाजलाशय इव, रिक्तीभवति यादसाम् ॥ १ ॥
केऽप्यास्वादितकिम्पाका, इव पीतविषा इव । सर्पदष्टा इवोन्मूर्च्छाः, पेतुर्वसुमतीतले ॥ २ ॥
केचिदास्फालयामासुः, स्वशिरो नालिकेरवत् । केचिदाजघ्निरे वक्षः, कृतागस्कमिवाऽसकृत् ॥ ३ ॥
पादान् प्रसार्य केऽप्यस्थुः, कृत्यमूढाः पुरन्ध्रिवत् । भृगूण्यारुरुहुर्झम्पां, कपिवत् केऽपि दित्सवः ॥ ४ ॥
कूष्माण्डदारमुदराण्येके स्वानि दिदीर्षवः । चकृषुः क्षुरिकां कोशाद्, यमजिह्वासहोदराम् ॥ ५ ॥
आत्मानं तरुशाखायामुद्बन्धुमनसोऽपरे । बबन्धुरुत्तरीयाणि, लीलादोलां यथा पुरा ॥ ६ ॥
शिरसोऽत्रोटयन् केऽपि, केशान् क्षेत्रात् कुशानिव । केऽप्यङ्गलग्नं नेपथ्यं, चिक्षिपुः स्वेदबिन्दुवत् ॥ ७ ॥
हस्तन्यस्तकपोलाः केऽप्यस्थुश्चिन्तापरायणाः । प्रदत्तोत्तम्भनस्तम्भजर्जराकारकुड्यवत् ॥ ८ ॥
असंवहन्तः केचिच्च, परिधानांशुकान्यपि । विशंस्थुलाङ्गं व्यलुठन्नुन्मत्ता इव भूतले ॥ ९ ॥
विलापोऽन्तःपुरस्त्रीणां, कुररीणामिवाऽम्बरे । हृदयाकम्पजनकः, पृथक् पृथगभूदिति ॥ १० ॥
प्राणेशान् गुह्यताऽस्माकं, प्राणानत्रैव मुञ्चता । किमर्धवैशसमिदं, रे दैवाऽऽचरितं त्वया? ॥ ११ ॥
प्रसीद विवरं देहि, स्फुटित्वा देवी काश्यपि! । अभ्रादपि पतितानां, शरणं धरणी खलु ॥ १२ ॥

१ कृतापराधम् । २ छिन्नटङ्कानि अत्युच्चानि गिरिशिखराणि । ३ दातुमिच्छवः । ४ शिथिलाङ्गं यथा स्यात्तथा । ५ अर्धमरणम् । ६ हे पृथ्वि ।

अद्य चन्दनगोधानामिवाऽस्माकमुपर्यहो! विद्युद्दण्डमकाण्डेऽपि, दैव! पातय निर्दयम् ॥ १३ ॥
प्राणाः! शिवा वः पन्थानः, सन्तु यात यथेप्सितम् । विमुञ्चताऽस्मच्छरीरमवक्रयेकुटीमिव[1] ॥ १४ ॥
समायाहि महातन्द्रे!, सर्वदुःखापनोदिनि! । मन्दाकिनि! त्वमुत्प्लुत्य, जलमृत्युं प्रयच्छ वा ॥ १५ ॥
अस्यां गिरितलाटव्यां, प्रादुर्भव दवानल! । अनुयामः पतिगतिं, तव साहाय्यकाद् यथा ॥ १६ ॥
हा केशपाश! मुञ्चाऽद्य, सुमनोदामसौहृदम्[2] । युवाभ्यां दीयतां नेत्रे!, कज्जलाय जलाञ्जलिः ॥ १७ ॥
पत्रलेखनकण्डूतिं, मा कृषाथां कपोलकौ! । अलक्तकव्यतिकरश्रद्धामधर[3]! मा धर ॥ १८ ॥
गीताकर्णनवत् कर्णौ!, त्यजतं रत्नकर्णिकाम् । हे कण्ठ! कण्ठिकोत्कण्ठां, मा कार्षीस्त्वमतः परम् ॥ १९ ॥
वक्षोजावद्य वां हारो, नीहारोऽम्भोरुहामिव[4] । सद्यो हृदय! भूयास्त्वं, पक्वैर्वारुकवद्[5] द्विधा ॥ २० ॥
बाहु! कङ्कण-केयूरैर्भारैरिव कृतं च वाम् । नितम्ब! रसनां मुञ्च, प्रातश्चन्द्र इव प्रभाम् ॥ २१ ॥
अनाप्तैरिव पर्याप्तं, हे पादौ! पादभूषणैः । अलमङ्गाऽङ्गरागैस्तैः[6], कपिकच्छूमयैरिव ॥ २२ ॥
एवमन्तःपुरस्त्रीणां, रुदितैः करुणस्वरैः । वनान्यपि प्रतिरवै, रुरुदुः सह बन्धुवत् ॥ २३ ॥
सेनाधिपति-सामन्त-मण्डलेशादयोऽपि हि । शोक-ह्री-क्रोध-शङ्कादिविचित्रं प्रालपन्निति ॥ २४ ॥
हा स्वामिपुत्राः! क्व गताः?, न हि संविद्महे वयम् । ब्रूताऽनुयामोऽद्य यथा, स्वामिशासनतत्पराः ॥ २५ ॥
किं तिरोधानविद्येह, भवतां काऽप्युपस्थिता? । सा तु खेदाय भृत्यानां, प्रयोक्तुं न हि युज्यते ॥ २६ ॥

१ भाटकगृहीतां कुटीमिव । २ पुष्पमालामैत्रीम् । ३ सम्बन्धः । ४ हिमम् । ५ पक्वचिर्भटकवत् । ६ हे शरीर! ।

युष्मान् नष्टान् विनष्टान् वा, हित्वा गतवतां मुखम् । कथं द्रक्ष्यति नः स्वामी, ऋषिहत्याकृतामिव? ॥ २७ ॥
युष्मान् विना गतान्[1] नोऽद्य, लोकोऽप्युपहसिष्यति । हृदय! स्फूट रे! सद्यः, पयःसिक्तामकुम्भवत्[2] ॥ २८ ॥
तिष्ठ तिष्ठाऽहिखेट! त्वं, छलेन श्वेव नः पतीन् । व्यग्रानष्टापदत्राणे, दग्ध्वाऽयासीः क्व रेऽधुना? ॥ २९ ॥
खड्गः खड्गो धन्व धन्व, शक्तिः शक्तिर्गदा गदा । युद्धाय सज्जीभव रे!, कियन्नंष्ट्वा गमिष्यसि? ॥ ३०॥
अमी तावदिह त्यक्त्वा, ययुर्नः स्वामिसूनवः । हहा! तत्र गतानद्य, त्यक्ष्यति स्वाम्यपि द्रुतम् ॥ ३१ ॥
अगतानपि नस्तत्र, जीवतोऽत्रैव तिष्ठतः । श्रुत्वा लज्जिष्यते स्वामी, यदि वा निग्रहीष्यति ॥ ३२ ॥
एवं रुदित्वा विविधं, भूयः सम्भूय ते मिथः । सहजं धैर्यमालम्ब्य, मन्त्रयामासुरित्यथ ॥ ३३ ॥
पूर्वोदितविधानेभ्यः[3], परोक्तविधिवद् विधिः[4] । सर्वेभ्यो बलवांस्तस्मान्न कोऽपि बलवत्तरः ॥ ३४ ॥
तत्राऽशक्यप्रतीकारे, मुधा प्रतिचिकीर्षितम्[5] । व्योम्नः प्रतिजिघांसेव[6], जिघृक्षेव नभस्वतः ॥ ३५ ॥
एभिः प्रलापैस्तदलं, हस्त्यश्वाद्यखिलं प्रभोः । इदानीमर्पयामः स्वं[7], वयं न्यासधरा इव ॥ ३६ ॥
उचितं रुचितं वाऽपि, यत्किञ्चन ततः परम् । विदधातु तदस्मासु, स्वामि किं नो विचिन्तया? ॥ ३७ ॥
एवमालोच्य ते सर्वे, सर्वमन्तःपुरादिकम् । आदाय दीनवदनाः, प्रत्ययोध्यं प्रतस्थिरे ॥ ३८ ॥
मन्दं मन्दमथोत्साहहीना म्लाननेक्षणाः । अयोध्यासन्निधिभुवं, प्रापुः सुप्तोत्थिता इव ॥ ३९ ॥
विषण्णास्तत्र च स्थित्वा, नीता वध्यशिलामिव । उपविश्य महीपीठेऽन्योऽन्यमेवं बभाषिरे ॥ ४० ॥

१ अस्मान् । २ अपक्व घटवत् । ३ पूर्वविधिभ्यः परो विधिर्बलवानिति व्याकरणशास्त्रे न्यायः । ४ दैवम् । ५ प्रतिहन्तुमिच्छा । ६ ग्रहीतुमिच्छा । ७ धनम् ।

भक्ता बहुज्ञा दोष्मन्तो, दृष्टसाराः पुराऽपि च । इत्यादिष्टा वयं राज्ञा, सत्कृत्य तनयैः सह ॥ ४१ ॥
विना कुमारानभ्येत्य, स्वामिनोऽग्रे वयं कथम् । वदनं धारयिष्यामो, नासिकारहिता इव? ॥ ४२ ॥
कथं वा कथयिष्यामः, पुत्रवृत्तान्तमीदृशम् । अकाण्डाशनिसम्पातसदृशं वसुधापतेः? ॥ ४३ ॥
अतः परमहो! तत्राऽस्माकं गन्तुं न युज्यते । युज्यते किन्तु मरणं, शरणं सर्वदुःखिनाम् ॥ ४४ ॥
सम्भावनायाः प्रभुणा, कृताया भ्रंशभाजिनः । पुंसोऽशरीरिकस्येव, जीवितव्येन किं ननु? ॥ ४५ ॥
किञ्च पुत्रक्षयं श्रुत्वा, दुःश्रवं चक्रवर्त्यपि । चेद् विपद्येत तदपि, मृत्युरग्रेसरो हि नः ॥ ४६ ॥
मन्त्रयित्वेति ते सर्वे, मरणे कृतनिश्चयाः । यावत् तस्थुस्तावदागादेकः काषायभृद्द्विजः ॥ ४७ ॥
ब्राह्मणग्रामणीः सोऽथ, प्रोत्क्षिप्तकरपङ्कजः । जीवयंस्तानुवाचैवं, गिरा जीवातुकल्पया ॥ ४८ ॥
भोः कृत्यमूढाः! किं यूयमेवं स्थाऽस्वस्थचेतसः? । उपर्यापतिते व्याधे, पतित्वा शशका इव ॥ ४९ ॥
यदि षष्टिसहस्रा वः, स्वामिपुत्रा विपेदिरे । युगपद् युग्मिवत् तत्र, विषादेन कृतं ननु ॥ ५० ॥
सहजाता अपि क्वाऽपि, विपद्यन्ते पृथक् पृथक् । पृथग्जाता अपि क्वाऽपि, विपद्यन्ते सहैव हि । ५१ ॥
बहवोऽपि विपद्यन्ते, विपद्यन्तेऽल्पका अपि । सर्वेषामपि जीवानां, यन्मृत्युः पारिपार्श्विकः ॥ ५२ ॥
न हि केनाऽपि कस्यापि, मृत्युः[२] शक्यो निषेधितुम् । अपि यत्नशतं कृत्वा, स्वभाव इव देहिनाम् ॥ ५३ ॥
निषेधितुं शक्यते चेत्, स निषिद्धः कथं न हि । वज्रभृच्चक्रवर्त्याद्यैः, स्वस्य वा स्वजनस्य वा? ॥ ५४ ॥
मुष्टिना शक्यते धर्तुमपि वज्रं पतद् दिवः । सेतुनाऽवस्खलयितुमप्युद्भ्रान्तः पयोनिधिः ॥ ५५ ॥

१ सञ्जीवनौषधतुल्यया । २ मृत्युः । ३ रोद्धुम् ।

निर्वापयितुमुद्दामो, युगान्तज्वलनोऽपि वा । कल्पान्तोत्पातजातो वा, मन्दीकर्तुं समीरणः ॥ ५६ ॥
उत्तम्भनेनाऽद्रिरपि, समुत्तम्भयितुं पतन् । न तूपायशतेनाऽपि, शक्यो मृत्युर्निषेधितुम् ॥ ५७ ॥
ते नः सम्पश्यमानानां, विपन्नाः स्वामिसूनवः । इत्येवं मास्म खिद्यध्वं, धीरीभवत सम्प्रति ॥ ५८ ॥
युष्माकं स्वामिनमपि, मज्जन्तं शोकसागरे । हस्तेनेव धरिष्यामि, प्रबोधवचसाऽञ्जसा ॥ ५९ ॥
एवमाश्वास्य तान् सर्वान्, मृतं किञ्चित् पथि स्थितम् । विप्रः सोऽनाथमादाय, विनीतां नगरीं ययौ ॥ ६०॥
सगरस्य नरेन्द्रस्य, स गत्वा सदनाङ्गणे । ऊर्द्ध्वीभूयोर्द्ध्वदोर्दण्डः, पूच्चकारोच्चकैरिति ॥ ६१ ॥
चक्रवर्तिन्! न्यायवर्तिन्नखण्डभुजविक्रम! । अत्याहितमब्रह्मण्यमब्रह्मण्यमहो! इदम् ॥ ६२ ॥
स्वर्गे पुरन्दरेणेव, क्षेत्रे भरतनामनि । यत् त्वया रक्षितेऽप्यस्मिन्, मुषितो मुषितोऽस्म्यहम् ॥ ६३ ॥
शब्दमश्रुतपूर्वं तं, श्रुत्वा सगरचक्र्यपि । सङ्क्रान्ततदुःख इव, जगाद द्वारपालकम् ॥ ६४ ॥
केनैष मुषितः? कोऽयं?, कुतो वाऽयं समागतः? । सर्वं विज्ञायतामेतत्, स्वयं वाऽत्र प्रवेश्यताम् ॥ ६५ ॥
द्वारपालोऽथ पप्रच्छ, विप्रं क्षिप्रमुपेत्य तम् । अनाकर्णितकं कुर्वन्, पूच्चकार तथैव सः ॥ ६६ ॥
व्याजहार प्रतीहारः, पुनरेवमहो द्विज! । किं दुःखबधिरोऽसि त्वं?, निसर्गबधिरोऽसि वा? ॥ ६७ ॥
अजितस्वामिनो भ्राता, स्वयमेष महीपतिः । दीना-ऽनाथपरित्राता, शरणं शरणार्थिनाम् ॥ ६८ ॥
सादरः सोदरमिव, त्वां पृच्छति विराविणम्[२] । मुषितः केन? कश्चाऽसि?, कुतस्त्योऽसीति शंस नः ॥ ६९ ॥
यदि वा स्वयमागत्य, स्वकीयं दुःखकारणम् । वैद्यायेव रुगुत्थानं[३], निवेदय महीभुजे ॥ ७० ॥

अपरिचितेन द्विजेन स्व-पुत्रमरण मिषेण सगरस्य बोदनम् ।

१ जीवितापहार्यनर्थसम्पातः । २ पूत्कारिणम् । ३ रोगोत्पत्तिम्

इत्युक्तः प्रतिहारेण, स द्विजः साश्रुलोचनः । नीहारकणिकाकीर्णसरोरुह इव ह्रदः ॥ ७१ ॥
प्रम्लानवदनेन्दुश्च, निशीथ[१] इव हैमनः । अच्छभल्ल[२] इवातुच्छप्रविकीर्णशिरोरुहः ॥ ७२ ॥
जरत्प्लवङ्गम इव, परिक्षामकपोलकः । मन्दमन्दपदन्यासं, प्राविशच्चक्रिणः सदः[३] ॥७३॥ ॥ त्रिभिर्विशेषकम्॥
स्वयं कृपालुना सोऽथ, चक्रिणैवमपृच्छ्यत । कच्चित् ते काञ्चनं किञ्चिज्जह्रे[४] कुत्राऽपि केनचित्? ॥ ७४ ॥
किं वा रत्नानि केनाऽपि, हृतानि वसनानि वा? । किं वाऽपालापि[५] केनाऽपि, न्यासो विश्वस्तघातिना? ॥७५॥
ग्रामारक्षादिना किं वा, केनाऽप्यसि कदर्थितः? । भाण्डसर्वस्वहरणात्, पीडितः शौल्किकेन[६] वा? ॥ ७६ ॥
दायादेनाऽथ केनाऽपि, प्रापितोऽसि पराभवम्? । उपदुद्राव कोऽपि त्वां, जायाविद्रवणेन[७] वा? ॥ ७७ ॥
बलवानथवा वैरी, त्वामास्कन्दति कञ्चन? । आधिर्वा बाधते कोऽपि, त्वां? व्याधिरथवोत्कटः? ॥ ७८ ॥
द्विजातिजातिसुलभं, दारिद्र्यं त्वां दुनोति वा? । अन्यद्वा दुःखकृद् यत् ते, तदाख्याहि महाद्विज! ॥ ७९ ॥
सद्यो नट इवाऽलीकं, मुञ्चन्नश्रान्तमश्रु सः । ब्राह्मणो व्याजहारैवं, राजानं रचिताञ्जलिः ॥ ८० ॥
द्यौरिवाऽमरराजेन, न्याय-विक्रमराजिना । त्वया राजन्वती राजन्!, षट्खण्डभरतावनिः ॥ ८१ ॥
नाऽऽच्छिन्त्ते[८] कस्यचित् कोऽपि, स्वर्ण-रत्नादि किञ्चन । आढ्याः स्वगृहवद् ग्रामान्तरालेऽपि हि शेरते ॥८२॥
न्यासं नाऽपह्नुते कोऽपि, निजं कुलमिवोत्तमम् । स्वपुत्रमिव रक्षन्ति, ग्रामारक्षादयः प्रजाम् ॥ ८३ ॥
अर्थे लभ्येऽतिरिक्तेऽपि, शुल्कं भाण्डानुमानतः । गृह्णन्ति शौल्किका दण्डमिव मन्तुप्रमाणतः[९] ॥ ८४ ॥

१ हेमन्तर्तौ रात्रिरिव । २ यथा विशीर्णकेशः भल्लूको भवति तादृशः । ३ सभाम् । ४ अपह्नुतः । ५ विश्वासघातिना । ६ शुल्काध्यक्षेण । ७ जायाया अपहारेण । ८ नापहरति । ९ यथापराधम् ।

दायमादाय[1] दायादा, विवदन्ते पुनर्न हि । अवाप्तोत्तमसिद्धान्ताः, शिष्या इव गुरुं प्रति ॥ ८५ ॥
भगिनीवद् दुहितृवत्, स्नुषावन्मातृवत् तथा । मन्यते परकीयाः स्त्रीर्न्यायनिष्ठोऽखिलो जनः ॥ ८६ ॥
नास्ति यत्याश्रम इव, त्वद्राज्ये वैरवागपि । सन्तोषशालिनि जने, नाऽऽधिः साऽम्भसि तापवत् ॥ ८७ ॥
भुवि सर्वौषधीमय्यां, न व्याधिः प्रावृषीव तृट् । त्वयि कल्पद्रुम इव, दारिद्र्यं च न कस्यचित् ॥ ८८ ॥
अस्ति दुःखाकरं लोके, न किञ्चिदपि कस्यचित् । किन्तूपनतमस्त्येतैन्ममैव हि तपस्विनः ॥ ८९ ॥
अवन्तिर्नाम देशोऽस्ति, स्वर्गदेश्यो महानिह । नगरोद्यान-नद्याद्यैरनवद्यैर्मनोहरः ॥ ९० ॥
महासरः-कूप-वापी-विचित्रारामबन्धुरः । तत्राऽश्वभद्रो नामाऽस्ति, ग्रामस्तिलकवद् भुवः । ९१ ॥
तत्र ग्रामेऽस्मि वास्तव्यो, वेदाध्ययनतत्परः । अग्निहोत्ररतो नित्यं, शुद्धब्रह्मकुलोद्भवः ॥ ९२ ॥
पत्न्याः प्राणप्रियं पुत्रमर्पयित्वाऽहमन्यदा । विशेषविद्याध्ययनहेतोर्ग्रामान्तरं गतः ॥ ९३ ॥
पठतस्तत्र चाऽन्येद्युरुदभूदरतिर्मम । अनिमित्तं[2] महदेतदित्यक्षुभ्यमहं ततः ॥ ९४ ॥
भीतस्तेनाऽनिमित्तेन, स्वं ग्रामं पुनरागमम् । अहं पूर्वाश्रितां जात्यतुरङ्ग[3] इव मन्दुराम्[4] ॥ ९५ ॥
दूरादहमपश्यं च, श्रीविमुक्तं निजं गृहम् । किमेतदिति चित्ते च, चिरं यावदचिन्तयम् ॥ ९६ ॥
अमन्दं स्पन्दितं तावद्, दक्षिणेतरचक्षुषा[5] । शुष्कवृक्षे चटित्वोच्चै, रटितं क्रकटेन[6] च ॥ ९७ ॥
इत्यादिभिर्दुर्निमित्तैर्विद्धो हृदि शरैरिव । विमनाः प्राविशमहं, चञ्चापुरुषवद्[7] गृहम् ॥ ९८ ॥
मामापतन्तं सम्प्रेक्ष्य, ब्राह्मणी विलुलत्कचा[8] । सद्यो हा पुत्र! हा पुत्रेत्याक्रन्दन्त्यपतद् भुवि ॥ ९९ ॥

१ भागम् । २ प्राप्तम् । ३ दुःखम् । ४ स्वर्गसदृशः । ५ अपशुकनम् । ६ अश्वशालाम् । ७ वामनेत्रेण । ८ काकेन । ९ विकीर्णकेशा ।

ध्रुवं विपन्नो मे पुत्र, इति निश्चित्य चेतसा । अहमप्यपतं सद्यो, गतप्राण इवाऽवनौ ॥ १०० ॥
मूर्च्छाविरामे भूयोऽपि, प्रलपन् करुणस्वरम् । अपश्यं गृहमध्येऽहं, सर्पदष्टमिमं सुतम् ॥ १०१ ॥
भोजनाद्यप्यकृत्वाऽस्थां, यावज्जाग्रदहं निशि । कुलदेवतया[1] तावदिदमादेशि मे पुनः ॥ १०२ ॥
भोः! किमेवं समुद्विग्नोऽस्यमुना पुत्रमृत्युना? । सम्पादयामि ते पुत्रं, यद्यादेशं करोषि मे ॥ १०३ ॥
देव्याः प्रमाणमादेश, इत्यवोचमहं ततः । पुत्रार्थे शोकविधुरैः, किं वा न प्रतिपद्यते? ॥ १०४ ॥
कुलदेवतयाऽथोक्तं, विपन्नो यत्र कोऽपि न । ततोऽग्निं मङ्गलगृहात्, कृतोऽप्यानय सत्वरम् ॥ १०५ ॥
ततस्तनयलोभेन, प्रत्यहं प्रतिमन्दिरम् । तत् पृच्छन् हस्यमानोऽहं, भ्रान्तोऽर्भक इवाऽभ्रमम् ॥ १०६ ॥
पृच्छयमानो जनः सर्वोऽप्याचष्टे[3] स्म गृहे गृहे । सङ्ख्यातीतान् मृतान् वेश्म, नाऽमृतं किञ्चिदप्यभूत् ॥१०७॥
तदप्राप्त्या च भग्नाशः, परासुरिव नष्टधीः । व्यजिज्ञपमहं दीनस्तत् सर्वं कुलदेवताम् ॥ १०८ ॥
आदिशद् देवताऽप्येवं, न मङ्गलगृहं यदि । अमङ्गलं कथमहं, तव रक्षितुमीश्वरी? ॥ १०९ ॥
तया च देवतावाचा, तोत्रेणेव प्रवर्तितः । प्रतिग्रामं प्रतिपुरं, भ्रमन्नहमिहाऽऽगमम् ॥ ११० ॥
अपि धात्र्याः समस्तायास्त्राता त्वमसि विश्रुतः । न कोऽपि प्रतिमल्लोऽस्ति, दोष्मदग्रेसरस्य ते ॥ १११ ॥
वैताढ्यगिरिदुर्गस्थश्रेणिद्वयगतास्तव । विद्याधरा अपि दधत्याज्ञां शिरसि माल्यवत् ॥ ११२ ॥
देवा अपि तवाऽऽदेशं, सदा कुर्वन्ति भृत्यवत् । वाञ्छितार्थं प्रयच्छन्ति, निधयश्च तवाऽनिशम् ॥ ११३ ॥
ततस्त्वां शरणं प्राप्तो, दीनत्राणैकसत्रिणम्[5] । तदग्निं मङ्गलगृहात्, कुतोऽप्यानय मत्कृते ॥ ११४ ॥

१ जीवयामि । २ मृतः । ३ गतप्राणः । ४ गवादिताडनदण्डः । ५ दीनरक्षणैकदीक्षितम् ।

विपन्नमपि मे पुत्रं, सा यथा कुलदेवता । प्रत्यानयति येनाऽस्मि, दुःखितः पुत्रमृत्युना ॥ ११५ ॥
भवस्वरूपं नृपतिर्जानन्नपि कृपावशात् । तदुःखदुःखितः किञ्चिच्चिन्तयित्वैवमब्रवीत् ॥ ११६ ॥
एतस्यामवनौ तावद्, गृहेषु सकलेष्वपि । अस्माकं गृहमुत्कृष्टं, सुमेरुः पर्वतेष्विव ॥ ११७ ॥
आसीदस्मिन्नसामान्यस्त्रिजगन्मान्यशासनः । प्रथमस्तीर्थनाथानां, प्रथमः पृथिवीभुजाम् ॥ ११८ ॥
लक्षयोजनमुत्सेधे, दण्डीकृत्याऽमराचलम् । दोर्दण्डेन समुत्क्षिप्य, च्छत्रीकर्तुं क्षमः क्षमाम् ॥ ११९ ॥
चतुःषष्टीन्द्रमुकुटोत्तेजिताङ्घ्रिनखावलिः । भगवानृषभखामी, विपन्नः सोऽपि कालतः ॥ १२० ॥

॥ त्रिभिर्विशेषकम् ॥

तस्य च प्रथमः सूनुः, प्रथमश्चक्रवर्तिनाम् । सुरा-ऽसुरैरपि सदा, शिरसोद्वाह्यशासनः ॥ १२१ ॥
भरतो नाम सौधर्मपुरुहूतासनार्धभाक् । कालेन गच्छता सोऽपि, समाप्तिं प्रापदायुषः ॥ १२२ ॥ युग्मम् ॥
तस्य चाऽवरजो धुर्यो[1], वर्यदोर्वीर्यशालिनाम् । अम्भोधीनामिवाऽम्भोधिः, स्वयम्भूरमणाभिधः ॥ १२३ ॥
कण्डूयद्भिः सैरिभेभ-शरभाद्यैरकम्पितः । वज्रदण्ड इव न्यस्तो, वत्सरं प्रतिमाधरः ॥ १२४ ॥
महाबाहुर्बाहुबलिर्बाहुदन्तेयविक्रमः[2] । नाऽधिकं किञ्चिदप्यस्थात्, सम्पूर्णे पुरुषायुषे ॥ १२५ ॥

॥ त्रिभिर्विशेषकम् ॥

उग्रेण तेजसाऽऽदित्यो, नाम्नाऽऽदित्ययशा इति । समभूदोजसाऽनूनः, सूनुर्भरतचक्रिणः ॥ १२६ ॥
आदित्ययशसः सूनुरासीन्नाम्ना महायशाः । दिगन्तसङ्गीतयशाः, सर्वदोष्मच्छिरोमणिः ॥ १२७ ॥

१ महिषगजाष्टापदप्रभृतिभिः । २ इन्द्रसमपराक्रमः ।

तस्य चाऽतिबलो नाम, सूनुः समुदपद्यत । आखण्डल इवाऽखण्डशासनोऽवनिशासनः ॥ १२८ ॥
बभूव तस्य तनयो, बलभद्रोऽभिधानतः । जगन्भद्रङ्करः[1] स्थाम्ना, धाम्ना दीधितिमानिव[2] ॥ १२९ ॥
बलवीर्यो महावीर्यः, शौर्य-धैर्यभृदग्रणीः । ग्रामणीर्नरनाथानामभवत् तस्य चाऽऽत्मजः ॥ १३० ॥
शोभितः कीर्ति-वीर्याभ्यां, कीर्तिवीर्यश्च विश्रुतः । उदभूदङ्गभूस्तस्माद्, दीपो दीपादिवोज्ज्वलः ॥१३१॥
दन्तिभिर्गन्धदन्तीव, वज्रदण्ड इवाऽऽयुधैः । परैरवार्यवीर्योऽभूज्जलवीर्यश्च तत्सुतः ॥ १३२ ॥
अखण्डदण्डशक्तिश्च, दण्डपाणिरिवाऽपरः । अभूदुद्दण्डदोर्दण्डो, दण्डवीर्यस्तदात्मजः ॥ १३३ ॥
अपाच्यभरतार्धस्य, शासितारो महौजसः । इन्द्रोपनीतभगवन्महामुकुटधारिणः ॥ १३४ ॥
सुरा-ऽसुरैरप्यजय्यास्तेऽपि लोकोत्तरौजसः । सर्वेऽपि कालधर्मेण, कालधर्ममुपाययुः ॥ १३५ ॥ ।।युग्मम् ॥
ततः प्रभृति चाऽन्येऽपि, सङ्ख्यातीता महीभुजः । महाभुजा व्यपद्यन्त, कालो हि दुरतिक्रमः[3] ॥ १३६ ॥
सर्वङ्कषः पिशुनवत्, सर्वभक्षी हुताशवत् । सर्वभेदी सलिलवत्, कृतान्तस्तदहो द्विज! ॥ १३७ ॥
मदीयेऽपि गृहे कालान्नाऽवशिष्टोऽस्ति पूर्वजः । का वार्ताऽन्यगृहेष्वस्ति?, तन्मङ्गलगृहं कुतः? ॥ १३८ ॥
त्वत्पुत्रश्चेन्म्रियेतैकस्तदेवमुचितं तव । सर्वसाधारणे मृत्यौ[4], किं नाम द्विज! शोचसि? ॥ १३९ ॥
अर्भके स्थविरे वाऽथ, दरिद्रे चक्रवर्तिनि । समं वर्तत इत्येष, कृतान्तः समवर्त्यहो! ॥ १४० ॥
संसारस्य स्वभावोऽयं, न स्थिरः कश्चिदत्र यत् । तरङ्गवत् तरङ्गिण्यां[5], शरदभ्रवदम्बरे ॥ १४१ ॥
किञ्चाऽसौ मे पिता माता, भ्राता पुत्रः स्वसा स्नुषा । इत्यादिरपि सम्बन्धो, न भवे पारमार्थिकः ॥ १४२ ॥

१ जगन्माङ्गल्यकारकः । २ सूर्य इव । ३ अलौकिकपराक्रमवन्तः । ४ मृत्युम् । ५ नद्याम् ।

केऽपि केऽपि कुतोऽप्येत्य, मिलन्त्येकत्र वेश्मनि । यतः शरीरिणः सर्वे, ग्रामकुट्यामिवाऽध्वगाः ॥ १४३ ॥
पृथक् पृथक् पथेनैव, स्वकर्मपरिणामतः । तेषु गच्छत्सु को नाम, सुधीः शोचेन्मनागपि? ॥ १४४ ॥
मा स्म शोकं कृथास्तेन, मोहचिह्नं द्विजोत्तम! । धेहि धैर्यं महासत्त्व!, विवेके स्वं निधेहि च ॥ १४५ ॥
अथावोचद्द्विजन्माऽपि, राजन्! जानामि जन्मिनाम् । भवस्वरूपं किन्त्वद्य, व्यस्मार्षं पुत्रशोकतः ॥ १४६ ॥
तावत् सर्वोऽपि जानाति, तावत् सर्वोऽपि धैर्यभाक् । यावदिष्टवियोगं नाऽनुभवत्यात्मना भवी ॥ १४७ ॥
सदाऽर्हदादेशसुधापाननिर्धौतचेतसः । विरलास्त्वादृशाः स्वामिन्!, धैर्यवन्तो विवेकिनः ॥ १४८ ॥
विवेकिन्! भवता मुह्यन्, बोधितः साधु साध्वहम् । उपस्कार्यो विवेकोऽयमात्मनोऽपि कृते त्वया ॥ १४९ ॥
नश्यन्नयं[2] रक्षणीयो, व्यसने समुपस्थिते । यतो विधुरवेलायै[3], ध्रियते ध्रुवमायुधम् ॥ १५० ॥
अयं च कालो रङ्के च, समश्नक्रधरेऽपि च । प्राणान् पुत्रादि वाऽऽच्छिन्दन्, बिभेति न कुतोऽपि हि ॥ १५१ ॥
हन्त! पुत्रादि यस्याल्पमल्पं तस्य विपद्यते । भूयिष्ठं यस्य तत् तस्य, भूयिष्ठं हि विपद्यते ॥ १५२ ॥
द्वयोरपि तयोः पीडा, तुल्यैव हि भवत्यहो! । अल्पा-ऽनल्पप्रहाराभ्यां, कुन्थु-कुञ्जरयोरिव ॥ १५३ ॥
नाशेनैकस्य पुत्रस्य, न शोचिष्याम्यतः परम् । मद्वत् त्वमपि मा शोचीः, सर्वपुत्रक्षयेऽपि हि ॥ १५४ ॥
षष्टिसहस्रसङ्ख्यास्ते, दोर्विक्रमविराजिनः । राजन्! विपन्नास्तनया, युगपत् कालयोगतः ॥ १५५ ॥
अत्रान्तरे च सामन्ता-ऽमात्य-सेनाधिपादयः । अपरेऽपि कुमाराणां, जना आसन्नवर्तिनः ॥ १५६ ॥
उत्तरीयच्छन्नमुखाः, शालीना इव लज्जया । विवर्णदेहाः खेदेन, दवदग्धा इव द्रुमाः ॥ १५७ ॥

१ धर्मशालायाम् । २ विवेकः । ३ दुःखवेलायै ।

अत्यन्तशून्यमनसः, पिशाच-किन्नरा इव । उदश्रुलोचना दीना, मुषिताः कृपणा इव ॥ १५८ ॥
प्रस्खलच्चरणन्यासा, दष्टा इव भुजङ्गमैः[1] । आस्थानं[2] युगपद् राज्ञोऽविशन् सङ्केतिता इव ॥ १५९ ॥
राजानं ते नमस्कृत्य, यथास्थानमुपाविशन् । विविक्षव इव क्षोणीं, ते च तस्थुरधोमुखाः ॥ १६० ॥
तां विप्रवाचमाकर्ण्य, दृष्ट्वा तांश्च तथाविधान्[3] । कुमारवर्जमायातानिषादिद्विपानिव ॥ १६१ ॥
लिखितो नूल्लिखितो नु, सुप्तो नूत्तम्भितो नु वा । शून्यो निष्पन्दनयनो, द्रागभूदवनीपतिः ॥ १६२ ॥

॥ युग्मम् ॥

आप्तममूर्च्छमधैर्येण, धैर्येण च तथास्थितम्[4] । पुनर्बोधयितुं विप्रः, प्रोवाच पृथिवीपतिम् ॥ १६३ ॥
त्वमसि क्षमापते! विश्वमोहनिद्राविवस्वतः । ऋषभस्वामिनो वंश्यो, भ्राता चास्यजितप्रभोः ॥ १६४ ॥
इत्थं पृथग्जन[5] इव, भवन् मोहवशंवदः[6] । तयोः कलङ्कमाधत्सेऽधुना किं धरणीधव? ॥ १६५ ॥
राजाऽपि दध्यौ विप्रोऽयं, स्वपुत्रान्तापदेशतः[7] । मत्पुत्रक्षयनाट्यस्य, जगौ प्रस्तावनामिमाम् ॥ १६६ ॥
व्यक्तं च शंसत्यधुना, कुमाराणामसौ क्षयम् । कुमारवर्जं चाऽऽयाताः, प्रधानपुरुषा अमी ॥ १६७ ॥
कुतः सम्भाव्यते तेषां, क्षयश्च मनसाऽपि हि । भुवि सञ्चरतां स्वैरं, वने केसरिणामिव? ॥ १६८ ॥
महारत्नपरीवारा, दुर्वाराः स्वौजसाऽपि हि । केन शक्या निहन्तुं ते, हन्तास्खलितशक्तयः? ॥ १६९ ॥
चिन्तयित्वेति किमिदमिति पृष्टाः क्षमाभुजा । ज्वलनप्रभवृत्तान्तं, शशंसुः सचिवादयः ॥ १७० ॥

१ सभाम् । २ प्रवेष्टुमिच्छवः । ३ हस्तिपकरहितगजानिव । ४ स्वस्थम् । ५ साधारणजनः । ६ ऋषभाजितस्वामिनोः। ७ स्वपुत्रमरणमिषात् ।

ताडितः कुलिशेनेव, तेनोदंन्तेन[1] भूपतिः । पपात मूर्च्छितः पृथ्व्यां, पृथिवीमपि कम्पयन् ॥ १७१ ॥
मातरश्च कुमाराणां, निपेतुर्मूर्च्छया क्षितौ । पितुर्मातुश्च तुल्यं हि, दुःखं सुतवियोगजम् ॥ १७२ ॥
राजवेश्मनि लोकानामाक्रन्दोऽथ महानभूत् । समुद्रतटगर्तान्तर्गतानां यादसामिव ॥ १७३ ॥
मन्त्र्यादयोऽपि ते स्वामिपुत्रव्यापत्तिसाक्षिणम् । आत्मानमतिनिन्दन्तो, रुरुदुः करुणस्वरम् ॥ १७४ ॥
तादृशीं स्वामिनोऽवस्थां, तां वीक्षितुमिवाऽक्षमाः । अञ्जलिच्छन्नवदनाः, पूच्चक्रुर्वेत्रपाणयः ॥ १७५ ॥
प्राणप्रियाण्यप्यस्त्राणि, त्यजन्तश्चाऽऽत्मरक्षकाः । प्रलपन्तोऽलुठन् भूमौ, वातभग्ना इव द्रुमाः ॥ १७६ ॥
स्वकञ्चुकान् कञ्चुकिनः, स्फाटयन्तोऽरटन् भृशम् । दवानलान्तः पतिता, इव तित्तिरपक्षिणः ॥ १७७ ॥
हृदयं कुट्टयन्तः स्वं, चिरात् प्राप्तमिव द्विषम् । चेट्यश्चेटाश्च चक्रन्दुर्हताः स्म इति भाषिणः ॥ १७८ ॥
तालवृन्तानिलेनाऽम्बुसेकेन च महीपतिः । राज्ञ्यश्च संज्ञामासेदुर्दुःखशल्यप्रतोदनीम् ॥ १७९ ॥
मलिनीभूतवासस्का, नेत्रास्रजलकज्जलैः । छाद्यमानकपोला-ऽक्ष्यो, लुलितालकवल्लिभिः ॥ १८० ॥
उरःस्थलकराघातप्रत्रुटद्धारयष्टयः । निर्भरं भूमिलुठनस्फुटत्कङ्कणमौक्तिकाः ॥ १८१ ॥
धूमं शोकानलस्येवोज्झन्त्यो निःश्वासमुच्चकैः । शुष्यत्कण्ठा-ऽधरदला, राजपत्न्योऽरुदन्नथ ॥ १८२ ॥
॥ त्रिभिर्विशेषकम् ॥
धैर्यं लज्जां विवेकं च, विहायैकपदेऽपि हि । राज्ञीवच्छोकविधुरो, विललापेति भूपतिः ॥ १८३ ॥
हे कुमाराः! क्व यूयं स्थ?, निवर्तध्वं विहारतः । राज्यायाऽवसरो वोऽद्य, व्रताय सगरस्य तु ॥ १८४ ॥

१ वृत्तान्तेन । २ मरणम् ।

सगरस्य विलापः ।

कथं न कोऽपि ब्रूते वः?, सत्युमुक्तं द्विजन्मना । दस्युनेव[१] च्छलज्ञेन, दैवेन मुषितोऽस्मि हा[२] ही ॥ १८५ ॥
अरे रे दैव! कुत्राऽसि?, कुत्राऽसि ज्वलनप्रभ? । अक्षत्रमिदमाचर्य, क्वाऽयासीर्नागपांशन[३]!? ॥ १८६ ॥
सेनापते! क्व तेऽगच्छद्दण्डदोर्दण्डचण्डिमा? । क्षेमङ्करत्वमगमत्, क्व पुरोहितरत्न! ते? ॥ १८७ ॥
गलितं वर्धके! किं ते, दुर्गनिर्माणकौशलम्? । गृहिन्! सञ्जीवनौषध्यः, किं ते कुत्राऽपि विस्मृताः?॥१८८॥
गजरत्न! किमाप्तस्त्वं, तदा गजनिमीलिकाम्[४]? । अश्वरत्न! समुत्पन्नं, शूलं किं भवतस्तदा? ॥ १८९ ॥
चक्र-दण्डा-ऽसयो! यूयं, किं तदानीं तिरोहिताः? । अभूतां मणि-काकिण्यौ!, निष्प्रभौ किं दिनेन्दुवत्?॥१९०॥
आतोद्यपुटवद् भिन्ने, किं युवां छत्र-चर्मणी? । नवाऽपि निधयो! यूयं, ग्रस्ताः किमनया भुवा? ॥ १९१ ॥
युष्मद्विश्वासतोऽशङ्कं, रममाणाः कुमारकाः । सर्वैरपि न यत् त्रातास्तस्मात् पन्नगपांसनात् ॥ १९२ ॥
करोम्येवं विनष्टे किमिदानीं ज्वलनप्रभम्? । सगोत्रमपि चेद्धन्मि, न हि जीवन्ति मे सुताः ॥ १९३ ॥
ऋषभस्वामिनो वंशे, नैवं कोऽप्यासदन्मृतिम् । त्रपाकरमिमं मृत्युं, हा वत्साः! कथमाप्नुत? ॥ १९४ ॥
पूर्वे मदीयाः सर्वेऽपि, पुरुषायुषजीविनः । दीक्षामाददिरे स्वर्गमपवर्गं च लेभिरे ॥ १९५ ॥
स्वेच्छाविहारश्रद्धाऽपि, भवतां न ह्यपूर्यत । अरण्यानीसमुत्पन्नभूरुहामिव दोहदः ॥ १९६ ॥
उदियाय च पूर्णेन्दुर्दैवाद् ग्रस्तश्च राहुणा । फलेग्रहिश्च[६] सञ्जज्ञे, तरुर्भग्नश्च कुम्भिना[७] ॥ १९७ ॥
आगता च तरी[८] तीरं, भग्ना च तटभूभृता । उन्नतश्च नवाम्भोदो, विकीर्णश्च नभस्वता ॥ १९८ ॥

१ चौरेणेव । २ खेदे । ३ नागाधम । ४ गजवद् नेत्रनिमीलिकाम् । ५ महदरण्यमरण्यानी । ६ फलवान् । ७ गजेन । ८ नौः ।

निष्पन्नं च व्रीहिवणं, दग्धं च दववह्निना । धर्मा-ऽर्थ-कामयोग्याश्च, जाता यूयं हताश्च हा ! ॥ १९९ ॥
॥ त्रिभिर्विशेषकम् ॥

प्राप्याऽपि मद्गृहं वत्सा!, अकृतार्था गता हहा! । आढ्यस्य कृपणस्येव, वेश्मोपेत्य वनीपकाः[1] ॥ २०० ॥
तदद्य किं मे चक्राद्यै, रत्नैर्निधिभिरप्यलम् । युष्मान् विना विरहिणो, ज्योत्स्नोद्यानादिकैरिव ॥ २०१ ॥
षट्खण्डभरतक्षेत्रराज्येन यदि वाऽसुभिः[2] । असुभ्योऽपि प्रियैः पुत्रैर्विनाभूतस्य किं मम? ॥ २०२ ॥
एवं विलापिनमथो, भूनाथं श्रावकद्विजः । स बोधयितुमित्यूचे, सुधामधुरया गिरा ॥ २०३ ॥
धात्र्याः परित्राणमिव, प्रबोधोऽपि तवाऽन्वये । मुख्याधिकारसम्प्राप्तो, मुधाऽन्यैर्देव! बोध्यसे ॥ २०४ ॥
जगन्मोहार्यमा[3] यस्य, साक्षाद् भ्राताऽजितप्रभुः । अन्येन बोध्यमानस्य, तस्य लज्जा न किं तव? ॥ २०५ ॥
असावसारः संसारो, ज्ञाप्यतेऽन्यस्य ते पुनः । जन्म प्रभृति सर्वज्ञसेवकस्य किमुच्यते? ॥ २०६ ॥
पितरो मातरो जायास्तनयाः सुहृदोऽपि च । स्वप्नदृष्टोपमं राजन्!, संसारे सर्वमप्यदः ॥ २०७ ॥
यत् प्रातस्तन्न मध्याह्ने, यन्मध्याह्ने न तन्निशि । निरीक्ष्यते भवेऽस्मिन् ही!, पदार्थानामनित्यता ॥ २०८ ॥
तत्त्ववित् स्वयमेवाऽसि, स्वं धैर्ये स्थापय स्वयम् । रविणा द्योत्यते विश्वं, नाऽपरो द्योतको रवेः ॥ २०९ ॥
लवणोद इवाऽम्भोधिर्मणिभिर्लवणेन च । पक्षमध्यतमिस्रेवाऽऽलोकेन तिमिरेण च ॥ २१० ॥
राकानिशाकर[4] इव, ज्योत्स्नया लाञ्छनेन च । हिमाद्रिरिव दिव्याभिरोषधीभिर्हिमेन च ॥ २११ ॥
तद् विप्रवचनं शृण्वन्, पुत्रान्तं च मुहुः स्मरन् । बोधेन च विमोहेन, चानशे पृथिवीपतिः ॥ २१२ ॥
॥ त्रिभिर्विशेषकम् ॥

१ याचकाः । २ प्राणैः । ३ जगतां मोहनाशने सूर्यसमः । ४ पूर्णिमाचन्द्रः ।

यथा नैसर्गिकं धैर्यं, महत् तस्य महीपतेः । मोहोऽप्यागन्तुको जज्ञे, पुत्रक्षयभवस्तथा ॥ २१३ ॥
एककोश इव खड्गावेकस्तम्भ इव द्विपौ । प्रबोध-मोहौ युगपत्,तदा राज्ञि बभूवतुः ॥ २१४ ॥
अथ बोधयितुं भूपं, सुबुद्धिर्नाम बुद्धिमान् । वाचा पीयूषसध्रीच्येत्युवाच सचिवाग्रणीः ॥ २१५ ॥
अम्भोधयोऽपि मर्यादां, लङ्घयेयुः कदाचन । आसादयेयुः कम्पं च, कदाचन कुलाचलाः ॥ २१६ ॥
अवाप्नुयात् तरलतां, कदाचिदपि मेदिनी । अपि जर्जरतां वज्रमश्नुवीत कदाचन ॥ २१७ ॥
त्वादृशास्तु महात्मानो, व्यसनेषु महत्स्वपि । उपस्थितेषु वैधुर्यं, न भजन्ते मनागपि ॥ २१८ ॥

॥ त्रिभिर्विशेषकम् ॥

क्षणाद् दृष्टं क्षणान्नष्टं, कुटुम्बाद्यखिलं भवे । विवेकिन इति ज्ञात्वा, न मुह्यन्ति यथा शृणु ॥ २१९ ॥
जम्बूद्वीप इह द्वीपे, क्षेत्रे भरतनामनि । कस्मिंश्चिन्नगरे कोऽपि, पुराऽभूत् पृथिवीपतिः ॥ २२० ॥
जिनधर्मसरोहंसः, सदाचारपथाध्वगः । प्रजामयूरीजलदो, मर्यादापालनाम्बुधिः ॥ २२१ ॥
सर्वव्यसनकक्षाग्निर्दयावल्ल्येकपादपः । कीर्तिकल्लोलिनीशैलः, शीलरत्नैकरोहणः ॥ २२२ ॥
स एकस्मिन् दिने स्वस्यामास्थान्यां सुखमास्थितः । यथाक्षणं विज्ञपयाम्बभूवे वेत्रपाणिना ॥ २२३ ॥
पुष्पदामकरो द्वारि, कलाविदिव कोऽपि ना ॥ विज्ञीप्सुं किञ्चिदद्यैव, देवपादान् दिदृक्षते ॥ २२४ ॥
पण्डितः किं कविः किं वा, गन्धर्वः किं नटोऽथ किम् । छान्दसो वा नीतिविद् वाऽस्त्रविद्वाऽथेन्द्रजालिकः ॥२२५॥
इति न ज्ञायते ज्ञातं, त्वाकृत्या गुणवानिति । यत्राऽऽकृतिस्तत्र गुणा, इत्यर्भा अप्यधीयते ॥ २२६ ॥

१ अमृतसमानया । २ सर्वव्यसनतृणवह्निः । ३ सभायाम् ।

आदिदेश विशामीशोऽप्येनमानय सत्वरम् । यथा विज्ञपयत्येष, यथेच्छं स्वमभीप्सितम् ॥ २२७ ॥
नृपादेशादनुज्ञातो, वेत्रिणा स तदा पुमान् । बुधोऽर्कमण्डलमिव, नृपास्थानीमथाऽविशत् ॥ २२८ ॥
रिक्तहस्तो न कुर्वीत, स्वामिदर्शनमित्यसौ । भूभुजे सुमनोदाम, मालाकार इवाऽर्पयत् ॥ २२९ ॥
वेत्रिणा दर्शिते स्थाने, ततोऽसौ रचिताञ्जलिः । निषसादाऽऽसनायुक्तैर्दत्ते तदुचितासने ॥ २३० ॥
किञ्चिदुन्नमितैकभ्रूः, स्मितस्तबकिताधरः । सप्रसादमभाषिष्ट, तमेवं पृथिवीपतिः ॥ २३१ ॥
विप्र-क्षत्रिय-विट्-शूद्रवर्णेभ्यः कतमोऽसि भोः? । अम्बष्ठ-मागधादिभ्यो, मिश्रेभ्यो वाऽसि कश्चन? ॥ २३२ ॥
तत्र किं श्रोत्रियोऽसि त्वमसि पौराणिकोऽथवा? । स्मार्तो वा? मौहूर्तो वाऽसि?, त्रिविद्याविदुरोऽसि वा? ॥ २३३ ॥
चापाचार्योऽसि यदि वा?, चर्मा-ऽसिचतुरोऽसि वा? । किं वा प्रासे कृताभ्यासः?, शल्ये वा प्रासकौशलः? ॥२३४॥
यद्वा गदायुधज्ञोऽसि?, यदि वा दण्डपण्डितः? । प्रकृष्टशक्तिः शक्तौ वा?, मुसले कुशलोऽसि वा? ॥२३५॥
निरर्गलो लाङ्गले वा? चक्रे वा प्राप्तविक्रमः? । कृपाण्यां निपुणोवाऽसि बाहुयुद्धेऽथ वा पटुः? ॥ २३६ ॥
यद्वाऽश्वहृदयज्ञोऽसि? गजशिक्षाक्षमोऽसि वा? किं व्यूहस्वनाचार्यः? किं वाऽसि व्यूहभेदकः ॥ २३७ ॥
किं वा रथादिकर्ताऽसि?, रथादिप्राजकोऽसि वा? । रजत-स्वर्ण-शुल्वादिधातूनां घटकोऽसि वा? ॥ २३८॥
चैत्य-प्रासाद-हर्म्यादिनिर्माणनिपुणोऽसि वा? । विचित्रयन्त्र-दुर्गादिरचनाचतुरोऽसि वा? ॥ २३९ ॥
सांयात्रिककुमारः किं?, सार्थवाहसुतोऽथवा? । किं वा सौवर्णिकोऽसि त्वमसि वैकटिकोऽथवा? ॥ २४० ॥

१ शून्यहस्तः । २ आसनाधिकारिभिः । ३ ऋग्-यजुः-सामवेदेषु निपुणः । ४ फलका-ऽसिविद्या- प्रवीणः । ५ कुन्तविद्यायाम् । ६ सारथिः । ७ ताम्रम् । ८ पोतवणिक्पुत्रः । ९ मणिकारः ।

किं वा वीणाप्रवीणोऽसि?, किं वेणुनिपुणोऽसि वा? । पटुः पटहवाद्ये वा?, मर्दलेवाऽसि दुर्मदः? ॥ २४१॥
यद्वा वाग्गेयकारोऽसि?, किं शिक्षागायनोऽसि वा? । रङ्गाचार्योऽथवाऽसि त्वं?, किं नाटकनटोऽसि वा? ॥
अथ वैतालिकोऽसि त्वं?, नग्नाचार्योऽथवाऽसि किम्? । संशप्तकोऽसि यदि वा?, चारणो यदि वाऽप्यसि? ॥
लिपिज्ञलेखको वा किमसि? चित्रकरोऽथवा? । अथ पुस्तकरो वा त्वमन्यो वा कोऽपि शिल्प्यसि? ॥ २४४ ॥
नदी-नद-नदीनाथतरणे वा कृतश्रमः? । मायेन्द्रजाल-कुहकप्रयोगचतुरोऽसि वा? ॥ २४५ ॥
एवं वसुमतीनाथेनाऽनुयुक्तः स सादरम् । भूयोऽपि हि नमस्कृत्य, सप्रश्रयमदोऽवदत् ॥ २४६ ॥
पाथसामिव पाथोधिरादित्यस्तेजसामिव । सर्वेषां पात्रभूतानां, त्वमाधारो धराधव! ॥ २४७ ॥
वेदादिशास्त्रविज्ञेषु, सहाधीतीव तादृशः । धनुर्वेदादिविद्वत्सु, तदाचार्य इवाऽधिकः ॥ २४८ ॥
प्रत्यक्षो विश्वकर्मेव, विश्वस्मिन् शिल्पकर्मणि । सरस्वतीव पुंरूपा, गीतादिककलासु च ॥ २४९ ॥
रत्नादिव्यवहारेषु, पितेव व्यवहारिणाम् । बन्द्यादीनामुपाध्याय, इव वाग्मितयाऽस्मि च ॥ २५० ॥
नद्यादिवारितरणं, कलालेशः कियान् मम? । इन्द्रजालप्रयोगार्थं, किन्त्वस्मि त्वामुपागतः ॥ २५१ ॥
अहं हि सद्य उद्यानवीथिकां दर्शयामि ते । मध्वादीनां परावर्तमृतूनां कर्तुमीश्वरः ॥ २५२ ॥
गन्धर्ववर्गसङ्गीतं, व्योमन्याविष्करोमि च । क्षणाददृश्यो दृश्यो वा, निमेषान्तर्भवाम्यहम् ॥ २५३ ॥
भक्षयाम्यहमङ्गारान्, खादिरानपि सक्तुवत् । चर्वयामि क्रमुकवत्, तप्तायस्तोमरानपि ॥ २५४ ॥

१ मुखेन गायकः । २ स्तुतिपाठकः । ३ युद्धादनिवर्त्तनप्रतिज्ञाकारी । ४ मृन्मयरूपघटकः । ५ सहाध्यायी । ६ सर्वस्मिन् । ७ पूगफलवत् । ८ अस्त्रविशेषान् ।

अम्भश्चर-स्थलचर-खचराणां परेच्छया । भवामि रूपान्तरभृदेकधाऽनेकधाऽप्यहम् ॥ २५५ ॥
पदार्थमिष्टमाकृष्य, दूरादप्यानयामि च । सद्यो वर्णान्तराधानं, पदार्थानां करोमि च ॥ २५६ ॥
आश्चर्यभूतान्यन्यानि, सद्यो दर्शयितुं क्षमः । कलाभ्यासप्रयासं मे, तद् दृष्ट्वा सफलीकुरु ॥ २५७ ॥
एवमुच्चैः प्रतिज्ञाय, गर्जित्वेव बलाहकम्[1] । तस्थिवांसं पुमांसं तं, व्याजहारेति भूपतिः ॥ २५८ ॥
आखोराकर्षणकृते, मूलात् खात इवाऽचलः । मत्स्यादिग्रहणायेव, शोषितं विपुलं सरः ॥ २५९ ॥
सहकारोद्यानमिव, च्छिन्नमिन्धनहेतवे । चन्द्रकान्तोपल इव, निर्दग्धश्चूर्णमुष्टये ॥ २६० ॥
पाटितं व्रणपट्टाय, देवदूष्यमिवांऽशुकम् । उत्कीलितं देवकुलं[2], कीलिकार्थमिवोच्चकैः ॥ २६१ ॥
शुद्धस्फटिकसङ्काशः, परमार्थार्जनोचितः । अहो! त्वयाऽपविद्यायै, कियदात्मा कदर्थितः? ॥ २६२ ॥
॥ चतुर्भिः कलापकम् ॥

तवाऽपविद्यामीदृक्षामवलोकयतामपि । धीभ्रंशो जायते प्राप्तसन्निपातरुजामिव ॥ २६३ ॥
याचकोऽसि गृहाणार्थमेवमेव यथेप्सितम् । आशाभङ्गो न कस्याऽपि, क्रियते मत्कुले यतः ॥ २६४ ॥
एवं स राज्ञाऽभिहितः, परुषं पुरुषस्ततः । सदा पुरुषमानीति, गूढरोषमभाषत ॥ २६५ ॥
अन्धोऽस्मि बधिरो वाऽस्मि, पङ्गुरस्म्यस्मि वा कुणिः[3] । क्लीबो वाऽस्मि दयापात्रमपरः कश्चिदस्मि वा ॥२६६॥
अदर्शयित्वा स्वगुणमकृत्वा च चमत्कृतिम् । त्यागं ते त्यागकल्पद्रोरपि गृह्णाम्यहं कथम्[4]? ॥ २६७ ॥
स्वस्त्यस्तु तुभ्यं तुभ्यं च, नमस्कारो ममैषकः । अयमन्यत्र यास्यामीत्यभिधाय स उत्थितः ॥ २६८ ॥

१ मेघम् । २ पापविद्याकृते । ३ हस्तरहितः । ४ दानम् ।

भूभुजा स्वस्य कार्पण्यदोषारोपणभीरुणा । पुरुषैर्धार्यमाणोऽपि, निर्ययौ पुरुषोऽथ सः ॥ २६९ ॥
स्वामिनाऽर्थं दीयमानमसौ नाऽऽदत्त कोपतः । दातैवाऽसीति राज्ञो ह्रीरपजह्रे स्वपूरुषैः ॥ २७० ॥
विप्रवेषमुपादाय, स एव पुरुषोऽन्यदा । उपायनकरस्तस्थौ, द्वारि तस्यैव भूपतेः ॥ २७१ ॥
तथैव राज्ञे विज्ञप्तः, स द्वाःस्थेन तथास्थितः । धर्मोऽसौ प्रतिहाराणां, द्वारागतनिवेदनम् ॥ २७२ ॥
आदेशाद् भूपतेस्तस्य, सभायां तत्र वेत्रभृत् । आयुक्तपुरुषैराशु, तं पुमांसमवीविशत् ॥ २७३ ॥
स स्थित्वा भूपतेरग्रे, समुन्नमितपाणिकः । आर्यवेदोदितान् मन्त्रानपठत् सपदक्रमम् ॥ २७४ ॥
मन्त्रपाठावसाने च, वेत्रिसन्दर्शितासने । निषसाद प्रसादार्द्रदृशा राज्ञा निरीक्षितः ॥ २७५ ॥
कस्त्वं? किमागतोऽसीति, पृष्टश्च पृथिवीभुजा । कृताञ्जलिरुवाचैवमग्रणीः सोऽग्रजन्मनाम्[२] ॥ २७६ ॥
ज्ञानानामिव मूर्त्तानां, सद्गुरूणामुपासनात् । अवाप्तसम्यगाम्नायो, राजन्! नैमित्तिकोऽस्म्यहम् ॥ २७७ ॥
अष्टाधिकरणीग्रन्थान्, फलग्रन्थानथाऽखिलान् । जातकं गणितग्रन्थान्, जानामि निजनामवत् ॥ २७८ ॥
सन्तं भूतं भविष्यन्तमर्थं सर्वं नरेश्वर! । तपःसिद्धो मुनिरिवाऽव्याहतं[३] कथयाम्यहं ॥ २७९ ॥
अन्वयुङ्क्त ततो राजा, यदस्मिन् समये द्विज! । यद् भावि तत् कथय भो!, ज्ञानस्य प्रत्ययः फलम् ॥ २८०॥
द्विजोऽपि कथयामास, वासरे सप्तमेऽर्णवः । जगदेकार्णवीकृत्य, प्रलयं प्रापयिष्यति ॥ २८१ ॥
तद्वाचा विस्मय-क्षोभौ, बिभ्राणो युगपन्नृपः । नैमित्तिकानामन्येषामीक्षाञ्चक्रे मुखान्यथ ॥ २८२ ॥
राज्ञा भ्रूसंज्ञया पृष्टा, रुष्टा दुर्घटया तया । द्विजवाचा सोपहासमूचुर्नैमित्तिकास्तु ते ॥ २८३ ॥

१ ऊर्ध्वबाहुः । २ ब्राह्मणानाम् । ३ अस्खलितम् ।

असावभिनवः कोऽपि, जज्ञे ज्योतिषिको यदि । ज्योतिःशास्त्राण्यपि स्वामिन्!, जज्ञिरे नूतनानि किम्? ॥२८४॥
एष येषां प्रमाणेन, विश्वमेकार्णवं जगत् । करिष्यत्यर्णव इति, ब्रूते श्रवणदुःश्रवम् ॥ २८५ ॥
बभूवुर्ग्रह-नक्षत्र-तारा अपि हि किं नवाः? । येषां वक्रातिचारादिप्रमाणादेष वक्त्यदः ॥ २८६ ॥
सर्वज्ञशिष्यगणभृद्ग्रथितद्वादशाङ्गतः । ज्योतिःशास्त्राणि यानीह, नैवं तदनुमानतः ॥ २८७ ॥
अमी तच्छास्त्रसंवादभाजो येऽर्कादयो ग्रहाः । तेषामप्यनुमानेन, मन्महे नेदृशं वयम् ॥ २८८ ॥
जम्बूद्वीपपरिक्षेपी, यश्चाऽयं लवणार्णवः । सोऽपि त्वमिव मर्यादां, जातुचिन्न हि लङ्घते ॥ २८९ ॥
आकाशाद् भूमिमध्याद् वा, कश्चिदुत्पद्य नूतनः । करिष्यत्यर्णवो विश्वमिदमेकार्णवं यदि ॥ २९० ॥
अयं साहसिकः किं वा, पिशाचाधिष्ठितोऽथवा? । मत्तो वा यदि वोन्मत्तो, वातूलो वा निसर्गतः? ॥२९१॥
अकालं चाऽऽगमेऽधीती[१], किमपस्मारवानथ? । यदीदृशमसम्बद्धमभिधत्ते निरर्गलः ॥ २९२ ॥ ॥ युग्मम् ॥
स्थिरः सुमेरुवत् स्वामी, भूवत् सर्वंसहश्च यत् । दुष्टैः प्रकटमीदृक्षं, स्वच्छन्दैस्तदुदीर्यते ॥ २९३ ॥
सामान्यस्याऽपि पुरतो, नेदृशं वक्तुमीश्यते । कोप-प्रसादशक्तस्य, किं पुनः स्वामिनः पुरः ? ॥ २९४ ॥
वचसो दुर्वचस्याऽस्य, वक्ता धीरः किमेष वा? । धीरः किमथवा श्रोता, यः श्रुत्वाऽपि न कुप्यति? ॥२९५ ॥
ईदृक्षमपि चेत् स्वामी, श्रद्धत्ते श्रद्दधातु तत् । विना विप्रतिपत्तिं च, प्रत्येतव्यमदोऽपि हि ॥ २९६ ॥
पर्वता उत्पतन्त्युच्चैराकाशे कुसुमानि च । वैश्वानरः[२] शीतरुचिर्वन्ध्यायाश्च स्तनन्धयः[३] ॥ २९७ ॥
चक्रीवतो[४] विषाणं च, दृषदस्तरणं जले । अवेदना नारकाश्च, नो चेदस्याऽपि वाक् तथा ॥२९८॥ ॥ युग्मम् ॥

१ कुशलः । २ अग्निः । ३ पुत्रः । ४ गर्दभस्य ।

ततो युक्तमयुक्तं च, विदन्नपि महीपतिः । तस्य नैमित्तिकस्याऽभिमुखमैक्षिष्ट कौतुकात् ॥ २९९ ॥
अथ नैमित्तिकः सोऽपि, सोपहासगिरा तया । नुन्नः[1] प्रवयणेनेव, सावष्टम्भमदोऽवदत् ॥ ३०० ॥
राजन्! सभायां भवतः, किं नर्मसचिवा[2] अमी? । वासन्तिकाः किमथवा?, किमथ ग्रामपण्डिताः? ॥ ३०१॥
सभ्याः सभाया भवतोऽप्येवंप्रायाः प्रभो! यदि । निराश्रया सती हन्त!, तदा दग्धा विदग्धता ॥ ३०२ ॥
तव विश्वविदग्धस्य, मुग्धैरेभिः समं कथम् । गोष्ठी हा! मृगराजस्य, मृगधूर्तैः[3]रिवोचिता? ॥ ३०३ ॥
समं कुलक्रमेणैव, समायाता अमी यदि । स्त्रीवत् पोषणमात्रं तदर्हन्त्यल्पधियोऽपि हि ॥ ३०४ ॥
न सभायामासयितुं, सभ्यत्वेनोचिता अमी । स्वर्ण-माणिक्यघटिते, किरीटे काचखण्डवत् ॥ ३०५ ॥
रहस्यं न हि जानन्ति, शास्त्रवाचां[4] मनागपि । गर्विताः पाठमात्रेण, किन्त्वमी शुकवत् सदा ॥ ३०६ ॥
वाच उत्फुल्लगल्लानां, पल्लवग्राहिणामिमाः । ये जानन्ति रहस्यार्थं, परिभाव्य वदन्ति ते ॥ ३०७ ॥
उष्ट्रपृष्ठसमारूढः, कुतुपः[5] सार्थवाहिनः । देशाद् देशान्तरं याति, पन्थानं किमु वेत्ति सः? ॥ ३०८ ॥
तुम्बैः कक्षाविनिक्षिप्तैर्निम्नगायां सरस्यथ । तरत्यतारकोऽप्यम्भस्तरीतुं[6] किं नु वेत्ति सः? ॥ ३०९ ॥
गुरुवागनुवादेन, शास्त्राण्येतेऽप्यधीयते । रहस्यभूतमर्थं तु, न जानन्ति मनागपि ॥ ३१० ॥
अश्रद्धेयं मम ज्ञानममीषां यदि दुर्धियाम् । मज्ज्ञानप्रत्ययाघाटः, किं दूरे सप्तवासरी? ॥ ३११ ॥
जगदेकार्णवीकृत्य, पर्यस्तैर्निजवारिभिः । सत्यापयति मद्वाचं, भगवांश्चेन्महार्णवः ॥ ३१२ ॥
तदमी पारिषद्यास्ते, ज्योतिर्ग्रन्थार्थवेदिनः । उत्पतिष्णून् पक्षिवत् किं, दर्शयिष्यन्ति पर्वतान्? ॥ ३१३ ॥

१ प्रतोदेन प्रेरितः । २ विदूषकाः । ३ शृगालैः । ४ पदलवग्राहिणाम् । ५ चर्मपात्रम् । ६ सीमा ।

द्रुमवद्दर्शयिष्यन्ति, खे पुष्पाण्यग्निमम्बुवत् । किं नु स्प्रक्ष्यन्ति वन्ध्या या, लप्स्यन्ते धेनुवत् सुतम्? ॥३१४॥
विषाणिनं महिषवत्, किमानेष्यन्ति रासभम्? । तरीवत् तारयिष्यन्ति, किं पाषाणान् जलाशये? ॥ ३१५ ॥
अवेदनान् नारकांश्च, भाषमाणा इमे जडाः । किमन्यथा करिष्यन्ति, ग्रन्थान् सर्वज्ञभाषितान्? ॥ ३१६ ॥
॥ पञ्चभिः कुलकम् ॥
धृतस्त्वत्पुरुषैरत्राऽवस्थास्ये सप्त वासरान् । न खल्वेवमवष्टम्भं[1], कुर्वन्त्यनृतभाषिणः ॥ ३१७ ॥
सत्यं न चेन्मम वचः, सप्तमेऽह्नि भवेन्नृप! । निग्राहणीयः श्वपचैरहं[2] तस्करवत् तदा ॥ ३१८ ॥
राजाऽपि स्वानुवाचैवं, ब्राह्मणस्याऽस्य गीरियम् । अनिष्टा दुर्घटा वा संवादिन्यपि च यद्यपि ॥ ३१९ ॥
तथाऽपि सप्ताहोरात्रान्, मनः सन्देग्धि हन्त! नः । भविष्यति तदन्तेऽस्य, सत्या-ऽसत्यविवेचनम् ॥ ३२० ॥
॥ युग्मम् ॥
इत्युक्त्वा न्यासमिव तं, नृपतिः स्वाङ्गरक्षिणाम् । द्विजं समर्पयामास, पर्षदं विससर्ज च ॥ ३२१ ॥
महत् कुतूहलमहो!, द्रष्टव्यं सप्तमे दिने । उन्मत्तभाषी विप्रोऽयं, तदहो! निहनिष्यते ॥ ३२२ ॥
ही! स्याद् युगान्तः को ह्येवमन्यथा मृत्यवे वदेत्? । एवं तदानीमभवद्, विचित्रा नागरोक्तयः ॥ ३२३ ॥
॥ युग्मम् ॥
आश्चर्यं दर्शयिष्यामि, सम्प्राप्तेऽहनि सप्तमे । इत्युत्सुको द्विजः कष्टं, षड् दिनान्यत्यवाहयत् ॥ ३२४ ॥
राजाऽपि संशयच्छेदोत्कण्ठितो गणयन् मुहुः । कथञ्चिदतिचक्राम, षण्मासानिव षड् दिनान् ॥ ३२५ ॥

१ स्थिरताम् । २ चाण्डालैः ।

चन्द्रशालास्थितो राजा, सप्तमेऽहन्युवाच तम् । पूर्णोऽवधिस्त्वदीयस्य, वचसो जीवितस्य च ॥ ३२६ ॥
प्रलयाय त्वयाऽऽख्यातः, समुद्भ्रान्तो महार्णवः । स दूरे तावदद्याऽपि, जललेशोऽपि नेक्ष्यते ॥ ३२७ ॥
सर्वप्रलयशंसित्वात्, तव सर्वोऽपि वैर्यहो! । अनृतायां प्रतिज्ञायां, निग्रहाय यतिष्यते ॥ ३२८ ॥
भवता जन्तुमात्रेण, निगृहीतेन किं मम? । इदानीमपि गच्छ त्वमुन्मत्तेन त्वयोदितम् ॥ ३२९ ॥
वराको मुच्यतामेष, मेषवद् यात्वसौ सुखम् । इत्यात्मरक्षकानुच्चैरादिदेश विशाम्पतिः ॥ ३३० ॥
विप्रोऽपि प्रत्युवाचैवं, स्मितविच्छुरिताधरः[1] । युक्तं प्राणिषु कारुण्यं, सर्वेष्वपि महात्मनाम् ॥ ३३१ ॥
किन्तु नाऽद्यापि करुणापात्रमस्मि महीपते! । न यावदनृतीस्यान्मे, प्रतिज्ञा सा तदोदिता ॥ ३३२ ॥
अनृतायां प्रतिज्ञायां, मद्वधस्य त्वमीशिषे । वधार्हं मां तदा मुञ्चन्, कृपावानुच्यसे नृप! ॥ ३३३ ॥
मुक्तोऽपि नाऽहं यास्यामि, स्थास्यामि घृतवत् पुनः । स्तोकमेवान्तरं विद्धि, प्रतिज्ञापूरणे मम[2] ॥ ३३४ ॥
क्षणमात्रं प्रतीक्षस्वाऽत्रैव प्रेक्षस्व च क्षणात् । उदस्तोदन्वदुल्लोलान्, यमस्येवाऽग्रसैनिकान् ॥ ३३५ ॥
नैमित्तिकसदस्यान् स्वान्, कुरुष्व क्षणसाक्षिणः । भविष्यामः क्षणादूर्द्ध्वं, नाऽहं न त्वं न चापि ते ॥ ३३६॥
अभिधायेति तूष्णीकस्तस्थौ नैमित्तिकोऽथ सः । अव्यक्तः शुश्रुवे चोच्चैर्मृत्युगर्जिरिव ध्वनिः ॥ ३३७ ॥
आकस्मिकं महाध्वानं, तमातङ्क[3]विधायिनम् । आकर्ण्य तस्थुरुत्कर्णाः, सर्वे वनमृगा इव ॥ ३३८ ॥
किञ्चिदुन्नमितग्रीवः, किञ्चिदुच्छ्वस्य चाऽऽसनात् । किञ्चिद् वक्त्रोष्ठिकां[4] कुर्वन्नित्यूचे स पुनर्द्विजः ॥ ३३९ ॥
ध्वनिराकर्ण्यतां राजन्!, रोदसी पूरयन्नयम् । भम्भाध्वनिस्तवेवाम्भोनिधेः प्रस्थानसूचकः ॥ ३४० ॥

१ हास्यव्याप्ताधरः । २ महाकल्लोलान् । ३ पीडाकरम् । ४ मन्दहास्यम् ।

यस्य वारिलवेनाऽपि, गृहीतेन घनाघनाः । प्लावयन्ति महीं सर्वां, पुष्करावर्तकादयः ॥ ३४१ ॥
स मर्यादां समुल्लङ्घ्य, स्वयं प्रचलितोऽधुना । अम्भोधिः प्लावयन्नुर्वीमवार्यः प्रेक्ष्यतामयम् ॥ ३४२ ॥
बिभर्ति गर्तान् मथ्नाति, वृक्षान् स्थगयति स्थलीः । गिरीनप्यन्तरयति, दुर्वारो हन्त! वारिधिः ॥ ३४३ ॥
वायोर्वेश्मप्रवेशादि, ज्वलनस्य पुनर्जलम् । प्रतीकारोऽस्ति जलधेश्चलितस्य पुनर्न हि ॥ ३४४ ॥
इति ब्रुवाणं ब्रह्माणं, पश्यतस्तं महीपतेः । मृगतृष्णाम्बुवद् दूराद्, विष्वगाविरभूज्जलम् ॥ ३४५ ॥
सौप्तिकेनेव विश्वस्तं, विश्वं संहृतमब्धिना । हा हेत्याक्रोशिनो दीनाः, सर्वे ददृशुरुन्मुखाः ॥ ३४६ ॥
अथ राज्ञः पुरोभूय, सोऽङ्गुल्या दर्शयन् द्विजः । प्लाव्यमानं प्लाव्यमानं, शशंसेती नृशंसवत् ॥ ३४७ ॥
निरीक्षन्ताममी भो भोः!, सर्वे प्रत्यन्तपर्वताः । पिधीयन्ते पयोराशेः, पयोभिस्तिमिरैरिव ॥ ३४८ ॥
मन्ये प्रोन्मूलितान्यद्भिः[2], सर्वाण्यपि वनानि तु । दृश्यन्ते यत् तरन्तोऽमी, तरवो नक्रचक्रवत् ॥ ३४९ ॥
अधुना प्लावयत्युच्चैर्ग्रामा-ऽऽकर-पुरादिकम् । इदमभोनिधेरम्भो, धिगहो! भवितव्यता ॥ ३५० ॥
पुरीपरिसरोद्यानान्यपीदानीं निरर्गलैः । पिहितान्यम्बुधेस्तोयैः, पिशुनैरिव सद्गुणाः ॥ ३५१ ॥
प्राकारवलयेऽमुष्मिन्नालवाल इवाऽधुना । धुनीपतेर्[3]ध्वनन्नीरमास्फलत्युच्चकैर्नृप! ॥ ३५२ ॥
अयमुल्लङ्घ्यते वप्रः, क्षिप्रं प्रसृमराम्भसा । रभसादश्ववारेणाऽश्व इवाऽतितरस्विना[4] ॥ ३५३ ॥
पश्यैतत् पूर्यते सर्वं, सप्रासादं समन्दिरम् । अम्भोधेरेवमम्भोभिः, प्रचण्डैः कुण्डवत् पुरम् ॥ ३५४ ॥
वेश्मद्वारे तवेदानीमश्वसैन्यमिवोल्ललत् । शब्दायमानमुद्दामं, देवाऽऽपतति वार्यदः ॥ ३५५ ॥

१ रात्रियुद्धेन । २ वारिभिः । ३ समुद्रस्य । ४ अतिवेगवता ।

मग्नस्य पत्तनस्याऽस्याऽवशेषः पृथिवीपते! । अन्तरीप[1] इवाऽयं ते, प्रासादः प्रेक्ष्यतेऽधुना ॥ ३५६ ॥
अध्यारोहति सोपानवीथीषु च पयोऽस्खलत् । तव प्रसाददुर्मत्तमिव सेवक-राजकम् ॥ ३५७ ॥
पूरिता प्रथमा भूमिर्द्वितीयाऽप्यद्य पूर्यते । तामापूर्य तृतीयाऽपि, पूर्यते भूमिरम्भसा ॥ ३५८ ॥
चतुर्थी पञ्चमी षष्ठी, चाऽपि भूः पश्यतोऽपि हि । अहो! क्षणार्धमात्रेण, पूरिता वार्धिवारिभिः ॥ ३५९ ॥
विषवेगैरिवाऽम्भोभिराक्रान्तस्याऽस्य सद्मनः । शिरोगृहं शिर इव, शरीरस्याऽवशिष्यते[2] ॥ ३६० ॥
उपस्थितो युगान्तोऽयमुक्तपूर्वीदमस्म्यहम् । क्व ते सदस्यास्ते राजन्!, ये मां हसितपूर्विणः? ॥ ३६१ ॥
ततश्च विश्वसंहारशोकाद् राजाऽपि सत्वरम् । झम्पादानार्थमुत्थायाऽबध्नात् परिकरं दृढम् ॥ ३६२ ॥
प्लवङ्गम इवोत्पत्य, ददौ झम्पां महीपतिः । स्वं च सिंहासनासीनं, तं चाऽपश्यत् तथास्थितम् ॥ ३६३ ॥
ययौ च क्वचिदप्यम्भस्तदम्भोधेः क्षणादपि । तस्थौ च विस्मयस्मेरलोचनः स महीपतिः ॥ ३६४ ॥
अभग्नाभुग्न[3]वृक्षाऽद्रि-प्राकार-भवनादिकम् । ईक्षाञ्चक्रे तथावस्थं, विश्वं विश्वम्भरापतिः ॥ ३६५ ॥
मायानैमित्तिकः सोऽपि, कट्यामाबध्य मर्दलम् । आस्फालयन् स्वपाणिभ्यां, पपाठेति ससम्मदः ॥ ३६६ ॥
इन्द्रजालप्रयोगादौ, नमामि चरणाम्बुजे । इन्द्रजालकलास्त्रष्टुर्वज्रिणः शम्बर[4]स्य च ॥ ३६७ ॥
निजसिंहासनासीनस्ततः स पृथिवीपतिः । किमेतदिति साश्चर्यो, द्विजन्मानमभाषत ॥ ३६८ ॥
अवदद् ब्राह्मणोऽप्येवं, निःशेषाणां कलाविदाम् । गुणप्रकाशी राजेति, पुराऽस्मि त्वामुपस्थितः ॥ ३६९ ॥
इन्द्रजालं मतिभ्रंशकारीति न्यक्कृ[5]तस्त्वया । प्रदीयमानमप्यर्थमनादाय गतोऽस्मयहम् ॥ ३७० ॥

१ द्वीप इव । २ पूर्वं हसितवन्तः । ३ अभुग्ना अनताः । ४ देवविशेषः । ५ तिरस्कृतः ।

अर्थे भूयस्यपि प्राप्ते, गुणार्जनभवः श्रमः । न याति गुणिनां किन्तु, गुणज्ञानेन गच्छति ॥ ३७१ ॥
अद्य नैमित्तिकीभूय, च्छलेनाऽप्यमुना मया । इन्द्रजालकलाभ्यासं, ज्ञापितोऽसि प्रसीद मे ॥ ३७२ ॥
सदस्या न्यक्कृतास्ते यच्चिरं यत् त्वं च मोहितः । राजन्! सहस्व तत् सर्वं, नाऽपराधोऽस्ति तत्त्वतः ॥३७३॥
इत्युदित्वा स्थिते तस्मिन्, पार्थिवः परमार्थवित् । निजगादेति पीयूषस्यन्दसोदरया[1] गिरा ॥ ३७४ ॥
राजानं राजसभ्यांश्च, न्यक्कार्षमिति चेतसि । मा स्म भैषीरहो! विप्रोपकारी परमोऽसि मे ॥ ३७५ ॥
इन्द्रजालमिदं ह्यद्य, दर्शयित्वा त्वया द्विज! । तत्तुल्यमेतं संसारमसारं ज्ञापितोऽस्म्यहम् ॥ ३७६ ॥
दृष्टनष्टमिदं यद्वत्, त्वयाऽऽविर्भावितं जलम् । तद्वत् पदार्थाः सर्वेऽपि, संसारेऽद्यापि का रतिः? ॥ ३७७ ॥
चिरमित्यादिसंसारदोषान् व्याहृत्य भूपतिः । कृतार्थीकृत्य तं विप्रं, प्रव्रज्यामाददे स्वयम् ॥ ३७८ ॥
तदिन्द्रजालरूपोऽयं, भवोऽस्माभिरनूद्यते । प्रभो! वेत्सि स्वयं हि त्वं, सर्वज्ञकुलचन्द्रमाः ॥ ३७९ ॥
वाचस्पतिमतिर्वाचा, शोकशल्यविशल्यया[2] । इत्युवाच द्वितीयोऽपि, मन्त्री नृपतिपुङ्गवम् ॥ ३८० ॥
इहैव भरतक्षेत्रे, कस्मिन्नपि पुरे पुरा । बभूव नृपतिः कोऽपि, विवेकादिगुणाकरः ॥ ३८१ ॥
तमास्थानस्थमन्येद्युः, पार्थिवं कोऽपि पूरुषः । मायाप्रयोगनिष्णं स्वं, ज्ञापयामास वेत्रिणा ॥ ३८२ ॥
प्रवेशं नृपतिस्तस्य, नानुजज्ञे[3] विशुद्धधीः । न मायिनामृजूनां चाऽऽर्जवं[4] शाश्वतवैरिवत् ॥ ३८३ ॥
प्रतिषेधविलक्षः सन्, स नीत्वाऽहानि कानिचित् । चक्रे रूपपरावर्तं[5], कामरूप इवाऽमरः ॥ ३८४ ॥
स तमेवाऽन्यदा भूपमुपतस्थे विहायसा । कृपाणपाणिः फलकी, वरनारीसमन्वितः ॥ ३८५ ॥

१ अमृतरससमानया । २ शोक एव शल्यं तदर्थं विशल्योषधितुल्यया । ३ नानुमेने । ४ मैत्री । ५ फलकधरः ।

असि कस्त्वमियं का च?, हेतुना केन चाऽऽगमः? । इति राज्ञा स्वयं पृष्टः, स पुमानब्रवीदिति ॥ ३८६ ॥
अहं विद्याधरो विद्याधरी चेयं मम प्रिया । विद्याधरेण[1] केनाऽपि, जातवैरोऽस्मि भूपते! ॥ ३८७ ॥
इयं हि पूर्वं तेन स्त्रीलम्पटेन दुरात्मना । सुधा विधुन्तुदेनेवाऽपहृता च्छलकर्मणा ॥ ३८८ ॥
प्रत्याहार्षमहं तस्मादिमां प्राणप्रियां प्रियाम् । नारीपरिभवं राजन्!, सहन्ते पशवोऽपि न ॥ ३८९ ॥
चरितार्थौ प्रचण्डौ ते, दोर्दण्डौ क्षितिधारणात् । अर्थिनां दौस्थ्यघातेन, सम्पच्च्च सफला तव ॥ ३९० ॥
भीतानामभयदानात्, कृतार्थो विक्रमश्च ते । विदुषां संशयच्छेदादमोघा शास्त्रवैदुषी ॥ ३९१ ॥
विश्वस्य कण्टकोद्धारात्, फलवच्छस्त्रकौशलम् । अन्येऽप्यन्योपकारेण, कृतार्थास्ते पृथग्गुणाः ॥ ३९२ ॥
परस्त्रीसोदरत्वं च, तवेदं विश्वविश्रुतम् । अस्तु मय्युपकारेण, विशिष्टफलवन्नृप! ॥ ३९३ ॥
प्रियया पार्श्ववर्तिन्या, सन्दानित[2] इवाऽनया । नाऽलम्भविष्णुर्योद्धुं हि, परैश्छलपरैरहम्[3] ॥ ३९४ ॥
नाऽहं हस्तिबलं याचे, याचे वाजिबलं न वा । न वा रथबलं याचे, याचे पत्तिबलं न वा ॥ ३९५ ॥
आत्मसाहायिके त्वत्तः, किन्तु याचे नराधिप! । एतस्या न्यासवत् त्राणं, परनारीसहोदर! ॥ ३९६ ॥
स्वयं स्त्रीलम्पटः कोऽपि, परित्राणसहोऽपि सन् । कोऽप्यस्त्रीलम्पटः स्वेन, परित्राणासहः परम् ॥ ३९७ ॥
त्वमस्त्रीलम्पटस्त्राणसहश्चाऽसि महीपते! । तेन दूरादुपेत्याऽपि, त्वमसि प्रार्थितो मया ॥ ३९८ ॥
अयं मत्प्रेयसीरूपो, न्यासश्चेत् स्वीकृतस्त्वया । ज्ञायतां हत एवाऽरिः, स मया बलवानपि ॥ ३९९ ॥
अथोल्लसत्स्मितज्योत्स्नापवित्रमुखचन्द्रमाः । उदारचरितः पृथ्वीपतिरेवमवोचत ॥ ४०० ॥

१ राहुणा । २ बद्ध इव । ३ शत्रुभिः ।

कल्पद्रुरिव पत्राणि, रत्नाकर इवोदकम् । कामधेनुरिव क्षीरं, रोहणाद्रिरिवोपलम् ॥ ४०१ ॥
अन्नमात्रमिव श्रीदश्छायामात्रमिवाऽम्बुदः । दूरादुपेत्य भवता, कियदस्मीदमर्थितः ॥४०२ ॥ युग्मम् ॥
तमेव दर्शय निजं, रिपुं येन निहन्म्यहम् । निर्विशङ्कं ततो भोगान्, भुङ्क्ष्व मङ्क्षु विचक्षण! ॥ ४०३ ॥
नृपवागमृताप्लावपूर्णश्रवणकोटरः । मुदितः पुरुषः सोऽपि, जगादेति महीपतिम् ॥ ४०४ ॥
रजतं जातरूपं च, समस्ता रत्नजातयः । पितरो मातरः पुत्राः, सर्वं चाऽन्यद् गृहादिकम् ॥ ४०५ ॥
विश्वासेनाऽल्पकेनाऽपि, न्यासेऽर्पयितुमीश्यते । विश्वासेनाऽपि महता, न पुनः प्रेयसी क्वचित् ॥ ४०६॥
राजन्नीदृशविश्वासस्थानं त्वमसि नाऽपरः । चन्दनास्पदमेको हि, मलयः सानुमानिह ॥ ४०७ ॥
बिभ्राणेन त्वया न्यासे, मदीयां प्रेयसीमिमाम् । त्वयैव निहतो मन्ये, द्विषन्तप! स मे द्विषन् ॥ ४०८ ॥
भार्यान्यासे त्वयोपात्ते, त्वद्विश्वाससमाहितः । विश्वस्तभार्यान् द्विषतः, करिष्याम्यधुना ननु ॥ ४०९ ॥
क्षोणीनाथ! तवाऽत्रैव, तिष्ठतो नचिरादहम् । केसरीव समुत्पत्य, दर्शयिष्यामि विक्रमम् ॥ ४१० ॥
अनुमन्यस्व गच्छामि, स्वच्छन्दं पक्षिराडिव । एषोऽहमन्तरिक्षेण, क्षणादस्खलितस्यदः ॥ ४११ ॥
राजाऽप्यूचे व्रज स्वैरं, विद्याधर! महाभट! । तिष्ठत्वेषा तु ते भार्या, मद्धाम्नि पितृधामवत् ॥ ४१२ ॥
अथोत्पपात स पुमान्, विहायोवद् विहायसा । निस्त्रिंशदण्ड-फलके, पक्षाविव विजृम्भयन् ॥ ४१३ ॥
तद्भार्या तु स्वदुहितृप्रतिपत्तिपुरःसरम् । राज्ञा सम्भाषिता तस्थौ, तत्रैव स्वस्थमानसा ॥ ४१४ ॥
तत्रैव तिष्ठन् नृपतिर्जायमानां नभस्तले । क्ष्वेडामाकर्णयामास, स्तनितं वार्मुचामिव ॥ ४१५ ॥

१ सद्यः । २ गरुड इव । ३ वेगः । ४ पक्षिवत् । ५ मेघानामिव ।

विचित्रखड्ग-फलकप्रहारध्वनितान्यपि । तडत्तडितिविस्फूर्जत्तडित्ताडानिवाऽशृणोत् ॥ ४१६ ॥
सोऽसि सोऽसि नासि नासि, तिष्ठ तिष्ठ व्रज व्रज्ञ । एष त्वां हन्मि हन्मीति, व्योम्नि शुश्रुविरे गिरः ॥ ४१७ ॥
नृपतिः पर्षदासीनः, पार्षद्यैः सह विस्मितः । उपरागेक्षण इव, तस्थौ सुचिरमुन्मुखः ॥ ४१८ ॥
इत्थं सम्पश्यमानस्य, भूपतेः पुरतो भुवि । भुजदण्डः पपातैको, रत्नकङ्कणभूषणः ॥ ४१९ ॥
उपलक्षयितुं तं च, बाहुदण्डं दिवश्च्युतम् । विद्याधरी[२] पुरोभूय, साऽपश्यच्च जगाद च ॥ ४२० ॥
गण्डयोरुपधानत्वं, कर्णयोरवतंसताम् । कण्ठे च निष्कतां[३] योऽगात्, सोऽयं मत्प्रेयसो भुजः ॥ ४२१ ॥
एवं वदन्त्यां पश्यन्त्यामेव तस्यां मृगीदृशि । भुवि पादः पपातैको, दोष्णः[३] प्रीत्येव तस्य तु ॥ ४२२ ॥
सपादकटकं पादमुपलक्ष्य तमप्यथ । उदश्रुवदना पद्मवदना साऽवदत् पुनः ॥ ४२३ ॥
चिरमभ्यक्त उन्मृष्टः, क्षालितोऽथ विलेपितः । स्वहस्तेन मया यो हि, स पादो मत्पतेरयम् ॥ ४२४ ॥
एवं तस्या ब्रुवाणायाः, पुरो गीर्वाणवर्त्मनः[४] । वातोद्धूतद्रुशाखेव, द्वितीयोऽपि भुजोऽपतत् ॥ ४२५ ॥
तमप्यालोक्य दोर्दण्डं, रत्नकेयूर-कङ्कणम् । सोवाच स्पन्दमानाक्षी, धारायन्त्रवधूरिव ॥ ४२६ ॥
सोऽयं सीमन्तरचनाचतुरः केशकङ्कतः[५] । विचित्रपत्रलतिकालीलालिपिकरः करः ॥ ४२७ ॥
तस्यास्तत्रैव तिष्ठन्त्या, एवाऽग्रे गगनाङ्गणात् । पपाताङ्घ्रिर्द्वितीयोऽपि, साऽपि भूयोऽब्रवीदिदम् ॥ ४२८ ॥
स एष मत्पतेः पादो, मत्कराम्भोजलालितः । अनारतं मदुत्सङ्गशय्यादुर्ललितो हहा! ॥ ४२९ ॥
अथ तत्रैव तत्कालं, मुण्ड-रुण्डौ निपेततुः[६] । हृदयेन समं तस्याः, कम्पयन्तौ महीतलम् ॥ ४३० ॥

१ उपरागे ग्रहणे ईक्षणे नेत्रे यस्य सः । २ हृदयाभूषणम् । ३ करस्य । ४ आकाशात् । ५ केशप्रसाधनसाधनम् । ६ शीर्षकबन्धौ ।

अथ सा विललापैवं, बलिना च्छलिना द्विषा । हा! हतो मत्पतिरसौ, हा! हताऽस्मि तपस्विनी ॥ ४३१ ॥
एतत् तदेव वदनं, मत्पतेः पद्मसोदरम् । यन्मया परया प्रीत्या, कुण्डलाभ्यामभूष्यत ॥ ४३२ ॥
तदेतत् तस्य हृदयं, विपुलं हन्त! मत्पतेः । अन्तर्बहिश्च यद् वासस्थानमेकं ममैव हि ॥ ४३३ ॥
हा! नाथाऽहमनाथाऽस्मि, त्वां विना नन्दनाद् वनात् । पुष्पाण्यानीय को नाम, ममोत्तंसीकरिष्यति? ॥४३४॥
एकासनसमासीना, विचरन्ती नभोऽङ्गणे । यथासुखं केन समं, वादयिष्यामि वल्लकीम्? ॥ ४३५ ॥
वल्लीकीमिव को वा मामुत्सङ्गे धारयिष्यति? । शय्याविशंस्थुलान् को वा, स्थापयिष्यति मेऽलकान्? ॥ ४३६॥
कोपिष्यामि मुहुः कस्मै, प्रौढप्रणयलीलया? । मत्पादघातोऽस्तु मुदे, कस्याऽशोकतरोरिव? ॥ ४३७ ॥
हा प्रिय! स्तबकीभूतकौमुदीभिरिवाऽद्य मे । गोशीर्षचन्दनरसैः, कोऽङ्गरागं करिष्यति? ॥ ४३८ ॥
कपोलपाल्योर्ग्रीवायां, ललाटे कुचकुम्भयोः । कोऽद्य मे पत्ररचनां, सैरन्ध्रीव[3] विधास्यति? ॥ ४३९ ॥
अप्यलीकव्यलीकेन, मानमौनधरां च माम् । आलापयिष्यत्यथ कः, क्रीडाराजशुकीमिव? ॥ ४४० ॥
प्रिये! प्रिये! देवि! देवीत्यादिचाटुगिरा मुहुः । को वा कृतकसुप्तां[4] मां, स्वयमुद्बोधयिष्यति? ॥ ४४१ ॥
विलम्बेनाऽद्य पर्याप्तममुनाऽऽत्मविडम्बिना । महापथमहापान्थं[5], नाथ! त्वामनुयाम्यहम् ॥ ४४२ ॥
प्राणनाथपथे गन्तुकामा कामं कृताञ्जलिः । सा पावकं यानमिव, ययाचे वसुधाधवात् ॥ ४४३ ॥
तामभाषिष्ट भूपोऽपि, वत्से! स्वच्छाशये! त्वया । पत्युः सम्यगविज्ञाय, कथां किमिदमुच्यते? ॥ ४४४ ॥
रक्षो-विद्याधरादीनां, मायाऽपि भवतीदृशी । तन्मुहूर्त्तं प्रतीक्षस्व, स्वाधीनं ह्यात्मसाधनम् ॥ ४४५ ॥

१ वीणाम् । २ शय्यायां विप्रकीर्णान् । ३ निपुणा दासीव । ४ अलीकसुप्ताम् । ५ मृत्युमार्गपथिकम् ।

सा भूयो भूपतिं स्माऽऽह, साक्षादेष पतिर्मम । प्रधने[1] निधनं नीतः, पतितश्चेह दृश्यते ॥ ४४६ ॥
सन्ध्या सहोदयं याति, सहाऽस्तं च विवस्वता[2] । जीवन्ति च म्रियन्ते च, समं पत्या पतिव्रताः ॥ ४४७ ॥
पितुरम्लानवंशस्य, स्वस्य पत्युरपीदृशः[3] । कुले कलङ्कं किमहं, जीवन्त्यारोपयाम्यतः? ॥ ४४८ ॥
धर्मपुत्रीं च मां पश्यन्, विना पतिमवस्थिताम् । न किं लज्जिष्यसे तात!, कुलस्त्रीधर्मकोविद!? ॥ ४४९ ॥
विनेन्दुमिव कौमुद्या, विनाऽब्दमिव विद्युतः । विना नाथमवस्थानं, युक्तं नाऽतः परं मम ॥ ४५० ॥
आयुक्तानादिशैधांसि[4], समानायय मत्कृते । समं पतिशरीरेण, वह्नौ वेक्ष्यामि वारिवत् ॥ ४५१ ॥
तया साग्रहमित्युक्तः, क्ष्मापतिः[5] करुणापरः । शोकगद्गदया वाचा, पुनरेवमुवाच ताम् ॥ ४५२ ॥
तिष्ठ तिष्ठ कियत्कालं, न मर्तव्यं पतङ्गवत् । विमृश्य हि विधातव्यमल्पीयोऽपि प्रयोजनम् ॥ ४५३ ॥
कुपिता भामिनी साऽथ, भूनाथमिदमभ्यधात् । अतः परं धारयन् मां, ज्ञातं तातो न खल्वसि ॥ ४५४ ॥
परस्त्रीसोदर इति, नाम यत् प्रथितं तव । तद् विश्वविश्वासकृते, न पुनः परमार्थतः ॥ ४५५ ॥
तत् सत्यं यदि तातोऽसि, सत्त्वं स्वदुहितुस्ततः । पश्याऽनुयान्त्या भर्तारं, कृष्णवर्त्मैकवर्त्मना[6] ॥ ४५६ ॥
राजाऽपि व्याजहारैवं, वत्से! कुरु समीहितम् । नातः परं निरोद्धास्मि, पवित्रय सतीव्रतम् ॥ ४५७ ॥
ततः प्रमुदिता राजादेशादुपनते रथे । भर्तुरङ्गानि सत्कृत्याऽऽरोपयामास सा स्वयम् ॥ ४५८ ॥
अङ्गे कृताङ्गरागा सा, संवीतविशदांशुका[7] । सपुष्पकुन्तला पत्युः, पार्श्वमध्यास्त पूर्ववत् ॥ ४५९ ॥

१ युद्धे । २ सूर्येण । ३ षष्ठ्यैकवचनमिदम् । ४ सेवकान् । ५ नृपः । ६ अग्निमार्गेण । ७ परिहितस्वच्छवस्त्रा ।

अन्वीयमाना न्यग्ग्रीवं[1], सशोकेन महीभुजा । साश्रुयैर्वीक्ष्यमाणा च, पौरैः सा सरितं ययौ ॥ ४६० ॥
आजहुश्चन्दनैधांसि, तत्राऽऽयुक्ताः क्षणादपि । चितां च रचयाञ्चक्रुस्तल्पं पितृपतेरिव[2] ॥ ४६१ ॥
पित्रेव पृथिवीशेन, तेन सम्पूरितं वसु । याचकेभ्यो यथाकामं, ददौ कल्पलतेव सा ॥ ४६२ ॥
पयःपूर्णाञ्जलिपुटा, तत्र त्रिः साऽऽशुशुक्षणिम्[3] । चक्रे प्रदक्षिणं जातदक्षिणावर्त्तरोचिषम्[4] ॥ ४६३ ॥
सतीसत्यापनां[5] कृत्वा, पत्युरङ्गैः सहैव तैः । वासागार इव स्वैरं, चितान्तः प्रविवेश सा ॥ ४६४ ॥
प्राज्याभिराज्यधाराभिराहुतोऽथ हुताशनः[6] । जज्वालाऽभ्यधिकं ज्वालाजालपल्लविताम्बरः ॥ ४६५ ॥
तानि विद्याधराङ्गानि, सा चैधांसि च तत्क्षणम् । अभवद् भस्मसात् सर्वं, जलं लवणसादिव[7] ॥ ४६६ ॥
तत्र तस्या निवापादि, कृत्वा शोकसमाकुलः । आजगाम निजं धाम, ततः स जगतीपतिः ॥ ४६७ ॥
यावत् सशोकः परिषद्यासाञ्चक्रे महीपतिः । आययौ स पुमांस्तावन्नभस्तः फलका-ऽसिभृत् ॥ ४६८ ॥
भूभुजा पारिषद्यैश्च, वीक्ष्यमाणः सविस्मयम् । मायाविद्याधरः सोऽथ, पुरोभूयेदमब्रवीत् ॥ ४६९ ॥
दिष्ट्या प्रवर्द्धसे देव! परस्त्री-धननिःस्पृह! । दुरोदर[8] इव द्वन्द्वे, यथाऽजैषं तथा शृणु ॥ ४७० ॥
तदा ह्यहमितः स्थानाच्छरण्य! शरणे तव । विमुच्य दारान् निर्भार इवोदपतमम्बरे ॥ ४७१ ॥
समापतन्तं साटोपं, तमपश्यं नभस्तले । दुष्टविद्याधरमहं, रुष्टो बभ्रुरिवोरगम्[9] ॥ ४७२ ॥
ऋषभाविव गर्जन्तावूर्जितं दुर्जयावुभौ । अहं च स च युद्धार्थमाह्वास्वहि परस्परम् ॥ ४७३ ॥

१ नम्रकन्धरं यथा स्यात् तथा । २ शय्याम् । ३ यमस्य । ४ अग्निम् । ५सतीत्वसत्यतां समर्थ्य । ६ घृतधाराभिः । ७ लवणाधीनम् । ८ द्यूते । ९ नकुलः ।

दिष्ट्या दृष्टोऽसि दोर्दप्त!, प्रहर प्रहरादितः । कौतुकं पूरयाम्यद्य, स्वदोष्णोर्द्युसदामपि ॥ ४७४ ॥
नो वा शस्त्रं परित्यज्याऽऽदाय दन्तैर्दशाङ्गुलीः । भक्ष्यं रङ्क इवाऽशङ्को, व्रज जीवितकाम्यया ॥ ४७५ ॥
साक्षेपमिति जल्पन्तौ, द्वावप्यावां परस्परम् । चर्मा-ऽसिपक्षौ धुन्वन्तौ, मिलितौ कुक्कुटाविव ॥ ४७६ ॥
॥ त्रिभिर्विशेषकम् ॥
चारीप्रचारचतुरौ, रङ्गाचार्याविवाम्बरे । प्रहारान् वञ्चयमानौ, व्यचराव चिरं नृप! ॥ ४७७ ॥
आवाभ्यां खड्गशृङ्गेण, प्रहरद्भ्यां मुहुर्मुहुः । खड्गिभ्यामिव[1] विहिते, अभिसर्पा-ऽपसर्पणे[2] ॥ ४७८ ॥
क्षणेनाऽपि मया तस्य, दोर्दण्डो दक्षिणेतरः । निकृत्य पातितो राजन्!, प्रवर्धक इवेह ते ॥ ४७९ ॥
युष्मदानन्दहेतोश्च, कदलीस्तम्भलीलया । मया निकृत्य तस्यैकश्चरण- पातितो भुवि ॥ ४८० ॥
दक्षिणोऽपि भुजस्तस्य, नलिनीनाललीलया । विलूय क्षितिपृष्ठेऽस्मिन्, क्षिप्तः क्षितिपते! मया ॥ ४८१॥
ततो द्वितीयस्तस्याङ्घ्रीरङ्घ्रिपस्य[3] प्रकाण्डवत् । खड्गदण्डेन निष्कृत्य, तवाऽग्रे परिपातितः ॥ ४८२ ॥
ततो रुण्डश्च मुण्डश्च, पृथक् कृत्वेह पातितः । तमित्यकार्षं षट्खण्डं, रिपुं भरतवर्षवत् ॥ ४८३ ॥
कलत्रं त्रायमाणेन, न्यासीभूतमपत्यवत् । त्वयैव सोऽरिर्निहतो, हेतुमात्रमहं त्विह ॥ ४८४ ॥
त्वत्साहाय्यं विना सोऽरिर्न हन्तुं शक्यते मया । नाऽलं दग्धुं कक्षमग्निर्विना वायुं ज्वलन्नपि ॥ ४८५ ॥
इयत्कालमहं स्त्री वाऽथवाऽभूवं नपुंसकः । पुंस्त्वं मेऽद्य त्वया दत्तं, द्विषन्निग्रहहेतुना ॥ ४८६ ॥
ममाऽसि माता तातो वा, गुरुर्वा देवताऽथवा । एवंविधोपकारी हि, नाऽन्यो भवितुमर्हति ॥ ४८७ ॥

१ गण्डकाभ्याम् । २ अभिगमनं दूरगमनं च । ३ वृक्षस्य ।

प्रद्योतनो[१] द्योतयते, विश्वं प्रीणाति चोडुपः[२] । काले वर्षति पर्जन्यः, प्रसूते भूमिरोषधीः ॥ ४८८ ॥
मर्यादां लङ्घते नाऽब्धिर्मेदिनी चाऽवतिष्ठते । परोपकारनिष्ठानां, प्रभावेण भवादृशाम् ॥ ४८९ ॥
न्यासीकृतं कलत्रं मे, तत् सम्प्रति समर्पय । महीनाथ! गमिष्यामि, स्वां क्रीडाभूमिकामहम् ॥ ४९० ॥
वैताढ्य-जगतीजालकटकादिषु सप्रियः । विहरिष्ये निराशङ्कस्त्वत्प्रसादाद्धतद्विषन् ॥ ४९१ ॥
आक्रान्तो युगपल्लज्जा-चिन्ता-निर्वेद-विस्मयैः । एवं वसुमतीनाथः, पुरुषं तमभाषत ॥ ४९२ ॥
न्यासीकृत्य कलत्रं स्वं, तदानीं त्वयि जग्मुषि । अम्बरे शुश्रुवेऽस्माभिः, क्ष्वेडा-ऽसि-फलकध्वनिः ॥४९३॥
बाहु-पाद-शिरोरुण्डं चाऽपतन्नभसः क्रमात् । मत्पतेरिदमित्युच्चैस्त्वत्पत्यकथयच्च नः ॥ ४९४ ॥
पत्युरङ्गैः समं वह्नौ, प्रवेक्ष्यामीति भाषिणीम् । अवारयाम सुचिरं, पुत्रीप्रेम्णा तव प्रियाम् ॥ ४९५ ॥
वह्निप्रवेशादस्माभिर्वार्यमाणा तु ते प्रिया । अस्मान् सम्भावयामासाऽन्यथैवेतरलोकवत् ॥ ४९६ ॥
तूष्णीकेषु ततोऽस्मासु, सा साहसवती नदीम् । गत्वा लोकसमक्षं तैः, सहाऽङ्गैः प्राविशच्चिताम् ॥ ४९७ ॥
अधुनैव निवापादि, तस्याः कृत्वाऽहमागमम् । तस्यां शोके न्यषीदं च, त्वं चाऽगाः किमिदं ननु? ॥ ४९८ ॥
तान्यङ्गानि न किं ते वा? स वा त्वं नेति संशयः । अज्ञानमुद्रितमुखाः किमिह ब्रूमहे वयम्? ॥ ४९९ ॥
व्याजहार कृतव्याजकोपः[३] सोऽपि पुमानिति । परस्त्रीसोदरो मिथ्या, जनश्रुत्या श्रुतोऽसि हा! ॥ ५०० ॥
तेन नाम्ना वयं भ्रान्ताः, प्रियान्यासमकृष्महि । अयोवत्[४] पुष्करैर्ज्ञातस्त्वं वृत्तैरीदृशैरसि ॥ ५०१ ॥

१ सूर्यः । २ चन्द्रः । ३ विहितकपटक्रोधः । ४ लोहवत् ।

सगरप्रतिबोधाय द्वितीय-मन्युक्तमपरमिन्द्रजालिकोदाहरणम् ।

दुराचारस्य यत् कृत्यं, तस्य मद्विषतोऽभवत् । तच्चक्रे भवता राजन्!, द्वयोर्हन्त! किमन्तरम्? ॥ ५०२ ॥
नारीष्वलुब्धंमन्यश्चेदपवादाद् बिभेषि वा । तदर्पय प्रियां तां मे, न हि निह्नोतुमर्हसि ॥ ५०३ ॥
अलुब्धपूर्वा लुभ्यन्ति, यद्येवं त्वादृशा अपि । ततः कृष्णोरग इव, कोऽस्तु विश्वासभाजनम्? ॥ ५०४ ॥
भूयो बभाषे भूपालस्तवाङ्गान्युपलक्ष्य सा । त्वत्प्रेयस्यविशद् वह्निमत्र तावन्न संशयः ॥ ५०५ ॥
अत्राऽर्थे साक्षिणः सर्वे, पौरा जानपदा अपि । जगच्चक्षुरयं व्योम्नि, भगवांश्च दिवाकरः ॥ ५०६ ॥
लोकपालाश्च चत्वारो, ग्रह-नक्षत्र-तारकाः । इयं च भगवत्युर्वी, धर्मश्च त्रिजगत्पिता ॥ ५०७ ॥
तन्न भाषितुमीदृक्षं, रूक्षाक्षरमिहाऽर्हसि । अमीषां मध्यतः कञ्चित्, प्रमाणीकुरु साक्षिणम् ॥ ५०८ ॥
अलीकरोषपरुषं, पुरुषः सोऽवदत् पुनः । न हि प्रमाणे[1] प्रत्यक्षे, प्रमाणान्तरकल्पना ॥ ५०९ ॥
तव पश्चादियं का नु, स्थिताऽस्ति? प्रेक्ष्यतां ननु । कक्षाप्रक्षिप्तलोप्त्रस्य[2], कोशपानमिदं नृप! ॥ ५१० ॥
ततश्च वलितग्रीवो, यावत् पश्चाद्ददौ दृशम् । ईक्षाञ्चक्रे नृपस्तावत्, तत्प्रियां तां निषेदुषीम् ॥ ५११ ॥
पारदारिकदोषेण, दूषितोऽस्मीति शङ्कया । ग्लानिं प्रपेदे नृपतिर्म्लानिं तापेन पुष्पवत् ॥ ५१२ ॥
नृपं ग्लानिं प्रपेदानं, निर्दोषं दोषशङ्कया । बद्धाञ्जलिः कथयितुं, प्रारेभे स पुमानिति ॥ ५१३ ॥
कच्चित् स्मरसि भूनाथ!, चिरेणाभ्यस्य यन्मया । मायाप्रयोगचातुर्यं, त्वं दर्शयितुमर्थितः? ॥ ५१४ ॥
देवेन मेघवद् विश्वसाधारण्यजुषाऽप्यहम् । भाग्यदोषादपूर्णेच्छो, द्वारादपि निवारितः ॥ ५१५ ॥
ततो रूपं परावर्त्य, कृत्वा कपटनाटकम् । मयेदं दर्शितं देव!, कृतार्थोऽस्मि प्रसीद मे ॥ ५१६ ॥

१ कृत्रिमकोपकठोरम् । २ लोप्त्रम् स्तेयधनम् ।

यथा तथा वा महतां,दर्शनीयो निजो गुणः । गुणार्जनभवः क्लेशः, प्रणश्यत्यन्यथा कथम्? ॥ ५१७ ॥
तदद्याऽस्मि गतक्लेशो, व्रजिष्यामि समादिश । सर्वत्राऽपि महार्घोऽस्मि, त्वदग्रे गुणदर्शनात् ॥ ५१८ ॥
कृतार्थीकृत्य भूयिष्ठैरर्थैस्तमवनीपतिः । विससर्ज ततः किञ्चिच्चिन्तयित्वेदमब्रवीत् ॥ ५१९ ॥
यादृग् मायाप्रयोगोऽस्य, संसारोऽप्येष तादृशः । दृष्टनष्टं वस्तु सर्वमस्मिन् बुद्बुदवद् यतः ॥ ५२० ॥
चिन्तयित्वा नैकधैवं, विरक्तो भववासतः । उत्सृज्य राज्यं प्रव्रज्यां, स जग्राह ततो नृपः ॥ ५२१ ॥
मायाप्रयोगसदृशे, संसारेऽस्मिंस्ततः प्रभो! । मा शोकविवशो भूस्त्वं, यतस्व स्वार्थसिद्धये ॥ ५२२ ॥
चक्रिणो भवनिर्वेदः, पदे शोकस्य तावतः । महाप्राण इव महाप्राणस्थानेऽभवत् ततः ॥ ५२३ ॥
उदाजहार सगरो, गिरं तत्त्वगरीयसीम् । युष्माभिरभ्यधायीदं, साधु साधु विवेकिनः! ॥ ५२४ ॥
जीवन्ति च म्रियन्ते च, जन्तवः स्वस्वकर्मणा । बालो युवा वा वृद्धो वेत्यप्रमाणं वयः खलु ॥ ५२५ ॥
सङ्गमा[१] बान्धवादीनां, स्वप्नसब्रह्मचारिणः[२] । लक्ष्मीर्निसर्गतो दन्तिकर्णतालचलाचला[३] ॥ ५२६ ॥
यौवनश्रीरपि गिरिनदीपूरसहोदरा । जीवितं च कुशाग्रस्थजलबिन्दुविडम्बकम् ॥ ५२७ ॥
न यावद् यौवनं याति, वारीव मरुभूमिगम् । न यावदायाति जरा, राक्षसीवायुरन्तकृत् ॥ ५२८ ॥
भवतीन्द्रियवैकल्यं, न यावत् सन्निपातवत् । वेश्येवोपात्तसर्वस्वा[४], यावच्छीर्न विरज्यति ॥ ५२९ ॥
छलयित्वा तावदमून्यखिलान्यपि हि स्वयम् । प्रव्रज्योपायलभ्याय, स्वार्थाय प्रयतामहे ॥ ५३० ॥
काचखण्डेन स मणिं, कृष्णकाकेन केकिनम्[५] । मृणालमालया हारं, कदन्नेन च पायसम् ॥ ५३१ ॥

१ मूल्यवान् । २ स्वप्नसदृशाः । ३ चञ्चला । ४ उपात्तं गृहीतं सर्वस्वं यया सा । ५ मयूरम् ।

सगरस्य
भवनिर्वेदः ।

कालसेयेन[१] च क्षीरं, रासभेन च वाजिनम् । क्रीणाति योऽर्जयेन्मोक्षमसारेणेह वर्ष्मणा[२] ॥५३२॥ ॥ युग्मम् ॥
एवमाभाषमाणस्य, तदा सगरचक्रिणः । द्वार्यायययुर्विषयिणो[३]ऽष्टापदाभ्यर्णवासिनः ॥ ५३३ ॥
अस्मांस्त्रायस्व त्रायस्वेत्युच्चैःपूत्कारकारिणः । आजूहवत् तान् सगरचक्रभृद् वेत्रपाणिना ॥ ५३४ ॥
हंहो! किमिदमित्युच्चैर्भाषिताश्चक्रवर्तिना । कृतप्रणामाः सम्भूय, ग्रामीणास्ते व्यजिज्ञपन् ॥ ५३५ ॥
अष्टापदाद्रिपरिखापूरणाय सरिद्वरा । या कृष्टा दण्डरत्नेन, कुमारैस्तैर्नरेश्वर! ॥ ५३६ ॥
पातालमिव दुष्पूरां, पूरयित्वा क्षणेन ताम् । साऽतिक्रामत्युभे कूले, कुलटेव कुलद्वयम् ॥ ५३७ ॥
अष्टापदाभ्यर्णवर्ति, ग्रामा-ऽऽकर-पुरादिकम् । आप्लावयितुमारब्धा, पर्यस्त इव सागरः ॥ ५३८ ॥
अधुनाऽपि युगान्तोऽयमस्माकं समुपस्थितः । तदादिश वयं कुत्र, तिष्ठामो निरुपद्रवाः? ॥ ५३९ ॥
ततश्च सगरश्चक्री, निजं पौत्रं भगीरथम् । वात्सल्यसारया वाचा, समाहूयेदमादिशत् ॥ ५४० ॥
पूरयित्वाऽष्टापदाद्रिपरिखां तां सरिद्वरा । उन्मत्तेव भ्रमन्त्यस्ति, सा ग्रामादिषु सम्प्रति ॥ ५४१ ॥
तां दण्डेन समाकृष्य, क्षिप पूर्वपयोनिधौ । अदर्शितपथं याति, पयो ह्यन्धवदुत्पथे ॥ ५४२ ॥
बाहुवीर्यमसामान्यमैश्वर्यं भुवनोत्तरम् । अत्युल्बणं हस्तिबलमश्वीयं[४] विश्वविश्रुतम् ॥ ५४३ ॥
पादातमतिविक्रान्तं, महद् रथबलं तथा । अत्युत्कटः प्रतापश्च, निःसीमं शस्त्रकौशलम् ॥ ५४४ ॥
दैवतानामायुधानां, सम्पत्तिश्चेत्यमून्यलम् । दर्पं यथा द्विषां घ्नन्ति, जनयन्त्यात्मनस्तथा ॥ ५४५ ॥
॥ त्रिभिर्विशेषकम् ॥

१ तक्रेण । २ शरीरेण । ३ जनपदवासिनो जनाः । ४ अश्वसैन्यम् । ५ पदातिसैन्यम् ।

अग्रणीः सर्वदोषाणामापदामेकमास्पदम् । सम्पदामपहर्तैकः, कर्ता दुर्यशसामपि ॥ ५४६ ॥
अपि वंशस्य संहर्ता, हर्ता निखिलशर्मणाम् । प्रहर्ता परलोकस्य, दर्पो वैरी शरीरजः ॥५४७॥ ॥ युग्मम् ॥
तद् दर्पः परिहर्तव्यः, सर्पवत् सत्पथस्थितैः । सामान्यैरपि पुरुषैर्मत्पौत्रेण विशेषतः ॥ ५४८ ॥
यथापात्रं विनीतेन, भवितव्यं ततस्त्वया । गुणप्रकर्षो विनयादशक्तस्याऽपि जायते ॥ ५४९ ॥
शक्तस्य पुंसो विनयः, सुवर्णस्येव सौरभम् । निष्कलङ्कवपुष्टेव[1], पार्वणस्य हिमद्युतेः ॥ ५५० ॥
सुराणामसुराणां च, नागादीनामपि त्वया । उपचारो यथाक्षेत्रं, कार्यः कार्ये सुखेऽपि हि ॥ ५५१ ॥
उपचारार्हणीयेषु, नोपचारो हि दोषकृत् । अपचारस्तु दोषाय, पित्तात्मन[2] इवाऽऽतपः ॥ ५५२ ॥
ऋषभस्वामिपुत्रेण, भरतेनापि चक्रिणा । वशंवदा देव-दैत्या, उपचारेण चक्रिरे ॥ ५५३ ॥
शक्तेनाऽपि सता तेनोपचारो देवतादिषु । दर्शितो यस्तथा कार्यः, स कुलाचार इत्यपि ॥ ५५४ ॥
तथेति प्रतिपेदे[3] स, महाभागो भगीरथः । निसर्गेण विनीतस्य, शिक्षा सद्वित्तिचित्रवत् ॥ ५५५ ॥
अर्पयित्वा दण्डरत्नं, स्वं प्रतापमिवोर्जितम् । चुम्बित्वा मूर्ध्नि सगरो, विससर्ज भगीरथम् ॥ ५५६ ॥
चक्रिणश्चरणाम्भोजे, प्रणम्याऽथ भगीरथः । सदण्डरत्नो निरगात्, सविद्युदिव वारिदः ॥ ५५७ ॥
महता चक्रिसैन्येन, वृत्तो जानपदैश्च तैः । रेजे भगीरथः शक्र, इवाऽनीकप्रकीर्णकैः ॥ ५५८ ॥
आससाद क्रमेणाऽथाऽष्टापदाद्रिं भगीरथः । मन्दाकिन्या वलयितं, त्रिकूटाद्रिमिवाऽब्धिना ॥ ५५९ ॥
उद्दिश्य तत्र तं नागकुमारं ज्वलनप्रभम् । तपोऽष्टमं स विदधे, विधिवेदी भगीरथः ॥ ५६० ॥

१ निष्कलङ्कशरीरता इव । २ पित्तप्रकृतेर्जनस्य । ३ अङ्गीचक्रे ।

अष्टमे च परिणमत्युपतस्थे भगीरथम् । पतिर्नागकुमाराणां, प्रसन्नो ज्वलनप्रभः ॥ ५६१ ॥
गन्धैर्धूपैश्च माल्यैश्च, तेनोपचरितो[१] भृशम् । स्वामी नागकुमाराणां, किं करोमीत्यभाषत ॥ ५६२ ॥
अथो भगीरथोऽप्यम्भोधरध्वानगभीरगीः । उवाच विनयेनाऽपि, सप्रभो ज्वलनप्रभम् ॥ ५६३ ॥
अष्टापदाद्रिपरिखामापूर्येयं सरिद्वरा । निरर्गलं प्रसरति, पन्नगीव बुभुक्षिता ॥ ५६४ ॥
क्षेत्राण्येषा हि खनति, प्रोन्मूलयति पादपान् । सदृशीकुरुते सर्वान्, स्थपुटान्[२]वटान्[३]पि ॥ ५६५ ॥
प्रभ्रंशयति वप्रांश्च, प्रासादान् दलयत्यलम् । प्रपातयति हर्म्याणि, निगृह्णाति गृहाणि च ॥ ५६६ ॥
तां पिशाचीमिवोन्मत्तां, देशविध्वंसकारिणीम् । दण्डेनाऽऽकृष्य पूर्वाब्धौ, क्षिपामि त्वदनुज्ञया ॥ ५६७ ॥
ततः प्रसन्नो ज्वलनप्रभनागस्तमभ्यधात् । निजं समीहितं कुर्या, निर्विघ्नं भवतोऽस्त्विति ॥ ५६८ ॥
येऽमुष्मिन् भरतक्षेत्रे, नागास्ते मम शासने । मदनुज्ञाप्रवृत्तः सन्, मा भैषीस्तदुपद्रवात् ॥ ५६९ ॥
अभिधायेति नागेन्द्रः, प्रविवेश रसातलम् । विदधेऽष्टमभक्तान्ते, पारणं च भगीरथः ॥ ५७० ॥
वैरिणीमिव भिन्नक्ष्मां, स्वच्छन्दां स्वैरिणीमिव । मन्दाकिनीमथ क्रष्टुं, दण्डरत्नं स आददे ॥ ५७१ ॥
मालामङ्कुटकेनेव[४], दण्डेनाऽऽकर्षति स्म ताम् । निनदन्तीं नदीं चण्डभुजदण्डो भगीरथः ॥ ५७२ ॥
कुरूणां मध्यभागेन, नगरं हस्तिनापुरम् । दक्षिणेन पश्चिमेन, पुनः कोशलनीवृतः ॥ ५७३ ॥
उत्तरेण प्रयागं च, कासीनां दक्षिणेन च । विन्ध्यान्तर्दक्षिणेनाङ्गान्, मगधानुत्तरेण च ॥ ५७४ ॥

१ पूजितः । २ स्थपुटान् उच्चप्रदेशान् । ३ अवटान् निम्नप्रदेशान् । ४ मालाकारप्रतिबद्धमणिकरूपाङ्कोटकवत् ।

वात्येव तृण्याः[1] कर्षन्ती, वर्तनीर्वर्तिनीर्नदीः[2] । भगीरथेन पूर्वाम्भोनिधिं गङ्गाऽवतारिता ॥ ५७५ ॥
ततः प्रभृति तत् तीर्थं, गङ्गासागर इत्यभूत् । कृष्टा भगीरथेनेति, गङ्गा भागीरथीति च ॥ ५७६ ॥
यत्र यत्र बभञ्जाऽहिर्भवनानि[3] व्रजन्त्यसौ । भगीरथस्तत्र तत्र, नागेभ्यः प्रददौ बलिम् ॥ ५७७ ॥
तेषां सगरपुत्राणां, शरीरास्थीनि तानि च । तेन गङ्गाप्रवाहेण, निन्यिरे पूर्वसागरम् ॥ ५७८ ॥
दध्यौ भगीरथश्चैवं, साधु जातमिदं ह्यहो! । मत्पितॄणां यदस्थीनि, गङ्गयेयुः पयोनिधिम् ॥ ५७९ ॥
गृध्रादिचञ्चू-चरणविलग्नान्यन्यथा पुनः । पतेयुरशुचिस्थानेष्वनिलोद्धूतपुष्पवत् ॥ ५८० ॥
एवं विचिन्तयन् प्रीतैर्जलापातापदुज्झितैः[4] । लोकैर्लोकम्पृणोऽसीति, प्रशशंसे चिरं हि सः ॥ ५८१ ॥
तदा पितॄणामस्थीनि, तेन क्षिप्तानि यज्जले । क्षिपत्यद्यापि तल्लोकः, सोऽध्वा यो महदाश्रितः ॥ ५८२ ॥
ततः स्थानान्निववृते, रथारूढो भगीरथः । रथप्रचारेण भुवं, रासयन्[5] कांस्यतालवत् ॥ ५८३ ॥
स आगच्छन्नथ पथि, कल्पद्रुममिव स्थितम् । ददर्शैकं भगवन्तं, केवलज्ञानिनं मुनिम् ॥ ५८४ ॥
उदयाद्रेरिवाऽऽदित्यो, गरुत्मानम्बरादिव । सानन्दः स्यन्दनवरात्, तस्मादवततार सः ॥ ५८५ ॥
आलोकमात्रे तं नत्वा, भक्त्या केवलिनं मुनिम् । स त्रिः प्रदक्षिणीचक्रे, भक्तिदक्षोऽतिदक्षिणः ॥ ५८६ ॥
तं प्रणम्य पुरः स्थित्वा, पप्रच्छैवं भगीरथः । ममाऽम्रियन्त पितरो, युगपत् केन कर्मणा? ॥ ५८७ ॥
त्रिकालवेदी भगवान्, करुणारससागरः । एवं गदितुमारेभे, मधुरोदारया गिरा ॥ ५८८ ॥
श्रावकैर्विपुलश्रीकैः, श्रीदश्रीसंश्रितैरिव[6] । पूर्णः सङ्घश्चालैकस्तीर्थयात्राकृते पुरा ॥ ५८९ ॥

१ तृणसमूहान् । २ मार्गान्तर्वर्त्तमानाः । ३ नागभवनानि । ४ जलस्य आपातस्तेन या आपत् तदुज्झितैः । ५ रासक्रीडां कारयन् । ६ कुबेरलक्ष्म्याश्रितैरिव ।

गङ्गाप्रवाह-स्खलनाय भगीरथस्य गमनम् ।

प्रत्यन्तग्राममेकं तु, सङ्घः सायमवाप सः । निशायां चाऽध्युवासोपकुम्भकारनिकेतनम् ॥ ५९० ॥
सङ्घं समृद्धं तं दृष्ट्वा, हृष्टो ग्रामजनोऽखिलः । तल्लुण्टनार्थमुत्तस्थे, दण्ड-कोदण्ड-खड्गभृत् ॥ ५९१ ॥
प्रबोध्य वचनैश्चाटुगर्भैरमृतसोदरैः । सशूकः[१] कुम्भकारस्तं, ग्रामलोकं न्यवारयत् ॥ ५९२ ॥
कुम्भकारस्य तस्योपरोधाद् ग्रामजनोऽखिलः । भूतः पात्रमिव प्राप्तं, तं सङ्घममुचत् तदा ॥ ५९३ ॥
अन्येद्युरेकवास्तव्यदस्युदोषान्महीभुजा । सबाल-वृद्धः स ग्रामो, दाहितः परराष्ट्रवत् ॥ ५९४ ॥
मित्रेणाऽऽमन्त्रितः कुम्भकारो ग्रामान्तरं गतः । दाहात् तेनावशिष्टोऽभूत्, सर्वत्र कुशलं[२] सताम् ॥ ५९५ ॥
ततः स कालयोगेन, कालधर्ममुपागतः । वणिग् विराटदेशेऽभूद्, द्वितीय इव यक्षराट् ॥ ५९६ ॥
स तु ग्रामजनो मृत्वा, विराटविषयेऽपि हि । जनो जानपदो जज्ञे, तुल्या भूस्तुल्यकर्मणाम् ॥ ५९७ ॥
मृत्वा च कुम्भकृज्जीवस्तत्राऽभूत् पृथिवीपतिः । ततोऽपि मृत्वा कालेन, देवोऽभूत् परमर्द्धिकः ॥ ५९८ ॥
च्युत्वा च देवसदनाज्जातोऽसि त्वं भगीरथः । ते च ग्राम्या भवं भ्रान्त्वा, जह्नुप्रभृतयोऽभवन् ॥ ५९९ ॥
मनस्कृतेन सङ्घोपद्रवरुपेण कर्मणा । युगपद् भस्मसादासन्, निमित्तं ज्वलनप्रभः ॥ ६०० ॥
तन्निवारणरूपेण, त्वं पुनः शुभकर्मणा । तस्मिन्निव भवेऽत्राऽपि, न दग्धोऽसि महाशय! ॥ ६०१ ॥
केवलज्ञानिनस्तस्मादाकर्ण्येत्थं भगीरथः । परं संसारनिर्वेदं, विवेकोदधिरादधे ॥ ६०२ ॥
गण्डोपरि स्फोट इव, दुःखं दुःखोपरि प्रभोः । मा भूत् पितामहस्येति, न प्राव्राजीत् तदैव सः ॥ ६०३ ॥
केवलज्ञानिनः पादान्, वन्दित्वाऽथ भगीरथः । रथमारुह्य भूयोऽपि, साकेतनगरं ययौ ॥ ६०४ ॥

१ दयासहितः । २ कुबेरः ।

आज्ञां कृत्वाऽभ्युपेतं तं, प्रणमन्तं पितामहः । मुहुः शिरसि जघ्रौ च, पृष्ठेऽस्प्राक्षीच्च[1] पाणिना ॥ ६०५ ॥
भगीरथमथोवाच, सगरः स्नेहगौरवात्, बालोऽप्यसि वयो-बुद्धिस्थविराणां त्वमग्रणीः ॥ ६०६ ॥
बालोऽस्मीति स्म मा वादी, राज्यभारं गृहाण नः । तरामो येन निर्भाराः, सन्तः संसारसागरम् ॥ ६०७ ॥
भवः[2] स्वयम्भूरमणाब्धिवद् यद्यपि दुस्तरः । तीर्णस्तथापि मत्पूर्वैरिति श्रद्धा ममाऽप्यभूत् ॥ ६०८ ॥
वत्स! तेषामप्यपत्यै, राज्यभार उपाददे । ततस्तद्दर्शितः पन्थाः, पाल्यतां ध्रियतां मही ॥ ६०९ ॥
नत्वा भगीरथोऽप्येवमभाषत पितामहम् । युक्तमादित्सते[3] तातः, प्रव्रज्यां भवतारणीम् ॥ ६१० ॥
स्वामिन्! व्रतायाऽयमपि, जनः किन्तूत्सुकायते । राज्यदानप्रसादेनाऽप्रसादं मा कृथास्ततः ॥ ६११ ॥
चक्रवर्त्यप्युवाचैवं, युक्तमस्मत्कुले व्रतम् । ततोऽपि किन्त्वभ्यधिकं, गुर्वाज्ञापालनव्रतम् ॥ ६१२ ॥
गृह्णीयाः समये मद्वत्, परिव्रज्यां महाशय! । स्वापत्ये कवचहरे, निदधीथाश्च मेदिनीम् ॥ ६१३ ॥
श्रुत्वा भगीरथोऽप्येवं, गुर्वाज्ञाभङ्गकातरः । भवभीरुश्च मौन्यस्थाद्, दोलायितमनाश्चिरम् ॥ ६१४ ॥
ततः सिंहासने स्वस्मिन्नुपवेश्य भगीरथम् । राज्येऽभ्यषिञ्चत् सगरस्तदैव परया मुदा ॥ ६१५ ॥
तदानीं चक्रिणोऽभ्येत्य, शीघ्रमुद्यानपालकाः । शशंसुः समवसृतं, बाह्योद्यानेऽजितप्रभुम् ॥ ६१६ ॥
पौत्रराज्याभिषेकेणाऽजितस्वाम्यागमेन च । तदानीं चक्रिणो जज्ञे, हर्षोत्कर्षो यथोत्तरम् ॥ ६१७ ॥
तत्रस्थोऽपि स उत्थाय, नमश्चक्रे जगत्पतिम् । पुरःस्थमिव च शक्रस्तवेनोच्चैरवन्दत ॥ ६१८ ॥
तेषामुद्यानपालानां, स्वाम्यागमनशंसिनाम् । ददौ चक्री हिरण्यस्य, कोटीरर्धत्रयोदश ॥ ६१९ ॥

१ अस्पृशत् । २ संसारः । ३ ग्रहीतुमिच्छति ।

समं भगीरथेनाऽथ, सामन्तादिभिरावृतः । ययौ समवसरणं, सगरो गुरुसम्भ्रमः[1] ॥ ६२० ॥
उत्तरद्वारमार्गेण, तत्र च प्रविवेश सः । प्रविष्टमानी[2] हर्षेण, सिद्धिक्षेत्र इवोच्चकैः ॥ ६२१ ॥
तत्र प्रदक्षिणीचक्रे, त्रिश्चक्री धर्मचक्रिणम्[3] । नमस्कृत्य पुरोभूय, स्तोतुं चेति प्रचक्रमे ॥ ६२२ ॥
मत्प्रसत्तेस्त्वत्प्रसादस्त्वत्प्रसादादियं[4] पुनः[5] । इत्यन्योऽन्याश्रयं भिन्द्धि, प्रसीद भगवन्! मयि ॥ ६२३ ॥
निरीक्षितुं रूपलक्ष्मीं, सहस्राक्षोऽपि[6] न क्षमः । स्वामिन्! सहस्रजिह्वोऽपि, शक्तो वक्तुं न ते गुणान् ॥ ६२४॥
संशयान् नाथ! हरसेऽनुत्तरस्वर्गिणामपि । अतः परोऽपि किं कोऽपि, गुणः स्तुत्योऽस्ति वस्तुतः? ॥ ६२५ ॥
इदं विरुद्धं श्रद्धत्तां, कथमश्रद्दधानकः? । आनन्दसुखश(स)क्तिश्च, विरक्तिश्च समं त्वयि ॥ ६२६ ॥
नाथेयं घट्यमानाऽपि, दुर्घटा घटतां कथम्? । उपेक्षा सर्वसत्त्वेषु, परमा चोपकारिता ॥ ६२७ ॥
द्वयं विरुद्धं भगवंस्तव नाऽन्यस्य कस्यचित् । निर्ग्रन्थता परा या च, या चोच्चैश्चक्रवर्तिता ॥ ६२८ ॥
नारका अपि मोदन्ते, यस्य कल्याणपर्वसु । पवित्रं तस्य चारित्रं, को वा वर्णयितुं क्षमः? ॥ ६२९ ॥
शमोऽद्भुतोऽद्भुतं रूपं, सर्वात्मसु कृपाऽद्भुता । सर्वाद्भुतनिधीशाय, तुभ्यं भगवते नमः ॥ ६३० ॥
इति स्तुत्वा जगन्नाथं, यथास्थानं निषद्य च । सुधानिस्यन्दसध्रीचीं, सोऽश्रौषीद् धर्मदेशनाम् ॥ ६३१ ॥
देशनान्ते च सगरो, नमस्कृत्य पुनः प्रभुम् । रचिताञ्जलिरित्यूचे, गद्गदाक्षरया गिरा ॥ ६३२ ॥
न स्वो न च परः कोऽपि, तीर्थेश! तव यद्यपि । तथाप्यज्ञानतो नाथ!, मया पर्यनुयुज्यसे ॥ ६३३ ॥
विश्वमप्युत्तारयसि, भवाम्भोधेर्दुरुत्तरात् । नाथ! तत्र निमज्जन्तं, कथं मां त्वमुपेक्षसे? ॥ ६३४ ॥

१ महाहर्षः । २ आत्मानं प्रविष्टं मन्यते । ३ अजितस्वामिनम् । ४ मम प्रसन्नतायाः । ५ मम प्रसन्नता । ६ इन्द्रोऽपि ।

संसारगर्तपतनादनेकक्लेशसङ्कुलात् । रक्ष रक्ष जगन्नाथ!, दीक्षां देहि प्रसीद मे ॥ ६३५ ॥
संसारसुखमूढेन, मयाऽऽयुरियदात्मनः । निष्फलं क्षपितं स्वामिन्!, बालेनेवाऽविवेकिना ॥ ६३६ ॥
विज्ञाप्यैवं तस्थिवांसं, सगरं रचिताञ्जलिम् । भगवानप्यनुजज्ञे[२], दीक्षाग्रहणकर्मणि ॥ ६३७ ॥
अथोत्थाय नमस्कृत्य, भगवन्तं भगीरथः । एवमभ्यर्थयाञ्चक्रेऽभ्यर्थनाकल्पभूरुहम्[३] ॥ ६३८ ॥
दीक्षां दास्यन्ति तातस्य, स्वामिपादाः परं क्षणम् । प्रतीक्षणीयं कुर्वेऽहं, यावन्निष्क्रमणोत्सवम् ॥ ६३९ ॥
काऽप्यपेक्षा मुमुक्षूणां, न यद्यप्युत्सवादिषु । तथापि मेऽनुरोधेन[४], तातोऽप्येवं करिष्यति ॥ ६४० ॥
ततस्तदनुरोधेन, सगरोऽत्युत्सुकोऽपि सन्। जगाम नगरीं भूयः, प्रणिपत्य जगद्गुरुम् ॥ ६४१ ॥
सिंहासननिषण्णस्य, सगरस्य भगीरथः । दीक्षाभिषेकमकरोत्, पुरुहूत इवाऽर्हतः ॥ ६४२ ॥
उन्मृष्टो गन्धकाषाय्या, लिप्तो गोशीर्षचन्दनैः । मङ्गल्ये पर्यधत्ताऽथ, सगरो दिव्यवाससी ॥ ६४३ ॥
ततो देवोपनीतानि, दिव्यालङ्करणानि च । अलञ्चक्रे शरीरेण, गुणालङ्करणोऽपि सः ॥ ६४४ ॥
यथाकाममथाऽर्थिभ्यः, प्रदाय सगरो वसु । शिबिकामारुरोहोच्चैर्विशदच्छत्र-चामरः ॥ ६४५ ॥
प्रत्यापणं प्रतिगृहं, प्रतिरथ्यं च नागरैः । नगर्यां विदधे मञ्च-पताका-तोरणादिकम् ॥ ६४६ ॥
स्थाने स्थाने नागरैश्च, जनैर्जानपदैरपि । पूर्णपात्रादिना हर्षात्, प्रकृतानेकमङ्गलः ॥ ६४७ ॥
पुनः पुनः प्रेक्ष्यमाणः, स्तूयमानः पुनः पुनः । पुनः पुनः पूज्यमानोऽन्वीयमानः पुनः पुनः ॥ ६४८ ॥

१ एतावदायुष्यम् । २ अनुज्ञां ददौ । ३ प्रार्थनापूरणे कल्पवृक्षसदृशम् । ४ आग्रहेण ।

विनीतामध्यतश्चक्री, द्युमध्येनेव[1] चन्द्रमाः । भृशायमानोऽपि जनोपरोधाच्छनकैर्ययौ ॥ ६४९ ॥

॥ त्रिभिर्विशेषकम् ॥

भगीरथेन सामन्तैरमात्यैः सपरिच्छदैः । खेचरैश्चाऽन्वीयमानः, सगरोऽगाज्जिनान्तिकम् ॥ ६५० ॥

तत्र प्रदक्षिणीकृत्य, भगवन्तं प्रणम्य च । भगीरथोपनीतं स, यतिवेषमुपाददे ॥ ६५१ ॥

समक्षं सर्वसङ्घस्य, स्वामिवाचनयोच्चकैः । पठन् सामायिकं दीक्षां, चतुर्यामां स आददे ॥ ६५२ ॥

कुमारैः सह ये जग्मुर्नृप-सामन्त-मन्त्रिणः । सगरेण समं तेऽपि, भवोद्विग्नाः प्रवव्रजुः ॥ ६५३ ॥

चक्रे चक्रिमुनेस्तस्य, मनःकुमुदकौमुदीम् । अनुशिष्टिमयीं धर्मदेशनां धर्मसारथिः[2] ॥ ६५४ ॥

पूर्णायामथ पौरुष्यां, देशनां विससर्ज ताम् । देवच्छन्दमलञ्चक्रे, ततश्चोत्थाय तीर्थकृत् ॥ ६५५ ॥

स्वाम्यङ्घ्रिपीठमध्यास्य, चक्रे गणधराग्रणीः । स्वामिप्रभावात् स्वामीव, देशनां संशयच्छिदम् ॥ ६५६ ॥

द्वितीयस्यां च पौरुष्यां, पूर्णायां सोऽपि देशनाम् । संवव्रे स्तनितमिव, प्रवृष्टः प्रावृडम्बुदः ॥ ६५७ ॥

ततः स्थानादथाऽन्यत्र, विहर्तुं प्राचलत् प्रभुः । देवा भगीरथाद्याश्च, स्थानं निजनिजं ययुः ॥ ६५८ ॥

विहरन् स्वामिना सार्धं, सगरोऽपि महामुनिः । अध्यैष्ट द्वादशाङ्गानि, मातृकामिव[3] लीलया ॥ ६५९ ॥

स पञ्च समितीस्तिस्रो, गुप्तीश्चारित्रमातृकाः । सम्यगाराधयामास, प्रमादरहितः सदा ॥ ६६० ॥

स नित्यं भगवत्पादशुश्रूषोद्भूतया मुदा । परीषहभवं क्लेशं, न विवेद मनागपि ॥ ६६१ ॥

त्रैलोक्यचक्रिणो भ्राता, चक्र्यस्मि स्वयमित्यपि । नाऽहङ्कृतिं[4] चक्रे किन्तु चक्रे, विनयं संयतेषु सः[5] ॥ ६६२ ॥

१ गगनमध्येन । २ अजितप्रभुः । ३ द्वादशाक्षरीवर्णानिव । ४ न अहङ्कारं चकार । ५ मुनिषु ।

पश्चादुपात्तदीक्षोऽपि, तपसाऽध्ययनेन च । चिरप्रव्रजितेभ्योऽपि, राजर्षिः सोऽत्यरिच्यत ॥ ६६३ ॥
घातिकर्मक्षयात् तस्य, केवलज्ञानमुज्ज्वलम् । उदभूद् दुर्दिनच्छेदात्, प्रताप इव भास्वतः ॥ ६६४ ॥
आरभ्य केवलोत्पत्तेरुर्व्यां विहरतः सतः । अजितस्वामिनः पञ्चनवतिर्गणभृद्वराः ॥ ६६५ ॥
लक्षं मुनीनां साध्वीनां, पुनस्त्रिंशत्सहस्रयुक् । लक्षत्रयं पूर्वभृतां, सप्तत्रिंशच्छतानि तु ॥ ६६६ ॥
मनःपर्ययिसहस्राः, सहसार्धचतुःशताः । द्वादशाऽवधिभाजां तु, चतुर्णवतिशत्यथ ॥ ६६७ ॥
उत्पन्नकेवलानां तु, द्वाविंशतिसहस्र्यभूत् । द्वादश वादलब्धीनां, सहस्राः सचतुःशताः ॥ ६६८ ॥
वैक्रियलब्धिसहस्रा, विंशतिः सचतुःशताः । ऊना द्वाभ्यां सहस्राभ्यां, श्रावकाणां त्रिलक्ष्यथ ॥ ६६९ ॥
पञ्चचत्वारिंशत्सङ्ख्यैः, सहस्रैरधिकानि तु । श्राविकाणां पञ्चलक्षाण्यजायन्त जगद्गुरोः ॥ ६७० ॥
एकाङ्गोने[1] पूर्वलक्षे, दीक्षाकल्याणकाद् गते । निर्वाणसमयं ज्ञात्वा, सम्मेताद्रिं विभुर्ययौ ॥ ६७१ ॥
लोकाग्रस्येव सोपानं, सम्मेतमधिरूढवान् । द्वासप्ततिपूर्वलक्षसङ्ख्यायुरजितप्रभुः ॥ ६७२ ॥
श्रमणानां, सहस्रेण, समं तत्र जगद्गुरुः । पादपोपगमं नामाऽनशनं प्रत्यपद्यत ॥ ६७३ ॥
तदा युगपदिन्द्राणामासनानि चकम्पिरे । अनिलान्दोलितोद्यानवृक्षशाखा इवाऽभितः ॥ ६७४ ॥
प्रयुक्तावधयस्ते तु, निर्वाणसमयं प्रभोः । विदाञ्चक्रुरुपेयुश्च, सम्मेतगिरिमूर्धनि ॥ ६७५ ॥
तत्र प्रदक्षिणीचक्रुः, सामरास्ते जगद्गुरुम् । शुश्रूषमाणास्तस्थुश्च, पादान्तेऽन्तिषदो[2] यथा ॥ ६७६ ॥
पादपोपगमस्याऽथ, मासे पूर्णे जगद्गुरुः । चैत्रस्य शुक्लपञ्चम्यां, चन्द्रे मृगशिरःस्थिते ॥ ६७७ ॥

१ एकपूर्वाङ्गोने इत्यर्थः । २ शिष्याः ।

पर्यङ्कस्थः काययोगे, बादरेऽवस्थितोऽरुणत् । बादरौ चित्त-वाग्योगा, रथस्थ इव वाजिनौ ॥ ६७८ ॥
सूक्ष्मेण काययोगेन, काययोगं च बादरम् । ततो रुरोध भगवान्, दीपेन ध्वान्तपूरवत् ॥ ६७९ ॥
काययोगे स्थितः सूक्ष्मे, योगौ वाक्चित्तयोरपि । सूक्ष्मौ रुरोध भेजे च, ध्यानं सूक्ष्मक्रियं ततः ॥ ६८० ॥
शुक्लध्याने चतुर्थे च, शैलेशीकरणं प्रभुः । पञ्चलघ्वक्षरोच्चारमात्रकालं समाश्रयत् ॥ ६८१ ॥
क्षीणावशिष्टकर्मा च, सिद्धानन्तचतुष्टयः । परमात्मा प्रभुः प्राप, लोकाग्रमृजुना पथा ॥ ६८२ ॥
अष्टादश पूर्वलक्षी, कौमारेऽगाज्जगत्पतेः । पूर्वलक्षास्त्रिपञ्चाशद्, राज्ये पूर्वाङ्गसंयुताः ॥ ६८३ ॥
व्रते छद्मस्थभावेऽगाद्, द्वादशाब्द्यथ केवले । पूर्वलक्षं द्वादशाब्द्या, पूर्वाङ्गेण च वर्जितम् ॥ ६८४ ॥
ततश्चर्षभनिर्वाणान्निर्वाणमजितप्रभोः । पञ्चाशत्कोटिलक्षेषु, सागराणां गतेष्वभूत् ॥ ६८५ ॥
सहस्रं मुनयस्तेऽपि, पादपोपगमस्थिताः । उत्पन्नकेवला रुद्धयोगास्तद्वद् ययुः शिवम् ॥ ६८६ ॥
तत्र कृत्वा समुद्घातं, सगरोऽपि महामुनिः स्वामिप्राप्तं पदं प्रापाऽनुपदीव[1] क्षणादपि ॥ ६८७ ॥
तदा च स्वामिनिर्वाणपर्वणा समजायत । अदृष्टशर्मणां शर्म[2], नारकाणामपि क्षणम् ॥ ६८८ ॥
अथाऽङ्गं स्वामिनः शक्रो, दिव्यैरस्नपयज्जलैः । गोशीर्षचन्दनरसैः, सशोको विलिलेप च ॥ ६८९ ॥
स्वाम्यङ्गं वासयामास[3], वाससा हंसलक्ष्मणा । भूषयामास च हरिर्विचित्रैर्दिव्यभूषणैः ॥ ६९० ॥
मुनीनामपरेषां तु, शरीरेषु दिवौकसः । स्नानाऽङ्गराग-नेपथ्या-ऽऽच्छादनानि वितेनिरे ॥ ६९१ ॥

१ अनुगामीव । ३ सुखम् । ३ आच्छादयामास ।

आरोप्य दिव्यशिबिकां,स्वामिदेहं पुरन्दरः । गोशीर्षचन्दनमयीमानैषीदुचितां चिताम् ॥ ६९२ ॥
आरोप्य शिबिकामन्यमुन्यङ्गान्यपरे पुनः । गोशीर्षकाष्ठरचितां, चितां निन्युर्दिवौकसः ॥ ६९३ ॥
चितान्तश्चक्रिरे देवा, अग्निमग्निकुमारकाः । झगित्यज्वालयंस्ते च, देवा वायुकुमारकाः ॥ ६९४ ॥
शक्रादेशेन कर्पूर-कस्तूरीभारशोऽमराः । सर्पिष्कुम्भांश्च शतशश्चितान्तः परिचिक्षिपुः ॥ ६९५ ॥
विमुच्याऽस्थीनि दग्धेषु, स्वामिनोऽन्येषु धातुषु । व्यध्यापयंश्चितावह्निं, देवा मेघकुमारकाः ॥ ६९६ ॥
शक्रेशानौ स्वामिदंष्ट्रे, दक्षिण-दक्षिणेतरे । उद्ध्वंस्थे चमर-बली, त्वगृह्णीतामधःस्थिते ॥ ६९७ ॥
अपरानपरे त्विन्द्रा, दशनान् जगृहुः प्रभोः । विभज्य भक्तितस्त्वन्ये, कीकसानि दिवौकसः ॥ ६९८ ॥

यत् किञ्चिदन्यदपि तत्र विधेयमासीत्, सर्वं विधाय विधिवद् विबुधाधिपास्तत् ।
नन्दीश्वरं समधिगम्य च शाश्वतार्हदष्टाह्निकां विदधिरे महतोत्सवेन ॥ ६९९ ॥
जग्मुस्ततो निजनिजं सदनं सुरेन्द्रा, मध्येसुधर्ममथ माणवकाभिधेषु ।
स्तम्भेषु वज्रमयवृत्तसमुद्गकान्तर्विन्यस्य ताश्च दधिरे जिननाथदंष्ट्राः ॥ ७०० ॥
ताः पूजयन्ति सततं वरगन्धधूपैर्माल्यैश्च शाश्वतजिनप्रतिमावदिन्द्राः ।
अव्याहतं तदनुभाववशेन तेषां, सञ्जायते विजयमङ्गलमद्वितीयम् ॥ ७०१ ॥
सगरनृपचरित्रेणान्तरस्थेन कामं, सर इव रसपूर्णं पद्मखण्डेन हृद्यम् ।
चरितमजितनाथस्यैहिकामुष्मिकाणि, प्रवितरतु सुखानि श्रोतृसामाजिकानाम् ॥ ७०२ ॥

१ धृतकुम्भान् । २ त्वचादिषु । ३ निरवापयन् । ४ अस्थीनि । ५ करणीयम् । ६ वज्रनिर्मितवृत्ताकारमञ्जूषायाम् ।

इत्याचार्यश्री हेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये
द्वितीये पर्वणि अजितस्वामि-सगरदीक्षा-निर्वाणवर्णनो
नाम षष्ठः सर्गः ।

द्वितीयं पर्व
समाप्तम् ।

॥ अर्हम् ॥

कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविनिर्मितं

श्रीत्रिषष्टिशलाकापुरुषचरितम् ।



श्रीसम्भवजिनादिश्रीशीतलजिनपर्यन्ताष्टजिनचरितम् ।

प्रथमः सर्गः ।

श्री सम्भवजिनचरितम्

त्रैलोक्यप्रभवे पुण्यसम्भवाय भवच्छिदे । श्रीसम्भवजिनेन्द्राय मनोभवभिदे नमः ॥ १ ॥
धात्रीपवित्रीकरणं लवित्रं[१] कर्मवीरुधाम्[२] । चरित्रमथ वक्ष्यामि श्रीसम्भवजिनेशितुः ॥ २ ॥
धातकीखण्डद्वीपस्य क्षेत्र ऐरावताभिधे । पुरी क्षेमपुरीनामा क्षेमधामास्ति विश्रुता* ॥ ३ ॥
तस्यामासीत्समायात इवोर्व्यां मेघवाहनः[३] । महीपतिर्विपुलधीर्नाम्ना विपुलवाहनः ॥ ४ ॥
आरामिक इवाराममविरामससौ प्रजाः । विधिवत्पालयामास छिन्दन् शल्यानि[४] सर्वतः ॥ ५ ॥
प्रीणयन्ती जनपदान् परितः पथिकानिव । नीतिकल्लोलिनी[५] तस्य प्रससार निरन्तरम् ॥ ६ ॥
अपराधं परस्येव स्वस्यापि न्यायतत्परः । असह्यशासनधरः स न सेहे मनागपि ॥ ७ ॥
उपायं प्रायुङ्क्त तुर्यं दोषमानेन दोषिषु । सोऽगदं गदमानेनातुरेष्विव चिकित्सकः[६] ॥ ८ ॥
गुणानुरुपमकरोदर्चनं गुणिनामसौ । <u>विवेकिनां विवेकस्य फलं ह्यौचित्यवर्तनम्*</u> ॥ ९ ॥

---

१ छेदकं । २ कर्मलतानाम् । ३ इन्द्रः । ४ दुःखानि । ५ नदी । ६ वैद्यः । * °मकरी । * °वर्तिनाम् संवृ ।

मदस्थानानि तस्यासन्न मदायान्यलोकवत् । नदीवन्न नदीभर्तुरुत्सेकाय[1] घनागमः ॥ १० ॥
तस्य चित्ते चैत्य इव सर्वज्ञो देवता सदा । वाचि जैनागम इव सर्वज्ञगुणशंसनम् ॥ ११ ॥
देवाय तीर्थनाथाय गुरवे च सुसाधवे । स शिरोऽनमयत्पृथ्व्यां सर्वोऽप्यन्यस्तमानमत् ॥ १२ ॥
अनार्त्तरौद्रध्यानेन स्वाध्यायेन जिनार्चया । उपाददे स परमं मनोवाग्वपुषां फलम् ॥ १३ ॥
तस्मिन् श्रावकधर्मोऽभूत् स द्वादशविधोऽपि हि । अनारतमपि स्थेयान् नीलीराग इवांशुके[2] ॥ १४ ॥
राजचक्रे जागरुको[3] यथा द्वादशधा स्थिते । तथा श्रावकधर्मेऽपि स बभूव महामनाः ॥ १५ ॥
धर्मप्ररोहबीजानि द्रविणानि[4] यथोचितम् । सप्तक्षेत्र्यां पवित्रात्मा निरन्तरमुवाप सः ॥ १६ ॥
दीनानाथैकशरणादेककारुणिकात्ततः । न रिक्तो[5] निर्ययावर्थी समुद्रादिव वारिदः ॥ १७ ॥
याचकेषु ववर्षार्थं स पर्जन्य इवोदकम् । केवलं निरहङ्कारो न जगर्ज मनागपि ॥ १८ ॥
कण्टकोच्छेदपरशौ त्यागकल्पमहीरुहे । नाभवद्दुस्थितः कोऽपि तस्मिन् शासति मेदिनीम् ॥ १९ ॥
तस्मिन्नपि महीनाथे कदाचिदथ भीषणम् । महादुर्भिक्षमभवद्दुर्लङ्घ्या[6] भवितव्यता ॥ २० ॥
अन्धकारीकृतदिशामम्भोदानामभावतः । वर्षाकालः समजनि रौद्रो[7] ग्रीष्म इवापरः ॥ २१ ॥
शोषयन्तोऽशेषतोयान्यन्ध्रिपोन्मूलनोन्मदाः[8] । कल्पान्तानिलसोदर्या नैर्ऋता वायवो ववुः ॥ २२ ॥
मेघा बभूवुर्नभसि काकोदरसहोदराः[9] । कांस्यतालसमानश्रीरदृश्यत दिवाकरः[10] ॥ २३ ॥

१ वृद्धये । २ वस्त्रे । ३ जागरणशीलः । ४ द्रव्याणि । ५ शून्यः । ६ दुष्कालः । ७ भयंकरः । ८ वृक्षोन्मूलनोन्मत्ताः । ९ काकपक्ष्युदरसमानाः काकोदर सर्प समानाः श्वेताः इत्यर्थः ॥ १० कांस्यपृष्ठ समान कान्तिः पीतः इत्यर्थः ॥

धान्याभावादजायन्त पौरजानपदा[1] जनाः । तापसा इव वृक्षत्वक्कन्दमूलफलाशिनः ॥ २४ ॥
कथञ्चिदपि लब्धेन ग्रासेन महतापि हि । न तृप्यन्ति स्म सञ्जातभस्मका इव मानवाः ॥ २५ ॥
भिक्षया[■] लज्जमानः सन् भिक्षाग्रहणहेतवे । बभूव लोकः प्रायेण मायातापसवेषभृत् ॥ २६ ॥
पितरो मातरः पुत्रा मिथस्त्यक्त्वाशनाशया । अन्यतश्चान्यतश्चायुर्दिक्सम्मोहवशादिव ॥ २७ ॥
अपि सम्पश्यमानस्य क्रन्दतोऽतिबुभुक्षया । लब्धं कथञ्चिदन्नादि पुत्रस्य न ददौ पिता ॥ २८ ॥
विक्रीणीते स्म चणकप्रसृत्या[2] निजबालकम् । माता भ्रमन्ती रथ्यासु शूर्पादि श्वपची[3] यथा ॥ २९ ॥
प्रातरीश्वरहर्म्याणां पतितानङ्गणे कणान् । वराकाश्चिक्षिरे रङ्का गृहपारापता इव ॥ ३० ॥
अपि कादम्बिकादीनामापणेषु[4] मुहुर्मुहुः । लब्ध्वा छलं श्वान इव भोज्यमाचिच्छिदुर्जनाः ॥ ३१ ॥
अप्यहः सकलं भ्रान्त्वा कथञ्चिदहरर्त्तये[5] । ग्रासमात्रमपि प्राप्य मुदितं मेनिरे नराः ॥ ३२ ॥
रङ्कैः करङ्कसङ्काशैर्लुठितैरतिभीषणैः[6] । स्मशानादत्यरिच्यन्त पुरराजपथा अपि ॥ ३३ ॥
रलरोलैरविरलैः प्रसरद्भिः पदे पदे[7] । अदूयन्त सतां कर्णाः क्षिप्ताभिरिव सूचिभिः ॥ ३४ ॥
कल्पान्तकल्पे[9] दुष्काले तस्मिन् सङ्घं चतुर्विधम् । क्षीयमाणं नृपः प्रेक्ष्य दध्याविति महामनाः ॥ ३५ ॥
इयं खलु धरित्री मे त्रातव्या सकलापि हि । किं करोमि परं ? पापः कालोऽयं नास्त्रगोचरः[10] ॥ ३६ ॥
तथाप्यवश्यं त्रातव्यः सङ्घोऽयमखिलोऽपि हि । पात्रोपकारे प्रथमं महतां यदुपक्रमः ॥ ३७ ॥

१ अर्द्धांजलिना । २ शूर्प वंशपात्रम् । ३ चांडाली । ४ दीनाः । ५ हट्टेषु । ६ दिनांते । ७ अस्थिपंजरसदृशैः । ८ कोलाहलैः "रडारड" इति भाषायां ।
९ कल्पांतसदृशे । १० अस्त्रविषयः । * नगरवासिनो देशवासिनश्च । ■ भिक्षाया।

चिन्तयित्वैवमुर्वीशः सूदानिति[१] समादिशत् । सङ्घभुक्तावशेषं भो ! भोक्ष्येऽहं खल्वतः परम् ॥ ३८ ॥
मत्कृते कृतमन्नादि दातव्यं व्रतिनामतः । श्रावका भोजयितव्याः पृथक्सिद्धौदनेन हि* ॥ ३९ ॥
तथेति प्रतिपद्याज्ञां राज्ञस्ते सूदपुङ्गवाः[२] । तथैव विदधुर्नित्यं स्वयं चैक्षिष्ट पार्थिवः ॥ ४० ॥
नासिकापेयसौरभ्याः कलमाः कमला इव । स्थूला माषकणेभ्योऽपि मुद्गा रससमुद्गकाः[३] ॥ ४१ ॥
घृतोदस्य[४] पयांसीव प्रचुराणि घृतानि च । सुधाया इव मित्राणि चित्राणि व्यञ्जनानि[५] च ॥ ४२ ॥
मण्डकाः[६] खण्डसम्मिश्रा मोदकाश्च प्रमोदकाः । खाद्यानि स्वादहृद्यानि मण्डिकाः[७] खण्डमण्डिताः ॥ ४३ ॥
सुकुमारा मर्मरालाः[८] वटकाश्चातिपेशलाः[९] । तीमनं[१०] च मनोहारि पिच्छलानि[११] दधीनि च ॥ ४४ ॥
दुग्धानि क्वाथसिद्धानि मार्जिता[१२] क्षुत्प्रमार्जनी । राजभोजनवत्तत्र[+] जाताः श्रावकभोजने[■] ॥ ४५ ॥
॥ पञ्चभिः कुलकम् ॥
एषणीयकल्पनीयप्रासुकानि[१३] पुनः स्वयम् । महामुनीनां स ददौ महाराजो महामनाः ॥ ४६ ॥
दुर्भिक्षकालं सकलमेवं स वसुधाधवः । ददौ सकलसङ्घाय भोजनादि यथाविधि ॥ ४७ ॥
वैयावृत्त्यं[१४] समाधिं[१५] च सर्वसङ्घस्य कुर्वता । अर्जितं तीर्थकृन्नाम कर्म तेन महीभुजा ॥ ४८ ॥
निषण्णश्चन्द्रशालान्तरपरेद्युः[१६] स उद्यतम्[१७] । नभस्यपश्यदम्भोदमातपत्रमिवावनेः ॥ ४९ ॥

---

१ पाचकान् । २ पाचकश्रेष्ठाः । ३ समुद्गकः संपुटः 'डबो' इति भाषायां प्रसिद्धः । ४ तन्नाम्नः समुद्रस्य । ५ शाकानि । ६ भक्ष्यविशेषा भाषायां "मांडा । ७ भक्ष्यविशेषा भाषायां "खाजा" । ८ मरमर शब्दवंतः । ९ वडा इति भाषायां प्रसिद्धिः । १० क्वथिका कढी इति भाषायां । ११ हृद्यम् । १२ चिक्कानि । १३ रसाला श्रीखण्ड इति भाषायां प्रसिद्धिः १४ निर्दोषं । १५ सेवां । १६ समाधानम् । १७ प्रासादतलं अगाशी इति ख्यातम् । * न च । न तु । इति पाठान्तरे । + °थशुद्धा° । ■ तत्राभवन् श्राव° इति पाठान्तरं । • त्रिभिर्विशेषकम् ।

नीलीरक्तांशुकमयः स व्योम्न इव कञ्चुकः । तडिल्लतामण्डनभृत्सम्न्ताद्[1] व्यानशे दिशः ॥ ५० ॥
अत्रान्तरे समुत्तस्थावामूलान्दोलितद्रुमः । पातालकुम्भसर्वस्वमिवोच्चण्डः[2] समीरणः ॥ ५१ ॥
वातेन तेन महता स महानपि वारिदः । अर्कतूलमिवोद्धूय दिशोदिशमनीयत ॥ ५२ ॥
आविर्भूतं क्षणान्मेघं विनष्टं च क्षणादपि । तं प्रेक्ष्य स क्षमानाथः सुधीरेवमचिन्तयत् ॥ ५३ ॥
असौ सम्पश्यमानानां दृष्टनष्टो यथाम्बुदः । ज्ञातं तथान्यदपि हि संसारे सर्वमीदृशम् ॥ ५४ ॥
तथाहि स्वेच्छया जल्पन् गायन्नृत्यन् हसन्नथ । दीव्यन् विचित्रान्द्रविणार्जनोपायान् विचिन्तयन् ॥ ५५ ॥
गच्छंस्तिष्ठन् शयानो वाधिरुढो वाहनेऽपि वा । कुप्यन्वा विलसन्वाऽपि गृहे वा बहिरेव वा ॥ ५६ ॥
कालादिष्टेन सद्योऽपि दन्दशूकेन[3] दश्यते । विद्युद्दण्डेन चण्डेन विनिपत्य निपात्यते ॥ ५७ ॥
मतङ्गजेन मत्तेन पिष्यते वा रदादिभिः[4] । जीर्णवप्रादिभीत्त्या वा विनिपत्य पिधीयते ॥ ५८ ॥
व्याघ्रेण भक्ष्यते वाँपि बुभुक्षाक्षामकुक्षिणा । दोषेण वैक्रियेणाथ दुश्चिकित्स्येन गृह्यते ॥ ५९ ॥
अकस्मादुन्मदेनाथ पात्यते तुरगादिना । वैरिचौरादिना वापि हन्यते क्षुरिकादिना ॥ ६० ॥
दह्यते वा प्रदीप्तेन प्रदीपनकवह्निना । कृष्यते वा महावृष्टिसरित्पूरादिरंहसा ॥ ६१ ॥
बलवद्वातदोषेण सर्वाङ्गं भज्यतेऽथवा । आश्लिष्यन्ते श्लेष्मणा वा शान्ताशेषतनूष्मणा ॥ ६२ ॥
यदि वा पित्तदोषेण प्रबलेन विलुप्यते । सद्यस्कसन्निपातेन यदि वा परिभूयते[7] ॥ ६३ ॥
लूतया[5] भक्ष्यते वाथ प्राप्यते राजयक्ष्मणा । विसूचिकोपद्रवेण[6] यदि वापि कदर्थ्यते ॥ ६४ ॥

१ अतिमहान् । २ वायुः । ३ दंदशूकः सर्पः । ४ दंतादिभिः । ५ लूता रोगविशेषः । ६ रोगविशेषः । ७ पीड्यते ।
* क्वापि ।

आसाद्यते दुरन्तेनार्बुदाख्येन व्रणेन वा । मोह्यते वा प्रवाहेण ग्रहण्या गृह्यतेऽथवा ॥ ६५ ॥
रुध्यते वापि विद्रध्या[1] कोशेन क्लिश्यतेऽथवा । श्वासेन पूर्यते वापि शूलेनोन्मूल्यतेऽथवा ॥ ६६ ॥
सदा सन्निहितैर्दोषैरित्यादिभिरनेकशः । दूतैरिव कृतान्तस्य जन्तुः पश्चत्वमाप्यते[2] ॥ ६७ ॥
॥ त्रयोदशभिः कुलकम् ॥
तथापि शाश्वतंमन्यः पशुवन्मन्दधीर्जनः । प्रवर्त्तते न ग्रहीतुं जीवितव्यतरोः फलम् ॥ ६८ ॥
हा ! दुःस्थिता भ्रातरो मे बाला मेऽद्यापि सूनवः । अनूढा[3] कन्यका चेयं पाठ्यश्चायं कुमारकः ॥ ६९ ॥
नवोढैव हि भार्येयं वृद्धौ च पितराविमौ । दुःस्थितौ श्वशुरावेतौ विधवा भगिनी त्वियम् ॥ ७० ॥
इत्यजस्रं जनं पाल्यं विचिन्तयति मुग्धधीः । हृदि बद्धशिलाकल्पं न तु वेत्ति भवार्णवम् ॥ ७१ ॥
न तृप्तोऽद्यापि दयितावपुराश्लेषशर्मणा । न घ्रातः पयसश्चापि माल्येच्छा न ह्यपूर्यत ॥ ७२ ॥
न चापूरि मनोहारि पदार्थेक्षामनोरथः । वीणावेण्वादिगीतानां न प्रीतोऽस्मि मनागपि ॥ ७३ ॥
अद्यापि च कुटुम्बाय भाण्डागारं न पूरितम् । नवीकृतं समुद्धृत्य जीर्णमेतन्न मन्दिरम् ॥ ७४ ॥
गमितेषु परां शिक्षां नारुढोऽस्म्येषु वाजिषु । नोक्षाणो वाहिताश्चामी सुस्यंदाः[4] स्यन्दनोत्तमैः ॥ ७५ ॥
करोतीत्यन्तकालेऽपि पश्चात्तापं जडो जनः । धर्मश्चक्रे मया नेति नानुशेते[5] मनागपि ॥ ७६ ॥
॥ पञ्चभिः कुलकम् ॥
इतः सदोद्यतो मृत्युरितो नानापमृत्यवः । व्याधयोऽवस्थिताश्चेत इतो बहव आधयः[6] ॥ ७७ ॥

१ रोगविशेषः । २ मृत्युः । ३ अविवाहिता । ४ सुष्ठु स्यदः वेगः एषां ते । ५ नानुतप्यते । ६ मानसिक्यः पीडा ।

राग-द्वेषादयश्चेतो द्विषन्तो नित्यमुद्यताः । इतः कषायाः प्रबलाः खला इव विपत्प्रदाः ॥ ७८ ॥
न किञ्चन सुखायेह संसारे मरुदेशवत् । सुखवासेन तिष्ठामीत्याः[1] प्राणी न विरज्यति ॥ ७९ ॥
सुखाभासे विमूढस्य प्रसुप्तस्येव सौप्तिकम्[2] । कालपाशः पतत्याशु सद्यः प्राणापहारकृत् ॥ ८० ॥
तदमुष्य शरीरस्य नश्वरस्य यथा तथा । फलं हि धर्माचरणं सिद्धान्नस्येव भोजनम् ॥ ८१ ॥
नश्वरेण शरीरेणाविनश्वरपदार्जनम् । अहो सुकरमप्येतद्विमूढैः क्रियते न हि ॥ ८२ ॥
वपुषा तदनेनाद्य क्रेतुं निर्वाणसम्पदम् । भृशमेषोऽहमुच्छास्ये निधास्ये राज्यमात्मजे ॥ ८३ ॥
इति निश्चित्य रभसादाजूहवदिलापतिः । द्वारपालेन विमलकीर्तिं कीर्त्तिप्रियं सुतम् ॥ ८४ ॥
प्रकृष्टदैवतस्येव भक्त्या परमया पितुः । पादौ नत्वा कुमारः स बद्धाञ्जलिरदोऽवदत् ॥ ८५ ॥
महतापि निदेशेन प्रसीदानुगृहाण माम् । पुत्रभाण्डमसौ बाल इति शङ्कां च मा कृथाः ॥ ८६ ॥
प्रत्यर्थिनः[3] पार्थिवस्य कस्याऽऽच्छिन्देऽद्य मेदिनीम् ? । सपर्वतं पर्वतीयं[4] नृपं कं साधयामि च[*] ? ॥ ८७ ॥
सजलं जलदुर्गस्थमन्तयामि रिपुं च कम् ? । यो वः शल्यायतेऽन्योऽपि तमप्याशूत्खनाम्यहम् ॥ ८८ ॥
बालोऽपि तव पुत्रोऽस्मि क्षमो दुःसाध्यसाधने । तातस्यैव प्रभावोऽयं न भटंमन्यतात्र मे[5] ॥ ८९ ॥
राजापि व्याजहारैवं प्रत्यर्थी पार्थिवो न मे । पर्वतीयो न वा कोऽपि व्यतिक्रामति मद्वचः ॥ ९० ॥
न च द्वीपाधिपः कोऽपि मदाज्ञां व्यतिलङ्घते । यत्साधनाय वत्स ! त्वां प्रहिणोमि महाभुज ! ॥ ९१ ॥
एकः शल्यायते किन्तु भववासो ममानिशम् । तदुद्धर कुलोत्तंस ! धराभारं धुरन्धर ! ॥ ९२ ॥

१ प्रवासात् । २ रात्रियुद्धं । ३ शत्रोः । ४ पर्वते भवं । ५ भटं आत्मानं मन्यते तस्य भावः । * वा ।

मयेव गृह्यतामेतत्त्वया राज्यं क्रमागतम् । आत्तदीक्षो यथाभीक्ष्णं भववासं त्यजाम्यहम् ॥ ९३ ॥
अलङ्घनीयां गुर्वाज्ञां स्वसन्धां[1] चाधुना कृताम् । संस्मरन् वत्स ! भक्त्यापि नान्यथा कर्तुमर्हसि ॥ ९४ ॥
दध्याविति कुमारोऽपि तातेनाज्ञां प्रयच्छता । मत्सन्धां स्मारयता च हा ! कृतोऽस्मि निरुत्तरः ॥ ९५ ॥
इत्यादि चिन्तयन् राजपुत्रो राज्ञा स्वपाणिना । आदाय राज्ये निदधे साभिषेकमहोत्सवम् ॥ ९६ ॥
राजापि कृतदीक्षाभिषेको विमलकीर्त्तिना । शिबिकारुढश्चागात् सूरिं नाम्ना स्वयम्प्रभम् ॥ ९७ ॥
तस्य चाचार्यवर्यस्य समीपे स नृपाग्रणीः । प्राव्राजीत्सर्वसावद्यप्रत्याख्यानपुरःसरम् ॥ ९८ ॥
साम्राज्यवत्परिव्रज्यामन्तरङ्गद्विषज्जयात् । स संयमरथारुढो विधिवत्पर्यपालयत् ॥ ९९ ॥
विंशतेः स्थानकानां च स्थानकैरपरैरपि । स पुपोष निजं कर्म तीर्थकृन्नामनामकम् ॥ १०० ॥
उपसर्गैरनुद्विग्नो मोदमानः परीषहैः । स आयुः क्षपयामास स्वयाममिव यामिकः ॥ १०१ ॥
विहितानशनो मृत्वा कल्पं स प्रापदानतम् । निर्वाणफलदायिन्या* दीक्षायाः स्तोकमीदृशम् ॥ १०२ ॥
ततश्च जम्बूद्वीपे प्राग्भरतार्धस्य भूषणम् । श्रावस्तीत्यस्ति विस्तीर्णा नगरी श्रीगरीयसी ॥ १०३ ॥
बभूव तस्यामिक्ष्वाकुकुलक्षीरोदचन्द्रमाः । जितारिरित्यरिजयात्यथार्थाख्यः क्षमापतिः ॥ १०४ ॥
मृगेष्विव मृगेन्द्रस्य पक्षीन्द्रस्येव पक्षिषु । न समो नाधिको वापि तस्याभूत्कोऽपि राजसु ॥ १०५ ॥
स रेजे राजभी राजा पत्तीकृत्य प्रवेशितैः । ग्रहैरिव ग्रहपतिर्मण्डलान्तः प्रवेशिभिः ॥ १०६ ॥
नाधर्म्यं किंञ्चिदप्यूचे नाचचार च तादृशम् । नाचिन्तयच्च तादृक्षं स धर्म इव मूर्तिमान् ॥ १०७ ॥

१ प्रतिज्ञां । * °लभूतया दी° ।

विनेतरि दुराचारानर्थिभ्योऽर्थांश्च दातरि । अधार्मिको दुःस्थितो वा तस्मिन् राज्ञि न कोऽप्यभूत् ।। १०८ ।।
सोऽस्त्रपाणिः कृपालुश्च शक्तिमांश्च क्षमापरः । विद्वांश्च गतमात्सर्यो युवा चासीत्जितेन्द्रियः ।। १०९ ।।
बभूव महिषी तस्यानुरुपा रुपसम्पदा । सेनानीर्गुणसैन्यानां सेनादेवीति नामतः ।। ११० ।।
अबाधमान इतरान् पुरुषार्थान् यथाक्षणम् । अरंस्त स तया देव्या रोहिण्येव हिमद्युतिः ।। १११ ।।
इतश्च नवमे कल्पे[1] स्वमायुः पर्यपूरयत् । जीवस्तदानीं विपुलवाहनस्य महीपतेः ।। ११२ ।।
फाल्गुनस्य सिताष्टम्यां चन्द्रे मृगशिरःस्थिते । आनतात्[2] परिच्युत्य सेनाकुक्षाववातरत् ।। ११३ ।।
क्षणं सुखं तदा जज्ञे नारकप्राणिनामपि । लोकत्रयेऽपि चोद्योतो विद्युदुद्योतसोदरः ।। ११४ ।।
शयानया रात्रिशेषे प्रविशन्तो मुखाम्बुजे । सेनादेव्या ददृशिरे महास्वप्नाश्चतुर्दशः ।। ११५ ।।
गर्जन् गजपतिर्गौरः शरन्मेघ इवोच्चकैः । वृषः स्फटिकशैलस्य गण्डशैल[3] इवामलः ।। ११६ ।।
केसरी केसरभरेणातिकुङ्कुमकेसरः । क्रियमाणाभिषेका च करिभ्यां कमलालया[4] ।। ११७ ।।
पंचवर्णप्रसूनस्रक्[5] सन्ध्याभ्रच्छवितस्करा । राजतो दर्पण इव सम्पूर्णो रजनीकरः ।। ११८ ।।
विसूत्रितान्धकारं च चण्डदीधीतिमण्डलम् । प्रक्वणत् किङ्किणीजालपताकश्च महाध्वजः ।। ११९ ।।
तापनीय[6]ः पयस्कुम्भः पयोजपिहिताननः । विकासिभिः स्मयमानमिव पद्मैर्महासरः ।। १२० ।।
ऊर्मिविहस्तकैर्नृत्यन्निव क्षीरमहोदधिः । अदृष्टप्रतिमानं च विमानं रत्ननिर्मितम् ।। १२१ ।।
रत्नपुञ्जो मणिगणः पातालफणिनामिव । विभावसुश्च निर्धूमः प्रत्यूषतपनोपमः ।। १२२ ।।

१ देवलोके । २ तन्नाम्नो नवमदेवलोकात् । ३ गिरेश्च्युतः स्थूलोपलः । ४ लक्ष्मीः । ५ पुष्पमाला । ६ सौवर्णः ।

देवी प्रबुद्धा तान् स्वप्नान्नृपायाख्यान्नृपोऽपि च । व्याख्यात्त्रैलोक्यवन्द्यस्ते नूनं सुनुर्भविष्यति ॥ १२३ ॥
इन्द्राश्चासनकम्पेन विज्ञायोपेत्य तत्र च । सेनादेवीं नमस्कृत्य स्वप्नार्थं व्याचचक्षिरे ॥ १२४ ॥
एतस्यामवसर्पिण्यां तृतीयस्तीर्थनायकः । भविष्यति जगत्स्वामी तव स्वामिनि ! नन्दनः ॥ १२५ ॥
तेन स्वप्नविचारेण स्तनितेनेव केकिनी । मुदिता तं निशाशेषं देव्यनैषीत्प्रजाग्रती ॥ १२६ ॥
वज्रं वज्राकरोर्वीव कृशानुमिव चारणिः । महासारं पवित्रं च गर्भं देवी बभार तम् ॥ १२७ ॥
देव्याः स उदरे गर्भो निगूढं ववृधे ततः । गङ्गाया इव पानीये तपनीयपयोरुहम् ॥ १२८ ॥
तदाभूतां दृशौ देव्याः सविकाशे विशेषतः । सरस्या हि सरोजानि विशिष्यन्ते शरत्क्षणे ॥ १२९ ॥
लावण्यमङ्गे कुचयोः पीनत्वं मन्दता गतौ । देव्याः प्रतिदिनं गर्भानुभावादत्यरिच्यत ॥ १३० ॥
फाल्गुनस्य सिताष्टम्यां द्यौरिवाम्भोदलक्षणम् । गर्भं तं बिभ्रती साभूज्जगतोऽपि मुदे तदा ॥ १३१ ॥
ततो नवसु मासेषु दिनेष्वर्धाष्टमेषु च । मार्गशुक्लचतुर्दश्यां चन्द्रे मृगशिरःस्थिते ॥ १३२ ॥
जरायुरक्तप्रभृतिवर्जितं वाजिलाञ्छनम् । प्राचीवार्कं स्वर्णवर्णं सुखं सा सुषुवे सुतम् ॥ १३३ ॥
ध्वान्तध्वंसकृदुद्योतस्त्रैलोक्येऽपि तदा क्षणम् । क्षणं च सौख्यं सञ्जज्ञे नारकप्राणिनामपि ॥ १३४ ॥
ग्रहाः स्वोच्चं ययुः स्थानं प्रसेदुः सकला दिशः । ववौ वायुः सुखं लोकश्चिक्रीड निखिलस्तदा ॥ १३५ ॥

१ तन्नाम्नि कालविशेषे । २ मयूरी । ३ वज्राणां हीरकाणां आकरः खनिः यस्यां सा । ४ अरणिः काष्ठविशेषः । ५ जरायुः गर्भाशयः रक्तं रुधिरं तदादिभिर्वर्जितम् । ६ सुखं यस्मिन्यथा स्यात् तथा । ७ ध्वांतस्य अंधकारस्य ध्वंसः नाशः तं करोतीति तादृक यः उद्योतः प्रकाशः ।
* माघस्य सितसप्तम्यां । ■ °लाञ्छितम् ।

गन्धाम्बुवृष्टिरभवद्दिवि दध्वान दुन्दुभिः । रजोऽपनिन्ये पवनो मही चोच्छ्वासमासदत् ॥ १३६ ॥
तथाधोलोकतो भोगङ्करादया दिक्कुमारिकाः । अष्टैयुः स्वामिसदनमर्हद्जन्मविदोऽवधेः ॥ १३७ ॥
तास्त्रिः प्रदक्षिणीकृत्य जिनं तद्जननीमथ । नत्वा स्वं ज्ञापयामासुर्मा भैषीर्वादपूर्वकम् ॥ १३८ ॥
दिश्यैशान्यां स्थिताः कृत्वा समुद्घातं च वैक्रियम् । जह्रुः संवर्तवातेनायोजनं कण्टकादि च ॥ १३९ ॥
भगवन्तं ततो नत्वा तदासन्ने निषद्य च । गायन्त्यस्तद्गुणांस्तस्थुर्गोत्रस्त्रिय इवोच्चकैः ॥ १४० ॥
अथोर्ध्वलोकतो मेघङ्करादया दिक्कुमारिकाः । अष्टैयुस्तद्वदानेमुः स्वामिनं स्वामिमातरम् ॥ १४१ ॥
विकृत्याभ्राणि तद्वेश्मपार्श्वतो योजनावधि । रजांसि शमयामासुस्ता गन्धोदकवृष्टिभिः ॥ १४२ ॥
जानुदघ्नीं पञ्चवर्णपुष्पवृष्टिं विधाय ताः । नत्वा जिनं जिनगुणान् गायन्त्योऽस्थुर्यथोचितम् ॥ १४३ ॥
दिक्कुमार्यः प्राग्रुचकादष्ट नन्दोत्तरादयः । एत्य नत्वा तथैवास्थुर्गायन्त्यो धृतदर्पणाः ॥ १४४ ॥
दिक्कुमार्योऽपाग्रुचकात्समाहारादयोऽष्ट च । एत्य नत्वा दक्षिणेऽस्थुः सभृङ्गाराग्रपाणयः ॥ १४५ ॥
प्रत्यग्रुचकतोऽष्टैयुर्दिक्कुमार्य इलादयः । नत्वास्थुर्व्यजनभृतो गायन्त्यः पश्चिमेन तु ॥ १४६ ॥
अष्टोदग्रुचकादेयुर्दैव्यश्चालम्बुसादयः । नत्वा चोत्तरतस्तस्थुर्गायन्त्यो धृतचामराः ॥ १४७ ॥
एयुश्चतस्रश्चित्राद्या विदिग्रुचकतोऽप्यथ । नत्वा विदिक्षु तस्थुश्च गायन्त्यो दीपपाणयः ॥ १४८ ॥
एयुश्चतस्रो रुपाद्या देव्यो रुचकमध्यतः । चतुरङ्गुलवर्जं ता नालं निचकृतुः प्रभोः ॥ १४९ ॥

१ गंधयुक्तं अम्बु तस्य वृष्टिः । २ योजनपर्यन्तम् । ३ जानुप्रमाणाम् । ४ भृंगारः स्वर्णरचितपात्रविशेषः झारी इति भाषायां तेन सहितः दक्षिणहस्तः यासां ताः । ५ तालवृन्तधराः ।

ताः कृत्वा विवरं भूमौ न्यधुर्नालं निधानवत् । वज्रै रत्नैश्च सम्पूर्य दुर्वया[1] पीठिकां व्यधुः ॥ १५० ॥
प्रत्यग्वर्जं प्रतिदिशं जिनजन्मगृहस्य ताः । विचक्रुः कदलिगृहं चतुःशालसमन्वितम् ॥ १५१ ॥
पाणिभ्यां जिनमादाय जिनाम्बां दत्तबाहवः । अपाग्रम्भाचतुःशाले नीत्वा सिंहासने व्यधुः ॥ १५२ ॥
उभावभ्यज्य तैलेन लक्षपाकेन तास्ततः । सुगन्धेनोद्वर्तनेनोद्वर्तयामासुराशु[2] च ॥ १५३ ॥
नीत्वोभौ प्राक्चतुःशाले न्यस्य सिंहासने च ताः । गन्धोदकैरस्नपयन् देवदूष्येण[3] चामृजन् ॥ १५४ ॥
गोशीर्षेण[4] व्यलिम्पंश्च देवदूष्यांशुकान्यथ । भूषणानि च दिव्यानि ता द्वाभ्यां पर्यधापयन् ॥ १५५ ॥
उदग्रम्भाचतुःशाले जिनं तद्जननीं च ताः । नीत्वोपवेशयामासू रत्नसिंहासनोपरि ॥ १५६ ॥
अथाभियोग्यैः[5] रानाय्य भूरि गोशीर्षचन्दनम् । समिधीकृत्य[6] जुहुवुर्वह्नावरणिनिर्मिते[7] ॥ १५७ ॥
स्वामिनः स्वामिमातुश्च रक्षापोट्टलिकामथ । तद्वह्निभस्मना कृत्वा बबन्धुस्ता यथाविधि ॥ १५८ ॥
पर्वतायुर्भवेत्युच्चैरुच्चारितगिरोऽथ ताः । कर्णाभ्यर्णे भगवतो ग्रावगोलावताडयन्[8] ॥ १५९ ॥
शय्याजुषं सूतिगृहेऽर्हन्तं तन्मातरं च ताः । कृत्वावस्थिरे तारं[9] गायन्त्यो मङ्गलान्यथ ॥ १६० ॥
स्वामिपदाम्बुजाभ्यर्णे यियासूनीव सर्वतः । तदा च पुरुहूतानामासनानि[10] चकम्पिरे ॥ १६१ ॥
जिनजन्मावधेर्ज्ञात्वोत्थाय शक्रोऽपपादुकः । दत्वा पदानि सप्ताष्टान्यवन्दत जिनेश्वरम् ॥ १६२ ॥
घण्टानिर्घोषसेनानी घोषणामिलितैः सुरैः । परिवव्रे सुरेन्द्रोऽथ जिनजन्मोत्सवोत्सुकैः ॥ १६३ ॥

१ भाषायां 'चौक' तेन युक्तम् । २ लेपनेन । ३ देववस्त्रेण । ४ पीतचंदनेन । ५ सेवकदेवैः । ६ असमिधं समिधमिव कृत्वा । ७ निर्मथनीयेन काष्ठेन उत्पादिते । ८ पाषाणगोलकौ । ९ दीर्घ । १० इन्द्राणां ।

आरुह्य पालकं[1] शक्रः सामरः सपरिच्छदः[2] । मध्येनन्दीश्वरं गत्वा स्वामिवेश्मायययौ ततः ॥ १६४ ॥
स प्रदक्षिणयामास स्वामिवेश्म विमानगः । मुक्त्वा विमानं चैशान्यां[3] ततो हरिरवातरत् ॥ १६५ ॥
अथ तत्स्वामिनो वेश्म प्रविशेश पुरन्दरः । तमालोकनमात्रेऽपि प्रणनाम च भक्तितः ॥ १६६ ॥
स त्रिः प्रदक्षिणीकृत्य भगवन्तं समातरम् । पञ्चाङ्गस्पृष्टभूपीठो[4] भूयोऽपि प्रणनाम च ॥ १६७ ॥
अवस्वापनिकां[5] दत्त्वा देव्याः पार्श्वे निधाय च । प्रतिच्छन्दं[6] विभोः शक्रः पञ्चमूर्तिरभूत्स्वयम् ॥ १६८ ॥
तत्र चैको दधौ नाथं शक्रच्छत्रमथापरः । चामरे द्वावथैकोऽगाद्वज्रमुल्लालयन् पुरः ॥ १६९ ॥
सुरैर्जयजयारावकारिभिः परिवारितः । गृहीत्वा स्वामिनं शक्रः क्षणान्मेरुशिरो ययौ ॥ १७० ॥
अतिपाण्डुकम्बलायां शिलायां तत्र वासवः । सिंहासने निषसाद कृत्वोत्सङ्गे जगद्गुरुम् ॥ १७१ ॥
तदैवासनकम्पेनावधिज्ञानमनाहतम्[7] । प्रयुज्य तत्क्षणादेवाच्युतेन्द्रः प्राणतोऽपि[1] च ॥ १७२ ॥
सहस्रारो महाशुक्रो[3] लान्तको ब्रह्मवासवः[4] । माहेन्द्रः सनत्कुमार[5] ईशानश्चमरो[6] बलिः[7] ॥ १७३ ॥
धारणो[8] भूतानन्दश्च हरिर्हरिसहस्तथा[9] । वेणुदेवो[10] वेणुदारी[11] चाग्निशिखोऽग्निमाणवः[12] ॥ १७४ ॥
वेलम्बः[13] प्रभञ्जनश्च[14] सुघोषाभिध[15] एव च । महाघोषो[16] जलकान्ताभिधानोऽथ जलप्रभः[17] ॥ १७५ ॥
अथ पूर्णोऽवशिष्टश्चामितोऽथामितवाहनः[18] । तथा कालमहाकालौ[19] सुरुपप्रतिरुपकौ[20] ॥ १७६ ॥
पूर्णभद्रस्तथा माणिभद्रो[21] भीमाभिधोऽपि च । महाभीमः किन्नरश्च[22] तथा किम्पुरुषाभिधः[23] ॥ १७७ ॥

---

१ तन्नामकं विमानं । २ सपरिवारः । ३ ईशानदिशि । ४ पञ्चाङ्गैः स्पृष्टः भूभागो येन । ५ तन्नाम्नी निद्रां । ६ प्रतिबिंबम् । ७ न आहतं अनाहतं अप्रतिहतं ।

सत्पुरुषाभिधानश्च महापुरुष एव च । अतिकायमहाकायावपि गीतरतिस्तथा ॥ १७८ ॥
तथा गीतयशोनामा सन्निहितः समानकः । तथा धातृविधातारावृषिश्च ऋषिपालकः ॥ १७९ ॥
ईश्वरो महेश्वरश्च सुवत्सकविशालकौ । हासहासरती श्वेतो महाश्वेतस्तथैव च ॥ १८० ॥
पवकपवकपती सूर्याचन्द्रमसावपि । इन्द्रास्त्रिषष्टिरेतेऽपि सर्वर्द्धर्या सपरिच्छदाः ॥ १८१ ॥
जिनजन्माभिषेकाय मेरुपर्वतमूर्धनि । त्वरमाणाः समाजग्मुः प्रतिवेश्मस्थिता इव ॥ १८२ ॥
॥ एकादशभिः कुलकम् ॥
अच्युतेन्द्राज्ञया कुम्भांस्त्रिदशा आभियोगिकाः । हैमान्[1] रुप्यमयान्[2] रात्नान् हेमरुप्यमयानपि[3] ॥ १८३ ॥
हेमरत्नमयांश्चैव रुप्यरत्नमयानपि । हैमरुप्यरत्नान् भौमान्[4] सहस्रं साष्टकं पृथक् ॥ १८४ ॥
भृङ्गारान्[5] दर्पणांश्चापि सुप्रतिष्ठान् करण्डकान्[6] । स्थालानि पात्रीश्चङ्गेरीर्विचित्रान्[7] चक्रुस्तावतीरपि ॥ १८५ ॥
क्षीरोदादिसमुद्रेभ्योऽन्यतीर्थेभ्योऽपि वारि ते । मृत्स्नां[8] पद्मानि चानिन्युः शतमन्युमनोमुदे[9] ॥ १८६ ॥
हिमाद्रेरोषधीर्भद्रशालादेस्तु वरानपि[10] । गन्धद्रव्यमन्यदपि तत्रानिन्युर्दिवौकसः ॥ १८७ ॥
गन्धद्रव्याणि सर्वाणि क्षिप्रं प्रक्षिप्य तानि ते । ततः सुरभयामासुस्तीर्थवारीणि भक्तितः ॥ १८८ ॥
अच्युतः पारिजातादिकुसुमाञ्जलिपूर्वकम् । स्वामिनं स्नपयामास तैः कुम्भैरमरार्पितैः ॥ १८९ ॥
चारुवाद्यगीतनृत्यप्रवृत्तमुदितामरम् । अजनि स्वामिनः स्नात्रमच्युतेन्द्रविनिर्मितम् ॥ १९० ॥

१ हेमविकारान् । २ रुप्यविकारान् । ३ उभयविकारान् । ४ मृद्विकारान् । ५ सुवर्णपात्रविशेषान् भाषायां "झारी" इति विख्यातान् । ६ लघुपात्राणि । ७ पुष्पपात्राणि । ८ मृत्तिकां । ९ शतमन्युः इंद्रः । १० केशरान् ।
* सहाऽऽज° । + त्स्ना ।

दिव्याङ्गरागपूजादि भक्त्या जिनपतेर्व्यधात् । स आरणाच्युतपतिर्ववन्दे च यथाविधि ॥ १९१ ॥
इन्द्रा द्वाषष्टिरन्येऽपि शक्रवर्जं तथा व्यधुः । जगत्पवित्रीकरणं स्नात्रं त्रिभुवनेशितुः ॥ १९२ ॥
भूत्वाथ पञ्चधेशान एकोऽङ्के नाथमग्रहीत् । अन्यश्छत्रं चामरे द्वावन्योऽग्रेऽस्थाच्च शक्रवत् ॥ १९३ ॥
शक्रः प्रभोश्चतसृषु दिक्षूक्ष्णः स्फाटिकानथ । उत्तुङ्गश्रृङ्गांश्चतुरो भक्त्येकं चतुरोऽकरोत् ॥ १९४ ॥
तेषां श्रृङ्गेभ्य उत्पेतुर्वारिधारा मनोरमाः । मूले भिन्नाः प्रान्ते मिश्राः पेतुश्च स्वामिमूर्धनि ॥ १९५ ॥
अकरोदित्थमन्येन्द्रकृतस्नात्रविलक्षणम् । स्नात्रं सौधर्मकल्पेन्द्रो जिनेन्द्रस्यातिभक्तितः ॥ १९६ ॥
उक्ष्णस्तानुपसंहृत्य चर्चार्चादि जगद्गुरोः । चक्रे शक्रः सप्रमोदं प्रणम्यैवमथास्तवीत् ॥ १९७ ॥
नमो भगवते तुभ्यं विश्वनाथाय तायिने । तृतीयतीर्थनाथाय सनाथाय महर्द्धिभिः ॥ १९८ ॥
ज्ञानैस्त्रिभिश्चतुर्भिश्चातिशयैः सहजन्मभिः । जगद्विलक्षणोऽप्यष्टसहस्रस्फुटलक्षणः ॥ १९९ ॥
सदैव हि प्रमत्तानां प्रमादच्छेदकारणम् । इदं त्वद्जन्मकल्याणं कल्याणायाद्य मादृशाम् ॥ २०० ॥
सकलापि श्लाघनीया यामिनीयं जगत्पते ! । अकलङ्कतनुर्यस्यामुदगास्त्वं सुधाकरः ॥ २०१ ॥
अमर्त्यलोकवन्मर्त्यलोकोऽप्यस्त्वधुना प्रभो ! । देवैस्त्वद्वन्दनाहेतोरहिरेयाहिरापरैः ॥ २०२ ॥
देव ! त्वद्दर्शनसुधास्वादसन्तुष्टचेतसाम् । पर्याप्तं जीर्णसुधयातः परेण सुधान्धसाम् ॥ २०३ ॥
भगवन् ! भरतक्षेत्रसरोवरसरोरुह ! । भूयान्मधुव्रतस्येव त्वयि मे परमो लयः ॥ २०४ ॥

---

१ अच्युतेंद्रः । २ बलिवर्दान् । ३ भक्त्यामेकः एव चतुरः । ४ चर्चा अंगचर्चनं अर्चा पूजनं आदी यस्य तत् । ५ रक्षणकर्त्रे । ६ युक्ताय । ७ अकलंका तनूर्यस्य । ८ स्वर्गलोकवत् । ९ 'रे आगच्छ रे गच्छ' इत्यादि भाषण तत्परैः । १० देवानाम् । * °धुकरस्ये° ।

मानवा अपि ते धन्या ये त्वां पश्यन्ति नित्यशः । त्वद्दर्शनोत्सवोऽधीश ! स्वाराज्यादतिरिच्यते ॥ २०५ ॥
स्तुत्वैवं पञ्चधा भूत्वेशानात्स्वामिनमाददे । मूर्त्त्यैकया पराभिश्च प्राग्वत्कर्माणि सोऽकरोत् ॥ २०६ ॥
सेनादेव्याः क्षणात्पार्श्वे वस्त्रालङ्कारभूषितम् । मुमोच प्रभुमुल्लोचेऽबध्नाच्छ्रीदामगण्डकम् ॥ २०७ ॥
कुण्डले च दूकूले च प्रभोरुच्छीर्षकेऽमुचत् । तामवस्वापनीमर्हत्प्रतिबिम्बं च सोऽहरत् ॥ २०८ ॥
अथाभियोगिकान् देवान् दिवस्पतिरघोषयत् । कल्पवासिषु देवेषु भवनाधिपतिष्वपि ॥ २०९ ॥
व्यन्तरेषु ज्योतिष्केषु प्रभोर्देव्याश्च योऽशुभम् । चिन्तयिष्यति तन्मूर्धा सप्तधैव स्फुटिष्यति ॥ २१० ॥ ॥युग्मम् ॥
सोऽथ सङ्क्रमयामासाह्नुष्ठे भर्तुः सुधारसम् । अर्हन्तोऽस्तन्यपा यस्मात्क्षुधि स्वाह्नुष्ठपायिनः ॥ २११ ॥
सर्वाणि धात्रीकर्माणि सदा कारयितुं प्रभोः । समादिदेशाप्सरसः पञ्च धात्रीः सुरेश्वरः ॥ २१२ ॥
एवमासूत्र्य सुत्रामा नत्वार्हन्तं ततो ययौ । मेरुतः पुनरन्येद्युः द्वीपं नन्दीश्वराभिधम् ॥ २१३ ॥
शाश्वतार्हत्प्रतिमानां तत्र चाष्टाह्निकोत्सवम् । कृत्वा निजनिजं स्थानं ययुः सर्वे सुरा-ऽसुराः ॥ २१४ ॥
प्रातर्जितारिणा राज्ञा पुत्रभूयमुपेयुषः । अर्हतो जगदर्हस्य चक्रे जन्मोत्सवो महान् ॥ २१५ ॥
गृहेगृहे पथिपथि विपणौ विपणावपि । पुर्यां तत्रोत्सवो जज्ञे सर्वस्यां राजवेश्मवत् ॥ २१६ ॥
यद्गर्भस्थेऽत्र सम्भूतं धान्यं शं चाभवत्ततः । सम्भवः शम्भवश्चेति पिता नाम विभोर्व्यधात् ॥ २१७ ॥
मुहुर्मुहुरुदैक्षिष्टं बालरुपं जगत्पतिम् । सुधामग्नमिवात्मानं मन्यमानो महीपतिः ॥ २१८ ॥

१ स्वर्गराज्यात् । २ अन्याभिः मूर्तिभिः । ३ विताने । ४ पुष्पदामगुच्छकं । ५ उपधाने । ६ इन्द्रः । ७ तन्मस्तकं । ८ स्तने भवं स्तन्यं तत् न पिबन्ति ते । ९ अष्टसु अहःसु भवः आष्टाह्निकः स चासौ उत्सवश्च तं । १० दृष्टवान् । * कर्माणि सदा तदा कार० ।

भूपतिर्धारयामासोत्सङ्गे हृदि शिरस्यपि । प्रकृष्टमिव माणिक्यं प्रभुं तत्स्पर्शलालसः ॥ २१९ ॥
धात्र्यः शक्रकृताः पञ्च ताः प्रपञ्चितभक्तयः[1] । कदापि देहच्छायावत्पार्श्वं न मुमुचुः प्रभोः ॥ २२० ॥
स धात्रीं खेदयामासाङ्कादुत्तीर्य परिभ्रमन् । अपेतसाध्वसः[2] सिंहीमिव सिंहकिशोरकः ॥ २२१ ॥
रत्नाश्मभूमिसङ्क्रान्ते[3] चन्द्रे स ज्ञानवानपि । करं चिक्षेप लोकस्य दर्शयन् बालचापलम् ॥ २२२ ॥
आगतैः सवयोभूय[4] मर्त्यरुपधरैः सुरैः । सहाऽक्रीडत्प्रभुः कोऽन्यस्तत्क्रीडायामपि क्षमः ? ॥ २२३ ॥
क्रीडया धावतो भर्तुर्वलद्ग्रीवा दिवौकसः । प्रतिकारा[5] इवेभ्यस्य[6] धावन्ति स्म पुरः पुरः ॥ २२४ ॥
लीलया पातितेष्वेषु रक्ष रक्षेतिवादिषु । तथापि विदधे स्वामी परिणामोचितां कृपाम् ॥ २२५ ॥
एवं विचित्रक्रीडाभिश्चित्रैः क्रीडनकैश्च सः । शैशवं व्यतिचक्राम प्रदोषमिव चन्द्रमाः ॥ २२६ ॥
चतुर्धनुःशतोत्तुङ्गः स्वर्णवर्णो जगद्गुरुः । बभासे कौतुकान्मेरुरिव पुंस्त्वमुपागतः ॥ २२७ ॥
छन्नवृत्तोन्नतोष्णीषः[7] स्निग्धश्यामलकुन्तलः । अष्टमीन्दुललाटश्रीः कर्णविश्रान्तलोचनः ॥ २२८ ॥
स्कन्धावलम्बिश्रवणो वृषस्कन्धो महाभुजः । विशालभुजमध्यश्च सिंहोदरकृशोदरः ॥ २२९ ॥
करीन्द्रकरकल्पोरुरेणीजङ्घोऽल्पगुल्फकः[8] । कूर्मपृष्ठोन्नतसमतलांह्रिः सरलाङ्गुलिः ॥ २३० ॥
असम्पृक्तोद्गतश्यामृदुलस्निग्धरोमकः । पद्मामोदिमुखश्वासः सदा मालिन्यवर्जितः ॥ २३१ ॥
एवं निसर्गसर्वाङ्गसुभगोऽपि जगत्पतिः । पार्वणः[9] शरदेवेन्दुर्यौवनेनाधिकं बभौ ॥ २३२ ॥

१ विस्तारितभक्तयः । २ अपगतभयः । ३ रत्नोपलनिबद्धभूमिप्रतिबिम्बिते । ४ सवयसः मित्राणि भूत्वा इति । ५ भटाः । ६ धनिकस्य । ७ शिरोवेष्टनम् । ८ अल्पौ गुल्फौ घुटिके यस्य । ९ पर्वणि भवः ।

पितृभ्यामुत्सवातृप्त्या[*] परेद्युः प्रार्थितः प्रभुः । परिणेतुं नृपकन्याः सुरकन्यासहोदराः ॥ २३३ ॥
जानन् भोगफलं कर्म पित्रोराज्ञां च पालयन् । कन्यानामुपयमनं[1] सोऽनुमेने महामनाः ॥ २३४ ॥
राज्ञा जितारिणा साक्षात्शक्रेण च समेयुषा[2] । हाहाहूहूप्रभृतिषु गायत्सु मधुरस्वनम् ॥ २३५ ॥
गन्धर्वेषु मृदङ्गादि गम्भीरं वादयत्सु च । रम्भातिलोत्तमाद्यासु नृत्यन्तीष्वप्सरःसु च ॥ २३६ ॥
धवलानुद्गृणन्तीषु[3] कुलनारीषु चोच्चकैः । कारितः सम्भवः स्वामी कन्योद्वाहमहोत्सवम् ॥ २३७ ॥
॥ त्रिभिर्विशेषकम् ॥
नन्दनोद्यानकल्पासु[4] कदाप्युद्यानवीथिषु[5] । रत्नाद्रिशृङ्गतुल्येषु क्रीडाद्रिषु कदापि च ॥ २३८ ॥
सुधाकुण्डसदृक्षासु[6] कदाचित् केलिवापिषु । कदाचिच्चित्रशालासु द्युविमानसनाभिषु[7] ॥ २३९ ॥
वैदर्ध्यरमणीयाभी[8] रमणीभिः सहस्रशः । रेमे श्रीसम्भवस्वामी करिणीभिरिव द्विपः ॥ २४० ॥
॥ त्रिभिर्विशेषकम् ॥
भुञ्जानो विविधान् भोगान् कौमारे परमेश्वरः । गमयामास पूर्वाणां[9] लक्षाणि दश पञ्च च ॥ २४१ ॥
राजाथ भवनिर्विण्णः सम्भवस्वामिनं तदा । उपरुध्य न्यधाद् राज्येऽङ्गुलीये[10] वररत्नवत् ॥ २४२ ॥
सद्गुरोः पादपद्मान्ते जितारिनृपतिः स्वयम् । उपादाय परिव्रज्यां निजमर्थमसाधयत् ॥ २४३ ॥
तातोपरोधादादाय राज्यं प्राज्यं पराक्रमः[11] । ररक्ष सम्भवस्वामी पृथिवीं पुष्पदामवत् ॥ २४४ ॥

१ विवाहं । २ प्राप्तवता । ३ उद्गायन्तीषु । ४ नंदनोद्यानादीषन्न्यूनासु । ५ उद्यानराजिषु । ६ सदृक्षा तुल्या । ७ सनाभिः सदृशा । ८ चातुर्यं । ९ षट्पंचाशत्सहस्राधिकसप्ततिलक्षकोटिवर्षात्मकः कालविशेषः पूर्वः । १० मुद्रिकायाम् । ११ पराक्रमवान् ।
* °तृभ्यां परया प्रीत्याऽपरे° ।

निरीतयो[1] निरातङ्काः[2] पुरुषायुषजीविताः । सम्भवस्वामिनो राज्ये प्रभावादभवन् प्रजाः ॥ २४५ ॥
न कस्याप्युपरि स्वामी भ्रुवमप्यध्यरोपयत् । चापारोपणवार्त्ताया अवकाशोऽपि कीदृशः ? ॥ २४६ ॥
भोग्यं कर्म क्षिपन् राज्ये सपूर्वाङ्गचतुष्टयम्[3] । चतुश्चत्वारिंशत्पूर्वलक्षीं स्वाम्यत्यवाहयत्[4] ॥ २४७ ॥
ज्ञानत्रयपरीतात्मा[5] स्वयम्बुद्धो जगत्प्रभुः । तदा च चिन्तयामास संसारस्थितिमीदृशीम् ॥ २४८ ॥
संसारे विषयास्वादसुखं सविषभोज्यवत् । आपातमात्रमधुरं परिणामे त्वनर्थदम् ॥ २४९ ॥
अस्मिन्नसारे संसारे कथञ्चिद्धि शरीरिभिः । अवाप्यते मानुषत्वमूषरे[6] स्वादुवारिवत् ॥ २५० ॥
मानुषत्वमवाप्यापि मूढैर्विषयसेवया । मुधा निर्गम्यते पादशौचेनेव सुधारसः ॥ २५१ ॥
इति चिन्तयतो भर्तुरेयुर्लोकान्तिकामराः । नत्वा व्यज्ञपयंश्चैवं स्वामिंस्तीर्थं प्रवर्त्तय ॥ २५२ ॥
गतेषु तेषु देवेषु दीक्षादानोत्सवोत्सुकः । सांवत्सरिकमारेभे दानं दातुं जगत्पतिः[7] ॥ २५३ ॥
देवाश्च जृम्भकाः[8] शक्रादिष्टवैश्रवणेरिताः[9] । क्षीणस्वामीनि निर्नष्टसेतून्यद्रिगतानि च ॥ २५४ ॥
श्मशानस्थानवर्तीनि निगूढानि गृहान्तरे । चिरभ्रष्टानि नष्टानि स्वर्णादीनि धनान्यथ ॥ २५५ ॥
आनीय पुर्यां श्रावस्त्यां चत्वरेषु[10] त्रिकेषु[11] च । अन्येष्वपि प्रदेशेषु राशींश्चक्रुर्गिरीन्द्रवत् ॥ २५६ ॥
यो येनार्थी स तद्द्रव्यं स्वैरमर्थयतामिति । आयुक्तैर्घोषणामुच्चैः[12] श्रावस्त्यां स्वाम्यकारयत् ॥ २५७ ॥

१ निर्गता अतिवृष्टि अनावृष्टि प्रभृतय ईतयः याभ्यः ताः । २ आतंकः व्याधिः । ३ चतुरशीतिलक्षवर्ष पूर्वागं तस्य चतुष्टयं तेन सहितं यथा तथा । ४ चतुश्चत्वारिंशत् लक्षपूर्वान् । ५ युक्तः । ६ क्षारभूमौ । ७ संवत्सरे भवं । ८ देवविशेषाः । ९ इन्द्रकृताज्ञकुबेरेण प्रेरिताः । १० चतुष्पथेषु । ११ मार्गत्रयसंयोगेषु । १२ नियुक्तजनैः ।

स्वामी कोटिं साष्टलक्षां हाटकस्यान्वहं ददौ । अर्थिनस्तावतोऽर्थस्य भवन्ति ददतोऽर्हतः ॥ २५८ ॥
कोटीशतत्रयं स्वर्णस्याष्टाशीतिश्च कोटयः । लक्षाशीतिश्च ददिरे स्वामिना वत्सरेण तु ॥ २५९ ॥
सांवत्सरिकदानान्ते वासवाश्चलितासनाः । सान्तःपुरपरीवाराः स्वामिवेश्म समाययुः ॥ २६० ॥
ततः प्रदक्षिणीकृत्य स्वामिवेश्म विमानतः । अवतेरुश्चास्पृशन्तः पृथिवीं चतुरङ्गुलम् ॥ २६१ ॥
द्युसन्नाथा[1] जगन्नाथमथो विनयशालिनः । सर्वे प्रदक्षिणीचक्रुर्नमश्चक्रुश्च भक्तितः ॥ २६२ ॥
जन्माभिषेकवद् भर्तुरभिषेकमथाच्युतः । आभियोग्याहृतैस्तीर्थाम्भस्कुम्भैर्विधिवद्व्यधात् ॥ २६३ ॥
क्रमेण तद्वदन्येऽपि विदधुर्विबुधाधिपाः । दीक्षाकल्याणकस्नात्रं भक्तिकल्या* जगत्पतेः ॥ २६४ ॥
सुरासुरेन्द्रवद् भक्त्या नरेन्द्रा अपि तत्क्षणम् । सम्भवस्वामिनश्चक्रुः पवित्रैः स्नात्रमम्बुभिः ॥ २६५ ॥
वपुर्देवाधिदेवस्य देवदूष्यैर्दिवौकसः । ममृजुः स्नानतोयार्द्रमादर्शमिव काञ्चनम् ॥ २६६ ॥
गोशीर्षचन्दनेनाथ नाथं विलिलिपुः सुराः । दिव्यानि च दुकूलानि भक्तितः पर्यधापयन् ॥ २६७ ॥
किरीटं[2] मुर्ध्नि सर्वस्वमिव वज्राकरावनेः[3] । कुण्डले कर्णयोरभ्रमुक्तामणिमये[4] इव ॥ २६८ ॥
कण्ठे हारं नीहाराद्रिभ्रश्यद्गङ्गानुहारकम्[5*] । केयूरकङ्कणान्[6] बाह्वोः सूर्यज्योतिर्मयानिव[7] ॥ २६९ ॥
कुण्डलीभूतनालाभान् कटकान्पादपद्मयोः । एवं निदधिरे देवा भूषणानि जगद्विभोः ॥ २७० ॥
॥ त्रिभिर्विशेषकम् ॥

१ द्युसदां देवानां नाथाः इंद्राः । २ मुकुटम् । ३ वज्राणां आकरः खनिः यस्यां सा चासौ अवनिश्च तस्याः । ४ मेघमौक्तिकमणिप्रचुरे । ५ हिमगिरिपतद्गंगामनुकुर्वतम् । ६ अंगदकरभूषणानि । ७ रवितेजोव्याप्तान् । ★ भक्तिचतुराः । * °नुकार° ।

सिद्धार्थां नामतः सांघ्रिपीठसिंहासनां[1] ततः । शिबिकां रचयाञ्चक्रुर्भूभुजः स्वामिनः कृते ।। २७१ ।।
अच्युतेन्द्रोप्याभियोग्यैः शिबिकां तां व्यकारयत् । वैमानिकविमानानामधिदेवीमिवोच्चकैः[2] ।। २७२ ।।
स्वयंकृतां तां शिबिकां नरेन्द्रशिबिकान्तरे । श्रीचन्दनेऽगरुमिवाच्युतेन्द्रोऽन्तरभावयत् ।। २७३ ।।
अथारुरोह भगवान् दत्तहस्तो बिडौजसा[3] । शिबिकायां तत्र सिंहासनं हंस इवाम्बुजम् ।। २७४ ।।
आदौ तामुदधुर्मर्त्या *रथ्या[4] इव महारथम् । अनन्तरं दिविषदो घनवाता[5] इवावनिम् ।। २७५ ।।
ध्वनत्सु तूर्यवर्येषु समन्ताद्वारिदेष्विव । गन्धर्वेषु च कुर्वत्सु गीतिं[6] कर्णसुधोपमाम् ।। २७६ ।।
चित्राङ्गहारकरणं[7] नृत्यन्तीष्वप्सरःसु च । पठत्सु बन्दिवृन्देषु ब्रह्मसु ब्रह्मगेषु[8] च ।। २७७ ।।
आशंसन्तीषु माङ्गल्यं कुलवृद्धासु चोच्चकैः । धवलांश्च कुलस्त्रीषु गायन्तीषु मनोरमान् ।। २७८ ।।
अग्रे पृष्ठे पार्श्वयोश्चाश्ववद्वल्गत्सु नाकिषु[9] । दृश्यमानः स्मेरनेत्रैर्दर्श्यमानोऽङ्गुलीदलैः[10] ।। २७९ ।।
स्थाने स्थाने नागराणां प्रतीच्छन्मङ्गलानि च । पीयूषदृष्टिभिरिव[11] दृग्भिरानन्दयन् जगत् ।। २८० ।।
दोधूयमानचमरो[12] धृतछत्रश्च नाकिभिः । श्रावस्तीमध्यतः स्वामी सहस्राम्रवणं[13] ययौ ।। २८१ ।।

।। षड्भिः कुलकम् ।।

---

१ पादपीठसिंहासनाभ्यां सहितां । २ देवविशेषाः । ३ इन्द्रेण । ४ रथं वहन्ति रथ्याः अश्वाः । ५ तन्नामानो वायवः । ६ संगीतं । ७ चित्राणां अंगहाराणां अभिनयानां करणं यस्मिन्यथा तथा । ८ गीतविशेषान् । ९ देवेषु । १० विकसितचक्षुर्भिः । ११ अमृतदृष्टिभिः । १२ अतिशयेन कंप्यमाने चामरे यस्य । १३ तन्नामकमुद्यानम् । * मुदधु० ।

तस्माच्च शिबिकारत्नात्पादपादिव बर्हिणः । दीक्षां हारमिवादित्सुरुत्ततार जगद्गुरुः ॥ २८२ ॥
मुमोच तत्र भगवान् माल्यालङ्करणादिकम् । इन्द्रन्यस्तं देवदूष्यं स्कन्धदेशे दधार च ॥ २८३ ॥
मार्गशीर्षस्य राकायां[1] चन्द्रे मृगशिरःस्थिते । अह्नश्च पश्चिमे भागे कृतषष्ठतपास्ततः ॥ २८४ ॥
पञ्चभिर्मुष्टिभिर्मूर्ध्नो लीलयैव जगत्पतिः । उत्पाटयामास केशान् क्लेशान्पूर्वार्जितानिव ॥ २८५ ॥ ॥ युग्मम् ॥
शक्रस्तान् स्वामिनः केशान् स्वकीयवसनाञ्चले[2] । शेषामिव प्रतीयेष क्षीरोदे चाक्षिपत्क्षणात् ॥ २८६ ॥
सुरासुरनृणामाशु तुमुलं[3] मुष्टिसंज्ञया । निषिषेध द्वाःस्थ[4] इव क्षीरोदादेत्य वासवः ॥ २८७ ॥
सावद्यं योगमखिलं[5] प्रत्याख्यामीत्युदीरयन्[6] । देवादिपर्षत्प्रत्यक्षं[7] चारित्रं शिश्रिये प्रभुः ॥ २८८ ॥
मनःपर्यवमुत्पेदे ज्ञानं तुर्यं[8] प्रभोरथ । ज्ञानस्य केवलस्येव सत्यङ्कार उपस्थितः ॥ २८९ ॥
एकान्तदुःखदग्धानां प्रक्षिप्तानामिवानले[9] । अपि नारकजन्तूनां तदा सुखमभूत्क्षणम् ॥ २९० ॥
उत्सृज्य तृणवद् राज्यं सहस्रं पृथिवीभुजः । सह त्रैलोक्यनाथेन दीक्षामाददिरे स्वयम् ॥ २९१ ॥
अथ शक्रो नमस्कृत्य भगवन्तं कृताञ्जलिः । स्तोतुमेवं समारेभे भक्तिनिर्भरया गिरा ॥ २९२ ॥
चतुर्ज्ञानधर ! चतुर्यामधर्मप्रदर्शक !। चतुर्गतिप्राणिगणप्रीतिदायिन्नय प्रभो ! ॥ २९३ ॥
धन्यास्तास्त्रिजगन्नाथ ! भरतक्षेत्रभूमयः । तीर्थेश ! जङ्गमं तीर्थं यासु त्वं विहरिष्यसे ॥ २९४ ॥
अस्मिन् वसति संसारे संसारेण न लिप्यसे । पङ्कजं पङ्कजमपि याति पङ्किलतां[10] न हि ॥ २९५ ॥

१ पूर्णिमायां । २ वस्त्रप्रान्तभागे । ३ कोलाहलम् । ४ द्वारपालः । ५ सदोषं । ६ मनोवचनकायात्मकं । ७ देवादिसभासमक्षम् । ८ चतुर्थ । ९ पंकात् जातमपि । १० पंकयुक्तताम् ।

तवासिधारासोदर्यं[1] जयतीदं महाव्रतम् । कर्मपाशच्छेदनाय प्रभविष्णु[2] जगत्प्रभो ! ॥ २९६ ॥
निर्ममोऽपि कृपालुस्त्वं निर्ग्रन्थोऽपि[3] महर्द्धिकः । तेजस्व्यपि सदा सौम्यो धीरोऽपि भवकातरः[4] ॥ २९७ ॥
नितान्तं[5] पूजनीयः स नाकिनां मानवोऽपि सन् । विहरन् कार्यसे येन पारणं विश्वतारणैम्[*] ॥ २९८ ॥
महोपकारजनकं स्वामिन्नविरतस्य[6] मे । औषधं व्याधितस्येव[7] भवद्दर्शनमीदृशम् ॥ २९९ ॥
त्रिजगन्नाथ ! नार्थामि त्वयि भूयान्मनो मम । अनुस्यूतमिवोत्कीर्णमिव श्लिष्टमिवानिशम्[10] ॥ ३०० ॥
इति स्तुत्वा प्रभुं शक्रोऽन्येपीन्द्रा अच्युतादयः । स्थानं निजनिजं जग्मुः स्मरन्तः प्रभुसन्निधिम् ॥ ३०१ ॥
द्वितीयस्मिन् दिने पुर्यां तस्यामेव जगत्पतिः । राज्ञः सुरेन्द्रदत्तस्य गृहेऽगात् पारणेच्छया ॥ ३०२ ॥
सोऽभ्युत्थाय जगन्नाथं नमस्कृत्य च भक्तितः । परमान्नमुपादाय गृह्यतामित्यभाषत ॥ ३०३ ॥
एषणीयं कल्पनीयं प्रासुकं[11] पायसं[12] च तत् । पाणिपात्रेण विश्वैकपात्रं प्रभुरुपाददे ॥ ३०४ ॥
कल्याणकारणं दातुः प्राणमात्रकधारणम् । चकार[13] पारणं तेन स्वादागर्द्धमनाः प्रभुः ॥ ३०५ ॥
तदाभूद्दुन्दुभेर्नादो दिग्गजस्येव[14] गर्जितम् । वसुधारापतद्दिव्या दिवः[15] शीर्णेव कण्ठिका ॥ ३०६ ॥
नन्दनस्येव सर्वस्वं पुष्पवृष्टिः पपात खात् । गन्धाम्बुवृष्टिरभवद्दिग्दन्तिमदसोदरा ॥ ३०७ ॥
एकरश्मिधृतानीव चेलान्युच्चिक्षिपुः[16] सुराः । अहो दानमहो दानं सुदानं चेति गीरभूत् ॥ ३०८ ॥

---

१ सदृशं । २ सशक्तिकम् । ३ निर्धनः । ४ भवात् कातरः भीरुः । ५ अत्यंत । ६ अनिवृत्तस्य । ७ व्याधिः संजातः यस्य तस्य । ८ याचे । ९ प्रोतं । १० खचितं । ११ प्रासुकं अचितं । १२ पयसा पक्वं क्षीरान्नं इत्यर्थः । १३ स्वादे अगर्द्धं अलुब्धं मनः यस्य सः । १४ वसु धनं । १५ आकाशात् । १६ चेलानि वस्त्राणि । * तारण ! इति पाठान्तरम् ।

भगवान् पारयामास यत्र तत्र तदैव हि । सुरेन्द्रदत्तो विदधे पीठं स्वर्णमणीमयम् ।। ३०९ ।।
त्रिसन्ध्यं पूजयामास तत्पीठं स्वामिपादवत् । सुरेन्द्रदत्तोऽसम्पूज्य बुभुजे जातुचिन्न हि ।। ३१० ।।
स्थानात्ततश्च भगवान् ग्रामे द्रोणमुखे[1] पुरे । आकरे कर्पटे[2] खेटे[3] मडम्बे[4] पत्तने[*] वने ।। ३११ ।।
नवे नवेऽनवस्थानो विविधाभिग्रहोद्यतः । द्वाविंशतिमनुद्विग्नः सहमानः परीषहान् ।। ३१२ ।।
त्रिगुप्तिः[5] पञ्चसमितिर्मौनभाग्निर्भयः[6] स्थिरः । एकाग्रदृग्विजहार वत्सराणि चतुर्दश ।। ३१३ ।।
तदानीं च सहस्राम्रवणे सप्तच्छदतरोस्तले[7] । द्वितीयशुक्लध्यानस्थस्तस्थौ प्रतिमया प्रभुः ।। ३१४ ।।
ध्यानान्तरे तिष्ठतश्च घातिकर्मचतुष्टयम् । सम्भवस्वामिनोऽत्रुट्यच्छाखिनः शुष्कपत्रवत् ।। ३१५ ।।
ततश्च कार्तिके मासि पक्षे च धवलेतरे । पञ्चम्यां च तिथौ शीतरश्मौ मृगशिरःस्थिते ।। ३१६ ।।
स्वामिनः कृतषष्ठस्योत्पेदे केवलमुज्ज्वलम्[8] । सद्भाविभूतवस्तूनां दर्शनप्रतिभूरिव[9] ।। ३१७ ।।
परमाधार्मिककृत-क्षेत्रजाऽन्योऽन्यजन्मनः[10] । दुःखस्यान्तात्क्षणं सौख्यं तदा निरयिणामभूत्[▲] ।। ३१८ ।।
सुरासुरेन्द्राः सर्वेऽपि तदानीं चलितासनाः । केवलज्ञानमहिम[11] कर्तुं तत्र समाययुः ।। ३१९ ।।
ततः समवसरणकृते क्षामेकयोजनाम्[12] । ममृजुर्वायुकुमाराः सिषिचुश्च पयोमुचः ।। ३२० ।।
बबन्धुर्व्यन्तरास्तां च स्वर्णरत्नाश्मभिः शुभैः । पञ्चवर्णानि पुष्पाणि विकिरन्ति स्म तत्र च ।। ३२१ ।।

१ चतुःशतग्रामेषु एकरम्यं ग्रामं द्रोणमुखं । २ कुनगरम् । ३ कृषीवलग्रामे । ४ धूलिप्राकारवेष्टितो ग्रामः मडंबः । ५ तिस्रः मनोवचनकायरुपाः गुप्तयः यस्य । ६ पंच ईर्यादयः समितयः यस्य । ७ वृक्षविशेषस्य । ८ केवलज्ञानं । ९ प्रतिभूः प्रतिनिधिभूतः भाषायां "जामीनऽ इति ख्यातः । १० प्रकारत्रयोद्भवस्य । ११ महिमानं । १२ पृथ्वीं । * विविधदेशागत पण्यस्थानम् तच्च द्विधा-जलपत्तनं स्थलपत्तनं वा । अथवा रत्नभूमि इति व्याख्या प्रज्ञप्तौ ।। ■ द्यमः । ▲ नारकाणाम् ।

श्वेतच्छत्रध्वजस्तम्भमकरास्यादिभूषितान् । प्रत्याशं[1] चतुरस्तत्र तोरणांस्ते विचक्रिरे ॥ ३२२ ॥
रत्नपीठं विकृत्यान्तः परितस्तं विचक्रिरे । रौप्यं वप्रं भवनेशाः सौवर्णकपिशीर्षकम्[2] ॥ ३२३ ॥
ज्योतिष्का[3] मध्यमं वप्रं सरत्नकपिशीर्षकम् । तापनीयं[4] विदधिरे भूवधूवलयोपमम् ॥ ३२४ ॥
अथ रत्नमयं वप्रं माणिक्यकपिशीर्षकम् । तत्रोपरितनं चक्रुर्विमानपतयोऽमराः ॥ ३२५ ॥
बभूव प्रतिवप्रं च गोपुराणां[5] चतुष्टयम् । द्वितीयवप्रे चैशान्यां देवच्छन्दं[6] व्यधुः सुराः ॥ ३२६ ॥
ऊर्ध्ववप्रान्तरावन्या मध्ये चैत्यतरुं[7] व्यधुः । साष्टधन्वशतक्रोशद्वयोच्चं व्यन्तरास्ततः ॥ ३२७ ॥
तस्याधो मणिभिर्बद्धे पीठे ते छन्दकं व्यधुः । तन्मध्ये प्राक् साङ्घ्रिपीठं रत्नसिंहासनं ततः ॥ ३२८ ॥
छन्दकोपरि चक्रुश्च ते च्छत्रत्रितयं शुभम् । दधाते पार्श्वयोर्यक्षौ चामरे चेन्दुपाण्डुरे ॥ ३२९ ॥
चक्रे समवसृत्यग्रे धर्मचक्रं च भासुरं । व्यन्तरैर्धर्मचक्रित्वसूचकं परमेशितुः ॥ ३३० ॥
सुरैः संचार्यमाणेषु सौवर्णेष्वम्बुजन्मसु । नवस्वारोपयन्पादौ सुरकोटीभिरावृतः ॥ ३३१ ॥
प्रातः समवसरणं पूर्वद्वाराऽविशद्विभुः[8] । त्रिः प्रदक्षिणयामास तत्र तं चैत्यपादपम् ॥ ३३२ ॥
नमस्तीर्थायेति जल्पंश्छन्दकान्तर्निवेशितम् । सिंहासनमथाध्यास्त प्राङ्मुखः परमेश्वरः ॥ ३३३ ॥
प्रभावात्स्वामिनः स्वामिप्रतिबिम्बानि चक्रिरे । रत्नसिंहासनस्थानि व्यन्तरा अन्यदिक्ष्वपि ॥ ३३४ ॥
शिरसः पश्चिमे भागेऽभवद् भामण्डलं प्रभोः । इन्द्रध्वजः पुरस्ताच्च दुन्दुभिश्चाध्वनद्दिवि ॥ ३३५ ॥

१ प्रतिदिशं । २ कपिशीर्षकं प्राकाराग्रं भाषायां "कांगरा" इति प्रख्यातं । ३ सूर्यचंद्रादिदेवविशेषाः । ४ सुवर्णमयं । ५ पुरद्वाराणां । ६ विश्रामपीठम् । ७ छायार्थ वृक्षविशेषं । ८ पूर्वद्वारा पूर्वद्वारेण ।

प्रविश्य प्राग्द्वारार्हन्तं नत्वाग्नेय्यामुपाविशन् । साधवोऽथ वैमानिक्यः साध्व्यश्चोद्ध्वा[*] वितष्ठिरे ॥ ३३६ ॥
अपाग्द्वारा प्रविश्यार्हत्पादान्नत्वा च नैर्ऋते । अतिष्ठन् भवनपतिज्योतिष्कव्यन्तरस्त्रियः ॥ ३३७ ॥
प्रत्यग्द्वारेण प्रविश्यार्हन्तं नत्वा मरुद्दिशि । तस्थुः क्रमाद्भवनेशज्योतिष्कव्यन्तराः सुराः ॥ ३३८ ॥
उदग्द्वारा प्रविश्याथ जिनं नत्वा क्रमेण तु । वैमानिका नरा नार्य ऐशान्यामवतस्थिरे ॥ ३३९ ॥
आद्यवप्रेऽवास्थितैवं श्रीमान् सङ्घश्चतुर्विधः[१] । वप्रे द्वितीये तिर्यञ्चस्तृतीये वाहनानि[२] च ॥ ३४० ॥
अथ शक्रो नमस्कृत्य स्वामिनं रचिताञ्जलिः । इति प्रचक्रमे स्तोतुं वाचा भक्तिसनाथया[३] ॥ ३४१ ॥
अनाहूतसहायस्त्वं त्वमकारणवत्सलः । अनभ्यर्थितसाधुस्त्वं त्वमसम्बन्धबान्धवः ॥ ३४२ ॥
अनक्तस्निग्धमनसममृ[४]जोज्वलवाक्पथम्[५] । अधौतामलशीलं त्वां शरण्यं[६] शरणं श्रये ॥ ३४३ ॥
अचण्डवीरव्रतिना शमिना समवर्त्तिना । त्वया काममकुट्यन्त कुटिलाः कर्मकण्टकाः ॥ ३४४ ॥
अभवाय महेशायागदाय[७] नरकच्छिदे । अरजसाय[८] ब्रह्मणे कस्मैचिद्भवते नमः ॥ ३४५ ॥
अनुक्षितफलोदग्रादनिपातगरीयसः[९] । असङ्कल्पितकल्पद्रोस्त्वत्तः फलमवाप्नुयाम् ॥ ३४६ ॥
असङ्गस्य जिनेशस्य निर्ममस्य कृपात्मनः । मध्यस्थस्य जगत्त्रातुरनङ्गस्तेऽस्मि किङ्करः ॥ ३४७ ॥
अगोपिते रत्ननिधाववृ[१०]ते कल्पपादपे । अचिन्त्यचिन्तारत्ने च त्वय्यात्मायं मयार्पितः ॥ ३४८ ॥
फलानुध्यानवन्ध्योऽहं फलमात्रतनुर्भवान् । प्रसीद यत्कृत्यविधौ किङ्कर्त्तव्यजडे मयि ॥ ३४९ ॥

१ चतुष्प्रकारः । २ भक्तियुक्तया । ३ अनक्तं अभ्यंगरहितम् । ४ अमृजः मलापकर्षरहितः । ५ शरणे साधुं । ६ रजोगुणरहिताय ।
७ जलसेकवर्जितोऽपि फलैः सम्भृतः तस्मात् । पत्राद्यगलनाद् गुरूतमः तस्मात् ॥ ८ न अंकं त्रिशूलादि चिन्हं यस्य । ९ अवेष्टने ।
* °श्वोद्धर्वमवस्थिताः संल. सङ्घ. ॥ • तु ॥ ■ °म्बन्धिबा० ।

स्तुत्वैवं विरते शक्रे विश्वस्योपचिकीर्षया । भगवान् सम्भवस्वामी विदधे देशनामिमां ॥ ३५० ॥
अनित्यं सर्वमप्यस्मिन् संसारे वस्तु वस्तुतः । मुधासुखलवेनापि तत्र मूर्च्छा शरीरिणाम् ॥ ३५१ ॥
स्वतोऽन्यतश्च सर्वाभ्यो दिग्भ्यश्चागच्छदापदः । कृतान्तदन्तयन्त्रस्थाः[1] कष्टं जीवन्ति जन्तवः ॥ ३५२ ॥
वज्रसारेषु देहेषु यद्यास्कन्दत्यनित्यता । रम्भागर्भसगर्भाणां[2] का कथा तर्हि देहिनाम् ॥ ३५३ ॥
असारेषु शरीरेषु स्थेमानं यश्चिकीर्षति । जीर्णशीर्णपलालोत्थे[3] चञ्चापुंसि[4] करोतु सः ॥ ३५४ ॥
न मन्त्रतन्त्रभैषज्यकरणानि शरीरिणाम् । त्राणाय मरणव्याघ्रमुखकोटरवासिनाम् ॥ ३५५ ॥
प्रवर्द्धमानं पुरुषं प्रथमं ग्रसते जरा । ततः कृतान्तस्त्वरते धिगहो जन्म देहिनाम् ॥ ३५६ ॥
यद्यात्मानं विजानीयात्कृतान्तवशवर्तिनम् । को ग्रासमपि गृह्णीयात् ? पापकर्मसु का कथा ॥ ३५७ ॥
समुत्पद्य समुत्पद्य विपद्यन्तेऽप्सु बुद्बुदाः[5] । यथा तथा क्षणेनैव शरीराणि शरीरिणाम् ॥ ३५८ ॥
आढ्यं निःस्वं[6] नृपं रङ्कं ज्ञं[7] मूर्खं सज्जनं खलम् । अविशेषेण संहर्तुं समवर्ती[8] प्रवर्तते ॥ ३५९ ॥
न गुणेष्वस्य दाक्षिण्यं द्वेषो दोषेषु वास्ति न । दवाग्निवदरण्यानीं[9] विलुम्पत्यन्तको जनम् ॥ ३६० ॥
इदं तु मा स्म शङ्कध्वं कुशास्त्रैरपि मोहिताः । कुतोऽप्युपायतः कायो निरपायो[10] भवेदिति ॥ ३६१ ॥
ये मेरुं दण्डसात्कर्तुं[11] पृथ्वीं वा छत्रसात्क्षमाः । तेऽपि त्रातुं स्वमन्यं वा न मृत्योः प्रभविष्णवः ॥ ३६२ ॥
आ कीटादा च देवेन्द्रात्प्रभावन्तकशासने । अनुन्मत्तो न भाषेत कथञ्चित्कालवञ्चनम्* ॥ ३६३ ॥

१ दंताः एव यंत्राणि तेषु तिष्ठंतीति । २ सगर्भाणां सदृशाम् । ३ पलालो घासः । ४ तृणनिर्मिते पुरुषे लोके 'चाडिओ' । ५ जलविकाराः भाषायां "परपोटा" इति ख्याताः । ६ निर्धनं । ७ पंडितं ८ महत्अरण्यं । ९ नाशरहितः । १० कृत्स्नः मेरुः दंडः संपद्यते इति दंडसात् । ११ समर्थाः । * ञ्चनाम्० ।

पूर्वेषां चेत् क्वचित् कश्चिज्जीवन् दृश्यते कैश्चन । न्यायपथातीतमपि स्यात्तदा कालवञ्चनम् ॥ ३६४ ॥
अनित्यं यौवनमपि प्रतियन्तु मनीषिणः । बलरुपापहारिण्या जरसा जर्जरीभवत् ॥ ३६५ ॥
यौवने कामिनीभिर्ये काम्यन्ते कामलीलया । निकामकृतथूत्कारं त्यज्यन्ते तेऽपि वार्द्धके ॥ ३६६ ॥
यदर्जितं बहुक्लेशैरभुक्त्वा यच्च पालितम् । तद्याति क्षणमात्रेण निधनं[1] धनिनां धनम् ॥ ३६७ ॥
उपमा न पदं किं स्यात्फेनबुद्बुद[2]विद्युतां[3] ? । धनस्य नश्यतोऽवश्यं पश्यतामपि तद्वताम् ॥ ३६८ ॥
समागमाः सापगमाः[4] सुहृद्भिर्बन्धुभिर्जनैः । स्वस्य वान्यस्य वा नाशे विकृतेऽपकृतेऽपि वा ॥ ३६९ ॥
ध्यायन्ननित्यतां नित्यं मृतं पुत्रं न शोचति । नित्यताग्रहमूढस्तु कुड्यभङ्गेऽपि रोदिति ॥ ३७० ॥
शरीरयौवनधनबान्धवादि न केवलम् । अनित्यं किन्तु भुवनमप्येतत्सचराचरम् ॥ ३७१ ॥
इत्यनित्यं विदन् सर्वं शरीरी निष्परिग्रहः । नित्याय नित्यसौख्याय पदाय प्रयतेत तत् ॥ ३७२ ॥
श्रुत्वा तां देशनां भर्तुः पादपद्मान्तिके ततः । नरा नार्यश्च बहवो दीक्षामाददिरे तदा ॥ ३७३ ॥
तदा चारुप्रभृतीनां गणभृन्नामकर्मणाम् । स्वाम्युद्दिदेश त्रिपदीं स्थित्युत्पादव्ययात्मिकाम् ॥ ३७४ ॥
द्व्यग्रं[5] शतं गणधरास्ते त्रिपद्यनुसारतः । असूत्रयन् द्वादशाङ्गी सचतुर्दशपूर्विकाम् ॥ ३७५ ॥
उत्थायादाय शक्रोपनीतं चूर्णं क्षिपन्प्रभुः । अनुयोगगणानुज्ञे तेषां द्रव्यादिभिर्ददौ ॥ ३७६ ॥
वासान्[6] सुरादयस्तेषु ध्वनद्दुन्दुभि[7] चिक्षिपुः । स्वामिवाचं प्रतीच्छन्तस्तस्थुर्गणभृतश्च ते ॥ ३७७ ॥
दिव्यसिंहासनं भूयोऽप्यध्यास्य प्राङ्मुखो[■] विभुः । अनुशिष्टिमयीं तेषां विदधे धर्मदेशनाम् ॥ ३७८ ॥

१ नाशं । २ बुद्बुदो जलविकारः । ३ नाशयुक्ताः । ४ भित्तिःभंगेऽपि । ५ द्वौ अग्रे यस्य । ६ वासक्षेपान् । ७ ध्वन्तः दुंदुभयः यस्मिन्यथा तथा ।
* °द्यृताम् । ■ प्राङ्मुखः प्रभुः ।

पूर्णायामथ पौरुष्यां व्यसाक्षीद् देशनां प्रभुः । शाल्याढ्कं[1]*बली राजभवनादाजगाम च ॥ ३७९ ॥
क्षिप्तस्य तस्य खाद्[2]■ भ्रश्यदर्धं देवैश्च्युतस्य तु । नृपैरर्धं नरैरर्धं विभज्य जगृहे मुदा ॥ ३८० ॥
अथोत्थायोत्तरद्वारा विनिर्गत्य जगद्गुरुः । देवच्छन्दे[3] विशश्रामाश्रान्तोऽपि स्थितिरीदृशी ॥ ३८१ ॥
स्वाम्यंघ्रिपीठमध्यास्य चारुर्गणधराग्रणीः । स्वामिप्रभावाद्विदधे देशनां संशयच्छिदम् ॥ ३८२ ॥
द्वितीयस्यां च पौरुष्यां पूर्णायां देशनाविधेः । व्यरंसीत् कालवेलायामागमाध्ययनादिव ॥ ३८३ ॥
ततश्च स्वामिनं नत्वा सुरासुरनृपादयः । स्वं स्वं स्थानं ययुः सर्वे मुदा वीतोत्सवा[4] इव ॥ ३८४ ॥
तीर्थे तत्र समुत्पन्नस्त्रिमुखो नाम यक्षराट् । त्रिनेत्रस्त्रिमुखः श्यामः षड्बाहुर्[5]र्हिवाहनः ॥ ३८५ ॥
दक्षिणैर्नकुलधरगदाभृदभयप्रदैः । युतो वामैर्भुजैर्मातुलिङ्ग[6]+दामाक्षसूत्रिभिः ॥ ३८६ ॥
तीर्थे तत्रैव चोत्पन्ना दुरितारिरभिख्यया[7] । चतुर्भुजा गौरवर्णा मेषवाहनगामिनी ॥ ३८७ ॥
दक्षिणाभ्यां भुजाभ्यां तु वरदेनाक्षसूत्रिणा । वामाभ्यां शोभमाना तु फणिनाभयदेन च ॥ ३८८ ॥
त्रिमुखो दुरितारिश्च ततः शासनदेवते । सन्निधाने सदा भर्तुरभूतामात्मरक्षवत् ॥ ३८९ ॥
ततः स्थानात् प्रभुरपि साधुभिः परिवारितः । चतुस्त्रिंशदतिशयान्वितो व्यहरदन्यतः ॥ ३९० ॥
विभोर्विहरतोऽभूवन् द्वे लक्षे व्रतिनामथ । व्रतिनीनां तु षट्त्रिंशत्सहस्राणि त्रिलक्ष्यपि ॥ ३९१ ॥
सर्वपूर्वभृतां[8] सार्धा शतानामेकविंशतिः । शतानि च षण्णवतिरवधिज्ञानशालिनाम् ॥ ३९२ ॥

---

१ आढकप्रमाणः शालिबलिः । २ आकाशात् । ३ विश्रामस्थानविशेषे । ४ निवृत्तोत्सवाः । ५ मयूरवाहनः । ६ नाम्ना । ७ चतुर्दशपूर्वधारिणां ।
* °ढके ब° । ■ °राद् वि° । + °ङ्गना–माना–ऽक्ष°।

तुर्यज्ञानिनां द्वादशः सहस्राः सार्धकं शतम् । सहस्राणि पञ्चदश केवलज्ञानिनां पुनः ॥ ३९३ ॥
वैक्रियलब्धिसहस्रा विंशतिर्द्विशतोनिता[1] । द्वादशैव सहस्राणि वादलब्धिमतां पुनः ॥ ३९४ ॥
सहस्रैः सप्तभिर्न्यूना श्रावकाणां त्रिलक्ष्यथ । श्राविकाणां च षड्लक्षी सषट्त्रिंशत्सहस्रिका ॥ ३९५ ॥
आरभ्य केवलात्पूर्वलक्षं व्यहरत प्रभुः । चतुर्दशाब्द्या च चतुःपूर्वाङ्ग्या च विवर्जितम् ॥ ३९६ ॥
ज्ञात्वात्मनो मोक्षकालं सर्वज्ञो भगवानथ । सम्मेतशैलशिखरं जगाम सपरिच्छदः ॥ ३९७ ॥
समं मुनिसहस्रेण तत्र च प्रत्यपद्यत । पादपोपगमं नामानशनं सम्भवप्रभुः ॥ ३९८ ॥
सुरासुराणामधिपास्तदानीं सपरिच्छदाः । तत्रैत्य भक्तितस्तस्थुः सेवमाना जगत्प्रभुम् ॥ ३९९ ॥
मासान्ते सम्भवस्वामी सर्वयोगनिरोधिनीम्[2] । शैलेशीं[3] शैलनिष्कम्पः प्रपेदे ध्यानमन्तिमम् ॥ ४०० ॥
चैत्रस्य सितपञ्चम्यां विधौ मृगशिरःस्थिते । सिद्धानन्तचतुष्कोऽगादव्याबाधपदं प्रभुः ॥ ४०१ ॥
सहस्रं मुनयस्तेऽपि स्वामिनोंऽशा इवामलाः । तेनैव विधिना प्रापुस्तदेव परमं पदम् ॥ ४०२ ॥
पूर्वलक्षाः कुमारत्वे ययुः पञ्चदश प्रभोः । चतुश्चत्वारिंशद् राज्ये सपूर्वाङ्गचतुष्टयाः ॥ ४०३ ॥
प्रव्रज्यायां पूर्वलक्षं चतुष्पूर्वांगवर्जितम् । इत्यायुः पूर्वलक्षाणि षष्टिः श्रीसम्भवप्रभोः ॥ ४०४ ॥
अजितस्वामिनिर्वाणात् कोटिलक्षेषु त्रिंशति । सागराणां गतेष्वासीन्निर्वाणं सम्भवप्रभोः ॥ ४०५ ॥
तत्राथ सम्भवजिनाधिपतेः शरीरसंस्कारमन्यदपि[4] कर्म यथावदिन्द्राः ।
चक्रुर्विभज्य जगृहुश्च यथार्हमेते दंष्ट्रा[3] रदान् दिविषदः पुनरस्थिजातम् ॥ ४०६ ॥

---

१ अनेकरुपोत्पादकतन्नाम्नि लब्धिविशेषवतां । २ तन्नामकं ध्यानम् । ३ दन्तान् । ४ देवाः ।

स्वं स्वं स्थानं जग्मुरिन्द्राः सुराश्च स्वाम्यस्थीनि स्थापयामासुरुच्चैः ।
अर्चाहितोर्माणवस्तम्भमूर्ध्नि तीर्थेशानामर्चनीयं न किं वा ।। ४०७ ।।

❖ ❖ ❖

इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिशष्टिशलाकापुरुषचरिते
महाकाव्ये तृतीयपर्वणि श्रीसम्भवस्वामिचरितवर्णनो
नाम प्रथमः सर्गः ।

द्वितीयः सर्गः ।

श्रीमदभिनन्दनजिनचरितम् ।

गुणद्रुनन्दनं श्रीमत्संवरोर्वीशनन्दनम् । जगदानन्दनं वन्दे जिनेन्द्रमभिनन्दनम् ॥ १ ॥
तस्य प्रभोर्भव्यजनैर्मोहनिद्रादिवामुखम् । तत्त्वज्ञानसुधाकुम्भं वक्ष्ये चरितमुज्ज्वलम् ॥ २ ॥
अस्यैव जम्बूद्वीपस्य प्राग्विदेहेषु सुन्दरी । अस्ति श्रीमङ्गलकुलं विजयो मङ्गलावती ॥ ३ ॥
तस्यामस्ति समस्तानां रत्नानामाकरोऽब्धिवत् । वसुन्धराशिरोरत्नं पूरत्नं रत्नसञ्चया ॥ ४ ॥
तस्यामासीन्महाराजो राजराज इव श्रिया । महाबलो नाम बलान्महाबल इवापरः ॥ ५ ॥
उत्साहमन्त्रप्रभुताशक्तिभिः स व्यभासत । गङ्गासिन्धुरोहितांशानदीभिर्हिमवानिव ॥ ६ ॥
स उपायैश्चतुर्भिश्च द्विषद्वर्गविजित्वरैः । चकासामास दशनैरिव निर्जरकुञ्जरः ॥ ७ ॥
देवमर्हन्तमेवैकं साधुमेव गुरुं पुनः । धर्मं जिनोपज्ञमेवातिष्ठते स्म स धीनिधिः ॥ ८ ॥
दानशीलतपोभावभेदाद्धर्मे चतुर्विधे । सोऽरंस्त महतां यस्मात्पुण्यं पुण्यानुबन्धकम् ॥ ९ ॥
स विवेकी भयोद्विग्नः सर्वत्रानित्यतां विदन् । नातुष्यत्श्रावकधर्मे देशमात्रविरागिणि ॥ १० ॥
ततो विमलसूरीणां पादान्ते दान्तपुंगवः । सोऽग्रहीत्सर्वविरतिं व्रतोच्चारणपूर्वकम् ॥ ११ ॥

---

१ गुणाः एव द्रवः वृक्षाः तेषां नंदनं नंदननामकं वनं । २ प्रातःकालसमानम् । ३ नगररत्नं । ४ कुबेरः । ५ सामदामभेददण्डैः ।
* °जन्तु मो° । ■ °नः अकर्तृकं जगदिवाति° । + विरामिणी. ।

दुर्जनैर्निन्द्यमानः सन् हृदये मुमुदे चिरम् । साधुभिः पूज्यमानस्तु प्रत्युत त्रपते स्म सः ॥ १२ ॥
न मनागप्युद्विविजे क्लिश्यमानोऽपि पापिभिः । महद्भिः पूज्यमानोऽपि स नोत्सेकमशिश्रियत् ॥ १३ ॥
उद्यानादिषु रम्येषु नारज्यद्विहरन्नसौ । सिंहव्याघ्रादिघोरेषु नारण्येषु व्यरज्यत ॥ १४ ॥
हेमन्ते हिमगहनाः क्षपयामास स क्षपाः । बहिः प्रतिमया तिष्ठन्नालानमिव निश्चलः ॥ १५ ॥
ग्रीष्मे सूर्योष्मभीष्मेऽपि कृतोत्सर्गः स आतपे*। नाम्लायद्द्विद्युते किन्तु वह्निशौचमिवांशुकम् ॥ १६ ॥
प्रावृषि क्ष्मारुहतले तस्थौ प्रतिमया च सः । मतङ्गज इव ध्याननिष्पन्दनयनद्वयः[1] ॥ १७ ॥
तपांस्येकावलीरत्नावलीप्रभृतिकानि सः । सर्वाण्यनेकशोऽकार्षीदतृप्तोऽर्थार्जनं यथा ॥ १८ ॥
विंशतेः स्थानकानां च मध्यात्कतिपयैरपि । स्थानकैरर्जयामास तीर्थकृन्नामकर्म सः ॥ १९ ॥
चिरं व्रतं पालयित्वा प्रपन्नानशनः स तु । मृत्वा विमाने विजये महर्द्धिरभवत्सुरः ॥ २० ॥
इतश्च जम्बूद्वीपस्य द्वीपस्य भरताभिधे । क्षेत्रेऽस्त्ययोध्येति पुरी पुरन्दरपुरीसमा ॥ २१ ॥
प्रतिवेश्म मणिस्तम्भसन्क्रान्तो रजनीकरः । तत्र स्थावरशृङ्गारादर्शलक्ष्मीं[2] प्रपद्यते ॥ २२ ॥
तत्र क्रीडामयूरीभिराकृष्याकृष्य लम्बितैः[3] । हारैः कल्पद्रुमायन्ते गृहाणामङ्गणद्रुमाः ॥ २३ ॥
चन्द्रकान्ताश्मनिःस्यन्दैस्तत्रोच्चैश्चैत्यपङ्क्तयः[4] । उदारनिर्झरोद्गारगिरिलीलां वितन्वते ॥ २४ ॥
चैत्याग्रे रत्नबद्धोर्व्यस्तत्र सङ्क्रान्ततारकाः । विभान्ति देवतामुक्तकुसुमाञ्जलिविभ्रमाः[5] ॥ २५ ॥

१ ध्यानेन निष्पंदं स्थिरनयनयोः द्वयं यस्य । २ स्थावरः स्थिरः । तत्र मणिस्तम्भसङ्क्रान्तः चन्द्रः स्थिरदर्पणः इव भातीति भावः । ३ आंदोलायितैः । ४ चंद्रकान्तमणिश्रावैः । ५ विभ्रमः शोभा । * °पे । धाम्ना यद् ।

तत्र खेलायमानाढ्यललना गृहदीर्घिकाः । निर्यदप्सरसो[1] लक्ष्मीं हरन्ति क्षीरनीरधेः ॥ २६ ॥
तत्र चाकण्ठमग्नानां गौराङ्गीणां मुखैः क्षणम् । कनकाम्भोजमालिन्यो राजन्ते गृहदीर्घिकाः ॥ २७ ॥
उद्यानैर्विपुलैस्तत्र श्यामायन्ते बहिर्भुवः । अधित्यका[3] भुव इव गिरेर्वारिधरैर्नवैः ॥ २८ ॥
वप्रो वलयितस्तत्र[*] महादीर्घिकया भृशम् । द्युसद्दीर्घिकयेवाष्टापदशैलो[4] विराजते ॥ २९ ॥
तत्रानुवेश्म दातारो दिवि कल्पद्रुमा इव । सर्वदा सुलभा एव दुर्लभाः पुनरर्थिनः ॥ ३० ॥
बभूव तस्यामिक्ष्वाकुकुलक्षीरोदचन्द्रमाः । नृपतिः संवरो नाम सर्वारिश्रीस्वयंवरः ॥ ३१ ॥
तस्याज्ञासाधिताशेषभूतलस्यैकभूभुजः । द्रविणं कृपणस्येव न कोशान्[5]निर्ययावसिः[6] ॥ ३२ ॥
महाभुजेन तेनोग्रप्रतापप्रभविष्णुना । एकच्छत्रा मही चक्रे द्यौरिवैकनिशाकरा ॥ ३३ ॥
स ढं वसुधां दध्रे दिग्यात्रायायिनोऽन्यथा । अस्य सेनाभरेणैषा विशीर्येत सहस्रशः ॥ ३४ ॥
दासीरिव समाकृष्य समाकृष्य दिगन्ततः । श्रियो[▲] निगडयामास स गुणैश्चपला अपि ॥ ३५ ॥
स राज्ञामाहृतैर्दण्डैःनोत्सेकं[7] जातु शिश्रिये । सरिदम्भोभिरम्भोधिः किं माद्यति मनागपि ॥ ३६ ॥
प्रसन्नचेताः सततमगृध्नुः[8] सोऽप्रमद्वरः[9][10] । ईश्वरे च दरिद्रे च समो मुनिरिवाभवत् ॥ ३७ ॥
प्रजाः शशास धर्माय न पुनः सोऽर्थकाम्यया । द्विषोऽशिषत्प्रजात्राणकृते द्वेषधिया न तु ॥ ३८ ॥
एकतः सर्वकृत्यानि धर्मकृत्यमथैकतः । युगपद्धारयामास स तुलायामिवात्मनि ॥ ३९ ॥

१ निर्गच्छत्यः अप्सरसः यस्मात् । २ पर्वतासन्नाः । ३ देववापिकया । ४ तन्नामागिरिः । ५ कोशः निधिः खड्गपिधानं च । ६ खड्गः । ७ गर्व । ८ नदीजलैः । ९ अलुब्धः । १० प्रमादरहितः । * वर्तुलीभूतः । ▲ °रसो [सः] क्रीडां ह°।

सिद्धार्था नाम [1]शुद्धान्तमण्डनं शुद्धवंशजा । सधर्मचारिणी तस्य बभूव गुणहारिणी ॥ ४० ॥
विलासमन्दया गत्या भृशं मधुरया गिरा । चकासामास सा राजहंसीव मधुराकृतिः ॥ ४१ ॥
तस्यां च पुण्यलावण्यनिम्न[2]गायां मनोरमम् । वक्त्रनेत्रं पाणिपादं पद्मखण्डमिवाशुभत् ॥ ४२ ॥
इन्द्रनीलमयीवान्तर्विलोचन[3]कुशेशये । मुक्तामयीव दन्तेषु वैद्रुमीवौष्टपत्रयोः ॥ ४३ ॥
नखेषु शोण[4]श्ममयीवाङ्गे स्वर्णमयीव च । बभासे चारुसर्वाङ्गमपि रत्नमयीव सा ॥ ४४ ॥ ॥ युग्मम् ॥
नगरीणां विनीतेव विद्यानामिव रोहिणी । मन्दा[6]किनीव सरितां सा सतीनामभूद्गुरि ॥ ४५ ॥
नाकुप्यत् प्रणयेनापि सा पत्यौ यत्कुलस्त्रियः । पतिव्रतात्वे व्रतवद[*]तिचारस्य[7] भीरवः ॥ ४६ ॥
तस्यामात्मानुरुपायां प्रेयस्यां प्रेम भूपतेः । अजायताविर्[8]संवादि नीलीरागसहोदरम् ॥ ४७ ॥
अबाधितौ मदस्थानैः सर्वैर्धर्माविबाधया । दम्पती बुभुजाते तौ तत्तद्वैषयिकं सुखम् ॥ ४८ ॥
इतो विमानविजये त्रयस्त्रिंशतमर्णव[9]वान् । जीवो महाबलस्यायुः सुखमग्नोऽत्यवाहयत् ॥ ४९ ॥
वैशाखसितचतुर्थ्यामभिचिस्थे निशाकरे । ततश्च्युत्वा स सिद्धार्थादेवीकुक्षाववातरत् ॥ ५० ॥
ज्ञानत्रयधरे तत्रावतीर्णे त्रिजगत्यपि । उद्योतोऽभूत्सुखं चासीन्नारकप्राणिनामपि ॥ ५१ ॥
सुखसुप्ता तु सा देवी निशायाः प्रहरेऽन्तिमे । मुखे प्रविशतोऽद्राक्षीन्महास्वप्नांश्चतुर्दश ॥ ५२ ॥
श्वेतवर्णश्चतुर्दन्तः करी कु[10]न्दद्युतिर्वृषः । [11]व्यात्तवक्त्रो हरिर्लक्ष्मीरभिषेकमनोरमा ॥ ५३ ॥

१ अंतःपुरभूषणं । २ निम्नगा नदी । ३ कुशेशयं शतपत्रकमलं । ४ पद्मरागमणिमयी । ५ विद्यादेवीनां अग्रिमा देवी । ६ गंगा । ७ अतिक्रमणस्य । ८ विसंवादः वंचनायुक्तभाषणं स नास्त्यस्मिन् । ९ सागरोपमान् । १० कुन्दं माध्यकुसुमं । ११ व्यात्तं विवृत्तं वक्त्रं मुखं येन सः ।
■ कुशेशयम् । * °दतिचा° ।

पञ्चवर्णा च पुष्पस्रक् पूर्णश्च रजनीकरः । द्योतमानश्च मार्त्तण्डः किङ्किणीमालितो ध्वजः ॥ ५४ ॥
पूर्णकुम्भश्च सौवर्णः पद्मच्छत्रं महासरः । उत्तरङ्गः सरिन्नाथो विमानं च मनोरमम् ॥ ५५ ॥
रुचिरो रत्नपुञ्जश्च निर्धूमश्च विभावसुः[1] । प्रबुद्धा स्वामिनी स्वप्नानेतान् राज्ञे शशंस च ॥ ५६ ॥
एभिः स्वप्नैस्तव देवि ! भावी त्रिजगदीश्वरः । नूनं सूनुरिति स्वप्नान्पार्थिवोऽपि व्यचारयत् ॥ ५७ ॥
इन्द्रा अपि समेत्यैवं स्वप्नार्थं व्याचचक्षिरे । चतुर्थस्तीर्थनाथस्ते देवि सूनुर्भविष्यति ॥ ५८ ॥
तं देव्यपि निशाशेषं जाग्रत्येवात्यवाहयत् । निद्रा दूरं ययौ तस्या हर्षेणैवापहस्तिता[2] ॥ ५९ ॥
सिद्धार्थास्वामिनीकुक्षौ गर्भः सोऽथ दिने दिने । पद्मकोशे बीजकोश इव गूढमवर्धत ॥ ६० ॥
सिद्धार्था स्वामिनी गर्भं सुखेन तमधारयत् । तादृशानामवतारः सुखाय जगतोऽपि हि ॥ ६१ ॥
ततो नवसु मासेषु दिनेष्वर्धाष्टमेषु[3] च । माघशुक्लद्वितीयायामभिचिस्थे क्षपाकरे ॥ ६२ ॥
सिद्धार्था स्वामिनी सूनुमनूनं[4] तेजसा रवेः । सुखेन सुषुवे स्वर्णवर्णं प्लवगलाञ्छनम्[5] ॥ ६३ ॥
लोकत्रयेऽपि युगपदुद्योतोऽभूत्तदा क्षणम् । क्षणं च सौख्यमुत्पेदे नारकप्राणिनामपि ॥ ६४ ॥
षट्पञ्चाशद्दिक्कुमार्यः स्वस्वस्थानादुपेत्य ताः । देव्याः सूनोश्च विदधुः सूतिकर्म यथोचितम् ॥ ६५ ॥
विज्ञायासनकम्पेन शक्रोऽर्हज्जन्म तत्तदा । आययौ पालकारुढः स्वामिवेश्माऽमरैः सह ॥ ६६ ॥
शक्रो विमानादुत्तीर्य प्राविशत्स्वामिवेश्म तत् । तत्र च स्वामिनं स्वामिजननीं च नमोऽकरोत् ॥ ६७ ॥
दत्वावस्वापिनीं[6] देव्याः पार्श्वे सौधर्मवासवः । निधायार्हत्प्रतिच्छन्दं पञ्चरुपोऽभवत्स्वयम् ॥ ६८ ॥

१ अग्निः । २ अपसारिता । ३ अर्धः अष्टसंख्यापूरकः येषु । ४ पूर्णं । ५ प्लवगः कपिः लांछनं चिन्हं यस्य । ६ अवस्वापिनीं निद्रां ।

एकः शक्रः प्रभुं दध्रेऽन्यश्छत्रं द्वौ च चामरे । कुलिशं[1] नर्तयन्नन्यो नृत्यन्नेव ययौ पुरः ॥ ६९ ॥
प्राप मेरावतिपाण्डुकम्बलां[2] स क्षणाच्छिलाम् । तत्सिंहासनमध्यास्त शक्रोऽङ्कारोपितप्रभुः ॥ ७० ॥
तत्राच्युतादयोऽपीन्द्रास्त्रिषष्टिः सपरिच्छदाः । समेत्यास्नपयन्नाथमम्भस्कुम्भैर्यथाविधि ॥ ७१ ॥
पञ्चमूर्त्तीर्भूयेशानोऽप्यङ्के स्वामिनमादधे । एकच्छत्रं चामरे द्वौ शूलमन्यः पुरःसरः ॥ ७२ ॥
विचक्रे स्फाटिकानुक्षण्[3]श्चतुरो दिक्चतुष्टये । तच्छृङ्गोत्थैर्जलैः शक्रोऽस्नपयत्परमेश्वरम् ॥ ७३ ॥
प्रभुं विलिप्य सम्पूज्य वस्त्रालङ्करणादिना । उत्तार्यारात्रिकं चेत्थं शक्रः प्राञ्जलिरस्तवीत् ॥ ७४ ॥
स्वामिंश्चतुर्थतीर्थेश ! चतुर्थारनभोरवे ! । चतुर्थपुरुषार्थश्रीप्रकाशक ! जय प्रभो ! ॥ ७५ ॥
*चिरान्नाथेन भवता सनाथमधुना जगत् । विवेकचौरैर्मोहाद्यैर्नैवोपद्रोष्यते क्वचित् ॥ ७६ ॥
पादपीठलुठन्मूर्ध्नि मयि पादरजस्तव । चिरं निविशतां[■] पुण्यपरमाणुकणोपमम् ॥ ७७ ॥
मद्दृशौ त्वन्मुखासक्ते हर्षबाष्पजलोर्मिभिः । अप्रेक्ष्यप्रेक्षणोद्भूतं क्षणात्क्षालयतां मलम् ॥ ७८ ॥
त्वत्पुरो लुठनैर्भूयान्मद्भालस्य तपस्विनः । कृतासेव्यप्रणामस्य प्रायश्चित्तं किणावलिः ॥ ७९ ॥
मम त्वद्दर्शनोद्भूताश्चिरं रोमाञ्चकण्टकाः । तुदन्तां चिरकालोत्थामसद्दर्शनवासनाम् ॥ ८० ॥
त्वद्वक्त्रकान्तिज्योत्स्नासु निपीतासु सुधास्विव । मदीयलोचनाम्भोजैः प्राप्यतां निर्निमेषता ॥ ८१ ॥
त्वदास्यलासिनी[4] नेत्रे त्वदुपास्तिकरौ[5] करौ । त्वद्गुणश्रोतृणी श्रोत्रे भूयास्तां सर्वदा मम ॥ ८२ ॥
कुण्ठापि यदि सोत्कण्ठा त्वद्गुणग्रहणं प्रति । ममैषा भारती तर्हि स्वस्त्येतस्यै किमन्यया ॥ ८३ ॥
तव प्रेष्योऽस्मि दासोऽस्मि सेवकोऽस्यस्मि किङ्करः । ओमिति प्रतिपद्यस्व नाथ ! नातः परं ब्रुवे ॥ ८४ ॥
स्तुत्वैवं पञ्चधाभूयेशानादादाय च प्रभुम् । प्राग्वच्छत्रादिभृत्चक्रः स्वामिवेश्म क्षणाद्ययौ ॥ ८५ ॥

१ वज्रं । २ तन्नाम्नीं शिलाम् । ३ बलीवर्दान् । ४ लासिनी नर्तके । ५ उपास्तिः उपासना । * चिरं° ना° संबृ. ॥ ■ निवसतां ।

तत्रापस्वापिनीमर्हत्प्रतिबिम्बं च सोऽहरत् । देव्याः पार्श्वे च निदधे तया स्थित्या जगत्पतिम् ॥ ८६ ॥
स्वामिहर्म्यात्ततः शक्रो मेरुतोऽन्ये तु वासवाः । यथायथागतेनैव स्वं स्वं स्थानं ययुः क्षणात् ॥ ८७ ॥
राज्ञापि विदधे प्रातः सूनुजन्मोत्सवो महान् । हर्षस्यैकातपत्रत्वजनकः सकले जने ॥ ८८ ॥
कुलं राज्यं पुरी चात्राभ्यनन्दद्गर्भगे हि तत् । अभिनन्दन इत्यस्य पितरौ नाम चक्रतुः ॥ ८९ ॥
शक्रसङ्क्रमितसुधां स्वकीयाङ्गुष्टकात्पिबन् । पाल्यमानो द्युधात्रीभिः क्रमेण ववृधे प्रभुः ॥ ९० ॥
सुरासुरकुमारैश्च चित्रक्रीडनपाणिभिः । विचित्रक्रीडया क्रीडन् बाल्यं स्वाम्यत्यवाहयत् ॥ ९१ ॥
उद्यानपादप इव वसन्तमिव यौवनम् । सर्वाङ्गशोभाजनकं प्राप स्वाम्यभिनन्दनः ॥ ९२ ॥
सार्धधन्वत्रिशत्युच्चो जानुलम्बिभुजो बभौ । सदोलाद्वुरिवाबद्धदोलायष्टिद्वयः श्रियः ॥ ९३ ॥
भालगण्डस्थलेनार्धचन्द्रशोभाभिभाविना । मुखेन च बभौ स्वामी पूर्णेन्दुश्रीविडम्बिना ॥ ९४ ॥
स्वर्णशैलशिलोरस्कः पीनस्कन्धः कृशोदरः । एणीजङ्घो जगन्नाथः कूर्मोन्नतपदोऽशुभत् ॥ ९५ ॥
विषयेषु निरीहोऽपि भोग्यं कर्म निजं विदन् । पितृभ्यां प्रार्थितो राजपुत्रीः प्रभुरुपायत ॥ ९६ ॥
क्रीडोद्यानसरोवापीशिलादिषु यदृच्छया । स रामाभिः समं रेमे ताराभिरिव चन्द्रमाः ॥ ९७ ॥
इत्थं च जन्मतः स्वामी सौख्यमग्नोऽहमिन्द्रवत् । पूर्वलक्षद्वादशकं गमयामास सार्धकम् ॥ ९८ ॥
अनुनीय न्यधाद्राज्येऽभिनन्दनविभुं ततः । स्वयं तु संवरनृपः प्रव्रज्याराज्यमाददे ॥ ९९ ॥
शशास लीलया स्वामी ग्राममेकमिवावनिम् । त्रिजगत्त्राणशौण्डस्य तस्योर्वीशासनं कियत् ॥ १०० ॥

१ निद्रां । २ चित्राणि विचित्राणि क्रीडनानि क्रीडासाधनानि पाणिषु करेषु येषाम् । ३ एण्याः मृग्याः जंघा इव जंघा यस्य । ४ निर्गता ईहा इच्छा यस्य । ५ त्रयाणां जगतां त्राणे रक्षणे शौंडः चतुरः तस्य । * स्वं स्थानं य° ।

साधाः षट्त्रिंशतं पूर्वलक्षा अष्टाङ्गसंयुताः । निनाय राज्यं कुर्वाणो जगन्नाथोऽभिनन्दनः ॥ १०१ ॥
अथेयेष प्रभुदीक्षां ते च लोकान्तिकामराः । सचिवा इव भावज्ञा एत्य व्यज्ञपयन्निति ॥ १०२ ॥
अलं संसारवासेन नाथ ! तीर्थं प्रवर्तय । संसारसिन्धुं येनान्येप्युत्तरन्ति दुरुत्तरम् ॥ १०३ ॥
लोकान्तिकेषु देवेषु विज्ञपय्य गतेष्विति । प्रारेभे वार्षिकं दानं निर्निदानं[1] जगत्पतिः ॥ १०४ ॥
स्वामिनो ददतो द्रव्यमानीयानीय जृम्भकाः[2] । शक्रादिष्टकुबेरेण प्रेरिताः पर्यपूरयन् ॥ १०५ ॥
सांवत्सरिकदानान्ते चतुःषष्ट्यापि वासवैः । दीक्षाभिषेको विदधे विधिवद् जगदीशितुः ॥ १०६ ॥
कृताङ्गराग आमुक्तदिव्यांशुकविभूषणः । आरोहत्छिबिकां नाथोऽर्थसिद्धां स्वार्थसिद्धये ॥ १०७ ॥
आदावुत्क्षिप्तया मर्त्यैरमर्त्यैस्तदनन्तरम्[3] । तया शिबिकया नाथः सहस्राम्रवणं ययौ ॥ १०८ ॥
तत्र चोत्तीर्य तत्याज भगवान्भूषणादिकम् । तदंसदेशे निदधे देवदूष्यं[4] च वासवः ॥ १०९ ॥
माघस्य शुक्लद्वादश्यामभीचौ[5] पश्चिमेऽहनि । कृतषष्ठः प्रभुः केशानुद्दध्रे पञ्चमुष्टिना ॥ ११० ॥
शक्रः प्रतीष्य[6] चिकुरानुत्तरीयाञ्चलेन[+] तान् । क्षणेन गत्वा क्षीरोदेऽक्षिपद् भूयोऽपि चागमत् ॥ १११ ॥
सुरासुरनृणां शक्रस्तुमुलं निषिषेध च । प्रतिपेदे च चारित्रं स्वामी सामायिकं पठन् ॥ ११२ ॥
मनःपर्ययसंज्ञं च तुर्यं ज्ञानमभूद्विभोः । नारकाणामपि सुखं तदा क्षणमजायत ॥ ११३ ॥
त्यक्त्वाङ्गमलवद् राज्यं सहस्रं पृथिवीभुजः । जगृहुः स्वामिना सार्धं प्रव्रज्यां मोहशातनीम् ॥ ११४ ॥
प्रभुं नत्वा ततः शक्रोऽन्येऽपीन्द्राः सपरिच्छदाः[7] । स्थानं निजनिजं जग्मुः प्रावृषि प्रोषिता[8] इव ॥ ११५ ॥

१ निर्हेतुकम् । २ असुरविशेषाः । ३ ऊढ्या । ४ देववस्त्रम् । ५ अभिजिन्नक्षत्रे । ६ गृहीत्वा । ७ सपरिवाराः । ८ प्रवासिनः । + चिकुरान् केशान् ।

द्वितीयेऽहन्ययोध्यायामिन्द्रदत्तस्य भूभुजः । सदने विदधे स्वामी परमान्नेन पारणम् ॥ ११६ ॥
वसुधारा पुष्पवृष्टिर्वृष्टिर्गन्धोदकस्य च । खे दुन्दुभिध्वनिश्चैलोत्क्षेपश्च विदधेऽमरैः ॥ ११७ ॥
अहो दानमहो दानं सुदानमिति चोच्चकैः । जुंघुषे हर्षविवशैः सुरासुरनरैस्तदा ॥ ११८ ॥
ततोऽन्यत्र ययौ स्वामी स्थाने च स्वामिपादयोः । रत्नपीठं व्यधादिन्द्रदत्तोऽर्चितुमनाः सदा ॥ ११९ ॥
छद्मस्थो व्यहरत्स्वामी सहमानः परीषहान् । अष्टादश समा यावद्विविधाभिग्रहोद्यतः ॥ १२० ॥
विहरन्नन्यदा नाथः सहस्राम्रवणं ययौ । कृतषष्ठः प्रियालस्याधोऽस्थात्प्रतिमया ततः ॥ १२१ ॥
द्वितीयशुक्लध्यानान्ते घातिकर्मक्षये सति । पौषशुक्लचतुर्दश्यामभीचिस्थे निशाकरे ॥ १२२ ॥
अमलं केवलज्ञानमाविरासीद् जगत्पतेः । नारकाणामपि बाधानिषेधनमहौषधम् ॥ १२३ ॥
चतुःषष्टिरथैत्येन्द्रा विधिवद्विदधुः प्रभोः । ऊच्चैः समवसरणं देशे योजनमात्रके ॥ १२४ ॥
देवैः संचार्यमाणेषु स्वर्णाब्जेषु क्रमो दधत् । स्वामी समवसरणं प्राग्द्वारा प्राविशत्ततः ॥ १२५ ॥
स धनुर्द्विशतीकं तु गव्यूतद्वयमुच्छ्रितम् । तत्र प्रदक्षिणीचक्रे चैत्यवृक्षं जिनेश्वरः ॥ १२६ ॥
नमस्तीर्थायेति वदन् देवच्छन्दस्य मध्यतः । सिंहासनमलञ्चक्रे प्राङ्मुखः परमेश्वरः ॥ १२७ ॥
ततश्चतुर्विधः सङ्घः ससुरासुरमानुषः । सम्प्रविश्य यथाद्वारं यथास्थानमुपाविशत् ॥ १२८ ॥
भगवन्तं नमस्कृत्य शक्रो विरचिताञ्जलिः । रोमाञ्चितवपुः स्वामिस्तवनं प्रास्तवीदिति ॥ १२९ ॥
मनोवचःकायचेष्टाः कष्टाः संहृत्य सर्वथा । श्लथत्वेनैव भवता मनःशल्यं वियोजितम् ॥ १३० ॥

१ चेलस्य वस्त्रस्योत्क्षेपः २ राजादनीवृक्षस्य । ३ सुवर्णकमलेषु । ४ पादौ । ५ क्रोशयुगलम् । ६ मनसः शल्यं ।
* °दानं महादानं । ■ °वलं सा° । ∘ उच्चैः घोषणा विहिता ।

संयतानि[1] न चाक्षाणि नैवोच्छृङ्खलितानि[2] च । इति सम्यक् प्रतिपेदा[3] त्वयेन्द्रियजयः कृतः ॥ १३१ ॥
योगस्याष्टाङ्गता नूनं प्रपञ्चः कथमन्यथा । आबालभावतोऽप्येष तव सात्म्यमुपेयिवान् ॥ १३२ ॥
विषयेषु विरागस्ते चिरं सहचरेष्वपि । योगे सात्म्यमदृष्टेऽपि स्वामिन्निदमलौकिकम् ॥ १३३ ॥
तथा परे न रज्यन्त उपकारपरे परे । यथापकारिणि भवानहो ! सर्वमलौकिकम् ॥ १३४ ॥
हिंसका अप्युपकृता आश्रिता अप्युपेक्षिताः । इदं चित्रं चरित्रं ते के वा पर्यनुयुञ्जताम्[5] ? ॥ १३५ ॥
तथा समाधौ परमे त्वयात्मा विनिवेशितः । सुखी दुःख्यस्मि नास्मीति यथा न प्रतिपन्नवान् ॥ १३६ ॥
ध्याता ध्यानं तथा ध्येयं त्रयमेकात्मतां गतम् । इति ते योगमाहात्म्यं कथं श्रद्धीयतां परैः ॥ १३७ ॥
स्तुत्वैवं विरते शक्रे स्वामी गम्भीरया गिरा । आयोजनविसर्पिण्या[6] प्रारेभे देशनामिति ॥ १३८ ॥
संसारोऽयं विपत्खानिरस्मिन्निपततः सतः । पिता माता सुहृद्बन्धुरन्योऽपि शरणं न हि ॥ १३९ ॥
इन्द्रोपेन्द्रादयोऽप्यत्र यन्मृत्योर्याति गोचरम् । अहो तदन्तकातङ्के[7] कः शरण्यः शरीरिणाम् ? ॥ १४० ॥
पितुर्मातुः स्वसुर्भ्रातुस्तनयानां च पश्यताम् । अत्राणो नियते जन्तुः कर्मभिर्यमसद्मनि ॥ १४१ ॥
शोचन्ति स्वजनानन्तं नीयमानान् स्वकर्मभिः । नेष्यमाणं तु शोचन्ति नात्मानं मूढबुद्धयः ॥ १४२ ॥
संसारे दुःखदावाग्निज्वलज्ज्वालाकरालिते । वने मृगार्भकस्येव शरणं नास्ति देहिनः ॥ १४३ ॥
अष्टाङ्गेनायुर्वेदेन जीवातुभिरथागदैः[8] । मृत्युञ्जयादिभिर्मन्त्रैस्त्राणं नैवास्ति* मृत्युतः ॥ १४४ ॥
खड्गपञ्जरमध्यस्थश्चतुरङ्गचमूवृतः । रङ्कवत्कृष्यते राजा हठेन यमकिङ्करैः ॥ १४५ ॥

१ नियमितानि । २ उद्धतानि । ३ प्रतिपादनं कुर्वता । ४ साहचर्यं । ५ अनुसरंतु । ६ योजनपर्यंतं गामिन्या । ७ तस्य अन्तकस्य आतंको भयम् तस्मिन् । ८ जीवनप्रदैः । * °स्ति देहिन ।

यथा मृत्युप्रतीकारं पशवो नैव जानते । विपश्चितोऽपि[1] हि तथा धिक् प्रतीकारमूढताम् ।। १४६ ।।
येऽसिमात्रोपकरणाः कुर्वते क्षमाकण्टकाम् । यमभ्रूभङ्गभीतास्तेऽप्यास्ये निदधतेऽङ्गुलीः ।। १४७ ।।
मुनीनामप्यपापानामसिधारोपमैर्व्रतैः[2] । न शक्यते कृतान्तस्य प्रतिकर्तुं कदाचन ।। १४८ ।।
अशरण्यमहो ! विश्वमराजकमनायकम् । यदेतदप्रतीकारं ग्रस्यते यमरक्षसा[3] ।। १४९ ।।
योऽपि धर्मप्रतीकारो न सोऽपि मरणं प्रति । शुभां गतिं ददानस्तु प्रतिकर्तेति कीर्त्यते ।। १५० ।।
प्रव्रज्यालक्षणोपायमादायाक्षय्यशर्मणे । चतुर्थपुरुषार्थाय यतितव्यमहो ! ततः ।। १५१ ।।
तया देशनया प्रायो नरा नार्यः प्रवव्रजुः । गणेशा वज्रनाभाद्याः षोडशाग्रमभूच्छतम् ।। १५२ ।।
अनुयोगगणानुज्ञे तेषां दत्वा यथाविधि । अनुशिष्टिमयीं धर्मदेशनां विदधे प्रभुः ।। १५३ ।।
जन्मव्ययध्रौव्यमयीं स्वाम्येभ्यस्त्रिपदीं[5] जगौ । जग्रन्थुर्द्वादशाङ्गीं ते तत्त्रिपद्यनुसारतः ।। १५४ ।।
देशनां पूर्वपौरुष्यां व्यसृजत्स्वाम्यथो बलिम् । राजानीतं क्षिप्त्वा गृह्णन् देवा भूपा जनाः क्रमात् ।। १५५ ।।
अथोत्तस्थौ जगन्नाथो मध्यवप्रमुपेत्य च । ईशानदिक्स्थिते* देवच्छन्दके समुपाविशत् ।। १५६ ।।
स्वाम्यंघ्रिपीठस्थो वज्रनाभो गणधरो व्यधात् । लोकैः केवलिवज्ज्ञातो देशनां श्रुतकेवली ।। १५७ ।।
पूर्णद्वितीयपौरुष्यां व्यसृजत्सोऽपि देशनाम् । नत्वार्हन्तं ययुः स्वं स्वं स्थानं सर्वे सुरादयः ।। १५८ ।।
तीर्थे यक्षेश्वरस्तत्र श्यामो द्विरदवाहनः[6] । दोर्दण्डौ दक्षिणौ बिभ्रन्मातुलिङ्गाक्षसूत्रिणौ ।। १५९ ।।

१ विद्वांसोऽपि । २ खड्गधारासदृशैः । ३ यम एव रक्षः राक्षसः तेन । ४ मोक्षसुखाय । ५ स्वामी एभ्यः गणधरेभ्यः । ६ गजवाहनः ।
* °दिक्स्थितो दे° ।

वामौ च धारयन् बाहू नकुलाङ्कुशधारिणौ । सदा सन्निहिता भर्तुरभूच्छासनदेवता ।। १६० ।। ।। युग्मम् ।।
कालिका च तथोत्पन्ना श्यामवर्णाम्बुजासना[1] । दक्षिणौ धारयन्ती तु भुजौ वरदपाशिनौ ।। १६१ ।।
नागाङ्कुशधरौ बाहू दधाना दक्षिणेतरौ । पारिपार्श्विक्यभून्नित्यं भर्तुः शासनदेवा[2] ।। १६२ ।। ।। युग्मम् ।।
ततः स्वाम्यप्यतिशयैश्चतुस्त्रिंशद्भिरन्वितः । व्यहरद् बोधयञ्जन्तून् ग्रामाकरपुरादिषु ।। १६३ ।।
साधुत्रिलक्षी साध्वीषट्लक्षी त्रिंशत्सहस्रयुक् । शतानि चाष्टनवतिरवधिज्ञानशालिनाम् ।। १६४ ।।
सहस्रं पूर्विणां सार्धं मनःपर्ययिणां पुनः । एकादशसहस्राणि सपञ्चाशच्च षट्शती ।। १६५ ।।
चतुर्दशसहस्राणि केवलज्ञानधारिणाम् । सहस्रं वैक्रियलब्धिमतामेकोनविंशतिः ।। १६६ ।।
एकादशसहस्राणि वादलब्धिमतां पुनः । लक्षद्वयं श्रावकाणामष्टाशीतिसहस्रयुक् ।। १६७ ।।
श्राविकाणां पञ्चलक्षी सप्तविंशतिसहस्रयुक् । अजायन्त जगद्भर्तुरुर्व्यां विहरतः सतः ।। १६८ ।।
अष्टाङ्ग्याष्टादशाब्दोने पूर्वलक्षे* च केवलात् । ज्ञात्वा निर्वाणकालं स्वं सम्मेताद्रिं ययौ प्रभुः ।। १६९ ।।
समं मुनिसहस्रेण प्रपन्नानशनो विभुः । मासं तस्थौ सुरैः सेन्द्रैः सेव्यमानो नृपैरपि ।। १७० ।।
शैलेशीध्यानमास्थाय भवोपग्राहिकर्मभित् । सिद्धानन्तचतुष्कः सन् भगवानभिनन्दनः ।। १७१ ।।
वैशाखस्य सिताष्टम्यां[3] पुष्पस्थे रजनीकरे । समं मुनिसहस्रेणापुनरावृत्त्यगात्[4] पदम् ।। १७२ ।। ।। युग्मम् ।।
कौमारे पूर्वाणां लक्षाः सहार्धा द्वादशागमन् । लक्षाणि सार्धषट्त्रिंशद्राज्येऽष्टाङ्गयुतानि च ।। १७३ ।।
अष्टाङ्गोनं पूर्वलक्षं प्रव्रज्यायामिति प्रभोः । पञ्चाशत्पूर्वलक्षाणि यावदायुरजायत ।। १७४ ।।

१ अंबुजं कमलं आसनं यस्याः सा । २ पार्श्ववर्तिनी । ३ शुक्लाष्टम्यां । ४ न पुनः आवृत्तिः आगमनं यस्मात्तत् पदम् मोक्षाख्यम् ।
* °लक्षे च के°।

सम्भवस्वामिनिर्वाणादभिनन्दननिर्वृतिः । समुद्रकोटिलक्षेषु व्यतीतेषु दशस्वभूत् ।। १७५ ।।
शक्रश्चक्रेऽङ्गसंस्कारं स्वामिनो व्रतिनामपि । दंष्ट्रारदांस्थि* जगृहुः पूजनाय सुरासुराः ।। १७६ ।।
कुर्वन्तोऽथाष्टाह्निकां शाश्वतार्हद्बिम्बानां तेऽभ्येत्य नन्दीश्वरान्तः ।
स्वं स्वं लोकं सामरा जग्मुरिन्द्रास्ते च स्वां स्वां राजधानीं नरेन्द्राः ।। १७७ ।।

✣ ✣ ✣

इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये तृतीये पर्वणि अभिनन्दनस्वामिचरित्रवर्णनो नाम द्वितीयः सर्गः ।

* °रदादि ज° ।

तृतीयः सर्गः ।

सुमतिनाथचरितम् ।

नमः सुमतिनाथाय प्रकृष्टज्ञानहेतवे । अपारसंसारमहासागरोत्तारसेतवे ।। १ ।।
तत्प्रसादात्तच्चरित्रं यथावत्कीर्तयिष्यते । भव्यसंसारिकल्याणतरुकुल्याम्बुसन्निभम् ।। २ ।।
अत्रैव जम्बूद्वीपेऽस्ति प्राग्विदेहविशेषकः । ऋद्ध्या पुष्कलया राजन् विजयः पुष्कलावती ।। ३ ।।
विचित्रचैत्यहर्म्यादि ध्वजैरुदन्तुरिताम्बरम् । तत्र शङ्खपुरं नाम पुरमस्त्यतिसुन्दरम् ।। ४ ।।
विजयी तत्र विजयसेन इत्यभवन्नृपः । शोभामात्रमभूत्सेना यस्य दोर्वीर्यशालिनः ।। ५ ।।
सकलान्तःपुरस्त्रैणभूषणं तस्य चाभवत् । प्रिया सुदर्शना नामेन्दुलेखेव सुदर्शना ।। ६ ।।
रममाणस्तया सार्धं रत्येव कुसुमायुधः । निनाय कालं विजयसेनः प्रथितवैभवः ।। ७ ।।
ययावन्येद्युरुद्यानमुद्यते क्वचिदुत्सवे । सर्वद्ध्या सपरिवारो जनः सर्वोऽपि नागरः ।। ८ ।।
वपुष्मतीव राज्यश्रीच्छत्रचामरलाञ्छिता । आरुह्य हस्तिनीं तत्रागाद्देव्यपि सुदर्शना ।। ९ ।।
अपश्यत् तत्र चानर्घ्यभूषणश्रीभिरष्टभिः । दिक्कन्याभिरिवोपेतां वधूभिः कामपि स्त्रियम् ।। १० ।।
उपास्यमानां तां ताभिरप्सरोभिः शचीमिव । दृष्ट्वा सुदर्शना देवी भृशं चित्ते विसिष्मिये ।। ११ ।।
इयं का ? पारिपार्श्विक्यः काश्चैतस्या अमूरिति । ज्ञातुं सुदर्शना देवी सौविदल्लं समादिशत् ।। १२ ।।

---

१ कुल्या जलप्रवाहः नीक इति प्रसिद्धा । २ ध्वजैर्दतुरितं उन्नतमंबरम् यस्मिन् । ३ स्त्रैणस्य स्त्रीसमूहस्य भुषणम् । ४ पार्श्ववर्तिन्यो दास्यः । ५ अंतःपुरस्य किंकरम् ।

तत्पृष्ट्वा सौविदल्लोऽपि समेत्यैवं व्यजिज्ञपत् । श्रेष्ठिनो नन्दिषेणस्य प्रेयसीयं सुलक्षणा ॥ १३ ॥
सुलक्षणाया द्वौ पुत्रौ प्रत्येकं च तयोरिमाः । वध्वश्चतस्रो दासीवच्छश्रूशुश्रूषणोद्यताः ॥ १४ ॥
श्रुत्वा सुदर्शना तच्च चेतस्येवमचिन्तयत् । इयं हि श्रेष्ठिनी श्रेष्ठा या पुत्रमुखमीक्षते ॥ १५ ॥
यस्याश्चैताः स्नुषीभूय[1] रुपवत्यः कुलस्त्रियः । नागकन्या इवाष्टापि सेवां कुर्वन्ति सर्वदा ॥ १६ ॥
न सूनुर्न स्नुषा यस्या धिग्धिग्मां तामपुण्यकाम् । पत्युर्हृदयभूताया अपि मे जीवितं वृथा ॥ १७ ॥
इतस्ततः क्षिपन्पाणिं समन्ताद्धूलिधूसरः । अङ्के क्रीडति धन्यानां पुत्रो वृक्षे प्लवङ्गवत्[2] ॥ १८ ॥
असञ्जातफला वल्ल्य इवाऽतोया इवाऽऽपगाः । निन्दनीयाः शोचनीया योषितस्तनयं विना ॥ १९ ॥
किमन्यैरुत्सवैस्तासां न यासां स्युर्महोत्सवाः । सूनुजन्मनामचूलाविवाहकरणादयः ॥ २० ॥
विचिन्त्यैवं म्लानमुँ*खी पद्मिनीव हिमार्दिता । ययौ सुदर्शना देवी सखेदा सदनं निजम् ॥ २१ ॥
अपि प्रियसखीस्तत्र विसृज्य शयनीयके । निःसहा मुक्तनिःश्वासा व्याधितेव पपात सा ॥ २२ ॥
नाभुङ्क्त न बभाषे च प्रतिकर्म च नाकरोत् । तस्थौ किं तु मनःशून्या रत्नपाञ्चालिकेव सा ॥ २३ ॥
तां तथावस्थितां ज्ञात्वा परिवारमुखान्नृपः । उपेत्यैवमभाषिष्ट प्रेम्णा[3] पेशलया गिरा ॥ २४ ॥
स्वाधीने मय्यपि सदा किमपूर्णं समीहितम् । देवि ताम्यसि[4] येनैवं हंसीव पतिता मरौ ॥ २५ ॥
किमाधिर्बाधते कोऽपि ? व्याधिर्वा कोऽपि नूतनः ? । किं कोऽप्याज्ञां ललङ्घे■ ? किं दुःस्वप्नं दृष्टवत्यसि ?॥ २६ ॥

१ पुत्रवधूभूय । २ कपिवत् । ३ प्रेम्णा पेशला कोमला तया । ४ सीदसि । * °मुखा प° । ■ लङ्घते किं ।

बाह्यमाभ्यन्तरं वापि दुर्निमित्तमथाभवत् ?। खेदस्य कारणं ब्रूहि रहस्यं न हि ते मयि ॥ २७ ॥
सुदर्शनापि निःश्वस्येत्यवदद् गद्गदाक्षरम् । त्वत्प्रसादात्तवेवाज्ञां न मे कश्चिदखण्डयत् ॥ २८ ॥
नाधिव्याधी न दुःस्वप्नदुर्निमित्ते न चापरम् । ताध्क् किमपि बाधायै किन्त्वेकं नाथ ! बाधते ॥ २९ ॥
वृथैव राज्यसम्पत्तिर्वृथा वैषयिकं सुखम् । वृथैव चावयोः प्रीतिरदृष्टसुतवक्त्रयोः ॥ ३० ॥
श्रद्दधाति श्रियः पश्यन् दरिद्रः श्रीमतां यथा । पुत्रान्पुत्रवतां पश्यन्त्यहमप्येवमस्मि हा !॥ ३१ ॥
एकतः सर्वसौख्यानि पुत्राप्तिसुखमन्यतः । मनस्तुलातोलनतो द्वितीयमतिरिच्यते ॥ ३२ ॥
वरं मृगादयोऽरण्ये ये पुत्रपरिवारिताः । अस्माकं पुत्रहीनानां धिक् तेभ्योऽप्यल्पभाग्यताम् ॥ ३३ ॥
अथोचे पृथिवीशोऽपि देवि ! धीरा भवाचिरात् । मनोरथं पूरयिष्ये देवताराधनेन ते ॥ ३४ ॥
विक्रमेण न यत्साध्यं यद्बुद्धीनामगोचरः । यन्मन्त्राणामविषयस्तन्त्राणां यच्च दूरतः ॥ ३५ ॥
अन्येषामप्युपायानां यदगम्यं तदप्यलम् । साधयन्ति नृणामर्थं प्रसन्ना देवि ! देवताः ॥ ३६ ॥
तद् विद्धि सिद्धमेवार्थममुं मानिनि ! किं शुचा ? । कुलदेव्याः पुरः स्थास्याम्येष प्रायेण सूनवे ॥ ३७ ॥
राज्ञीं राजैवमाश्वास्य जगाम निजधामतः । कृतशौचः शुचिवेषः कुलदेव्या निकेतनम् ॥ ३८ ॥
अर्चित्वा देवतां तत्र भूपतिर्दृढनिश्चयः । आपुत्रलाभं त्यक्तान्नपानवृत्तिरुपाविशत् ॥ ३९ ॥
उपवासे ततः षष्ठे प्रत्यक्षीभूय देवता । प्रसन्ना व्याजहारैवं वरं वृणु महीपते !॥ ४० ॥
राजा विजयसेनोऽपि देवीं नत्वैवमब्रवीत् । समस्तपुरुषोत्कृष्टं पुत्रं देहि प्रसीद मे ॥ ४१ ॥
च्युत्वा दिवः सुरवरस्तव सूनुर्भविष्यति । एवं वरमदाद् देवी तत्क्षणाच्च तिरोदधे ॥ ४२ ॥

१ अदृष्ट सुतस्य वक्त्रं मुखं याभ्यां तयोः । २ मन एव तुला तया तोलनात् । ३ पुत्रसुखम् । ४ शोकेन । ५ पुत्रलाभपर्यंतं । * °चरम् ।

आख्यद् राजापि तं देव्या देव्या दत्तं वरं वरम् । [1]स्तनितेन बलाकेव मुदिता* तेन देव्यपि ॥ ४३ ॥
देव्याः सुदर्शनायास्तु [2]स्नाताया अपरेऽहनि । दिवो महर्द्धिको देवश्च्युत्वा कुक्षाववातरत् ॥ ४४ ॥
तदा च ददृशे देव्या सुप्तया प्रविशन्मुखे । एकः केसरिकिशोरः कुङ्कुमारुणकेसरः ॥ ४५ ॥
उत्थाय शयनीयाच्च सत्वरं भीतभीतया । तया निजगदे राज्ञे स्वास्ये सिंहप्रवेशनम् ॥ ४६ ॥
राजाऽप्यूचे विक्रमी ते भावी सिंह इवात्मजः । स्वप्नेनानेनैतदुक्तं देवीवरतरोः फलम् ॥ ४७ ॥
तेन स्वप्नविचारेण राज्ञी भृशममोदत । जजागार च तं रात्रिशेषं शुभकथापरा ॥ ४८ ॥
देव्याः कुक्षाववर्धिष्ट गर्भः सोऽपि दिने दिने । मध्येसरिद्[3]वरावारि सौवर्णमिव वारिजम् ॥ ४९ ॥
अन्यदा दोहदान् देवी समुत्पन्नान्महीभुजे । शशंसेत्यभयं दित्साम्यहं निःशेषदेहिनाम् ॥ ५० ॥
[4]अमारिमाघोषयितुमिच्छामि च पुरादिषु । अष्टाहिकाश्चिकीर्षामि निखिलायतनेषु च ॥ ५१ ॥
राजाप्यूचे देवि ! देवीवरस्वप्नार्थयोरयम् । साधु सत्यापको गर्भप्रभावाद्दोहदस्तव ॥ ५२ ॥
महेच्छस्य हि गर्भस्य वशादिच्छेयमीदृशी । <u>प्रतिमायाः प्रभावोऽधिष्ठातृदेवोचितः खलु</u> ॥ ५३ ॥
इत्युक्त्वा भूपतिः सद्यो भीतानामभयं ददौ । घोषयामास चामारिं डिण्डिमास्फालपूर्वकम् ॥ ५४ ॥
अष्टप्रकारपूजाभिर्दिव्यैः सङ्गीतकैरपि । अष्टाहिकोत्सवानुच्चैः प्रतिचैत्यं चकार च ॥ ५५ ॥
हृष्टा तैर्दोहदैः पूर्णैः [5]पूर्णेन्दुविशदानना । फलं वल्लीव समये पुत्ररत्नमसूत सा ॥ ५६ ॥
यथाकाममथार्थिभ्यश्चिन्तामणिरिवार्थितम् । ददावाघोषणापूर्वं नरेश्वरशिरोमणिः ॥ ५७ ॥

१ मेघगर्जितेन । २ ऋतुस्नाताया: । ३ श्रेष्ठनदीजलमध्ये । ४ अहिंसां । ५ पूर्णेंदुवत् विशदमाननं यस्याः सा । * मुमुदे ॥ ■ अपरेद्यवि ।

राज्ञा महोत्सवश्चक्रे हृदयाब्धिनिशाकरः[१] । नागरैरपि तदनु स्वतोऽपि स्वजनैरिव ॥ ५८ ॥
राज्ञीस्वप्नानुसारेण कुमारस्य महीभुजा । विदधे पुरुषसिंह इति नाम मनोरमम् ॥ ५९ ॥
लाल्यमानः स धात्रीभिः कुमारो ववृधे क्रमात् । मातुः पितुः प्रजानां च सममेव मनोरथैः ॥ ६० ॥
कला जग्राह सकलाः स इन्दुरिव पार्वणः । प्रापच्च यौवनं लीलावनं मकरलक्ष्मणः[२] ॥ ६१ ॥
आत्मानुरुपा रुपेण कलाभिश्च कुलेन च । उपायतायतभुजः सोऽष्टौ कन्याः क्षमाभुजाम् ॥ ६२ ॥
सुखं वैषयिकं ताभिरप्सरोभिरिवामरः । यथाक्षणं रममाणोऽन्वभूद्विजयसेनभूः ॥ ६३ ॥
ऋतुः साक्षादिव मधुः साक्षान्मधुसखोऽथवा[३] । सोऽगात् क्रीडितुमन्येद्युः क्रीडोद्यानं यदृच्छया ॥ ६४ ॥
तत्रापश्यच्च समवसृतं विनयनन्दनम् । नाम सूरिं जितानङ्गं रुपेण च शमेन च ॥ ६५ ॥
तं तस्य पश्यतः पीतामृतस्येव विलोचने । हृदयं चापराण्यङ्गान्यपि च व्यकसन्निव ॥ ६६ ॥
सोऽथेति दध्यौ वेश्यान्ते सतीत्वस्येव पालनम् । तस्कराणां सन्निधाने निधानस्येव गोपनम्[४] ॥ ६७ ॥
मार्जारयूनामभ्यर्णे पीयूषस्येव रक्षणम् । शाकिन्याः प्रातिवेश्मिक्ये[५] स्वस्येव क्षेमकारिता ॥ ६८ ॥
रुपस्याप्रतिरुपस्य[६] वयसो मध्यमस्य[७] च । उन्मादहेतावुदयेऽमुष्याहो ! व्रतधारणम् ॥ ६९ ॥
॥ त्रिभिर्विशेषकम् ॥
हिमं सह्येत हेमन्ते ग्रीष्मे च तपनातपः[८] । झञ्झावातोऽपि[९] वर्षासु न पुनर्यौवने स्मरः ॥ ७० ॥

१ हृदयमेवाब्धिस्तस्मिन्निशाकरसदृशः । २ मकरः लक्ष्म चिह्नं यस्य सः कामः । ३ कामः । ४ रक्षणम् । ५ समीपगृहवासत्वे । ६ असदृशस्य । ७ यौवनस्य । ८ तपनस्य सूर्यस्यातपः । ९ सवृष्टिको वातः ।

तदद्य दिष्ट्या दृष्टोऽयं पुण्यैः पुण्यानुबन्धिभिः । प्रीतिदायी गुरुरिव मातेव च पितेव च ॥ ७१ ॥
कुमारश्चिन्तयित्वैवमुपसृत्य च सत्वरम् । ववन्दे हृदयानन्दं मुनिं विनयनन्दनम् ॥ ७२ ॥
[1]कल्याणकन्दलोद्भेदमेघवृष्टिसमानया । मुनिरानन्दयामास धर्मलाभाशिषाथ तम् ॥ ७३ ॥
भूयः कुमारस्तं नत्वा मुनिमेवमभाषत । चित्रीयसे व्रतधरो नवयौवनवानपि ॥ ७४ ॥
विषयाणां विमुखोऽसि वयस्यत्रापि यत्ततः । विद्मस्तेषां [2]दुर्विपाकं किम्पाकानामिव ध्रुवम् ॥ ७५ ॥
सारमत्र हि संसारे किं च मन्ये न किञ्चन । इच्छं तत्परिहारायोत्तिष्ठन्ते यद्भवादृशाः ॥ ७६ ॥
संसारतरणोपायं तन्ममापि समादिश । मां नय त्वं स्वेन पथा सार्थवाह इवाध्वगम् ॥ ७७ ॥
क्रीडार्थमागतेनेह त्वं प्राप्तोऽसि महामुने !। कर्करान्वेषकेणेव माणिक्यं पर्वतावनौ ॥ ७८ ॥
एवमुक्तः कुमारेण [3]मारारिः स महामुनिः । आबभाषे नवाम्भोदघोषगम्भीरया गिरा ॥ ७९ ॥
यौवनैश्वर्यरुपादिमदस्थानानि शान्तये । मान्त्रिकस्येव भूतानि पदातित्वाय साधनात्[+] ॥ ८० ॥
संसारसिन्धुतरणे यानपात्रमनर्गलम्[4][5] । भगवद्भिः [6]समाम्नातो यतिधर्मोऽयमुच्चकैः ॥ ८१ ॥
संयमः सूनृतं शौचं ब्रह्माकिञ्चनता[7] तपः । क्षान्तिर्मार्दवमृजुता मुक्तिश्च दशधेति सः ॥ ८२ ॥
प्राणातिपातव्यावृत्तिरुपः संयम ईरितः । मृषावादपरीहारस्वरुपं सूनृतं पुनः ॥ ८३ ॥
शौचं संयमसंशुद्धिरदत्तादानवर्जनात् । उपस्थसंयमो ब्रह्म नवगुप्तिसमन्वितम् ॥ ८४ ॥

१ कल्याणांकुरस्योत्पादने मेघवृष्टिसदृशया । २ अनिष्टपरिणामम् । ३ मारस्य कामदेवस्य अरिः । ४ नौः । ५ अप्रतिबंधकम् । ६ कथितः । ७ अपरिग्रहता । + साधु ते । साधने ।

निर्ममत्वं शरीरादावप्यकिञ्चनता मता । तपस्तु द्विविधं बाह्यमान्तरं चेति तद्यथा ॥ ८५ ॥
अनशनमौनोदर्यं[1] वृत्तेः संक्षेपणं तथा । रसत्यागस्तनुक्लेशो[2] लीनतेति बहिस्तपः ॥ ८६ ॥
प्रायश्चित्तं वैयावृत्त्यं[3] स्वाध्यायो विनयोऽपि च । व्युत्सर्गोऽथ[4] शुभध्यानं षोढेत्याभ्यन्तरं तपः ॥ ८७ ॥
क्षान्तिः शक्तावशक्तौ वा सहनं क्रोधनिग्रहात् । मददोषपरीहारो मार्दवं माननिर्जयात् ॥ ८८ ॥
मायाजयादार्जवं वाङ्मनःकायैरवक्रता । मुक्तिश्च तृष्णाविच्छेदो बाह्याभ्यन्तरवस्तुषु ॥ ८९ ॥
इत्थं दशविधो धर्मः संसारोत्तारणक्षमः । जगत्यवाप्यते पुण्यैश्चिन्तामणिरिवानघः ॥ ९० ॥
श्रुत्वा पुरुषसिंहोऽपि सप्रश्रयमदोऽवदत् । रोरस्य[5]ेव निधानं मे धर्मोऽयं साधु दर्शितः ॥ ९१ ॥
किन्त्वसौ गृहवासस्थैरनुष्ठातुं न शक्यते । गृहवासो हि संसारतरोर्दोहदमुत्तमम् ॥ ९२ ॥
प्रव्रज्यां धर्मराजस्य राजधानीं प्रयच्छ मे । भगवन् ! भवदुर्ग्रामवासादुद्विग्नवानहम् ॥ ९३ ॥
अथोचे भगवानेवं सूरिर्विनयनन्दनः । मनोरथोऽपि ते साधुः साधकः पुण्यसम्पदाम् ॥ ९४ ॥
महासत्व ! महाबुद्धे ! विवेकिन् ! दृढनिश्चय ! । योग्योऽसि व्रतभारस्य दास्यामस्त्वत्समीहितम् ॥ ९५ ॥
आपृच्छस्व परं गत्वा पितरौ पुत्रवत्सलौ । यतस्तावेव जगति गुरू प्रथमतो नृणाम् ॥ ९६ ॥
ततः स गत्वा पितरौ प्रणम्य च कृताञ्जलिः । मां व्रतायानुमन्येथामेवमुच्चैर्व्यजिज्ञपत् ॥ ९७ ॥
इत्यूचतुश्च तौ युक्ता प्रव्रज्या वत्स ! किं त्विह । उद्वोढव्यः[6] पञ्चमहाव्रतभारोऽतिदुर्वहः ॥ ९८ ॥
निर्ममत्वं स्वदेहेऽपि विरतौ[7] रात्रिभोजनात् । द्विचत्वारिंशता दोषैर्मुक्तः पिण्डश्च भोजने ॥ ९९ ॥

१ तदाख्यं तपः यत्राहारस्य क्रमेणाल्पत्वं क्रियते । २ देहकष्टरुपं । ३ सेवा । ४ कायोत्सर्गः । ५ निर्धनस्य । ६ पाल्यः । ७ विरमणम् ।

नित्योद्युक्तो निर्ममश्चाकिञ्चनो गुणतत्परः । धारयेत्समितीः पञ्च तिस्रो गुप्तीश्च सर्वदा ॥ १०० ॥
मासादिकाश्च प्रतिमा विधातव्या यथाविधि । अभिग्रहा द्रव्यक्षेत्रकालभावानुगा अपि ॥ १०१ ॥
यावज्जीवितमस्नानं भूशय्या केशलुञ्चनम् । शरीरस्याप्रतिकर्म[1] वासो गुरुकुले सदा ॥ १०२ ॥
परीषहोपसर्गाणां[2] सहनं सानुमोदनम् । अष्टादशानां शीलाङ्गसहस्राणां च धारणम् ॥ १०३ ॥
प्रव्रज्यायामुपात्तायां सुकुमार ! कुमारक !। तदेते लोहचणकाश्चर्वणीया निरन्तरम् ॥ १०४ ॥
बाहुभ्यां तरणीयोऽयमपारो मकराकरः[3] । निशातखड्गधारासु कार्यं चङ्क्रमणं क्रमैः[4] ॥ १०५ ॥
पातव्या[5] ज्वलनज्वाला[6] मेरुस्तोल्यस्तुलाधृतः । उत्पूरा च प्रतिश्रोतस्तरणीया सरिद्वरा ॥ १०६ ॥
एकाकिना च जेतव्यं बलवद्विद्विषद्बलम् । विधातव्यो भ्रमच्चक्रे* राधावेधश्च खल्वहो ! ॥ १०७ ॥
॥ दशभिः कुलकम् ॥

महत् सत्वं, महद् धैर्यं महती धीर्महद् बलम् । प्रव्रज्याया उपात्ताया यदाऽऽजन्मापि पालनम् ॥ १०८ ॥
तदाकर्ण्य कुमारोऽपि ससौष्ठवमभाषत । पूज्यपादा एवमेतत् प्रव्रज्येयं यदीदृशी ॥ १०९ ॥
किन्तु विज्ञपयाम्येकमंशः शततमोऽपि किम् । भववासससमुत्थानां कष्टानामिह दृश्यते ॥ ११० ॥
तथाहि दूरे तिष्ठन्तु साक्षान्नरकवेदनाः । वचनैर्दुर्वचा एव दुःश्रवाः श्रवणैरपि ॥ १११ ॥
इहापि दृश्यते लोके तिरश्चामकृतागसाम्[7] । नितान्तं बन्धनच्छेदतर्जनाद्यतिदुःसहम् ॥ ११२ ॥

१ असत्कारः । २ दुःखानामुपद्रवाणां च सहनम् । ३ समुद्रः । ४ पादैः । ५ पेया । ६ अग्निज्वाला । ७ निरपराधानाम् ।
* च्चक्रा° । = चर्तुभिः कलापकम् ।

कुष्ठादिव्याधिजा बाधा गुप्तिवासोऽङ्गकर्तनम् । त्वचनं ज्वालनं शीर्षच्छेदादि च नृणामपि ॥ ११३ ॥
विप्रयोगः प्रियजनैः शत्रुतश्च पराभवः । च्यवनज्ञानजं दुःखं दुःसहं नाकिनामपि ॥ ११४ ॥
तेनैवं पितरौ प्रोक्तौ साधु साध्विति वादिनौ । मुदितावनुमेनाते व्रतादानाय तं ततः ॥ ११५ ॥
सप्रमोदं ततः पित्रा कृतनिष्क्रमणोत्सवः । दीक्षार्थी तं मुनिं सोऽगात् फलार्थीव वनस्पतिम् ॥ ११६ ॥
आददे मुनिपादान्ते सामायिकमुदीरयन् । प्रव्रज्यां पुरुषसिंहो भवाब्धितरणे तरीम् ॥ ११७ ॥
प्रमादपरिहारेण रक्षेच्छुः सर्वदेहिनाम् । स दृढं पालयामास प्रव्रज्यां राज्यवन्नृपः ॥ ११८ ॥
विंशतिस्थानकानां च स्थानैः कतिपयैरपि । अर्जयामास विशदं तीर्थकृन्नाम कर्म सः ॥ ११९ ॥
चिरं विहृत्य कालं च कृत्वानशनकर्मणा । विमाने वैजयन्ते स महर्द्धिरमरोऽभवत् ॥ १२० ॥
इतश्च जम्बूद्वीपेऽस्मिन् क्षेत्रे भरतनामनि । विनीतेत्यस्ति नगरी गरीयःसम्पदास्पदम् ॥ १२१ ॥
राजते राजतैस्तत्र प्राकारः कपिशीर्षकैः । सर्वद्वीपान्तरानीतेन्दुबिम्बरचितैरिव ॥ १२२ ॥
नानारत्ननिधानं सा रुप्यवप्रेण राजभिः । रक्षार्थं कुण्डलीभूतशेषेणेव निषेविता ॥ १२३ ॥
सौधेषु रत्नवलभीसङ्क्रान्तस्तत्र चन्द्रमाः । लिह्यते गृहमार्जारैर्दधिपिण्डधिया मुहुः ॥ १२४ ॥
अर्हन् देवो गुरुः साधुरिति क्रीडाशुका अपि । पठन्ति तस्यां शृण्वन्तस्तदेव हि गृहे गृहे ॥ १२५ ॥
प्रतिवासगृहं तत्र दह्यमानागरूद्भवाः । धूमलेखा वितन्वन्ति तमालवनमम्बरे ॥ १२६ ॥

१ कारागृहवासः । २ त्वचाच्छेदनम् । ३ वियोगः । ४ वृक्षम् । ५ नावं । ६ महतीनां समृद्धीनां स्थानम् । ७ रुप्यमयैः । ८ सर्वद्वीपांतरेभ्य आनीतानि चंद्रबिंबानि तैः रचितैः ।

तत्रोद्यानेष्वरघट्टशीकरासारमालिषु[1] । शीतभीत्येव नो जातु प्रविशन्त्यर्करश्मयः ॥ १२७ ॥
इक्ष्वाकुवंशतिलकस्तस्यामासीन्महीपतिः । मेघो नाम महामेघ इव विश्वाभिनन्दकः ॥ १२८ ॥
सदैवोदच्यमानापि कृतार्थीकर्तुमर्थिनः । सिरा[2]वारीव ववृधे तस्य श्रीरतिशायिनी ॥ १२९ ॥
देवतामिव तं नेमुः पञ्चाङ्गस्पृष्टभूतलाः । वस्त्रालङ्काररत्नाद्यैरानर्चुश्च महीभुजः ॥ १३० ॥
प्रतापः प्रसरंस्तस्य माध्यन्दिन इवार्यमा । द्विषां सङ्कोचयामास देहच्छायामिव श्रियम् ॥ १३१ ॥
ऋद्ध्या महत्या शक्त्या च प्रभावेण च भूयसा । चतुष्षष्टेः स इन्द्राणां पञ्चषष्टितमोऽन्वभात् ॥ १३२ ॥
तस्यासीन्मङ्गला नाम मङ्गलानां निकेतनम् । सच्छीलकेतना पत्नी कुललक्ष्मीरिवाङ्गिनी ॥ १३३ ॥
पत्युः सा हृदयेऽवात्सीत् तस्याश्च हृदये पतिः । बहिरङ्गस्तयोश्चासीद्वासो वासगृहादिषु ॥ १३४ ॥
उद्यानादिप्रदेशेऽपि सञ्चरन्ती गृहेऽपि वा । अधिकं देवतातो[4]ऽपि भर्त्तारं ध्यायति स्म सा ॥ १३५ ॥
रुपलावण्यसौभाग्यदासीकृतसुराङ्गना । दासीचक्रे मुखेनेन्दुमपि सा वरलोचना ॥ १३६ ॥
विशदे रुपलावण्ये तस्याश्चातिशयान्विते । परस्परमभूष्येतामङ्गुलीयमणी इव ॥ १३७ ॥
पौलो[3]म्येव महेन्द्रस्य नरेन्द्रस्य तया समम् । उपभुञ्जानस्य भोगानभवत् प्रीतिरक्षया[5] ॥ १३८ ॥
इतः पुरुषसिंहस्य वैजयन्तविमानगः* । जीवः स्वायुस्त्रयस्त्रिंशदब्धिसङ्ख्यामपूरयत् ॥ १३९ ॥
श्रावणस्याथ शुक्लायां द्वितीयायां मघागते। मृगाङ्के मङ्गलादेव्याः कुक्षाववततार सः ॥ १४० ॥
ईक्षाञ्चक्रे तदानीं च तीर्थकृज्जन्मसूचकान् । गजादीन्मङ्गलादेवी महास्वप्नांश्चतुर्दश ॥ १४१ ॥

१ जलघटीयंत्रान्निर्गतानां बिंदूनां आसारः वृष्टिः तेन मालिनस्तेषु । २ कूपाद्युद्धृतजलमार्गः सिरा । ३ इंद्राण्या । ४ दैवादपि । ५ अक्षयाप्रीतिः ।
* °मानतः । = °णस्य च शु° ।

भुवनत्रितयाधारभूतं गर्भं दधार तम् । निगूढं[1] मङ्गला देवी निधानमिव मेदिनी ॥ १४२ ॥
इतश्च कश्चिदप्याढ्यस्ततः पुर्या वणिज्यया[3] । सदृग्[2]भार्याद्वययुतो दूरदेशान्तरं ययौ ॥ १४३ ॥
तस्य मार्गस्थितस्यैवैकस्यां समभवत्सुतः । उभाभ्यां च सपत्नीभ्यां निर्विशेषमवर्ध्यत ॥ १४४ ॥
अर्जयित्वा धनं देशान्तरात् व्यावृत्तवानथ । वर्त्मन्येव विपेदे स दैवस्य विषमा गतिः ॥ १४५ ॥
तस्य द्वे अपि ते भार्ये उदश्रुवदने शुचा । विरचय्याग्निसंस्कारं चक्राते और्ध्वदेहिकम्[4] ॥ १४६ ॥
ततः पुत्रश्च वित्तं च मदीये इति भाषिणी । पुत्रमात्रा सहान्या तु मायिन्यकलहायत ॥ १४७ ॥
क्षेममेका परा योगमिच्छन्त्यौ पुत्रवित्तयोः । अयोध्यामीयतुः शीघ्रं सूनोर्मातृविमातरौ ॥ १४८ ॥
तत्र च स्वाऽन्यकुलयोर्धर्माधिकरणेऽपि[5] च । डुढौके[6]ते उभे च्छिन्नो न तद्वादो मनागपि ॥ १४९ ॥
ततस्ते उपतस्थाते विवदन्त्यौ नरेश्वरम् । उपवेश्य सभां राज्ञा पृष्टे ते वादकारणम् ॥ १५० ॥
ऊचे विमाता वादोऽयमाख्यातः सकले पुरे । किन्त्वेनं नाच्छिदत् कोऽपि कः परव्यसनेऽर्तिमान् ॥ १५१ ॥
सुखिनं*परसौख्येन परदुःखेन दुःखिनम्■ । पृथिव्यां धर्मराजं त्वामिदानीमस्म्युपस्थिता ॥ १५२ ॥
ममौरसोऽयं तनयः सदृग् मे वर्द्धितो मया । वित्तं ममैतद्यस्या हि पुत्रस्तस्या धनादिकम् ॥ १५३ ॥
पुत्रमाताप्युवाचैवं पुत्रोऽसौ मे धनं च मे । सपत्नी मेऽनपत्यासौ लोभेन कलहायते ॥ १५४ ॥
प्राक् पुत्रं पालयन्त्येषा न निषिद्धा मयार्जवात्। पादान्ते शायिता स्नेहादुच्छीर्षग्राहिणी ह्यसौ ॥ १५५ ॥
तदुत्तिष्ठ स्वनिर्णेतुं विवादस्त्वयि तिष्ठते । राज्ञा दृष्टः कुदृष्टो वा निर्णयो ह्यपुनर्भवः ॥ १५६ ॥

१ गुप्तं क्रियाविशेषणम् । २ धनिकः । ३ व्यापारेण । ४ दाहादिकम् । ५ न्यायाधिकारिमंदिरे । ६ जग्मतुः । * सुखितं । ■ दुःखितम् ।

उभाभ्यामिति विज्ञप्तो जगाद जगतीपतिः । द्वे अप्येते सुसदृश्यावेकवृन्तच्युते इव ॥ १५७ ॥
अन्योऽन्यं वैसदृश्ये[1] हि यस्याः सादृश्यभाग्भवेत् । तस्याः पुत्रोऽनुमीयेत द्वयोः सदृश एष नु ॥ १५८ ॥
न वक्तुमपि जानाति बाल्यादेषोऽपि दारकः । असौ माता विमाताऽसाविति ज्ञाने तु का कथा ?॥ १५९ ॥
दुर्निर्णयार्थचकितस्येत्थं निगदितोऽपि हि[2] । जज्ञे राज्ञोऽथ मध्याह्नो नित्यकृत्यान्तरोचितः ॥ १६० ॥
पारिषद्यैरथेत्यूचे[3] मासैः षड्भिरपि प्रभो । विवादोऽभेदि नास्माभिर्वज्रग्रन्थिरिवानयोः ॥ १६१ ॥
इदानीं नित्यकृत्यानां क्षणो वो माऽतिवर्तताम् । क्षणान्तरे विवादोऽयं विचार्यः स्वामिना पुनः ॥ १६२ ॥
एवमस्त्विति राजापि निगद्य व्यसृजत्सभाम्[4] । कृत्वानन्तरकृत्यानि चान्तरन्तःपुरं ययौ ॥ १६३ ॥
विज्ञप्तो मङ्गलादेव्या तत्र चैवं महीपतिः । स्वामिन् ! मध्याह्नकृत्यानामतिवेलाऽभवत्कुतः ॥ १६४ ॥
तयोर्विवादवृत्तान्तो राज्ञ्यै राज्ञाऽप्यकथ्यत । गर्भप्रभावात् सुमती राज्ञ्यप्येवमभाषत ॥ १६५ ॥
स्त्रीणां विवादो निर्णेतुं स्त्रीभिरेव[=] हि युज्यते । तत्करिष्याम्यहं देव ! विवादच्छेदनं तयोः ॥ १६६ ॥
राज्ञा सविस्मयं देव्या सममागत्य पर्षदि[5] । आनायिते[6] ततस्ते तु पृष्टे पूर्ववदूचतुः ॥ १६७ ॥
राज्ञी भाषामुत्तरं च विचार्यैवमवोचत । ज्ञानत्रयधरस्तीर्थकरोऽस्त्येष ममोदरे ॥ १६८ ॥
स प्रसूतो[7] जगन्नाथोऽमुष्याशोकतरोस्तले । निर्णयं दास्यते तस्मात् प्रतीक्षेथामुभे अपि ॥ १६९ ॥
ओमित्यूचे विमाता तु माता त्वेवमवोचत । अहमागमयिष्ये[8] न महादेवि मनागपि ॥ १७० ॥
सर्वज्ञमाता भवती करोत्वद्यैव निर्णयम् । सपत्नीसात् करिष्यामि नेयत्कालं स्वमात्मजम् ॥ १७१ ॥

१ असादृश्ये । २ निर्णयाभावाच्चकितस्य । ३ सभासद्भिः । ४ समयः । ५ सभायाम् । ६ आहूते । ७ उत्पन्नः । ८ प्रतीक्षां करिष्ये ।
* ° भ्यामपि वि° । = स्त्रीणामेव ।

ततश्च मङ्गलादेवी निर्णीयैवमभाषत । कालक्षेपासहत्वेन नूनमस्या अयं सुतः ॥ १७२ ॥
विदधात्युभयाधीने परपुत्र–धने यतः । तेनेहकालहरणं विमाता सहते खलु ॥ १७३ ॥
आत्मपुत्रमुभयसात् क्रियमाणं तितिक्षितुम् । अक्षमा कालहरणं सहते जननी कथम् ॥ १७४ ॥
भद्रे ! न कालहरणं सहसे यन्मनागपि । तज्ज्ञातं तव पुत्रोऽयं गृहाण स्वगृहं व्रज ॥ १७५ ॥
एतस्यास्तनयो नायं पालितो लालितोऽपि हि । कोकिलायाः खल्वपत्यं काक्या पुष्टेऽपि कोकिलः ॥ १७६ ॥
गर्भप्रभावाद् देव्यैवं विहिते तत्र निर्णये । विसिष्मिये[1] स्मेरनेत्रा परिषत्[2]सा चतुर्विधा ॥ १७७ ॥
तदा ते जग्मतुर्वेश्म सूनोर्मातृविमातरौ । हृष्ट–म्लाने कमलिनी कुमुदिन्याविवोषसि[3] ॥ १७८ ॥
बाधामजनयन् देव्या लघूत्करणवानिव[4] । क्रमेण ववृधे गर्भः शुक्लपक्ष इवोडुपः[5] ॥ १७९ ॥
ततो नवसु मासेषु दिनेष्वर्धाष्टमेषु च । वैशाखविशदाष्टम्यां मघास्थे च निशाकरे ॥ १८० ॥
सुवर्णवर्णं क्रौञ्चाङ्कं मृगाङ्कमिव पूर्वदिक् । मङ्गलास्वामिनी सूनुरत्नं प्रसुषुवे सुखम्[+] ॥ १८१ ॥
त्रैलोक्ये क्षणमुद्योतो नारकाणां क्षणं सुखम् । तदानीमभवच्छक्रादीनां चासनकम्पनम् ॥ १८२ ॥
दिक्कुमार्यस्तत्र चक्रुः सूतिकर्म यथोचितम् । शक्रश्च मङ्गलातल्पात् सुमेरावनयत् प्रभुम् ॥ १८३ ॥
शक्राङ्कवर्तिनं नाथमिन्द्रास्तत्राच्युतादयः । त्रिषष्टिः स्नपयामासुस्तीर्थाम्भोभिर्यथाक्रमम् ॥ १८४ ॥
ईशानाङ्के निवेश्येशं शक्रोऽप्यस्नपयज्जलैः । विकृतस्फाटिकचतुर्वृषशृङ्गविनिर्गतैः ॥ १८५ ॥
विलिप्य पूजयित्वा च वस्त्रालङ्करणैः प्रभुम् । आरात्रिकं च प्रोत्तार्य शक्रो भक्त्यैवमस्तवीत् ॥ १८६ ॥

१ विकसितनयना । २ सभा । ३ प्रातःकाले । ४ चातुर्यवानिव । ५ शुक्लाष्टम्यां ।

* क्षत्रियपरिषद् गृहपति परिषद् ब्राह्मणपरिषद् ऋषिपरिषद् इत्येवं चतुर्विधा परिषत् सभा । राज प्रश्नियोपाङ्गे पृ. ३२१ कण्डिका १८४ (गूर्जर.) + शुभम् ।

देव ! त्वज्जन्मकल्याणेनापि कल्याणभाग् मही । किं पुनः पादकमलैर्यत्र त्वं विहरिष्यसे ॥ १८७ ॥
त्वद्दर्शनसुखप्राप्त्या कृतकृत्या दृशोऽधुना । कृतार्थाः पाणयश्चैते भगवन् ! पूजितोऽसि यैः ॥ १८८ ॥
जिननाथ ! तव स्नात्रचर्चाऽर्चादिमहोत्सवः । मन्मनोरथचैत्यस्य[1] चिरात् कलशतां ययौ ॥ १८९ ॥
जगन्नाथ ! प्रशंसामि संसारमपि सम्प्रति । यत्र त्वद्दर्शनं देव मुक्तेरेकं निबन्धनम् ॥ १९० ॥
उर्मयोऽपि हि गण्यन्ते स्वयम्भूरमणोदधेः । तवातिशयपात्रस्य न पुनर्मादृशैर्गुणाः ॥ १९१ ॥
धर्मैकमण्डपस्तम्भ ! जगदुद्योतभास्कर ! । कृपावल्लीमहावृक्ष ! रक्ष विश्वं जगत्पते ! ॥ १९२ ॥
निर्वृतेः संवृतद्वारसमुद्घाटनकुञ्चिका[2] । धन्यैः शरीरिभिर्देव ! श्रोष्यते तव देशना ॥ १९३ ॥
मन्मनस्युज्ज्वलादर्शसन्निभे भुवनेश्वर ! । त्वन्मूर्त्तिर्नित्यसङ्क्रान्ता भूयान्निर्वृतिकारणम् ॥ १९४ ॥
इति स्तुत्वा हरिर्नाथमादायोत्लुत्य[3] च क्षणात् । मङ्गलास्वामिनीपार्श्वे मुक्त्वा च स्वाश्रयं ययौ ॥ १९५ ॥
जनन्यास्तत्र गर्भस्थे यदभूच्छोभना मतिः । स्वामिनो नाम सुमतिरित्यकार्षीत् पिता ततः ॥ १९६ ॥
धात्रीभिरिन्द्रादिष्टाभिर्लाल्यमानो जगत्पतिः । शैशवं[4] व्यतिचक्राम प्रतिपेदे च यौवनम् ॥ १९७ ॥
धनुःशतत्रयोत्तुङ्गः पीनस्कन्धो[5] बभौ विभुः । आजानुलम्बिदोःशाखः[6] कल्पशाखीव जङ्गमः[7] ॥ १९८ ॥
स्वामिनः स्वच्छलावण्यकल्लोलिन्यां निरन्तरम् । ललनानां लुलन्ति स्म दृशः शफरिका[8] इव । १९९ ॥
भोग्यं कर्म निजं जानन् पित्रोरप्युपरोधतः । राज्ञां कन्याश्चारुरुपाः पर्यणैषीदथ प्रभुः ॥ २०० ॥

१ मम मनोरथ एव चैत्यं तस्य । २ संवृतद्वारस्योद्घाटने कुंचिकेव कुंचिका । ३ इन्द्रः । ४ बाल्यम् । ५ पीनौ पुष्टौ स्कंधौ यस्य । ६ जानुपर्यंतं लंबमाने दोषौ हस्तावेव शाखे यस्य । ७ मत्स्याः । ८ आग्रहात् ।

जन्मतः पूर्वलक्षेषु गतेषु दशसु प्रभुः । भूभुजाऽप्यर्थितोऽत्यर्थं राज्यभारमुपाददे ॥ २०१ ॥
एकोनत्रिंशतं पूर्वलक्षाः सद्वादशाङ्किकाः । राज्येऽनैषीत्सुखं स्वामी वैजयन्त इव स्थितः ॥ २०२ ॥
स्वयम्बुद्धो बोधितश्च ततो लोकान्तिकामरैः । दीक्षेच्छुर्वार्षिकं दानमदत्त सुमतिः प्रभुः ॥ २०३ ॥
अन्ते वार्षिकदानस्य वासवैश्चलितासनैः । दीक्षाभिषेको विदधे स्वामिनः पार्थिवैरपि ॥ २०४ ॥
अथाभयकरां नामाध्यारुह्य शिबिकां विभुः । सुरासुरनृपोपेतः सहस्राम्रवणं ययौ ॥ २०५ ॥
*वैशाखसितनवम्यां पूर्वाह्णे स मघासु भे । प्राव्राजीन्नित्यभक्तेन सहस्रेण नृपैः सह ॥ २०६ ॥
उत्पेदे स्वामिनो ज्ञानं मनःपर्ययसंज्ञकम् । अनुजन्मेव[1] दीक्षायाः प्रियमित्रमिवाथवा ॥ २०७ ॥
दिने द्वितीये विजयपुरे पद्मस्य भूपतेः । सदने[2] विदधे स्वामी परमान्नेन पारणम् ॥ २०८ ॥
वसुधारादीनि पञ्चाद्भूतदिव्यानि चक्रिरे । तत्र देवा रत्नपीठं त्वर्चायै पद्मपार्थिवः ॥ २०९ ॥
विविधाभिग्रहधरः सहमानः परीषहान् । वर्षाणि विंशतिं स्वामी विजहार ततो महीम् ॥ २१० ॥
ग्रामाकरप्रभृतिषु विहरन् प्रभुरन्यदा । सहस्राम्रवणं दीक्षाग्रहणस्थानमाययौ ॥ २११ ॥
प्रियङ्गुमूले ध्यानस्थस्यापूर्वकरणात्प्रभोः । क्षपकश्रेण्यारुढस्य घातिकर्माणि तुत्रुटुः ॥ २१२ ॥
चैत्रस्य शुक्लैकादश्यां मघास्थे च निशाकरे । स्वामिनः कृतषष्ठस्योत्पेदे केवलमुज्ज्वलम् ॥ २१३ ॥
तज्ज्ञात्वाऽऽसनकम्पेनाऽऽगत्येन्द्राः ससुराऽसुराः । चक्रुः समवसरणं स्वामिनो देशनाकृते ॥ २१४ ॥
तत्र प्रविश्य प्राग्द्वारा प्रदक्षिण्यकृतप्रभुः । धनुःषोडशशत्यग्रक्रोशोच्चं चैत्यपादपम् ॥ २१५ ॥

१ कनीयान् भ्राते । २ गृहे । * ° तपञ्चयां ।

"तीर्थाय नम" इत्युक्त्वाऽध्यास्त सिंहासनं प्रभुः । प्राङ्मुखो दिक्षु चान्यासु तद्रूपाणि व्यधुः सुराः ॥ २१६ ॥
सङ्घोऽप्यस्थाद्यथास्थानं ससुरासुरमानुषः । नमस्कृत्य जगन्नाथं वज्रभृच्चैवमस्तवीत् ॥ २१७ ॥
गायन्निवालिविरुतैर्नृत्यन्निव चलैर्दलैः । त्वद्गुणैरिव रक्तोऽसौ मोदतेऽशोकपादपः ॥ २१८ ॥
आयोजनं सुमनसोऽधस्तान्निक्षिप्तबन्धनाः । जानुदध्नीः सुमनसो देशनोर्व्यां किरन्ति ते ॥ २१९ ॥
मालवकैशिकीमुख्यग्रामरागपवित्रितः । तव दिव्यो ध्वनिः पीतो हर्षोद्गीवैर्मृगैरपि ॥ २२० ॥
तवेन्दुधामधवला चकास्ति चमरावली । हंसालिरिव वक्त्राब्जपरिचर्यापरायणा ॥ २२१ ॥
मृगेन्द्रासनमारुढे त्वयि तन्वति देशनाम् । श्रोतुं मृगाः समायान्ति मृगेन्द्रमिव सेवितुम् ॥ २२२ ॥
भासां चयैः परिवृतो ज्योत्स्नाभिरिव चन्द्रमाः । चकोराणामिव दृशां ददासि परमां मुदम् ॥ २२३ ॥
दुन्दुभिर्विश्वविश्वेश ! पुरो व्योम्नि प्रतिध्वनन् । जगत्याप्तेषु ते प्राज्यं साम्राज्यमिव शंसति ॥ २२४ ॥
तवोर्ध्वमूर्ध्वपुण्यर्द्धिक्रमसब्रह्मचारिणी । छत्रत्रयी त्रिभुवनप्रभुत्वप्रौढिसंशिनी ॥ २२५ ॥
एतां चमत्कारकरीं प्रातिहार्यश्रियं तव । चित्रीयन्ते न के दृष्ट्वा नाथ ! मिथ्यादृशोऽपि हि ॥ २२६ ॥
स्तुत्वैवं विरते शक्रे भगवान् सुमतिप्रभुः । सर्वभाषानुगामिन्या प्रारेभे देशनां गिरा ॥ २२७ ॥
कृत्याकृत्यपरिज्ञानयोग्यतामभ्युपेयुषा । इह स्वकार्यमूढेन न स्थातव्यं शरीरिणा ॥ २२८ ॥
पुत्रमित्रकलत्रादेः शरीरस्यापि सक्रिया । परकार्यमिदं सर्वं न स्वकार्यं मनागपि ॥ २२९ ॥
एक उत्पद्यते जन्तुरेक एव विपद्यते । कर्माण्यनुभवत्येकः प्रचितानि भवान्तरे ॥ २३० ॥

१ भ्रमरशब्दैः । २ कंपमानैः । ३ देवाः । ४ जानुप्रमाणाः । ५ पुष्पाणि । ६ चंद्रज्योत्सनावत्धवला । ७ भामण्डलेनेत्यर्थः । ८ हर्षम् ।
९ पुण्यसमृद्धिकमसदृशी । १० म्रियते ।

अन्यैस्तेनार्जितं वित्तं भूयः सम्भूय भुज्यते । स त्वेको नरकक्रोडे क्लिश्यते निजकर्मभिः ॥ २३१ ॥
दुःखदावाग्निभीष्मेऽस्मिन् वितते[1] भवकानने । बम्भ्रमीति[2]त्येक एवासौ जन्तुः कर्मवशीकृतः ॥ २३२ ॥
इह जीवस्य मा भूवन् सहाया बान्धवादयः । शरीरं तु सहायश्चेत्सुखदुःखानुभूतिदम्* ॥ २३३ ॥
नायाति पूर्वभवतो न याति च भवान्तरम् । ततः कायः सहायः स्यात्सम्फेट[3]मिलितः कथम् ॥ २३४ ॥
धर्मा-ऽधर्मौ समासन्नौ सहायाविति चेन्मतिः । नैषा सत्या न मोक्षेऽस्ति धर्माधर्मसहायता ॥ २३५ ॥
तस्मादेको बम्भ्रमीति भवे कुर्वन् शुभाशुभे । जन्तुर्वेदयते चैतदनुरुपे शुभाशुभे ॥ २३६ ॥
एक एव समादत्ते मोक्षश्रियमनुत्तराम् । सर्वसम्बन्धिविरहाद् द्वितीयस्य न सम्भवः ॥ २३७ ॥
यद्दुःखं भवसम्बन्धि यत्सुखं मोक्षसम्भवम् । एक एवोपभुङ्क्ते तन्न सहायोऽस्ति कश्चन ॥ २३८ ॥
यथा चैकस्तरन् सिन्धुं पारं व्रजति तत्क्षणात् । न तु हृत्पाणिपादादिसंयोजितपरिग्रहः ॥ २३९ ॥
तथैव धनदेहादिपरिग्रहपराङ्मुखः । स्वस्थ एको भवाम्भोधेः पारमासादयत्यसौ ॥ २४० ॥
तत्सांसारिकसम्बन्धं विहायैकाकिना सता । यतितव्यं हि मोक्षाय शाश्वतानन्दशर्मणे ॥ २४१ ॥
तां प्रभोर्देशनां श्रुत्वा प्रबुद्धा बहवस्तदा । नरा नार्यश्च निःसङ्गीभूयोपादादिरे व्रतम् ॥ २४२ ॥
चमराद्या गणभृतोऽभूवन् शतमनुत्तमाः । ते भर्तुस्त्रिपदीं प्राप्य द्वादशाङ्गीमसूत्रयन् ॥ २४३ ॥
पूर्णायामादिपौरुष्यां व्यसृजद्देशनां विभुः । चक्रे स्वाम्यङ्घ्रिपीठस्थो देशनां गणभृद्वरः ॥ २४४ ॥

१ विस्तृते । २ पुनःपुनः भ्रमति । ३ मार्गे मिलित इव । * सहाय्यस्तु सुख° । सहास्त्वे त त् सुख° ।

द्वितीयपौरुषीप्रान्ते व्यसृजत्सोऽपि देशनाम् । नत्वाऽर्हन्तं ततो जग्मुः स्वं स्वमिन्द्रादयः पदम् ॥ २४५ ॥
तत्तीर्थे तुम्बुरुर्नाम श्वेताङ्गस्तार्क्ष्यवाहनः[1] । दक्षिणौ वरदशक्तिधरौ बाहू समुद्वहन् ॥ २४६ ॥
वामौ बाहू गदाधारपाशयुक्तौ च धारयन् । सदा सन्निहितो[*] भर्तुरभूच्छासनदेवता ॥ २४७ ॥ युग्मम् ॥
तथोत्पन्ना महाकाली स्वर्णरुक्पद्मवाहना[2] । दधाना दक्षिणौ बाहुदण्डौ वरदपाशिनौ ॥ २४८ ॥
मातुलिङ्गाङ्कुशधरौ[+] परौ बाहू च बिभ्रती । भर्तुः शासनदेव्यासीत्सदा सन्निधिवर्तिनी ॥ २४९ ॥
वचनातिशयैः पञ्चत्रिंशता शोभितः प्रभुः । बोधयन् भव्यभविनो विजहार वसुन्धराम् ॥ २५० ॥
साधूनां त्रीणि लक्षाणि सहस्राणि च विंशतिः । साध्वीनां पञ्चलक्षी च सहस्रत्रिंशत्सहस्रिका ॥ २५१ ॥
चतुर्दशपूर्विणा द्वे सहस्रे सचतुःशते । एकादश सहस्राणि त्ववधिज्ञानशालिनाम् ॥ २५२ ॥
मनोज्ञानिनामयुतं सपञ्चाशच्चतुःशती । त्रयोदश सहस्राणि केवलज्ञानिनां पुनः ॥ २५३ ॥
वैक्रियलब्धिसहस्राण्यष्टादश चतुःशती । अयुतं वादलब्धीनां सपञ्चाशच्चतुःशती ॥ २५४ ॥
श्रावकाणामुभे लक्षे सैकाशीतिसहस्रके । श्राविकाणां पञ्चलक्षी सहस्राणि च षोडश ॥ २५५ ॥
चतुस्त्रिंशदतिशयान्वितस्य सुमतिप्रभोः । उर्व्यां विहरमाणस्य बभूवेति परिच्छदः[3] ॥ २५६ ॥
पूर्वलक्षं द्वादशाङ्ग्या विंशत्यब्द्या च वर्जितम् । आरभ्य केवलोत्पत्तेर्व्यहरत् सुमतिः प्रभुः ॥ २५७ ॥
स्वं मोक्षकालं ज्ञात्वाथ सम्मेताद्रिं ययौ विभुः । समं मुनिसहस्रेण तस्थावनशनेन च ॥ २५८ ॥
मासान्ते क्षतभवोपग्राहिकर्मा[4] जगत्पतिः । सम्प्राप्तानन्तचतुष्कः शैलेशीध्यानमास्थितः ॥ २५९ ॥

१ गरुडवाहनः । २ सुवर्णकांतिः । ३ परिजनः । ४ क्षतानि भवस्योपग्राहीणि कर्माणि येन यस्य वा ।
* सन्निहिता भ° । + °रौ वामबा° । ■ °न्ते क्षित° ।

चैत्रस्य सितनवम्यां पुनर्वसुगते[1] विधौ । समं तैर्मुनिभिः स्वामी प्रपेदे पदमव्ययम् ॥ २६० ॥ युग्मम् ॥
कौमारेऽयुः पूर्वलक्षा दश राज्ये पुनः प्रभोः । पूर्वलक्षैकोनत्रिंशद् द्वादशाङ्गसमन्विता ॥ २६१ ॥
पूर्वलक्षं द्वादशाङ्गन्यूनं व्रतधरस्य तु । चत्वारिंशत्पूर्वलक्षा इत्यायुः सुमतिप्रभोः ॥ २६२ ॥
अभिनन्दननिर्वाणात् सुमतिस्वामिनिर्वृतिः । कोटिलक्षेषु नवसु सागराणां गतेष्वभूत् ॥ २६३ ॥
भर्तुः सहस्रयतिनां च तदाशरीरसंस्कारमग्निजनितं विधिवद् विधाय ।
निर्वाणपर्वमहिमानमकार्षुरिन्द्रा नन्दीश्वरान्तरगमंश्च पुनः स्वलोकम् ॥ २६४ ॥

✣ ✣ ✣

इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये तृतीयपर्वणि सुमतिस्वामिचरितवर्णनो नाम तृतीयः सर्गः ।

---

१ पुनर्वसु नाम नक्षत्रं ।

चतुर्थः सर्गः ।

श्री पद्मप्रभस्वामिचरितम् ।

वन्दामहे पद्मवर्णं पद्मप्रभजिनेश्वरम् । लीलानिवासं पद्मायाः पद्म[1]राशिमिव[2] स्थितम् ॥ १ ॥
पद्मप्रभजिनेन्द्रस्य चरितं दुरि[3]तापहम् । तत्प्रभावादसामान्याद् वक्ष्यामि क्षाम[4]धीरपि ॥ २ ॥
धातकीखण्डद्वीपस्य प्राग्विदेहैकमण्डने । वत्साभिधाने विजये सुसीमेत्यस्ति पूर्वरा ॥ ३ ॥
तत्रापराजितो नाम द्विषद्भिरपराजितः । जितेन्द्रियः समभवद्भूपो धर्म इवाङ्गवान् ॥ ४ ॥
तस्य न्यायः सुहृदभूद् धर्मो बन्धुर्गुणा धनम् । सुहृद्बन्धुधनान्यासन् बहिरङ्गानि केवलम् ॥ ५ ॥
तस्यार्जवं च शीलं च सत्त्वं चेत्यूर्जिता गुणाः । मिथो भूषणतां जग्मुः पादपस्येव पल्लवाः ॥ ६ ॥
अकोपनोऽरीनशिष[5]दनासक्तोऽन्वभूत्सुखम् । अलुब्धश्च श्रियं दध्रे स विवेकिशिरोमणिः ॥ ७ ॥
अर्हत्प्रवचनसुधां पिबन् देव इवान्यदा । स एवं चिन्तयामास तत्त्वनिष्ठेन चेतसा ॥ ८ ॥
सम्पदो यौवनं रुपं शरीरं हरिणीदृशः । पुत्रमित्राणि हर्म्याणि दुस्त्यजानि शरीरिणाम् ॥ ९ ॥
जीवन्नप्यदशां प्राप्तः कालधर्मं गतोऽपि वा । एभिस्तु त्यज्यते जन्तुर्विनष्टाण्डमिवाण्डजैः ॥ १० ॥
एकपादेन फा[6]लाभं स्नेहं तेष्वेकपक्षकम् । कुर्वाणो भ्रश्यति स्वार्थाद् धिगहो ! मन्दधीर्जनः ॥ ११ ॥

१ लक्ष्म्याः । २ कमलसमूहम् । ३ पापनाशकम् । ४ अल्पधीः । ५ अशिषत्–शासयाञ्चकार । ६ फाल भाषायां 'कूदको' ।
* सत्यं चे ।

त्यजन्त्येते न यावन्मां पुण्यपाकक्षयादिह । तावत् पौरुषमालम्ब्य त्यजाम्येतानसंशयम् ॥ १२ ॥
एवं विचिन्त्य सुचिरं विवेकमणिरोहणः[१] । धाराधिरुढवैराग्यो[२] राज्यं पुत्राय दत्तवान् ॥ १३ ॥
पिहिताश्रवसूरीणां पादपद्मान्तमेत्य सः । उपाददे परिव्रज्यां मोक्षव्रज्यामहारथीम्[३] ॥ १४ ॥
त्रिगुप्तिः पञ्चसमितिर्निर्ममो निष्परिग्रहः । निशितं खड्गधारावच्चिरं सोऽपालयद् व्रतम् ॥ १५ ॥
स विंशतिस्थानकेभ्यः स्थानैः कतिपयैरपि । आर्जयत् तीर्थकृन्नाम कर्म निर्मलमानसः ॥ १६ ॥
शुभध्यानपरः स्वायुः क्षपयित्वा महामनाः । ग्रैवेयकेऽभून्नवमे महर्द्धिरमरोऽथ सः ॥ १७ ॥
इतश्च जम्बूद्वीपान्तर्वर्षेऽत्र भरताभिधे । कौशाम्बीत्यस्ति नगरी वत्सदेशस्य मण्डनम् ॥ १८ ॥
तत्रोच्चतरचैत्याग्रसिंहाभ्यर्णे परिभ्रमन् । त्रस्यताङ्कुरङ्गेण[४] यातीन्दुर्निष्कलङ्कताम् ॥ १९ ॥
*तत्रावासगृहेषूच्चैर्धूपधूमा वितन्वते । युग्मयूनां[५] रतभ्रष्टांशुकानामंशुकश्रियम्[६] ॥ २० ॥
स्वस्तिकन्यस्तमुक्तासु तत्र प्रतिगृहं शुकाः । चञ्च्वाघातं वितन्वन्ति दाडिमीबीजशङ्कया ॥ २१ ॥
श्रीमान् सर्वो जनस्तत्र नान्यस्वं कोऽपि लुण्टति । उद्यानकुसुमामोदस्योल्लुण्टाकः परं मरुत् ॥ २२ ॥
आसीत्तत्र धरो राजा धरायास्तापनोदनात् । धारणाच्चाप्यधरयन् धाराधरधराधरान्[७] ॥ २३ ॥
न भूपाः खण्डयामासुस्तस्याज्ञां क्षितिमण्डले । पुष्पस्रजमिवाखण्डां दधुः शिरसि किन्तु ते ॥ २४ ॥
कोदण्डोद्दण्डोदोर्दण्डोऽप्येष नो दण्डचण्डताम्[८] । अदर्शयत् किन्तु सौम्यस्तस्थौ भद्र इव द्विपः ॥ २५ ॥

१ विवेक एव मणयस्तेषां रोहणो गिरिः । २ वर्धमानवैराग्यवान् । ३ मोक्षमार्गे महारथसदृशीम् । ४ लांछनभूतमृगेण । ५ दंपतीनाम् ।
६ मैथुने वस्त्ररहितानाम् । ७ मेघान् पर्वतांश्च । ८ धनुषा प्रचण्डौ दोदण्डौ यस्य ।
■ ताङ्गकु° । * तत्र वा°, ▲धरणा°। धारणं च व्यवस्थापनम् इत्यर्थः ।

यशोऽनुरागैर्युगपद्विस्तीर्णैः ककुभोऽभितः[1] । अचचर्यच्चिरं सोऽर्धश्रीखण्डघुसृणैरिव[2] ॥ २६ ॥
तस्मिन् महीपतौ लक्ष्मीदेव्या लीलानिकेतने । गुणराशिरभूद् वास्तुदेवतेव सहोत्थितः ॥ २७ ॥
सतीनां सीमभूताभूत् सुसीमा नाम तस्य तु । सधर्मचारिणी देवकन्यासब्रह्मचारिणी ॥ २८ ॥
पाणिपादाधरेणाविःपल्लवा[3] पुष्पिता रदैः[4] । दोर्भ्यां सशाखा शुशुभे कल्पद्रुमलतेव सा ॥ २९ ॥
*नीरङ्गीच्छन्नवदना[5] पश्यन्ती भुवमेव हि । ईर्यासमितिलीनेव मन्थरं[6] सञ्चचार सा ॥ ३० ॥
तस्याः शरीरं कान्त्येव ह्रिया शीलमभूष्यत । आर्जवेन मन इव वचनं सूनृतेन च ॥ ३१ ॥
वदन्ती सातिविंशदैर्दन्तांशुभिरशोभत[7] । रजनीरमणज्योत्स्नाप्लवैरिव[8] विभावरी ॥ ३२ ॥
इतो ग्रैवेयके जीवः सोऽपराजितभूपतेः । एकाग्रत्रिंशदम्भोधिमितमायुरपूरयत् ॥ ३३ ॥
माघस्य षष्ठ्यां कृष्णायां चित्रास्थे रजनीकरे । च्युत्वा सुसीमास्वामिन्याः कुक्षाववततार च ॥ ३४ ॥
तदा मुखे प्रविशतस्तीर्थकृज्जन्मसूचकान् । चतुर्दश महास्वप्नान् सुसीमा देव्युदैक्षत ॥ ३५ ॥
वर्धमाने क्रमाद्गर्भे पद्मशय्यासु दोहदः । अभूद् देव्या देवताभिः पर्यपूर्यत तत्क्षणात् ॥ ३६ ॥
ततो नवसु मासेषु दिनेष्वर्धाष्टमेषु च । कार्तिककृष्णद्वादश्यां चन्द्रे चित्रागते सति ॥ ३७ ॥
सद्यो वक्राऽतिचाराभ्यां ग्रहेषूच्चगतेषु च । पद्मवर्णं पद्मचिह्नं सा देवी सुषुवे सुतम् ॥ ३८ ॥
षट्पञ्चाशद्दिक्कुमार्यः सूतिकर्मेत्य चक्रिरे । अथागत्य प्रभुं शक्रोऽनैषीत्स्वर्णाद्रिमूर्धनि ॥ ३९ ॥

१ दिशः । २ मिश्रितचंदनकेसरैरिव । ३ प्रकटितपल्लवा । ४ दंतैः । ५ नीरंगी सर्वाङ्गाच्छादनवस्त्रवेषः "बुर्खो" इति भाषायां प्रसिद्धः । ६ मंदं । ७ अतिनिर्मलैः । ८ चंद्रज्योत्स्नाप्रवाहैः । * नीरङ्गी शिरोऽवगुण्ठनम् भाषायाम् 'लाज–घुमटो' । ■ एकोनत्रिं° ।

शक्रोत्सङ्गस्थितं नाथमिन्द्रास्तत्राच्युतादयः । क्रमेणास्नपयन् सर्वेऽनुज्येष्ठं सोदरा इव ॥ ४० ॥
ईशानाङ्कस्थितं नाथं शक्रोऽपि हि यथाविधि । स्नपयामास पूजादि कृत्वा चेत्यभितुष्टुवे ॥ ४१ ॥
अस्मिन्नसारे संसारे मरौ सञ्चारिणां चिरात् । त्वद्दर्शनमभूद् देव ! देहभाजां सुधाप्रपा ॥ ४२ ॥
रुपेणाप्रतिरुपं[1] त्वामश्रान्तं पश्यतां सताम् । कृतार्थेयं समभवद् देवानां निर्निमेषता ॥ ४३ ॥
नित्यान्धकारे प्रद्योतः सुखं निरयिणां[2]मपि । अभूत्ते तीर्थनाथत्वरुपकस्याऽऽमुखं[3] ह्यदः ॥ ४४ ॥
पुण्यैः संसारिणां देव ! कृपासारणि वारिणा[4] । सिक्त्वा नयसि वृद्धित्वं चिराद्धर्ममहीरुहम् ॥ ४५ ॥
जगत्त्रितयनाथत्वं ज्ञानत्रितयधारिता । इदमाजन्म सिद्धं ते शीतलत्वमिवाम्भसां[*] ॥ ४६ ॥
पद्मवर्ण ! पद्मचिह्न ! पद्मगन्धिमुखानिल ! । पद्मानन[5] ! पद्माद्वैत[卐] ! पद्मासद्म ! जय प्रभो ! ॥ ४७ ॥
अपारो दुस्तरश्चायं सदा संसारसागरः । जानुदध्नोऽधुना[6] नाथ ! त्वत्प्रसादाद्भविष्यति ॥ ४८ ॥
न कल्पान्तरसाम्राज्यं नानुत्तरनिवासिताम् । वाञ्छामि किन्तु शुश्रूषां भवतः पादपद्मयोः ॥ ४९ ॥
स्तुत्वैवं नाथमादाय शक्रो द्रुतमुपेत्य च । सुसीमास्वामिनीपार्श्वे मुमोच द्यां[7] जगाम च ॥ ५० ॥
पद्मशय्यादोहदोऽस्मिन् यन्मातुर्गर्भगेऽभवत् । पद्माभश्चेत्यमुं पद्मप्रभ इत्याह्वयत् पिता ॥ ५१ ॥
लाल्यमानो द्युधात्रीभिः क्रीडन् सुरकुमारकैः । क्रमेण ववृधे स्वामी द्वितीयं वा[=]ऽऽसदद् वयः[⁂] ॥ ५२ ॥
सार्धधन्वद्विशत्युच्चः पृथूरस्को[8] बभौ प्रभुः । पद्मरागशिलाक्लृप्तक्रीडाशैल इव श्रियः ॥ ५३ ॥

१ अनुपमम् । २ नारकिणाम् । ३ आमुखं प्रथमः प्रारम्भः तीर्थनाथस्वरूपनाटकस्य प्रारम्भिकं फलम् । ४ कृपैव सारणिः तस्या वारि तेन । ५ कमलयुक्तलक्ष्म्याः गृह । ६ जानुप्रमाणः । ७ स्वर्गम् । ८ विशालवक्षाः । * वाम्भसः संवृ। सङ्घ। = चाभवद्° । 卐 अद्वैतेन पद्मरुपाभेदेन सर्वत्र पद्ममयत्वात् ॥ ⁂ द्वितीयं वयः– यौवनम् ।

तित्यक्षुरपि संसारं स्वामी लोकानुवर्तनात्[1] । मातापित्रनुरोधाच्च चक्रे दारपरिग्रहम् ॥ ५४ ॥
जन्मतः पूर्वलक्षेषु गतेष्वर्धाष्टमेष्वथ । उपरोधात्[2] पितुः स्वामी राज्यभारमुपाददे ॥ ५५ ॥
राज्यं च पालयन् सार्धां पूर्वलक्षैकविंशतिम् । तथा षोडश पूर्वाङ्गान्यत्यक्रामज्जगत्पतिः ॥ ५६ ॥
भवपारं जिगमिषुः स्वामी लोकान्तिकामरैः[3] । दीक्षायै प्रेरितो गत्यै पथिकः शकुनैरिव ॥ ५७ ॥
ददौ च वार्षिकं दानं ददतश्च प्रभोर्वसु । कुबेरप्रेरिताः सन्तो जृम्भकाः[4] पर्यपूरयन् ॥ ५८ ॥
अथेन्द्रभूपैर्विहिताभिषेकः शिबिकां प्रभुः । आरुह्य निर्वृतिकरां[5] सहस्राम्रवणं ययौ ॥ ५९ ॥
चित्रायां कार्तिके कृष्णत्रयोदश्यां च षष्ठकृत् । समं राजसहस्रेणापराह्णे प्राव्रजत् प्रभुः ॥ ६० ॥
द्वितीयदिवसे स्वामी पुरे ब्रह्मस्थलेऽकरोत् । पारणं परमान्नेन सोमदेवनृपौकसि ॥ ६१ ॥
अमरा विदधुस्तत्र पञ्चदिव्यान्यद्भुतान्यथ । स तु चक्रे नृपो रत्नपीठं यत्र स्थितो विभुः ॥ ६२ ॥
विजहार च षण्मासांश्छद्मस्थः परमेश्वरः । आगाद् भूयः सहस्राम्रवणं दीक्षैकसाक्षिकम् ॥ ६३ ॥
षष्ठेन प्रतिमास्थस्य विभोर्वटतरोस्तले । प्रणेशुर्घातिकर्माणि वातोद्धूताभ्रजालवत्[6] ॥ ६४ ॥
ततश्चैत्रस्य राकायां चन्द्रे चित्रामुपेयुषि । अम्लानं केवलज्ञानमभूत् पद्मप्रभप्रभोः ॥ ६५ ॥
सुरासुरेन्द्राः समवसरणं तत्र चक्रिरे । प्राग्द्वारा प्रविवेशाथ तत्र त्रिभुवनेश्वरः ॥ ६६ ॥
सार्धक्रोशोन्नतं चैत्यपादपं परमेश्वरः । तत्र प्रदक्षिणीचक्रे तमिव त्रिदिवेश्वरः ॥ ६७ ॥
"तीर्थाय नम" इत्येवमुच्चैरुच्चारितस्तुतिः । रत्नसिंहासने पूर्वाभिमुखो न्यषदत्प्रभुः ॥ ६८ ॥

दीक्षा
केवल-
ज्ञानं च ।

॥ ६८ ॥

१ त्यक्तुमिच्छुः । २ आग्रहात् । ३ सुरविशेषाः । ४ सुखकरं वनविशेषणमिदम् । ५ वायुनिरस्तमेघसमूहवत् । ६ शुद्धं ।
* कातिव° । • °मेषु च । 卐 ज्यं प्रपालयन् सार्धपू ।

प्रभोश्च प्रतिबिम्बानि दिक्ष्वन्यास्वपि [1]नाकिनः । तत्प्रभावेण तद्रूपनिर्विशेषाणि चक्रिरे ॥ ६९ ॥
तत्र चास्थाद्यथास्थानं श्रीमान् संघश्चतुर्विधः । स्वामिन्युत्कण्ठयोत्कण्ठः केकिव्रज इवाम्बुदे ॥ ७० ॥
अथ सौधर्मकल्पेन्द्रः प्रणम्य परमेश्वरम् । यथार्थसारया वाचा तुष्टाव स्पष्टभक्तितः ॥ ७१ ॥
निघ्नन् परीषहचमूमुपसर्गान् [2]प्रतिक्षिपन् । प्राप्तोऽसि शम[3]सौहित्यं महतां कापि वैदुषी ॥ ७२ ॥
अरक्तो भुक्तवान् मुक्तिमद्विष्टो हतवान् द्विषः । अहो ! महात्मनां कोऽपि महिमा लोकदुर्लभः ॥ ७३ ॥
सर्वथा निर्जि[4]गीषेण भीतभीतेन चागसः । त्वया जगत्त्रयं जिग्ये महतां कापि चातुरी ॥ ७४ ॥
दत्तं न किञ्चित् कस्मैचिन्नात्तं किञ्चित् कुतश्चन । प्रभुत्वं ते तथाप्येतत् कला कापि विपश्चिताम् ॥ ७५ ॥
यद्देहस्यापि दानेन सुकृतं नार्जितं परैः । उदासीनस्य तन्नाथ ! पादपीठे तवालुठत् ॥ ७६ ॥
रागादिषु नृशंसेन सर्वात्मसु कृपालुना । भीमकान्तगुणेनोच्चैः साम्राज्यं साधितं त्वया ॥ ७७ ॥
महीयसामपि महान् [6]महनीयो महात्मनाम् । अहो ! मे स्तुवतः स्वामी स्तुतेर्गोचरमागमत् ॥ ७८ ॥
सर्वे सर्वात्मनान्येषु दोषास्त्वयि पुनर्गुणाः । स्तुतिस्तवेयं चेन्मिथ्या तत्प्रमाणं सभासदः ॥ ७९ ॥
भूयो भूयो भवत्पाददर्शनं मे भवत्विति । आशंसामि जगन्नाथ ! निर्[7]वाणमपि नापरम् ॥ ८० ॥
एवं स्तुत्वा स्थिते शक्रे प्रारेभे धर्मदेशनाम् । पञ्चत्रिंशदतिशयान्वितया भगवान् गिरा ॥ ८१ ॥
[8]पारावार इवापारः संसारो घोर एष भोः ! । प्राणिनश्चतुरशीतियोनि[*]लक्षेषु पातयन् ॥ ८२ ॥

१ देवाः । २ नाशयन् । ३ शमतृप्तिम् । ४ निर्गता जिगीषा यस्य तेन । ५ गृहीतम् । ६ पूज्यः । ७ मोक्षम् । ८ समुद्रः ।
* °योन्यावर्त्तेषु । + °सारोऽप्येष एव भोः ! ।

श्रोत्रियः[1] श्वपचः[2] स्वामी पत्तिर्ब्रह्मा कृमिश्च सः । संसारनाट्ये नटवत् संसारी[3] हन्त ! चेष्टते ॥ ८३ ॥
न याति कतमां योनिं कतमां वा न मुञ्चति । संसारी कर्मसम्बन्धादवक्रयकुटीमिव[3] ॥ ८४ ॥
समस्तलोकाकाशेऽपि नानारुपैः स्वकर्मतः । वालाग्रमपि तन्नास्ति यन्न स्पृष्टं शरीरिभिः ॥ ८५ ॥
संसारिणश्चतुर्भेदाः श्वभ्रतिर्यग्नरामराः[4] । प्रायेण दुःखबहुलाः कर्मसम्बन्धबाधिताः ॥ ८६ ॥
आद्येषु त्रिषु नरकेषूष्णं शीतं परेषु च । चतुर्थे शीतमुष्णं च दुःखं क्षेत्रोद्भवं त्विदम् ॥ ८७ ॥
नरकेषूष्णशीतेषु चेत्पतेल्लोहपर्वतः । विलीयेत विशीर्येत तदा भुवमनाप्नुवन् ॥ ८८ ॥
उदीरितमहादुःखा अन्योऽन्येनासुरैश्च ते। इति त्रिविधदुःखार्त्ता वसन्ति नरकावनौ ॥ ८९ ॥
समुत्पन्ना घटीयन्त्रेष्वधार्मिकसुरैर्बलात् । आकृष्यन्ते लघुद्वारा[5] यथा सीसशलाकिका[6] ॥ ९० ॥
गृहीत्वा पाणिपादादौ वज्रकण्टकसङ्कटे । आस्फाल्यन्ते शिलापृष्ठे वासांसि रजकैरिव ॥ ९१ ॥
दारुदारं[7] विदार्यन्ते दारुणैः क्रकचैः[8] क्वचित् । तिलपेशं च पिष्यन्ते चित्रयन्त्रैः क्वचित्पुनः ॥ ९२ ॥
पिपासार्त्ताः पुनस्तप्तत्रपु-सीसकवाहिनीम्* । नदीं वैतरणीं नामावतार्यन्ते वरोकाकाः[9] ॥ ९३ ॥
छायाभिकाङ्क्षिणः क्षिप्रमसिपत्रवनं गताः । यत्र शस्त्रैः पतद्भिस्ते छिद्यन्ते तिलशोऽसकृत् ॥ ९४ ॥
संश्लेष्यन्ते च शाल्मल्यो वज्रकण्टकसङ्कटाः । तप्तायःपुत्रिकाः[10] क्वापि स्मारितान्यवधूरतम् ॥ ९५ ॥
संस्मार्य मांसलोलत्वमाश्यन्ते मांसमङ्गजम् । प्रख्याप्य मधुलौल्यं च पाय्यन्ते तापितं त्रपुः ॥ ९६ ॥

१ वेदज्ञब्राह्मणः । २ चांडालः । ३ भाटकरुपवेतनेन गृहीतं गृहम् । ४ नारकी । ५ बहूनि लघूनि छिद्राणि यस्मिन् तेन लघुच्छिद्रेण साधनेन भाषायाम् 'जतरडो' । ६ शलाकिका भाषायाम् 'सली' । ७ काष्ठदारणसदृशम् । ८ करपत्रैः । ९ दीनाः । १० मदिरासक्तत्वं । * पुनस्तत्र त्र° ।

भ्राष्ट्र[1]-कण्डू[2]-महाशूल-कुम्भीपाकादिवेदनाः । अश्रान्तमनुभाव्यन्ते भृज्यन्ते[3] च भटित्रवत् ।। ९७ ।।
छिन्नभिन्नशरीराणां भूयो मिलितवर्ष्मणाम्[4] । नेत्राद्यङ्गानि* कृष्यन्ते बककङ्कादिपक्षिभिः ।। ९८ ।।
एवं महादुःखहताः सुखांशेनापि वर्जिताः । गमयन्ति बहुं कालम् आ त्रयस्त्रिंशसागरम् ।। ९९ ।।
तिर्यग्गतिमपि प्राप्ताः सम्प्राप्यैकेन्द्रियादिताम् । तत्रापि पृथिवीकायरुपतां समुपागताः ।। १०० ।।
हलादिशस्त्रैः पाट्यन्ते मृद्यन्तेऽश्वगजादिभिः । वारिप्रवाहैः प्लाव्यन्ते दह्यन्ते च दवाग्निना ।। १०१ ।।
व्यथ्यन्ते लवणाचाम्लमूत्रादिसलिलैरपि । लवणक्षारतां प्राप्ताः क्वथ्यन्ते चोष्णवारिणि ।। १०२ ।।
पच्यन्ते कुम्भकाराद्यैः कृत्वा कुम्भेष्टकादिसात्[5] । चीयन्ते भित्तिमध्ये च नीत्वा कर्दमरुपताम् ।। १०३ ।।
केचिच्छाणैर्निधृष्यन्ते विपच्य क्षारमृत्पुटैः । टङ्काण्डकैर्विदार्यन्ते पाट्यन्तेऽद्रिसरित्प्लवैः ।। १०४ ।।
अप्कायतां पुनः प्राप्तास्ताप्यन्ते तपनांशुभिः । घनीक्रियन्ते तुहिनैः संशोष्यन्ते च पांसुभिः ।। १०५ ।।
क्षारेतररसाश्लेशाद्विपद्यन्ते परस्परम् । स्थाल्यन्तःस्था विपच्यन्ते पीयन्ते च पिपासितैः ।। १०६ ।।
तेजःकायत्वमाप्ताश्च विध्याप्यन्ते जलादिभिः । घनादिभिः प्रकुट्यन्ते ज्वाल्यन्ते चेन्धनादिभिः ।। १०७ ।।
वायुकायत्वमप्याप्ता हन्यन्ते व्यजनादिभिः । शीतोष्णादिद्रव्ययोगाद्विपद्यन्ते क्षणेक्षणे ।। १०८ ।।
प्राचीनाद्यास्तु सर्वेऽपि विराध्यन्ते परस्परम् । मुखादिवातैर्बाध्यन्ते पीयन्ते चोरगादिभिः ।। १०९ ।।
वनस्पतित्वं दशधा प्राप्ताः कन्दादिभेदतः । छिद्यन्ते वाथ भिद्यन्ते पच्यन्ते वाग्नियोगतः ।। ११० ।।
संशोष्यन्ते निपिष्यन्ते प्लुष्यन्तेऽन्योऽन्यघर्षणैः । क्षारादिभिश्च दह्यन्ते सन्धीयन्ते च भोक्तृभिः ।। १११ ।।

१ भ्राष्ट्रम् 'भट्ठि' इति भाषायाम् । २ कण्डू भ्राष्ट समानाम् । ३ भ्राष्टपात्रारोपितमांसवत् । ४ मिलितशरीराणाम् । ५ कुंभेष्टकाधीनाः ।
* ° नि क्लिश्यन्ते ।

सर्वावस्थासु खाद्यन्ते भज्यन्ते च[1] प्रभञ्जनैः । क्रियन्ते भस्मसाद् दावैरुन्मूल्यन्ते सरित्प्लवैः ।। ११२ ।।
सर्वेऽपि वनस्पतयः सर्वेषां भोज्यतां गताः । सर्वैः शस्त्रैः सर्वदानुभवन्ति क्लेशसन्ततिम् ।। ११३ ।।
द्वीन्द्रियत्वे च ताप्यन्ते पीयन्ते पूतरादयः । चूर्ण्यन्ते कृमयः पादैर्भक्ष्यन्ते चटकादिभिः ।। ११४ ।।
शङ्खादयो निखन्यन्ते निष्कृष्यन्ते जलौकसः । गण्डूपदाद्याः पात्यन्ते जठरादौषधादिभिः ।। ११५ ।।
त्रीन्द्रियत्वेऽपि सम्प्राप्ते षट्[2]पदीमत्कुणादयः । विमृद्यन्ते शरीरेण ताप्यन्ते चोष्णवारिणा ।। ११६ ।।
पिपीलिकास्तु तुद्यन्ते पादैः सम्मार्जनेन च । अदृश्यमानाः कुन्थ्वाद्या मथ्[*]यन्ते चासनादिभिः ।। ११७ ।।
चतुरिन्द्रियताभाजः सरघाभ्रमरादयः[3] । मधुभक्षैर्विराध्यन्ते[4] यष्टिलोष्टादिताडनैः ।। ११८ ।।
ताड्यन्ते तालवृन्ताद्यैर्द्रांग्दंशमशकादयः । ग्रस्यन्ते गृहगोधाद्यैर्मक्षिकामर्कटोर्णादयः[5] ।। ११९ ।।
पञ्चेन्द्रिया जलचराः खाद्यन्तेऽन्योऽन्यमुत्सुकाः । धीवरैः परिगृह्यन्ते गिल्यन्ते च बकादिभिः ।। १२० ।।
उत्कील्यन्ते त्वचयद्भिः प्राप्यन्ते च भटित्रताम्[6] । भोक्तुकामैर्विपाच्यन्ते निगाल्यन्ते वसार्थिभिः ।। १२१ ।।
स्थलचारिषु चोत्पन्ना अबला बलवत्तरैः । मृगाद्याः सिंहप्रमुखैर्मार्यन्ते मांसकाङ्क्षिभिः[7] ।। १२२ ।।
मृगयासक्तचित्तैस्तु क्रीडया मांसकाम्यया । नरैस्तत्तदुपायेन हन्यन्तेऽनपराधिनः ।। १२३ ।।
क्षुधापिपासाशीतोष्णातिभारारोपणादिना । कशाङ्कुशप्रतोदैश्च[8] वेदनां प्रसहन्त्यमी ।। १२४ ।।
खेचरास्तित्तिरिशुककपोतचटकादयः । श्येनसिञ्चानगृध्राद्यैर्ग्रस्यन्ते मांसगृध्नुभिः[9] ।। १२५ ।।

१ वायुभिः । २ यूकामत्कुणादयः । ३ मधुमक्षिकाः । ४ मधुमक्षकैः पुरुषैः । ५ मर्कट ऊर्णनाभः । ६ शूलेन संस्कृतं मांसं भटित्रं तस्य भावस्तत्ताम् । ७ "खादिभिः" इति पाठांतरम् । ८ अश्वताडनी कशा, वृषताडनः प्रतोदः । ९ मांसलोलुपैः । * मर्य्य [र्घ] न्ते ।

मांसलुब्धैः शाकुनिकैर्नानोपायप्रपञ्चतः[1] । सङ्गृह्य प्रतिहन्यन्ते नानारुपैर्विडम्बितैः[*] ।। १२६ ।।
जलाग्निशस्त्रादिभवं तिरश्चां सर्वतोभयम् । कियद्वा वर्ण्यते स्वस्वकर्मबन्धनिबन्धनम् ।। १२७ ।।
मनुष्यत्वेऽनार्यदेशे समुत्पन्नाः शरीरिणः । तत्तत्पापं प्रकुर्वन्ति यद्वक्तुमपि न क्षमम् ।। १२८ ।।
उत्पन्ना आर्यदेशेऽपि चाण्डालश्वपचादयः । तत्तत्पापं प्रकुर्वन्ति दुःखान्यनुभवन्ति च ।। १२९ ।।
आर्यदेशे समुत्पन्ना अप्यनार्यविचेष्टिताः । दुःखदारिद्र्यदौर्भाग्यनिर्दग्धा दुःखमासते ।। १३० ।।
परसम्पत्प्रकर्षेणापकर्षेण स्वसम्पदाम् । परप्रेष्यतया[2] दग्धा दुःखं जीवन्ति मानवाः ।। १३१ ।।
रुग्जरामरणैर्ग्रस्ता नीचकर्मकदर्थिताः[3] । तां तां दुःखदशां दीनाः प्रपद्यन्ते दयास्पदम् ।। १३२ ।।
जरा रुजा मृतिर्दास्यं न तथा दुःखकारणम् । गर्भे वासो यथा घोरनरके वाससन्निभः ।। १३३ ।।
सूचीभिरग्निवर्णाभिर्भिन्नस्य प्रतिरोम यत् । दुःखं नरस्याष्टगुणं तद् भवेद् गर्भवासिनः ।। १३४ ।।
योनियन्त्राद्विनिष्क्रामन् यद्दुःखं लभते भवी । गर्भवासभवात् दुःखात्तदनन्तगुणं खलु ।। १३५ ।।
बाल्ये मूत्रपूरीषाभ्यां यौवने रतचेष्टितैः[4] । वार्धके श्वासकासाद्यैर्जनो जातु न लज्जते ।। १३६ ।।
पुरीषसूकरः पूर्वं ततो मदनगर्दभः । जराजरद्गवः पश्चात् कदापि न पुमान् पुमान्[5] ।। १३७ ।।
स्याच्छैशवे मातृमुखस्तारुण्ये तरुणीमुखः । वृद्धभावे सुतमुखो मूर्खो नात्ममुखः क्वचित् ।। १३८ ।।
सेवाकर्षणवाणिज्यपाशुपाल्यादिकर्मभिः । क्षपयत्यफलं जन्म धनाशाविह्वलो जनः ।। १३९ ।।

१ पक्षिहंतृभिः । २ सेवया । ३ नीचकर्मभिर्दूषिताः । ४ मैथुनचेष्टाभिः । ५ "नान्तर्मुखः" इति पाठान्तरं । * रुपविड° ।

क्वचिच्चौर्यं क्वचिद् द्यूतं क्वचिन्नीचैर्भुजङ्गता । मनुष्याणां यथा भूयो भवभ्रमनिबन्धनम् ।। १४० ।।
सुखित्वे कामललितैर्दुःखित्वे दैन्यरोदनैः । नयन्ति जन्म मोहान्धा न पुनर्धर्मकर्मभिः ।। १४१ ।।
अनन्तकर्मप्रचयक्षयक्षममिदं क्षणात् । मानुषत्वमपि प्राप्ताः पापाः पापानि कुर्वते ।। १४२ ।।
ज्ञानदर्शनचारित्ररत्नत्रितयभाजने । मनुजत्वे पापकर्म स्वर्णभाण्डे सुरोपमम् ।। १४३ ।।
संसारसागरगतैः शमिलायुगयोगवत् । लब्धं कथञ्चिन्मानुष्यं हा ! रत्नमिव हार्यते ।। १४४ ।।
लब्धे मानुष्यके स्वर्गमोक्षप्राप्तिनिबन्धने । हा ! नरकाप्त्युपायेषु कर्मसूत्तिष्ठते जनः ।। १४५ ।।
आशास्यते यत्प्रयत्नादनुत्तरसुरैरपि । तत्सम्प्राप्तं मनुष्यत्वं पापैः पापेषु योज्यते ।। १४६ ।।
परोक्षं नरके दुःखं प्रत्यक्षं नरजन्मनि । तत्प्रपञ्चः प्रपञ्चेन किमर्थमुपवर्ण्यते ।। १४७ ।।
शोकाऽमर्षविषादेर्ष्यादैन्यादिहतबुद्धिषु । अमरेष्वपि दुःखस्य साम्राज्यमनुवर्तते ।। १४८ ।।
दृष्ट्वा परस्य महतीं श्रियं प्राग्जन्मजीवितम् । अर्जितस्वल्पसुकृतं शोचन्ति सुचिरं सुराः ।। १४९ ।।
चिराद् वा बलिनान्येन प्रतिकर्तुं तमक्षमाः । तीक्ष्णेनामर्षशल्येन दोदूयन्ते निरन्तरम् ।। १५० ।।
न कृतं सुकृतं किञ्चिदाभियोग्यं ततो हि नः । दृष्टोत्तरोत्तरश्रीका विषीदन्तीति नाकिनः ।। १५१ ।।
दृष्ट्वान्येषां विमानस्त्रीरत्नोपवनसम्पदम् । यावज्जीवं विपच्यन्ते ज्वलदीर्ष्यानलोर्मिभिः ।। १५२ ।।
हा प्राणेश ! प्रभो ! देव ! प्रसीदेति सगद्गदम् । परैर्मूषितसर्वस्वा भाषन्ते दीनवृत्तयः ।। १५३ ।।

१ अनंतकर्मणां प्रचयः समूहस्तस्य क्षये क्षमम् । २ जीवितविशेषणमिदम् । ३ दासत्वम् । * ° भ्रमिनि ।

प्राप्तेऽपि पुण्यतः स्वर्गे कामक्रोधभयातुराः । न स्वस्थतामश्नुवते सुराः कान्दर्पिकादयः[1] ।। १५४ ।।
अथ च्यवनचिह्नानि दृष्ट्वा दृष्ट्वा विमृश्य च । विलीयन्तेऽथ जल्पन्ति क्व निलीयामहे वयम् ।। १५५ ।।
तथाहि – अम्लाना अपि हि मालाः सुरद्रुमसमुद्भवाः । म्लानीभवन्ति देवानां वदनाम्भोरुहैः समम् ।। १५६ ।।
हृदयेन समं विश्वग्विश्लिष्यत्सन्धिबन्धनाः[2] । महाबलैरप्यकम्प्याः कम्पन्ते कल्पपादपाः ।। १५७ ।।
आकालप्रतिपन्नाभ्यां[3] प्रियाभ्यां च सहैव हि । श्रीह्रीभ्यां परिमुच्यन्ते[4] कृतागस इवामराः ।। १५८ ।।
अम्बरश्रीरपमला[5]* मलिनीभवति तत्क्षणात् । अप्यकस्माद्विसृमरैः[6]रघौघैर्मलिनैर्घनैः[7] ।। १५९ ।।
अदीना अपि दैन्येन विनिद्रा अपि निद्रया । आश्रीयन्ते मृत्युकाले पक्षाभ्यामिव कीटिकाः ।। १६० ।।
विषयेष्वतिरज्यन्ते न्यायधर्मविबाधया[8] । अपथ्यान्यपि यत्नेन स्पृहयन्ति मुमूर्षवः ।। १६१ ।।
नीरुजामपि भज्यन्ते सर्वाङ्गोपाङ्गसन्धयः । भाविदुर्गतिपातोत्थवेदनाविवशा इव ।। १६२ ।।
पदार्थग्रहणेऽकस्माद् भवन्त्यपटुदृष्टयः । परेषां सम्पदुत्कर्षमिव प्रेक्षितुमक्षमाः ।। १६३ ।।
गर्भवासनिवासोत्थदुःखागमभयादिव । प्रकम्पतरलैरङ्गैर्भापयन्ति परानपि ।। १६४ ।।
निश्चितच्यवनाश्चिन्हैर्लभन्ते न रतिं क्वचित् । विमाने नन्दने वाप्यामङ्गारैरिव[9] लिङ्गिता इव ।। १६५ ।।
हा प्रिया ! हा विमानानि ! हा वाप्यो हा सुरद्रुमाः । क्व दृष्टव्याः पुनर्यूयं हतदैवविवियोजिताः ? ।। १६६ ।।
अहो ! स्मितं ! सुधावृष्टिरहो ! बिम्बाधरः सुधा । अहो ! वाणी सुधावर्षिण्यहो ! कान्ता सुधामयी ।। १६७ ।।

१ कामवृद्धिकारकाः । २ विश्लिष्यंति त्रुट्यंति संधिबंधनानि येषाम् । ३ जन्मत आरभ्य प्राप्ताभ्याम् । ४ कृतापराधाः । ५ वस्त्रशोभा । ६ प्रसरद्भिः । ७ पापसमूहैः । ८ न्यायधर्मयोर्विबाधया । ९ अङ्गारैर्दग्धा इव । * ° रप्यम ।

हा रत्नघटितास्तम्भा ! हा श्रीमन्मणिकुट्टिमाः[1] । हा वेदिका रत्नमय्यः ! कस्य यास्यथ संश्रयम् ? ।। १६८ ।।
हा रत्नसोपानचिताः ! कमलोत्पलमालिनः । भविष्यन्त्युपभोगाय कस्येमाः पूर्णवापयः ? ।। १६९ ।।
हे पारिजात मन्दार ! सन्तान ! हरिचन्दन ! । कल्पद्रुम ! विमोक्तव्यः किं भवद्भिरयं जनः ? ।। १७० ।।
हहा ! स्त्रीगर्भनरके वस्तव्यमवशस्य मे । हहा ! शुचिरसास्वादः कर्तव्यो मयका मुहुः ? ।। १७१ ।।
हहा ! हा ! जठराङ्गारशकटीपाकसम्भवम्[2] । मया दुःखं विषोढव्यं बद्धेन निजकर्मणा ।। १७२ ।।
रत्नेरिव निधानानि क्व तास्ताः सुरयोषितः । क्वाशूचिस्यन्दबीभत्सा[3] भोक्तव्या नरयोषितः ।। १७३ ।।
एवं स्वर्लोकवस्तूनि स्मारं स्मारं दिवौकसः । विलपन्तः क्षणस्यान्तर्विध्यायन्ति प्रदीपवत् ।। १७४ ।।
।। नवभिः कुलकम् ।।
असारमित्थं संसारं चिन्तयित्वा विमुक्तये । प्रयतेत परिव्रज्योपायेन शुभधीर्जनः ।। १७५ ।।
भर्तुस्तया देशनया प्रतिबुद्धाः सहस्रशः । केचिदाददिरे दीक्षां सम्यक्त्वमपरे पुनः ।। १७६ ।।
सुव्रताद्या गणभृतोऽभूवन् सप्तोतरं शतम् । जग्रन्थुर्द्वादशाङ्गीं ते प्रपद्य पदवीं प्रभोः ।। १७७ ।।
देशनाविरते नाथे सुव्रतो देशनां व्यधात् । शिष्या गुरुणां कूपानामाहावा[4] इव तत्क्रियाः ।। १७८ ।।
विरते देशनातोऽस्मिन्नपि सर्वे सुरादयः । प्रणिपत्य जगन्नाथं स्थानं निजनिजं ययुः ।। १७९ ।।
तत्तीर्थजन्मा कुसुमो नीलाङ्गो मृगवाहनः । सफलं चाभयदं च बिभ्राणो दक्षिणौ करौ ।। १८० ।।

१ भूमयः । २ जठरमेव अंगारशकटी तस्याः पाकात्संभूतम् । ३ अशुचिप्रस्रवणत्वेन बीभत्साः । ४ कूपस्य समीपे तज्जलस्थापनाय रचितः गर्तः आहाव उच्यते ।

बिभ्रत्पाणी नकुलाऽक्षसूत्रिणौ दक्षिणेतरौ । सदा सन्निधिवर्त्यासीद् भर्तुः शासनदेवता ।। १८१ ।।
।। युग्मम् ।।
तथोत्पन्नाऽच्युता नाम श्यामाङ्गी नरवाहना । बिभ्राणा दक्षिणौ बाहुदण्डौ वरदपाशिनौ ।। १८२ ।।
वामौ च कार्मुकधराभयदौ बिभ्रती भुजौ । पद्मप्रभजिनेन्द्रस्याभवच्छासनदेवता ।। १८३ ।।
अमुक्तसन्निधिस्ताभ्यां विश्वानुग्रहकाम्यया । विजहार जगत्स्वामी ग्रामाकरपुरादिषु ।। १८४ ।।
साधूनां त्रीणि लक्षाणि सहस्रास्त्रिंशदेव च । साध्वीनां च चतुर्लक्षी सहस्राणि च विंशतिः ।। १८५ ।।
चतुर्दशपूर्वभृतां* द्वे सहस्रे शतत्रयम् । अवधिज्ञानवतां च सहस्राणि पुनर्दश ।। १८६ ।।
मनःपर्ययिणां त्रीणि शतान्ययुतमेव च । सहस्राणि द्वादश तु केवलज्ञानशालिनाम् ।। १८७ ।।
वैक्रियलब्धिसहस्राः षोडशाष्टोत्तरं शतम् । वादलब्धिधराणां तु सहस्रा नव षट्शती ।। १८८ ।।
श्रावकाणामुभे लक्षे षट्सप्ततिसहस्यपि । श्राविकाणां पुनः पञ्च लक्षाः पञ्च सहस्यपि ।। १८९ ।।
परिवारोऽभवद् भर्तुः केवलज्ञानकालतः । षण्मास्या षोडशाङ्गोनं पूर्वलक्षं विहारिणः ।। १९० ।।
मोक्षकालमथासन्नं विदित्वा परमेश्वरः । सम्मेताद्रिं जगामाथानशनं मासिकं व्यधात् ।। १९१ ।।
मार्गशीर्षे च कृष्णैकादश्यां चित्रास्थिते विधौ । क्षीणशेषचतुष्कर्मा सिद्धानन्तचतुष्टयः ।। १९२ ।।
मुनीनामनशनिनां शतैस्त्र्यग्रैः सहाष्टभिः । ध्यानाच्[1]चतुर्थाच्चतुर्थं पुमर्थ[2]मगमत्प्रभुः ।। १९३ ।। ।। युग्मम् ।।

१ शुक्लध्यानात् । २ मोक्षम् । * °पूर्वधरा द्वे ।

अर्धाष्टमाः पूर्वलक्षाः कौमारे षोडशाङ्गयुक् । पूर्वलक्षाणां सार्धैकविंशती राज्यपालने ॥ १९४ ॥
अङ्गैः षोडशभिर्न्यूनं पूर्वलक्षं पुनर्व्रते । इति त्रिंशत्पूर्वलक्षाण्यायुः पद्मप्रभप्रभोः ॥ १९५ ॥
सुमति स्वामिनिर्वाणान्मोक्षः पद्मप्रभप्रभोः । गतेष्वर्णवकोटीनां सहस्रेषु नवस्वभूत् ॥ १९६ ॥
इन्द्राश्चतुःषष्टिरुपेत्य तत्र प्रभोर्मुनीनामपि भक्तिभाजः ।
शरीरसंस्कारमकार्षुरुच्चैर्निर्वाणकल्याणमहोत्सवं च ॥ १९७ ॥

✣ ✣ ✣

इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये तृतीये पर्वणि पद्मप्रभस्वामिचरितवर्णनो नाम चतुर्थः सर्गः ।

पञ्चमः सर्गः ।

श्री सुपार्श्वनाथचरितम् ।

श्री सुपार्श्वजिनेन्द्रस्य पान्तु वो देशनागिरः । उद्वेलकेवलज्ञानसमुद्रस्येव वीचयः ।। १ ।।
चरितं श्रीसुपार्श्वस्य वक्ष्येऽहं सप्तमार्हतः । कुबोध[1]ध्वान्तसुदिनमशेषाणां शरीरिणाम् ।। २ ।।
धातकीखण्डद्वीपस्य प्राग्विदेहविशेषके । विजये रमणीयेऽस्ति नाम्ना क्षेमपुरी पुरी ।। ३ ।।
तत्रासीज्जगदानन्दी नन्दिषेणो नरेश्वरः । दिने[2]श्वर इव श्रीमांस्तेजसामेकमास्पदम् ।। ४ ।।
अशेषराज्यव्यापारे जागरुकस्य सर्वदा । तस्य प्रधान्यभूद् धर्मो दोर्दण्ड इव दक्षिणः ।। ५ ।।
निघ्नतः कण्टकीभूतान् जनतासुखहेतवे । तस्य कोपोऽपि धर्माय किं पुनः प्रस्तुताः क्रियाः ।। ६ ।।
अहो ! आश्चर्यमनिशं स्मृतिगोचरतां गतः । श्रीवीतरागो भगवांस्तस्य हृच्छ्[3]यतां ययौ* ।। ७ ।।
आर्त्तानामर्त्तिहरणे स शरण्यः सदाऽभवत् । स्मरातुरपरस्त्रीणां न कदापि कथञ्चन ।। ८ ।।
कालेन गच्छता सोऽथ भवोद्विग्नो महामनाः । गत्वारिदमनाचार्यान्तिके दीक्षामुपाददे ।। ९ ।।
स व्रतं पालयंस्तीक्ष्णं स्थानकैः कैश्चिदप्यथ । तीर्थकृन्नाम कर्मोपार्जयामास महामुनिः ।। १० ।।
ततो विधायानशनं समये स महा+मतिः । मृत्वा ग्रैवेयके षष्ठे महर्द्धिरमरोऽभवत् ।। ११ ।।

१ कुबोध एव ध्वांतस्तस्मिन् सुदिनं शुभदिवसः । २ सूर्यः । ३ हृदि शेत इति हृच्छ्यः तस्य भावस्तत्ता ताम् ।
* कामरूपताम् । + ° हा मुनिः । मृ ।

इतश्च जम्बूद्वीपस्यामुष्य क्षेत्रेऽत्र भारते । पुरी वाराणसीत्यस्ति काशिदेशस्य मण्डनम् ॥ १२ ॥
रत्नभित्तिषु गेहेषु तस्यामुद्योतशालिषु । अष्टप्रकारपूजायां दीपो देवाग्रतो यदि (? था)॥ १३ ॥
चैत्येषु तस्यामुद्दण्डैरदण्डोपरि चन्द्रभाः । धर्मस्यैकातपत्रस्यातपत्रश्रियमश्नुते ॥ १४ ॥
विद्याधर्यो रममाणास्तद्वप्राट्टालकोपरि । जगतीजालकटकान् विस्मृत्य सुखमासते ॥ १५ ॥
वासागारेषु कूजन्ति तस्यां पारापता निशि । रतिभर्तुः प्रबोधार्थमिव मङ्गलपाठकाः ॥ १६ ॥
सतां प्रतिष्ठाकल्पद्रुः प्रतिष्ठाभाक् सुरेन्द्रवत् । प्रतिष्ठो नाम तत्रासीन्न्यायनिष्ठो महीपतिः ॥ १७ ॥
मेरोरिव महत्त्वेनाप्रतिरुपस्य सर्वदा । तस्यैव पादच्छायायामतिष्ठदखिलं जगत् ॥ १८ ॥
श्वेतातपत्रैर्मायूरातपत्रैश्च निरन्तरैः । द्यौर्बलाकाघनाङ्केव तस्मिन् दिग्विजयिन्यभूत् ॥ १९ ॥
सोऽभूत्प्रत्यर्थिनां युद्धे न कदापि पराङ्मुखः । अर्थिनामिव निःसीमपुरुषव्रतभूषणः ॥ २० ॥
आजन्मानन्यसाहाय्यो लीलयैव महाभुजः । स सदा धारयामास लीलाकमलवन्महीम् ॥ २१ ॥
तस्य पृथ्वीपतेः पृथ्वी नाम पृथ्वीव जङ्गमा । सधर्मचारिण्यभवत् स्थैर्यादिगुणभाजनम् ॥ २२ ॥
तस्याः शीलं च रुपं च नित्यं भूषणतां ययौ । भूषणानि तु बाह्यानि भूष्यतां प्रतिपेदिरे ॥ २३ ॥
निसर्गनैर्मल्यजुषो गुणास्तस्यामनेकशः । उत्पेदिरे ताम्रपर्णीनद्यां मुक्ताकणा इव ॥ २४ ॥
लावण्यसलिलं वक्त्रनेत्रपाण्यङ्घ्रिपङ्कजम् । तद्रुपमाभाच्छ्रीदेव्याः पद्महृद इवापरः ॥ २५ ॥

१ सुवर्णदंडोपरि । २ कामस्य । ३ अनूपमस्य । ४ शत्रूणां । ५ स्वभावेन निर्मलताभाजः । ६ लक्ष्मीदेव्याः ।
* ° पत्रमायू । ■ ° तभीष ।

तीर्थकृज्जननीत्वेन भाविदासीत्वमस्तु तत् । रुपेणापि जितास्तस्या दास्योऽभूवन् सुराङ्गनाः ॥ २६ ॥
इतश्च नन्दिषेणस्य जीवो ग्रैवेयके स्थितः । षष्ठेऽपूरयदायुः स्वमष्टाविंशति सागरम् ॥ २७ ॥
च्युत्वा भाद्रपदे कृष्णाष्टम्यां राधागते विधौ[1] । स जीवो नन्दिषेणस्य पृथ्व्याः कुक्षाववातरत् ॥ २८ ॥
सुखसुप्ता निशाशेषे पृथ्वीदेवी तदैक्षत । तीर्थकृद् जन्मपिशुनान्[2] महास्वप्नांश्चतुर्दश ॥ २९ ॥
सुप्तमेकफणे पञ्चफणे नवफणेऽपि च । नागतल्पे[3] ददर्श स्वं देवी गर्भे प्रवर्धिनि ॥ ३० ॥
ज्येष्ठस्य शुद्धद्वादश्यां विशाखास्थे निशाकरे । स्वर्णवर्णं स्वस्तिकाङ्कं सुखं सा सुषुवे सुतम् ॥ ३१ ॥
जिनजन्मावधिज्ञानाज्ज्ञात्वा तत्रैत्य सत्वरम् । षट्पञ्चाशद्दिक्कुमार्यः सूतिकर्माणि चक्रिरे ॥ ३२ ॥
तथैवागत्य शक्रोऽपि समादाय जगत्पतिम् । मेरुमूर्धन्यतिपाण्डुकम्बलामगमच्छिलाम् ॥ ३३ ॥
बालधार[4] इवोत्सङ्गे निधाय परमेश्वरम् । रत्नसिंहासने तत्र निषसाद पुरन्दरः ॥ ३४ ॥
तीर्थनाथं तीर्थतोयैस्त्रिषष्टिरथ वासवाः । क्रमेणास्नपयन्नब्धिवेला इव तटाचलम् ॥ ३५ ॥
ईशानाङ्के निविश्येशं शक्रोऽप्यस्नपयद् जलैः । स्फाटिकोक्षविषाणोत्थैर्धारायन्त्रोत्थितैरिव ॥ ३६ ॥
विलिप्य पूजयित्वा च वस्त्रालङ्करणादिना । जगत्पतिमिति स्तोतुं सौधर्मेन्द्रः प्रचक्रमे ॥ ३७ ॥
अविज्ञेय[5]स्वरुपे त्वय्यर्थवादाग्रहो[6] मम । आदित्यमण्डलादाने फालदानं कपेरिव ॥ ३८ ॥
तथापि त्वत्प्रभावेण स्तोष्ये त्वां परमेश्वर ! । स्यन्दन्ते चन्द्रकान्ता हि चन्द्रकान्तिप्रभावतः ॥ ३९ ॥

१ चंद्रे । २ सूचकान् । ३ सर्पशय्यायां । ४ धरतीति धारः बालस्य धारः । ५ अविज्ञेयं स्वरुपं यस्य तस्मिन् । ६ अर्थवादस्य स्तुतेः आग्रहः ।

दत्से समस्तकल्याणैर्यत्सुखं श्वभ्रिणामपि[1] । तिर्यग्नरामराणां तत्कथं नासि सुखप्रदः ॥ ४० ॥
अप्युद्योतो जगत्त्रय्यामस्मिञ्जन्मोत्सवे तव । उदेष्यत्[2]केवलज्ञानतरणेररुणायते ॥ ४१ ॥
त्वत्प्रसादस्य सम्पर्कादिवैताः कक्कुभो[3]ऽखिलाः । प्रसादं कलयामासुरधुना परमेश्वर ! ॥ ४२ ॥
अमी च वान्ति सुखदाः पवनाः पावनाकृते[*] ! । सुखदे त्वयि नाथे हि जगतां कः प्रतीपकृत्[4] ? ॥ ४३ ॥
धिग् नः प्रमादिनो धन्यान्यासनान्यपि तानि नः । देव ! त्वज्जन्मकल्याणं चलित्वाऽज्ञापि यैः क्षणात्[5] ॥ ४४ ॥
निदानं देव ! बध्नामि निषिद्धमपि सम्प्रति । त्वद्दर्शनफलं मेऽस्तु त्वयि भक्तिर्निरन्तरा ॥ ४५ ॥
स्तुत्वैवं प्रभुमादाय शक्रः सत्वरमेत्य च । मुमोचालक्षितं पृथ्वीदेव्याः पार्श्वे यथास्थिति ॥ ४६ ॥
प्राणिनः प्रीणयन् कारामोक्षणादिभिरद्भुतैः । महोत्सवं नृपोऽकार्षीदानन्दफलपादपम् ॥ ४७ ॥
गर्भस्थेऽस्मिन्सुपार्श्वाभूज्जननी यत्ततः प्रभोः । सुपार्श्व इत्यभिधानं प्रतिष्ठः[6] प्रत्यतिष्ठिपत्[7] ॥ ४८ ॥
शक्रसङ्क्रमिताङ्गुष्ठसुधापो ववृधे प्रभुः । सुधान्धसामपि[8] वन्द्या अर्हन्तोऽस्तन्यपा यतः ॥ ४९ ॥
उत्तीर्योत्तीर्य चोत्सङ्गाच्चापलाच्छैशवोचितात् । वञ्चंवञ्चं[9] मुहुर्धात्रीश्चिक्रीडेतस्ततः प्रभुः ॥ ५० ॥
पणपूर्वं[10] क्रीडतश्च मर्त्यरुपान् सुरान् प्रभुः । जिगाय लीलया शक्ताः क्रीडायामपि केऽर्हताम् ॥ ५१ ॥
शैशवं व्यतिचक्राम क्रमेण परमेश्वरः । क्रीडन् विचित्रक्रीडाभिस्त्रियामामिव[11] कामुकः ॥ ५२ ॥
धनुःशतद्वयोत्तुङ्गः सर्वलक्षणलक्षितः । प्रपेदे यौवनं स्वामी भूषणं रुपसम्पदः ॥ ५३ ॥

१ नारकाणामपि । २ उदयं प्राप्स्यत् यत्केवलज्ञानं तदेव तरणिः सूर्यस्तस्य । ३ दिशः । ४ प्रतिकूलकृत् । ५ चकार । ६ देवानां । ७ वंचयित्वा वंचयित्वा । ८ प्रतिज्ञापूर्वकं । ९ रात्रिम् । * पवनाकृते ! । पवित्री करणार्थम् इति ।

दीक्षा ।

दाक्षिण्येन प्रभुः पित्रोर्नृपपुत्रीरुपायत[1] । अपि त्रिलोकनाथानां मान्यं हि पितृशासनम् ॥ ५४ ॥
भोग्यं कर्म क्षपयितुं रमणीभिः समं विभुः । अरंस्त भगवन्तो हि कर्मच्छेदाय तत्पराः ॥ ५५ ॥
ततो गतेषु कौमारे पूर्वलक्षेषु पञ्चसु । अभ्यर्थ्यारोपितं पित्रा प्रभुर्भूभारमुद्दधे ॥ ५६ ॥
विंशत्यब्दैः समधिकाः पूर्वलक्षाश्चतुर्दश । व्यतीयाय जगन्नाथः पृथिवीं परिपालयन् ॥ ५७ ॥
उपलक्ष्य च संसारविरक्तं स्वामिनो मनः । उपस्वाम्याययुर्ब्रह्मलोकाल्लोकान्तिकामराः[2] ॥ ५८ ॥
न बोध्यसे स्वयम्बुद्धः स्वभक्त्या स्मार्यसे पुनः । तीर्थं प्रवर्तय स्वामिन्नित्युक्त्वा ते दिवं ययुः ॥ ५९ ॥
सुपार्श्वस्वाम्यपि ततो दीक्षादानोत्सवोत्सुकः । दानचिन्तामणिर्दानं ददौ संवत्सरावधि ॥ ६० ॥
सांवत्सरिकदानान्ते वासवैश्चलितासनैः । दीक्षाभिषेको विदधे सुपार्श्वस्वामिनस्ततः ॥ ६१ ॥
अथो मनोहरां नाम नानारत्नमनोहराम् । अध्यारुरोह शिबिकां शिवंगामी[3] जगत्पतिः ॥ ६२ ॥
अन्वीयमानो[4] भगवान् सुरासुरनरेश्वरैः । सहस्राम्रवणं नाम जगामोपवनोत्तमम् ॥ ६३ ॥
त्रिजगद्भूषणं स्वामी तत्रौज्झद्भूषणादिकम् । शक्रन्यस्तं देवदूष्यं स्कन्धदेशे दधार च ॥ ६४ ॥
ज्येष्ठशुद्धत्रयोदश्यां राधायां पश्चिमेऽहनि । समं नृपसहस्रेण षष्ठेन प्राव्रजत्प्रभुः ॥ ६५ ॥
मनःपर्ययमुत्पेदे तुर्यं ज्ञानं जगत्पतेः । नारकाणामपि तदा सुखं क्षणमजायत ॥ ६६ ॥
पाटलीखण्डनगरे महेन्द्रनृपसद्मनि । द्वितीयेऽह्नि प्रभुश्चक्रे परमान्नेन पारणम् ॥ ६७ ॥
विदधुर्वसुधारादि देवाश्चाद्भुतपञ्चकम् । रत्नपीठं महेन्द्रस्तु यत्र तस्थौ जगत्पतिः ॥ ६८ ॥

१ परिणिनाय । २ स्वामिनः समीपम् । ३ शिवं मोक्षं गच्छतीति अथवा शिवं गमिष्यतीति भविष्यदर्थे । ४ अनुगम्यमानः ।

जयन् परीषहचमूतापं[1] गिरिरिवाभवत् । निराकाङ्क्षः शरीरेऽपि समः स्वर्णतृणादिषु ॥ ६९ ॥
एकाकी मौननिरतो नित्यमेकान्तनित्यदृक् । विविधाभिग्रहरतोऽनासीनो* निर्भयः स्थिरः ॥ ७० ॥
विविधाः प्रतिमाः कुर्वंश्छद्मस्थो ध्यानमास्थितः । नव मासान् जगन्नाथो विजहार वसुन्धराम् ॥ ७१ ॥
॥ त्रिभिर्विशेषकम् ॥
विहरंश्चाययौ भूयः सहस्राम्रवणं प्रभुः । शिरीषमूले षष्ठेन तत्रास्थात्प्रतिमाधरः ॥ ७२ ॥
द्वितीयशुक्लध्यानान्ते वर्तमानो जगद्गुरुः । संसारस्येव मर्माणि घातिकर्माण्यघातयत् ॥ ७३ ॥
फाल्गुनस्य कृष्णषष्ठ्यां विशाखास्थे निशाकरे । केवलज्ञानमुत्पेदे सुपार्श्वस्वमिनस्तदा ॥ ७४ ॥
सुरासुरेन्द्राः सद्योऽपि समागत्य नियुक्तवत्[2] । चक्रुः समवसरणं स्वामिनो देशनाकृते ॥ ७५ ॥
पूर्वद्वारेण तत्राथ मोक्षद्वारं जगद्गुरुः । प्रविवेश यथार्हैस्तु द्वारैः सुरनरादयः ॥ ७६ ॥
चतुर्धन्वशताग्रैकक्रोशोच्चं चैत्यपादपम् । तत्र प्रदक्षिणीचक्रे प्रभुर्भूकल्पपादपः ॥ ७७ ॥
"तीर्थाय नम" इत्युक्त्वा तत्र सिंहासनोत्तमे । उपाविशज्जगन्नाथोऽतिशयैरुपशोभितः ॥ ७८ ॥
पृथ्वीदेव्या तदा स्वप्ने दृष्टं तादृग्महोरगम् । शक्रो विचक्रे भगवन्मूर्ध्नि छत्रमिवापरम् ॥ ७९ ॥
तदादि चाभूत्समवसरणेष्वपरेष्वपि । नाग एकफणः पञ्चफणो नवफणोऽथवा ॥ ८० ॥
स्वामिनः प्रतिरुपाणि[3] देवा दिक्ष्वपरास्वपि । विकुर्वन्ति स्म तादृशि तत्प्रभावेण भूयसा ॥ ८१ ॥
सङ्घोऽपि भगवांस्तत्र यथास्थानमवास्थित । न स्थानव्यत्ययो जातु सामान्यस्यापि पर्षदि ॥ ८२ ॥

१ परीषहाणां चमूः सेना ताम् । २ भृत्यवत् । ३ प्रतिकृतीः । * अनुपविशन् – उर्ध्वं तिष्ठन्नेव इत्यर्थः ॥

अथ सौधर्मकल्पेन्द्रः प्रणम्य परमेश्वरम् । विरचय्याञ्जलिं मूर्ध्नि स्तोतुमेवं प्रचक्रमे ॥ ८३ ॥
निःशेष[1]भुवनकोशपद्मकोशविवस्वते । तुभ्यं नमो भगवते श्रीमते सप्तमार्हते ॥ ८४ ॥
गतं दुःखेन विश्वस्याविर्भूतं च मुदा प्रभो । विश्वं तीर्थपरावृत्त्या परावृत्तमिवाधुना ॥ ८५ ॥
धर्मचक्रिंस्तव वचोरत्नदण्डेन भास्वता[2] । निर्वाणवैताढ्यगिरेर्द्वारमद्योद्घटिष्यते ॥ ८६ ॥
उन्नतस्येव मेघस्य भगवन् ! दर्शनं तव । विश्वस्य जीवलोकस्य सन्तापच्छेदनान्मुदे[3] ॥ ८७ ॥
अनंतज्ञान ! भगवन् ! देशनावचनं तव । दरिद्रैर्द्रविणंमिव[4] चिरादस्माभिराप्स्यते ॥ ८८ ॥
कृतार्था दर्शनेनापि तवाद्य वचनेन तु । विशेषतो भविष्यामो मुक्तिद्वारप्रकाशिना ॥ ८९ ॥
अनन्तदर्शनज्ञानवीर्यानन्दमयात्मने । सर्वातिशयपात्राय तुभ्यं योगात्मने नमः ॥ ९० ॥
इन्द्रादिपदवीप्राप्तिः कियदेतज्जगत्पते । तव शुश्रूषया यस्मात् त्वाद्धैरपि भूयते ॥ ९१ ॥
इति स्तुत्वा द्युसन्नाथे तूष्णीकत्वमुपेयुषि । प्रारेभे भगवानेवं सर्वज्ञो धर्मदेशनाम् ॥ ९२ ॥
आत्मनः सर्वमप्येतदन्यत् तदिह तत्कृते । कृत्वा कर्म भवाब्धौ स्वं पातयत्यबुधो जनः ॥ ९३ ॥
यत्रान्यत्वं शरीरस्य वैस[5]दृश्याच्छरीरिणः । धनबन्धुसहायानां तत्रान्यत्वं न दुर्वचम् ॥ ९४ ॥
यो देहधनबन्धुभ्यो भिन्नमात्मानमीक्षते । क्व शोकशङ्कुना तस्य हन्ता[6]ऽऽतङ्कः प्रतन्यते ? ॥ ९५ ॥

१ समग्रभुवनकोश एव पद्मकोशस्तस्मिन् विवस्वान् सूर्यः तस्मै । २ दीप्तिमता, सूर्येण च । ३ हर्षाय । ४ द्रव्यम् । ५ आत्मना वैलक्षण्यात् । ६ भयम् ।

इहान्यत्वं भवेद् भेदस्तद्वैलक्षण्यलक्षणः । आत्मदेहादिभावानां साक्षादेव प्रतीयते ॥ ९६ ॥
देहाद्या इन्द्रियग्राह्या आत्मानुभवगोचरः । तदेतेषामनन्यत्वं[1] कथं नामोपपद्यते ? ॥ ९७ ॥
आत्मदेहादिभावानां[2] यद्यन्यत्वं स्फुटं ननु । ततो देहप्रहारादौ कथमात्मा प्रपीड्यते ? ॥ ९८ ॥
सत्यं येषां शरीरादौ भेदबुद्धिर्न विद्यते । तेषां देहप्रहारादौ* वात्मपीडोपजायते ॥ ९९ ॥
ये तु देहात्मनोर्भेदं सम्यगेव प्रपेदिरे । तेषां देहप्रहारादावपि नात्मा प्रपीड्यते ॥ १०० ॥
भेदं विद्वान् न पीड्येत पितृदुःखेऽप्युपस्थिते । आत्मीयत्वाभिमानेन भृत्यदुःखेऽपि मुह्यति ॥ १०१ ॥
अस्वत्वेन गृहीतः सन् पुत्रोऽपि पर एव हि । स्वकीयत्वेन भृत्योऽपि स्वपुत्रादतिरिच्यते ॥ १०२ ॥
सम्बन्धानात्मनो जन्तुर्यावतः कुरुते प्रियान् । तावन्तो हृदये तस्य जायन्ते शोकशङ्कवः ॥ १०३ ॥
सर्वमन्यदिदं तस्माज्जानीयात्पटुधीर्जनः ■ । कस्यापि हि विनाशात्तन्न मुह्येत्तत्त्ववर्त्मनि ॥ १०४ ॥
अस्यन्[3] ममत्वमृल्लेपं तुम्बीफलमिवाचिरात् । भवं तरति शुद्धात्मा परिव्रज्याधरो नरः ॥ १०५ ॥
एवं च देशनां श्रुत्वाऽबुध्यन्त बहवो जनाः । प्रव्रज्यां जगृहुः केऽपि श्रावकत्वमथापरे ॥ १०६ ॥
विदर्भाद्या गणभृतः पञ्चनवतिरभूवन् । ते चक्रुर्द्वादशाङ्गीं च स्वामिवागनुसारतः ॥ १०७ ॥
स्वामिनो देशनान्ते च विदर्भो गणभृद्वरः । स्वाम्यंघ्रिपीठाध्यासीनो विदधे धर्मदेशनाम् ॥ १०८ ॥
विदर्भेऽपि गणधरे देशनाविरते सति । नमस्कृत्य प्रभुं जग्मुः स्वं स्वं स्थानं सुरादयः ॥ १०९ ॥

१ अभेदत्वम् । २ पूर्वपक्षोऽयम् । ३ ममत्वमेव मृद् मृत्तिका तस्या लेपम् अस्यन् – दूरी कुर्वन् ।
* दावपि पी । ■ जानन्नन्यत्र धी ° ।

तत्तीर्थजन्मा मातङ्गो नीलाङ्गो गजवाहनः । बिल्वधरं पाशधरं बिभ्राणो दक्षिणौ करौ ॥ ११० ॥
दधद्वामौ च दोर्दण्डौ नकुलाङ्कुशधारिणौ । सुपार्श्वस्वामिनः पार्श्वेऽभवच्छासनदेवता ॥ १११ ॥
तथोत्पन्ना शान्तादेवी स्वर्णरुग्गजवाहना । वरदं साक्षसूत्रं च बिभ्राणा दक्षिणौ भुजौ ॥ ११२ ॥
सशूलाभयदौ बाहू दधाना दक्षिणेतरौ । भर्तुः शासनदेव्यासीत्सदा सन्निधिवर्तिनी ॥ ११३ ॥
विजहार ततोऽन्यत्र स्वामी ग्रामपुरादिषु । बोधयन् भव्यभविनः पङ्कजानीव भास्करः ॥ ११४ ॥
साधुत्रिलक्षी साध्वीनां सहत्रिंशत्सहस्रिका । चतुर्लक्षी पूर्विणां तु सहस्रौ त्रिंशदन्वितौ ॥ ११५ ॥
सहस्राणि नव पुनरवधिज्ञानधारिणाम् । सार्धैकनवतिशती मनःपर्ययशालिनाम् ॥ ११६ ॥
एकादशसहस्राणि केवलज्ञानिनां पुनः । वैक्रियलब्धिसहस्राः पञ्चदश त्रिशत्यपि ॥ ११७ ॥
अष्टौ च वादलब्धीनां सहस्राः सचतुःशताः । द्वे लक्षे सप्तपञ्चाशत् सहस्राः श्रावकाः पुनः ॥ ११८ ॥
श्राविकाणां पञ्चलक्षी सहस्रैः सप्तभिर्वियुक्[1] । परिवारेऽभवन् भर्तुः पृथ्वीं विहरतः सतः ॥ ११९ ॥
आ केवलान्नवमास्या विंशत्यङ्ग्या च वर्जिते । पूर्वलक्षे गते स्वामी गत्वा सम्मेतपर्वतम् ॥ १२० ॥
जगत्स्वामी समं तत्र मुनीनां पञ्चभिः शतैः । तपः प्रपेदेऽनशनं सेव्यमानः सुरासुरैः ॥ १२१ ॥
॥ युग्मम् ॥
मासान्ते फाल्गुने कृष्णसप्तम्यां मूलगे विधौ । समं तैर्मुनिभिः स्वामी जगाम पदमव्ययम् ॥ १२२ ॥

१ न्यूना ।

पञ्चलक्षाणि कौमारे पृथिवीपालने पुनः । युक्ता विंशतिपूर्वाङ्गया पूर्वलक्षाश्चतुर्दश ॥ १२३ ॥
न्यूनं विंशतिपूर्वाङ्गया पूर्वलक्षं पुनर्व्रते । इत्यायुः श्रीसुपार्श्वस्य पूर्वलक्षाणि विंशतिः ॥ १२४ ॥
श्री पद्मप्रभनिर्वाणात् सुपार्श्वस्वामिनिर्वृतिः । गतेष्वर्णवकोटीनां[1] सहस्रेषु नवस्वभूत् ॥ १२५ ॥
अच्युतप्रभृतयोऽथ सुरेन्द्राः स्वामिनो मुनिजनस्य च तस्य ।
अग्निसंस्करणपूर्वमकुर्वन् मोक्षपर्वमहिमानमखर्वम् ॥ १२६ ॥

✣ ✣ ✣

इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये तृतीय पर्वणि सुपार्श्वस्वामिचरितवर्णनो नाम पञ्चमः सर्गः ।

१ सागरोपमकोटीनाम् ।

षष्ठः सर्गः ।

श्री चन्द्रप्रभस्वामिचरितम् ।

वन्दे ध्वस्तमहामोहध्वान्तामानन्ददायिनीम् । चन्द्रप्रभामिव गिरं चन्द्रप्रभजिनप्रभोः ॥ १ ॥
चरितं कीर्तयिष्यामि चन्द्रप्रभजिनेशितुः । भव्यानां भविनां मोहहिमान्यर्कातपोपमम् ॥ २ ॥
धातकीखण्डद्वीपस्य प्राग्विदेहस्य मण्डने । विजये मङ्गलावत्यामस्ति पू रत्नसञ्चया ॥ ३ ॥
पद्मो राजाऽभवत्तस्यां पद्मायाः पद्मवद्गृहम् । भोगावत्यां भोगिराज इवोर्जितपराक्रमः ॥ ४ ॥
सेव्यमानोऽपि गन्धर्वैर्दिव्यसङ्गीतकारिभिः । अत्यप्सरोभिर्वारस्त्रीजनैश्च परिवारितः ॥ ५ ॥
दिव्याङ्गरागनेपथ्यदुकूलैश्च मनोरमैः । विभूष्यमाणसर्वाङ्गश्रीविशेषोऽपि सर्वदा ॥ ६ ॥
भूमिपालैः पाल्यमानशासनोऽपि दिवानिशम् । नित्यमक्षीणकोशोऽपि सदा सुस्थप्रजोऽपि हि ॥ ७ ॥
सर्वथा दुःखलेशस्याप्यनास्पदतया स्थितः । संसारवासवैराग्यं स भेजे तत्त्वविद्वरः ॥ ८ ॥
॥ चतुर्भिः कलापकम् ॥
भवस्य छेदनायाथ गिरेरिव पविं हरिः । अग्रहीत्स परिव्रज्यां युगन्धरगुरोः पुरः ॥ ९ ॥
विविधाभिग्रहो दान्तो विहितेन्द्रियनिग्रहः । स्वविग्रहेऽप्यनाकाङ्क्षश्चिरं सोऽपालयद् व्रतम् ॥ १० ॥
महारत्नं महामूल्यैरिव स्थानैस्तु कैरपि । दुरर्जमर्जयामास तीर्थकृन्नाम कर्म सः ॥ ११ ॥

१ ध्वस्तो महामोह एव ध्वान्तो यया ताम् । २ मोह एव हिमानी तस्यां सूर्यातपसमानम् । ३ लक्ष्म्याः । ४ इंद्रः । ५ अनासक्तः ।

कालेन क्षपयित्वाऽऽयुर्व्रतद्रोः[1] प्रथमं फलम् । विमानं वैजयन्ताख्यं स जगाम महातपाः ॥ १२ ॥
इतश्च जम्बूद्वीपेऽस्मिन् क्षेत्रे च भरताभिधे । पुरी चन्द्राननेत्यस्ति क्षितेराननसन्निभा ॥ १३ ॥
तस्यामनेकरत्नाढ्या विभात्यापणवीथिका । उद्वेचिताम्भोविभवं[2] भाण्डमम्भोनिधेरिव ॥ १४ ॥
नानाकाराण्यगाराणि[3] नानावर्णानि तत्र च । अदभ्राणीव[4] सन्ध्याभ्राण्यवतीर्णानि भूतले ॥ १५ ॥
तदुद्यानेषु दृश्यन्ते चारणाः[5] प्रतिमास्थिताः । आशिरःपादनिष्कम्पाः[6] पुरुपा इव पर्वताः ॥ १६ ॥
तस्यां च वासागारेषु रात्नेषु[7] प्रतिबिम्बितैः । स्वैरेव केयमन्येति कुप्यन्ति प्रेयसि स्त्रियः ॥ १७ ॥
तस्यामासीन्महासेनः सेनाच्छन्नमहीतलः । महीपतिः पतिरपामिवाधृष्यशिरोमणिः ॥ १८ ॥
तद्विक्रमस्य समभूद्भक्तो भृत्य इवानिशम् । प्रतापस्तत्क्रियां कुर्वन्नुर्वीविजयलक्षणम् ॥ १९ ॥
अलङ्घ्यशासने तस्मिन् शासत्यवनिमण्डलम् । अभूदाजन्मविरतः परस्वहरणे जनः ॥ २० ॥
अलब्धमध्योऽब्धिरिव शशीवातिमनोरमः । कल्पद्रुरिव दानेन्द्र इवाधीशश्च सोऽभवत् ॥ २१ ॥
कपाटपृथुले तस्योरःस्थलेऽनन्यमानसा । हंसीव गङ्गापुलिने रमा रेमे निरन्तरम् ॥ २२ ॥
तस्यासील्लक्ष्मणा नाम पत्नी सम्पूर्णलक्षणा । मुखलक्ष्म्यातिहारिण्या विजेत्री शशलक्ष्मणः[8] ॥ २३ ॥
लावण्यपुरमसमं सर्वाङ्गीणं दधत्यपि । पीयूषमेव सावर्षदृशापि च गिरापि[9] च ॥ २४ ॥
सा स्थलाम्भोरुहाणीव विकचानि पदे पदे । पादाभ्यां रोपयामास विचरन्त्यतिमन्थरम् ॥ २५ ॥

१ व्रतवृक्षस्य । २ उद्वेचितोऽधिकवृद्धः अम्भोविभवो यस्य । ३ गृहाणि । ४ अनल्पानि । ५ गगनचारिमुनयः । ६ शिरसः आरभ्य पादपर्यन्तं कंपरहिताः । ७ रत्नमयेषु । ८ चंद्रस्य । ९ अतिमन्दम् ।

तस्या भ्रुवोश्च गत्यां च कौटिल्यं न तु चेतसि । मध्यप्रदेशे तुच्छत्वं न पुनर्मतिसम्पदि ॥ २६ ॥
तस्या गुणचमूं सर्वामपि सर्वातिशायिनीम् । अलञ्चकार सेनानीरिव शीलगुणो महान् ॥ २७ ॥
इतश्च वैजयन्तस्थः स जीवः पद्मभूपतेः । त्रयस्त्रिंशत्पयोराशिसङ्ख्यमायुरपूरयत् ॥ २८ ॥
च्युत्वा च लक्ष्मणादेव्याः कुक्षाववतार सः । चैत्रस्य कृष्णपञ्चम्यामनुराधागते विधौ ॥ २९ ॥
तदानीं लक्ष्मणादेवी तीर्थकृज्जन्मसूचकान् । चतुर्दश महास्वप्नान् सुखसुप्ता निरैक्षत ॥ ३० ॥
तं रत्नं रत्नगर्भेव[1] रत्नसर्वस्वमुज्वलम् । सुखेन धारयामास लक्ष्मणादेव्यलक्षितम् ॥ ३१ ॥
पौषस्य कृष्णद्वादश्यामनुराधास्थिते विधौ । चन्द्राङ्कं चन्द्रवर्णं च सुतरत्नमसूत सा ॥ ३२ ॥
तदा चासनम्पेन ज्ञात्वा जन्माष्टमार्हतः । सूतिकाकर्म चक्रुः षट्पञ्चाशद्दिक्कुमारिकाः[2] ॥ ३३ ॥
जन्मस्नात्रोत्सवं चक्रे मुदा सौधर्मवासवः । अनैषीन्मेरुशिरसि स्वामिनं सुमनोवृतः[2] ॥ ३४ ॥
अतिपाण्डुकम्बलायां शिलायां परमेश्वरम् । विधायाङ्के निषसाद रत्नसिंहासने हरिः ॥ ३५ ॥
अथाच्युतप्रभृतयस्त्रिषष्टिरपि वासवाः । स्वामिनं स्नपयामासुरानुपूर्व्या[3]ल्लसन्मुदः ॥ ३६ ॥
ईशानेन्द्राङ्कपर्यङ्के[4] निवेश्य स्वामिनं ततः । शक्रोऽपि स्नपयामास वृषशृङ्गोत्थितैर्जलैः ॥ ३७ ॥
दिव्याङ्गरागनेपथ्यवस्त्रैरभ्यर्च्य भक्तितः । भगवन्तमिति स्तोतुमारेभे पाकशासनः ॥ ३८ ॥
त्वामनन्तगुणं स्तोतुं प्रवृत्तोऽस्मि हसास्पदम्[5] । आधारबुद्ध्या गगनस्योत्पाद इव टिट्टिभः ॥ ३९ ॥

१ महीव । २ देवैः परिवृतः । ३ अनुक्रमेण । ४ ईशानेंद्रस्यांक एव पर्यंकस्तस्मिन् । ५ हास्यस्थानमस्मि ।

व्यापिप्रज्ञस्त्वत्प्रभावात्क्षमोऽस्मि नु तव [1]स्तवे । दिशोऽश्नुतेऽभ्रलेशोऽपि [2]पौरस्त्यानिलसङ्गमात् [3] ॥ ४० ॥
भविनां दृष्टमात्रो वा ध्यातमात्रोऽपि वा प्रभो ! । कर्मपाशच्छेदनायापूर्वशस्त्रं किमप्यसि ॥ ४१ ॥
शुभानां कर्मणामद्य जगत्यभ्युदयः खलु । पङ्कजानामिवादित्ये त्वयि विश्वतमश्छिदि [4] ॥ ४२ ॥
निजं फलमदत्वापि गलिष्यत्यशुभं मम । शेफालिकापुष्पमिव निशाकरकराहतम् ॥ ४३ ॥
प्रव्रज्याधारि रुपं ते दूरे विश्वाभयप्रदम् । मूर्त्त्याऽनयापि भगवन् ! दुःखं हरसि जन्मिनाम् ॥ ४४ ॥
कर्माणि भवमूलानि छेत्तुमत्रागमः प्रभो ! । द्रुमानिवोन्मूलयितुं वने मत्तमतङ्गजः [5] ॥ ४५ ॥
अलङ्कारो यथा मुक्ताहारा+दिर्हृदयस्य मे । बहिरेष तथान्तस्त्वं भूयास्त्रिभुवनेश्वर ! ॥ ४६ ॥
स्तुत्वेति प्रभुमीशानादादाय च पुरन्दरः । नीत्वा च लक्ष्मणादेवीपार्श्वेऽमुञ्चद्यथाविधि ॥ ४७ ॥
महीपतिर्महासे*नोऽप्यथाकार्षीन्महोत्सवम् । अन्यत्राप्युत्सवायैव जातोऽर्हन् किं पुनर्गृहे ? ॥ ४८ ॥
गर्भस्थेऽस्मिन् मातुरासीच्चन्द्रपानाय दोहदः । चन्द्राभश्चैष इत्याह्लच्चन्द्रप्रभममुं पिता ॥ ४९ ॥
ज्योत्स्नागौरप्रभापूरपरिवेषमनोरमम् । वैजयन्तस्थितस्येव रुपं भर्तुः शिशोर्बभौ ॥ ५० ॥
लतानामिव धात्रीणामाकर्षन् पाणिपल्लवान् । दिने दिने कलभवद् [6] ववृधे परमेश्वरः ॥ ५१ ॥
अप्राप्तं देवभावेऽपि स्वेच्छाप्राप्तमिव प्रभुः । बालत्वमन्वभूज्ज्ञानत्रयभागपि मुग्धवत् ॥ ५२ ॥
नानाविधाभिः क्रीडाभिर्ललन्धे शैशवं विभुः । कथाभिरतिरम्याभिः पन्थानं पथिको यथा ॥ ५३ ॥
शिशुत्वसरितः पारं स्त्रीवशीकारकार्मणम् । प्रपेदे यौवनं स्वामी सार्धधन्वशतोन्नतिः ॥ ५४ ॥

१ स्तुतौ । २ अल्पोऽपि मेघः । ३ पूर्वदिग्वायुसंगात् । ४ विश्वस्य तमोऽज्ञानमंधकारश्च तच्छिनत्ति तस्मिन् । ५ गजबालवत् ।
+ °दि हृद° । * ° र्महसे° ।

विदन् भोगफलं कर्मादेशं पित्रोश्च पालयन् । जगत्पतिरुपायंस्तानुरुपा राजकन्यकाः ॥ ५५ ॥
पूर्वलक्षद्वये सार्धे जन्मतोऽतिगते सति । पितृभ्यामर्थितोऽत्यर्थं चतुर्विंशाङ्गसंयुताः ॥ ५६ ॥
पूर्वलक्षास्तु षट् सार्धा अनैषीत्पालयन्महीम् । अनध्यायमिवाध्याय[1]रतो दीक्षोत्सुकः प्रभुः ॥ ५७ ॥ ॥ युग्मम् ॥
आयु[2]क्तैरिव मौहू[3]र्त्तैरथ लोकान्तिकामरैः । अज्ञापि दीक्षासमयं स्वयं जानन्नपि प्रभुः ॥ ५८ ॥
आढ्यो विव्रजिषुरिव प्रविव्रजिषुरुच्चकैः । दानं प्रदातुमारेभे स्वामी संवत्सरावधि ॥ ५९ ॥
संवत्सरान्ते चलितासनैरेत्य सु[+]रेश्वरैः । दीक्षाभिषेको विदधे स्वामिनः किङ्करैरिव ॥ ६० ॥
ततो मनोरमां नाम शिबिकां श्रीमनोरमाम् । स्वाम्यारुरोह नृसुरासुरेन्द्रपरिवारितः ॥ ६१ ॥
स्तूयमानो गीयमानः प्रेक्ष्यमाणो जनैर्मुदा । सहस्राम्रवणं नामोपवनं भगवानगात् ॥ ६२ ॥
शिबिकातः समुत्तीर्य रत्नालङ्करणादिकम् । अपि रत्नत्रयं प्रेप्सुस्तत्याज परमेश्वरः ॥ ६३ ॥
पौषकृष्णत्रयोदश्यां भे[4] मैत्रेयेऽपरेऽहनि । स[■]मं नृपसहस्रेण षष्ठेन प्राव्रजत्प्रभुः ॥ ६४ ॥
मर्त्यक्षेत्रस्थितप्राणिमनोद्रव्यप्रकाशकम् । मनःपर्ययमुत्पेदे तुर्यं ज्ञानं ततः प्रभोः ॥ ६५ ॥
पद्मखण्डपुरे राज्ञः सोमदत्तस्य सद्मनि । पारणं परमान्नेन द्वितीयेऽह्नि प्रभुर्व्यधात् ॥ ६६ ॥
दिव्यं च वसुधारादिपञ्चकं विदधेऽमरैः । रत्नपीठं तेन राज्ञा त्वर्हत्पादाङ्कितावनौ ॥ ६७ ॥
हि[5]मान्याप्यपराभूतः पराभूतार्कतेजसा । अकम्पितः समीरैश्च कृतावश्या[6]यदुर्दिनैः ॥ ६८ ॥

१ अध्ययनपरः । २ प्रेरितैः । ३ ज्योतिर्विद्भिः । ४ नक्षत्रे । ५ पराभूतमर्कतेजो यया तया हिमान्या महद्भिमेनाप्यपराभूतः ।
६ कृतमवश्यायेन हिमेन दुर्दिनं यैस्तैः । विदन् भोगफलम् इत्यादिकः अयंश्लोकः संबृ. मो. नास्ति ॥
▲ अनाध्या° । असज्जाय समय इत्यर्थः + सुरासुरैः । ■ °मं मुनि सह स° ।

हैमनेन निशीथेन हिमीकृतसरोम्भसा । अखण्डमानप्रतिमः प्रतिमानविवर्जितः ॥ ६९ ॥
अरण्ये व्याघ्रसिंहादिदुःश्वापदभयानके । पुरे च श्राद्धबहुले निर्विशेषगतिस्थितिः ॥ ७० ॥
एकाकी निर्ममो मौनी निर्ग्रन्थो ध्यानतत्परः । त्रीन् मासान् विजहारोर्वीं छद्मस्थः परमेश्वरः ॥ ७१ ॥
॥ चतुर्भिः कलापकम् ॥
विहरन् भगवान् भूयः सहस्राम्रवणं ययौ । तस्थौ प्रतिमया तत्र पुन्नागस्य तरोस्तले ॥ ७२ ॥
द्वितीयशुक्लध्यानान्ते तस्थुषोऽथ जगत्पतेः । प्रणेशुर्घातिकर्माणि हिमवच्छिशिरात्यये ॥ ७३ ॥
फाल्गुनासितसप्तम्यामनुराधागते विधौ । स्वामिनः कृतषष्ठस्योत्पेदे केवलमुज्वलम् ॥ ७४ ॥
सुरासुरेन्द्राः सद्योऽपि क्षेत्रे योजनमात्रके । चक्रुः समवसरणं देशनार्थं जगद्गुरोः ॥ ७५ ॥
सुरैः संचार्यमाणानि स्वर्णाब्जानि नव क्रमात् । क्रमन्यासैः[1] पुनानस्तत्प्राग्द्वारा प्राविशत्प्रभुः ॥ ७६ ॥
तत्र चाष्टादशधनुःशतोच्चं चैत्यपादपम् । प्रभुः प्रदक्षिणीचक्रे पालयन्नार्हतीं स्थितिम् ॥ ७७ ॥
"तीर्थाय नम" इत्युच्चैर्वाचमुच्चारयन् प्रभुः । रत्नसिंहासने तत्र न्यषदत्पूर्वदिङ्मुखः ॥ ७८ ॥
प्रविश्य च यथाद्वारं यथास्थानमवास्थित । चतुर्विधोऽपि श्रीसङ्घः ससुरासुरमानुषः ॥ ७९ ॥
पञ्चाङ्गस्पृष्टभूपृष्ठः प्रणम्य परमेश्वरम् । जम्भारिर्भक्तिरभसादारेभे स्तोतुमित्यथ[2] ॥ ८० ॥
सुरासुरनरैर्मूर्ध्नि धार्यमाणमिदं प्रभो ! । शासनं ते विजयते त्रिलोकीचक्रवर्तिनः ॥ ८१ ॥
ज्ञानत्रयधरः पूर्वं मनःपर्ययभृत्ततः । केवली चाधुना दिष्ट्या दृष्टस्त्वमधिकाधिकम् ॥ ८२ ॥

---

१ पादन्यासैः । २ इंद्रः ।

तव ज्ञानमिदं नाथ ! केवलाभिधमुज्वलम् । विश्वोपकारकृज्जीयाच्छाया मार्गतरोरिव ॥ ८३ ॥
तावदेवान्धकाराणि न यावद्दिवसेश्वरः[1] । मदान्धास्तावदेवेभा यावत्पञ्चाननो[2] न हि ॥ ८४ ॥
तावदेव हि दारिद्र्यं न यावत्कल्पपादपः । तावदेव पयोदौस्थ्यं न यावद् वार्षुकोऽम्बुदः ॥ ८५ ॥
तावद्दिवससन्तापो न यावत्पूर्णचन्द्रमाः[3] । कुबोधास्तावदेवेह न यावत् त्वं निरीक्ष्यसे ॥ ८६ ॥
दृश्यसे नित्यमपि यैः सेव्यसे च शरीरिभिः । ताननुमोदयामीश ! सर्वदापि प्रमद्वरः ॥ ८७ ॥
इदानीं त्वत्प्रसादेन त्वद्दर्शनफलं मम । सम्यक्त्वमुत्तममिदं भूयादाजन्म निश्चलम् ॥ ८८ ॥
इति स्तुत्वा सुनाशीरे[4] स्थिरे सति जगद्गुरुः । प्रारेभे देशनामेवं गिरा स्तनितधीरया[5] ॥ ८९ ॥
अनन्तक्लेशकल्लोलनिलयो[6] भवसागरः । तिर्यगूर्ध्वमधो जन्तून् क्षिपत्येष प्रतिक्षणम् ॥ ९० ॥
एकं निबन्धनं तस्य क्रियते प्राणिभी[7] रतिः । अशुचौ कृमिभिरिव यदत्रापि शरीरके ॥ ९१ ॥
रसासृग्मांसमेदोऽस्थिमज्जशुक्रान्त्रवर्च्चसाम् । अशुचीनां पदं कायः शुचित्वं तस्य तत्कुतः ? ॥ ९२ ॥
नवस्रोतःस्रवद्विस्त्रसनिःस्यन्दपिच्छिले[8] । देहेऽपि शौचसङ्कल्पो महामोहविजृम्भितम्* ॥ ९३ ॥
शुक्रशोणितसम्भूतो मलनिःस्यन्दवर्द्धितः■ । गर्भे जरायुसंच्छन्नः[9] शुचिः कायः कथं भवेत् ? ॥ ९४ ॥
मातृजग्धान्नपानोत्थरसनाडीक्रमागतम् । पायंपायं विवृद्धः सन् शौचं मन्येत कस्तनोः+ ? ॥ ९५ ॥
दोषधातुमलाकीर्णं कृमिगण्डूपदास्पदम् । रोगभोगिगणैर्जग्धं शरीरं को वदेच्छुचि ? ॥ ९६ ॥

१ सूर्यः । २ सिंहः । ३ इंद्रे । ४ "मेघगभीरया" इति पाठांतरम् । ५ "अनंतक्लेशनिलयो दुःखौघो भवसागरः" इति पाठांतरम् । ६ प्राणिभिः रतिः इति पदविभागः । ७ नवसंख्याकानि यानि स्रोतांसि द्वाराणि तेभ्यः स्रवन्तो विरसस्य दुर्गन्धरसस्य निःस्यंदास्तैः पिच्छिले व्याप्ते । ८ वीर्यरजोभ्यां जातः । ९ जरायुर्गर्भावरणपदार्थः तेन छन्नः । * महन् मो । ■ मलनिष्यन्द । + स्तनौ ।

सुस्वादून्यन्नपानानि क्षीरेक्षुविकृतीरपि । भुक्तानि यत्र विष्ठायै तच्छरीरं कथं शुचि ?॥ ९७ ॥
विलेपनार्थमासक्तः सुगन्धिर्यक्षकर्दमः । मलीभवति यत्राशु क्व शौचं तत्र वर्ष्मणि ?॥ ९८ ॥
जग्ध्वा सुगन्धिताम्बूलं सुप्तो निश्युत्थितः[1] प्रगे । जुगुप्सते वक्त्रगन्धं यत्र तत्किं वपुः शुचि ?॥ ९९ ॥
स्वतःसुगन्धयो गन्धधूपपुष्पस्रगादयः । यत्सङ्गाद्यान्ति दौर्गन्ध्यं सोऽपि कायः[2] शुचीयते ॥ १०० ॥
अभ्यक्तोऽपि विलिप्तोऽपि धौतोऽपि घटकोटिभिः । न याति शुचितां कायः शुण्डाघट इवाशुचिः ॥ १०१ ॥
मृज्जलानलवातांशुस्त्रानैः शौचं वदन्ति ये । गतानुगतिकैस्तैस्तु विहितं तुषकण्डनम् ॥ १०२ ॥
तदनेन शरीरेण कार्यं मोक्षफलं तपः । क्षाराब्धे रत्नवद् धीमानसारात्सारमुद्धरेत् ॥ १०३ ॥
धर्मदेशनया भर्तुरनया च शरीरिणः । बहवः प्रत्यबुध्यन्त प्राव्रजंश्च सहस्रशः ॥ १०४ ॥
भर्तुस्त्रिनवतिर्दत्तादयो गणभृतोऽभवन् । उत्पादादित्रिपद्या ते द्वादशाङ्गीमसूत्रयन् ॥ १०५ ॥
देशनान्ते प्रभोः पादपीठस्थो गणभृद्वरः । विदधे देशनां दत्तो दत्तबोधः शरीरिणाम् ॥ १०६ ॥
तस्यापि देशनाप्रान्ते स्वं स्वं स्थानं सुरादयः । जग्मुर्नागरयुवानो वीतसंगीतका[3] इव ॥ १०७ ॥
तत्तीर्थभूर्हरिद्यक्षो विजयो हंसवाहनः । दधानो दक्षिणे चक्रं भुजे वामे तु मुद्गरम् ॥ १०८ ॥
मरालयाना[4] पीताङ्गी भृकुटी नाम देव्यपि । दधती दक्षिणौ बाहू खड्गमुद्गरधारिणौ ॥ १०९ ॥
वामौ फलकपरशुलाञ्छितौ बिभ्रती भुजौ । तदा भगवतोऽभूतामुभे शासनदेवते ॥ ११० ॥

॥ त्रिभिर्विशेषकम् ॥

१ प्रातः काले । २ मद्यकुम्भ इव । ३ समाप्तसङ्गीतकाः । ४ हंसयाना ।

अमुक्तसन्निधिस्ताभ्यां सर्वातिशयभाजनम् । व्योमेव चन्द्रो व्यहरत् पृथ्वीं चन्द्रप्रभप्रभुः ॥ १११ ॥
साधा द्विलक्षी साधूनां साध्वीलक्षत्रयी पुनः । सहस्राशीतिसहिता द्वे सहस्रे तु पूर्विणाम् ॥ ११२ ॥
शताशीतिः सावधीनां मनःपर्ययिणां तथा । तथा दशसहस्राणि केवलज्ञानधारिणाम् ॥ ११३ ॥
जातवैक्रियलब्धीनां सहस्राणि चतुर्दश । वादलब्धिमतां सप्तसहस्री षट्शतानि च ॥ ११४ ॥
सार्धे लक्षे श्रावकाणां श्राविकालक्षपञ्चकम् । सहस्रैर्नवभिर्न्यूनं परिवारोऽभवत्प्रभोः ॥ ११५ ॥
पूर्वलक्षं त्रिमासोनं चतुर्विंशाङ्गवर्जितम् । विहृत्य केवले स्वामी ययौ सम्मेतपर्वतम् ॥ ११६ ॥
समं मुनिसहस्रेण प्रपेदेऽनशनं प्रभुः । सुरासुरैः सेव्यमानो मासं चास्थात्तथाविधः ॥ ११७ ॥
सर्वयोगनिरोधेन निष्कम्पं ध्यानमास्थितः । तत्क्षणं क्षीणभवोपग्राहिकर्मचतुष्टयः ॥ ११८ ॥
नभस्यकृष्णसप्तम्यां श्रवणस्थे निशाकरे । समं तैर्मुनिभिः स्वामी जगाम परमं पदम् ॥ ११९ ॥
कौमारे पूर्वलक्षे द्वे सार्धे राज्यस्थितौ पुनः । पूर्वलक्षाः षट् च सार्धाश्चतुर्विंशाङ्गसंयुताः ॥ १२० ॥
चतुर्विंशत्यङ्गहीनं पूर्वलक्षं पुनर्व्रते । इत्यायुः पूर्वलक्षाणि दश चन्द्रप्रभप्रभोः ॥ १२१ ॥
सुपार्श्वस्वामिनिर्वाणाच्छ्रीचन्द्रप्रभनिर्वृतिः । शतेष्वर्णवकोटीनां व्यतीतेषु नवस्वभूत् ॥ १२२ ॥

इति मोक्षमुपेयुषः प्रभोर्व्रतिनां चैव शरीरसंक्रियाम् ।
विधिवद्विदधुः सुरेश्वराः पुनरेव त्रिदिवं प्रपेदिरे ॥ १२३ ॥

इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये तृतीये पर्वणि चन्द्रप्रभस्वामिचरितवर्णनो नाम षष्ठः सर्गः ।

१ क्षीणं भवोपग्राहि भवपर्यंतस्थायि कर्मचतुष्टयं यस्य सः । * °प्रभः प्र° । ■ °सार्ध द्वि° । ◆'भादरवो' इति गुर्जरे ।

सप्तमः सर्गः ।

श्रीसुविधिनाथचरितम् ।

वन्दे श्रीपुष्पदन्तस्य पुष्पदामेव निर्मलम् । जगत्त्रयशिरोवाह्यं शासनं पापनाशनम् ॥ १ ॥
नवमस्यार्हतस्तस्यानवमं[1] चरितं प्रभोः । तत्प्रभावात्प्रभविष्णुधिषणः[2] कीर्तयाम्यदः ॥ २ ॥
पुष्करवरद्वीपार्धे प्राग्विदेहेषु पुष्कले । विजये पुष्कलावत्यामस्ति पूः पुण्डरीकिणी ॥ ३ ॥
तस्यां पुर्यामभून्नाम्ना महापद्मो महीपतिः । महाहिमाद्रौ गम्भीरो महापद्म इव ह्रदः ॥ ४ ॥
आजन्मस्वीकृतस्तस्य शैशवे यौवनेऽपि च । धर्मो वपुःश्रिया सार्धमवर्धत यथोत्तरम् ॥ ५ ॥
स विरत्या विहीनेन मुहूर्तेनाप्यदूयत । धनेन वृद्धिहीनेन वृद्ध्याजीव[3] इवान्वहम् ॥ ६ ॥
धर्मकृत्यानि कुर्वाणो राज्यकृत्यानि सोऽकरोत् । वारिपाणमिवाध्वन्यस्तरन्नध्वतरङ्गिणीम्[4] ॥ ७ ॥
सम्यक् श्रावकधर्मं स निजं कुलमिवामलम् । सुचिरं पालयामास प्रमादरहितः सुधीः ॥ ८ ॥
प्रायः सन्तोषनिष्ठोऽपि न धर्मे सन्तुतोष सः । स्तोकधर्मानपि परान् मेने चाभ्यधिकान्स्वतः ॥ ९ ॥
दिव्यास्त्रमिव युत्पारे[5] भवपारयियासया । परिव्रज्यां स जग्राह जगन्नन्दगुरोः पुरः ॥ १० ॥
निर्व्यूढः[6] श्रावकधर्मे दृढं सोऽपालयद्व्रतम् । कृतसंलेखन इवानशनं मारणान्तिकम्* ॥ ११ ॥

१ निर्दोषम् । २ प्रभविष्णुः समर्था धिषणा बुद्धिर्यस्य । ३ वृद्ध्याजीवः भाषायाम् 'व्याजखाउ' । ४ जलपानम् । ५ पान्थः । ६ युद्धपारे । ७ दृढः ।
* मर° ।

एकावलीप्रभृतिभिः स तपोभिः सुदुस्तपैः । अर्हद्भक्त्यादिभिश्चोच्चैस्तीर्थकृन्नाम निर्ममे ॥ १२ ॥
एवंविधैरनुष्ठानैर्निजायुरतिवाह्य सः । विमाने वैजयन्ताख्ये महर्द्धिरमरोऽभवत् ॥ १३ ॥
इतश्च जम्बूद्वीपेऽस्मिन् भरतार्धे तु दक्षिणे । काकन्दीत्यस्ति नगरी श्रीविशेषगरीयसी ॥ १४ ॥
भान्ति तत्रौकसां मुक्तावचूलाः[1] पुष्पधन्वनः । मनस्विनीवशीकारजपमाला इवामलाः ॥ १५ ॥
तत्रायतनसङ्गीतगीतमुच्चैश्चतुर्विधम् । प्रपद्यते खेचरीणां[2] गतेः स्तम्भनमन्त्रताम् ॥ १६ ॥
उद्दण्डपुण्डरीकाढ्या विशदापां[3] जलाशयाः । व्यक्तोडुशरदभ्रां द्यामनुकुर्वन्ति तत्र च ॥ १७ ॥
दूरादप्यभिगम्यन्ते[4] नीयन्ते पाद्यपात्रताम् । प्रीण्यन्ते चोचितैरर्थैस्तस्यां गुरुवदर्थिनः ॥ १८ ॥
सुग्रीवो नाम समभूद् ग्रैवेयकमिवावनेः । ग्रैवेयकामर इव श्रिया तत्र महीपतिः ॥ १९ ॥
तस्याज्ञा नगरारण्यसागरेषु गिरिष्वपि । सिद्धमन्त्रायुधमिव न क्वापि प्रत्यहन्यत ॥ २० ॥
तस्मादद्रेरिव प्रादुर्भूता नीतितरङ्गिणी । उत्कल्लोलयशोवारिः प्रासरत्सागरावधि ॥ २१ ॥
यशोराशिपयोराशिस्तस्योर्वीशशिरोमणेः । विस्तृताः कीर्तिसरितो जग्रास सर्वभूभृताम् ॥ २२ ॥
विरामः सर्वदोषाणामभिरामामलैर्गुणैः । सर्वरामाशिरोरत्नं तस्य रामेति पत्न्यभूत् ॥ २३ ॥
निसर्ग*मानोज्ञकभूर्दृशामानन्ददायिनी । गगने चन्द्रलेखेव सैकैवाभून्महीतले ॥ २४ ॥
पक्षद्वयेन शुद्धेन राजन्ती मधुरस्वरा■ । सा पत्युर्मानसे राजहंसीवोवास सर्वदा ॥ २५ ॥

१ मौक्तिकैर्भूषितानि वस्त्रांचलानि अवचूला इति उच्यते गृहाणां ध्वजे सम्बद्धा मुक्तामयाः अधोमुखा मुक्तागुच्छा इति भवः । २ विद्याधरीणाम् । ३ निर्मलजलाः । ४ यत्र दातारः याचकानां सम्मुखं गच्छन्ति । * °र्गमनो । ■ °रा / स्वप° ।

रतिर्न रतिमन्वाप न प्रीतिः प्रीतिमाययौ । रुपेणाप्रतिरुपेण भृशं तस्याः पराजिता ॥ २६ ॥
सुग्रीवनृपतेस्तस्याश्चान्योऽन्यमनुरुपयोः । क्रीडतोरगमत्कालो रोहिणीशशिनोरिव ॥ २७ ॥
इतश्च वैजयन्तस्थो महापद्मस्य भूपतेः । जीवोऽपूरयदायुः स्वं त्रयस्त्रिंशतमर्णवान् ॥ २८ ॥
फाल्गुनासितनवम्यां मूलस्थे रजनीकरे । च्युत्वा ततस्तस्य जीवो रामाकुक्षाववातरत् ॥ २९ ॥
ददर्श च तदा देवी महास्वप्नांश्चतुर्दश । गजादींस्तीर्थकृज्जन्मपिशुनान् विशतो मुखे ॥ ३० ॥
जगदाधारहेतुं तं देवी गर्भं दधार सा । क्रीडन्तं मत्तकलभं निम्नगेव हिमाद्रिजा ॥ ३१ ॥
अथ मार्गशीर्षकृष्णपञ्चम्यां मूलगे विधौ । श्वेतवर्णं मकराङ्कं सुतरत्नमसूत सा ॥ ३२ ॥
षट्पञ्चाशद्दिक्कुमार्यस्ततो भोगङ्करादयः । स्वामिनः स्वामिमातुश्च सूतिकर्माणि चक्रिरे ॥ ३३ ॥
सौधर्मकल्पाधिपतिराभियोग्य इवामरः । आदाय स्वामिनं भक्त्या मेरुशैलशिरो ययौ ॥ ३४ ॥
तच्चूलाया दक्षिणतोऽतिपाण्डुकम्बलास्थिते । सिंहासन उपाविक्षच्छक्रोऽङ्कारोपितप्रभुः ॥ ३५ ॥
*अच्युताभक्तयस्तत्राच्युताद्यास्त्रिदशेश्वराः । त्रिषष्टिः स्नपयामासुः स्वामिनं तीर्थवारिभिः ॥ ३६ ॥
अथेशमैशानपतेः सौधर्मेशः समार्पयत् । रक्ष्यवस्तु स्वयामान्ते यामिकस्येव यामिकः ॥ ३७ ॥
अथ स्वामिनमीशानोत्सङ्गासीनं दिवस्पतिः । स्नपयामास वृषभश्रृङ्गोत्थैर्गन्धवारिभिः ॥ ३८ ॥
अङ्गरागैर्नवैश्चर्चां सर्वां चाभरणादिभिः । आरात्रिकं च कृत्वेति प्रभुं तुष्टाव वासवः ॥ ३९ ॥
धर्महर्म्यदृढस्तम्भ ! सम्यग्ज्ञानसुधाह्रद ! । जगदानन्दजीमूत ! जय त्रिभुवनेश्वर ! ॥ ४० ॥

१ रतिप्रीती कामपत्न्यौ । २ रोहिणी चंद्रपत्नी । ३ गंगा । ४ भृत्यसदृशकर्मकरो देवविशेषः । ५ जगदानंदे मेघसमान ।
* अच्युता भक्तितस्तत्रा इति– पाठान्तरम् ॥

जगदीश ! तव ब्रूमः किं नामातिशयान्तरम् ? । यन्माहात्म्यगुणक्रीति त्रिलोकी याति दासताम् ॥ ४१ ॥
स्वर्गराज्येऽपि न भ्राजे तथा दास्ये यथा तव । भात्यद्रौ न तथा रत्नमप्यङ्घ्रिकटके यथा ॥ ४२ ॥
शिवं यियासुरायासीर्वैजयन्ताच्छिवान्तिकात्[1] । मार्गभ्रान्तस्य लोकस्य मार्गं दर्शयितुं ध्रुवम् ॥ ४३ ॥
भरतक्षेत्रगेहस्य चिरात् त्वमसि दैवतम् । निःशङ्कं तत्र धर्मोऽद्य गृहस्थ इव नन्दतु ॥ ४४ ॥
विश्वनाथ ! त्वदीयस्य रुपस्यास्यातिशायिनः* । अवतारणतां यातु सर्वोऽयं दिविषद्गणः ॥ ४५ ॥
ज्योत्स्नायिते प्रभापूरे लीयमानानि सस्पृहम् । दिष्ट्या त्वयि चकोरन्ति[2] लोचनानि चिरात्प्रभो !॥ ४६ ॥
वासागारे सभायां वा तिष्ठतश्चलतोऽपि मे■ । त्वन्नाममन्त्रस्मरणमस्तु सर्वार्थसिद्धिदम् ॥ ४७ ॥
जिनेश्वरमिति स्तुत्वा गृहीत्वा च सुरेश्वरः । नीत्वा च रामास्वामिन्याः पार्श्वे न्यास्त[3] यथास्थिति ॥ ४८ ॥
कुशला सर्वविधिषु गर्भस्थेऽस्मिन् जनन्यभूत् । पुष्पदोहदतो दन्तोद्गामोऽस्य समभूदिति ॥ ४९ ॥
सुविधिः पुष्पदन्तश्चेत्यभिधानद्वयं विभोः । महोत्सवेन चक्राते पितरौ दिवसे शुभे ॥ ५० ॥ ॥युग्मम् ॥
जन्मतः प्रभृति स्वामी दर्शयन्नन्तरं महत् । क्रमेण ववृधे मेषसंक्रान्तेरिव[4] वासरः ॥ ५१ ॥
अवाप च जगन्नाथो यौवनं रुपपावनम् । धनुःशतोच्चः श्वेताङ्गः क्षीरोद इव मूर्तिमान् ॥ ५२ ॥
स्वामी भवविरक्तोऽपि भृशं पित्रनुरोधतः । उपयेमे राजकन्याः श्रियो विजयिनीः श्रिया ॥ ५३ ॥
गतायां पूर्वपञ्चाशत्सहस्र्यां जन्मतः प्रभुः । अलुब्धः[5] पितृदाक्षिण्याद् राज्यभारमुपाददे ॥ ५४ ॥

१ मोक्षांतिकात् । २ चकोर इवाचरंति । ३ अस्थापयत् । ४ चैत्रमासदिवसवत् । ५ अनासक्तः ।
* °पपस्याप्यति° । ■ °पि वा / त्वन्नाममन्त्रस्मरणं मेऽस्तु स° ।

साष्टाविंशतिपूर्वाङ्गं कालं तावन्तमेव हि । साम्राज्यं पालयामास विधिवत्सुविधिप्रभुः ॥ ५५ ॥
[1]इयेष च व्रतं स्वामी ते च लौकान्तिकामराः । तत्कृते प्रेरयामासुश्चाटु[2]कारा इव प्रभुम् ॥ ५६ ॥
[3]गतकामो यथाकामं चिन्तामणिरिवार्थिनाम् । ददौ दानं जगन्नाथस्ततः संवत्सरावधि ॥ ५७ ॥
पर्यन्ते तस्य दानस्य जन्मकाल इवामरैः । विधिवद् विदधे दीक्षाभिषेकः परमेशितुः ॥ ५८ ॥
ततः सूरप्रभां नामाध्यारुह्य शिबिकां प्रभुः । वृतः सुरासुरनरैः सहस्राम्रवणं ययौ ॥ ५९ ॥
मार्गकृष्णषष्ठ्यां मूलेऽपराह्णे षष्ठपूर्वकम् । समं राज्ञां सहस्रेण प्रव्रज्यामाददे प्रभुः ॥ ६० ॥
द्वितीयेऽह्नि श्वेतपुरे पुरे पुष्पनृपौकसि । चकार परमान्नेन पारणं परमेश्वरः ॥ ६१ ॥
विदधुर्वसुधारादिपञ्चकं च दिवौकसः । रत्नपीठं स्वामिपादस्थाने पुष्पनृपः पुनः ॥ ६२ ॥
एकाङ्गो [4]निर्ममोऽसङ्गः सहमानः परीषहान् । छद्मस्थो विजहाराथ चतुर्मासीं जगत्पतिः ॥ ६३ ॥
आजगाम प्रभुर्भूयः सहस्राम्रवणं वनम् । मालूर[*]तरुमूले चावतस्थे प्रतिमाधरः ॥ ६४ ॥
आरूढक्षपकश्रेणेरपूर्वकरणक्रमात् । [5]ऊर्जशुक्लतृतीयायां मूलेऽभूत् केवलं प्रभोः ॥ ६५ ॥
ततः समवसरणं व्यधीयत सुरासुरैः । पूर्वद्वारेण तत्राथ प्रविवेश जगद्गुरुः ॥ ६६ ॥
तत्र द्वादशकोदण्डशतोच्चं चैत्यपादम् । प्रभुः प्रदक्षिणीचक्रे सर्वातिशयशोभितः ॥ ६७ ॥
"तीर्थाय नम" इत्युक्त्वाध्यास्त सिंहासनं प्रभुः । प्राङ्मुखो दिक्षु चान्यासु तद्रूपाणि व्यधुः सुराः ॥ ६८ ॥
यथास्थानमथान्येऽपि निषेदुरमरादयः । प्रणम्याथ प्रभुं शक्रः स्तोतुमेवं प्रचक्रमे ॥ ६९ ॥

१ ऐच्छत् । २ प्रियवादिनः । ३ इच्छारहितः । ४ ममतारहितः । ५ कार्तिकशुक्लतृतीयायाम् । * °तलमू° ।

वीतरागोऽसि चेद्[1] रागः पाणिपादे कथं तव ? । कौटिल्यं च त्वया मुक्तं किं केशाः कुटिलास्तव ? ॥ ७० ॥
प्रजानां यदि गोप[2]स्त्वं दण्डहस्तोऽसि किं न हि ? । निःसङ्गो यदि वासि त्वं तत्किं त्रैलोक्यनाथता ? ॥ ७१ ॥
यदि त्वं निर्ममस्तत्किं सर्वत्र करुणापरः ? । त्यक्तालङ्करणश्चेत्त्वं तत् किं रत्नत्रय[3]प्रियः ? ॥ ७२ ॥
विश्वस्याप्यनुकूलश्चेत्तत् किं मिथ्यादृशां द्विषन् ? । स्वभावसरलश्चेत्त्वं छद्मस्थोऽस्थाः कथं पु[*]रा ? ॥ ७३ ॥
दयावान्यदि वासि त्वं न्यग्रहीर्मन्मथं कथम् ? । यदि च त्वं गतभयो भवान्द्रीतोऽसि तत्कथम् ? ॥ ७४ ॥
यद्युपेक्षापरोऽसि त्वं तत् किं विश्वोपकारकः ? । अदीप्तो यदि वासि त्वं दीप्तभामण्डलः कथम् ? ॥ ७५ ॥
यदि शान्तस्वभावस्त्वं तत्कुतस्तप्तवाँश्चिरम् ? । अरोषणोऽसि यदि च रुषितः कर्मणां कथम् ? ॥ ७६ ॥
अविज्ञेयस्वरुपाय महद्भ्योऽपि महीय[4]से । सिद्धानन्तचतुष्[5]काय तुभ्यं भगवते नमः ॥ ७७ ॥
विरचय्य स्तुतिमिति तूष्णीके सति वासवे । भगवान् सुविधिस्वामी विदधे देशनामिति ॥ ७८ ॥
अनन्तदुःखसम्भारनिधानं खल्वयं भवः । प्रभवश्चास्रवस्तस्य विषस्येव महोरगः ॥ ७९ ॥
मनोवाक्कायकर्माणि योगाः कर्म शुभाशुभम् । यदाश्रवन्ति जन्तुनामाश्रवास्तेन कीर्तिताः ॥ ८० ॥
मैत्र्यादिवासितं चेतः कर्म सूते शुभात्मकम् । कषायविषयाक्रान्तं वितनोत्यशुभं पुनः ॥ ८१ ॥
शुभार्जनाय निर्मिथ्[6]यं श्रुतज्ञानाश्रितं वचः । विपरीतं पुनर्ज्ञेयमशुभार्जनहेतवे ॥ ८२ ॥
शरीरेण सुगुप्तेन शरीरी चिनुते शुभम् । सततारम्भिणा जन्तुघातकेनाशुभं पुनः ॥ ८३ ॥

१ विरोधपरिहारे रागः अरुणिमा । २ गोपालः पालकश्च । ३ ज्ञानदर्शनचारित्राख्यं रत्नयत्रयम् । ४ महते पूज्याय । ५ ज्ञानदर्शनचारित्रवीर्याख्यं चतुष्टयम् । ६ सत्यम् । * पुरः ।

कषाया विषया योगाः प्रमादाविरती तथा । मिथ्यात्वमार्त्तरौद्रे चेत्यशुभं प्रति हेतवः ॥ ८४ ॥
यः कर्म[1]पुद्गलादानहेतुः प्रोक्तः स आश्रवः । कर्माणि चाष्टधा ज्ञानावरणीयादिभेदतः ॥ ८५ ॥
ज्ञानदर्शनयोस्तद्वत्तद्हेतूनां च ये किल । विघ्ननिह्नवपैशून्याशातनाघातमत्सराः[2] ॥ ८६ ॥
ते ज्ञानदर्शनावारकर्महेतव आस्रवाः । देवपूजा गुरुपास्तिः पात्रदानं दया क्षमा ॥ ८७ ॥
सरागसंयमो देशसंयमोऽकामनिर्जरा । शौचं बा[3]लतपश्चेति सद्वेद्यस्य स्युराश्रवाः ॥ ८८ ॥
दुःख[4]शोकवधास्तापाक्रन्दने परिदे[5]वनम् । स्वा[6]न्योभयस्थाः स्युरसद्वेद्यस्यामी इहाश्रवाः ॥ ८९ ॥
वीतरागे श्रुते सङ्घे धर्मे सद्गु[7]णेषु च । अव[8]र्णवादिता तीव्रमिथ्यात्वपरिणामता ॥ ९० ॥
सर्वज्ञसिद्धिदेवापह्नवो धार्मिकदूषणम् । उन्मार्गदेशनानर्थाग्रहोऽसंयतपूजनम् ॥ ९१ ॥
अस[9]मीक्षितकारित्वं गुर्वादिष्ववमान[10]ता । इत्यादयो दृष्टिमोहस्याश्रवाः परिकीर्तिताः ॥ ९२ ॥
कषायोदयतस्तीव्रपरिणामोऽयमात्मनः । चारित्रमोहनीयस्य स आश्रव उदीरितः ॥ ९३ ॥
उत्प्रा[11]सनं सकन्दर्पोपहासो हासशीलता । बहुप्रलापो दैन्योक्तिर्हास्यामी स्युराश्रवाः ॥ ९४ ॥
देशा+दिदर्शनोत्सुक्यं चित्रे रमणखेलने । पर[12]चित्तावर्जनं चेत्याश्रवाः कीर्तिता रतेः ॥ ९५ ॥
असूया पापशीलत्वं परेषां रति[13]नाशनम् । अ[14]कुशलप्रोत्साहनं चारतेराश्रवा अमी ॥ ९६ ॥

१ कर्मणः पुद्गलानां ग्रहणे । २ "पाय" इति पाठांतरं । ३ अज्ञानतपः । ४ सातावेदनीयस्य । ५ शोकः । ६ स्वस्मिन्नन्यस्मिन्नुभयस्मिन् वा स्थिताः । ७ "सर्वसुरेषु" इति वा पाठः । ८ अपवादवादित्वम् । ९ अविचारकारित्वम् । १० अवज्ञा । ११ अधिकं हास्यम् १२ परचित्तस्याकर्षणम् । १३ आनंदध्वंसः । १४ परस्याकुशले उत्साहः । + देशः प्रदेशः — अङ्गोपाङ्गानि इति ।

स्वयं भयपरीणामः परेषामथ भापनम् । त्रासनं निर्दयत्वं च भयं प्रत्याश्रवा अमी ॥ ९७ ॥
परशोकाविष्करणं स्वशोकोत्पादशोचने । रोदनादिप्रसक्तिश्च शोकस्यैते स्युराश्रवाः ॥ ९८ ॥
चतुर्वर्णस्य सङ्घस्य परिवाद[1]जुगुप्सने । सदाचारजुगुप्सा च जुगुप्सायाः स्युराश्रवाः ॥ ९९ ॥
ईर्ष्या[2]विषयगाद्‌र्ध्ये च मृषावादोऽतिवक्रता । परदाररतासक्तिः स्त्रीवेदस्याश्रवा इमे ॥ १०० ॥
स्वदारमात्रसन्तोषोऽनीर्ष्या मन्दकषायता । अवक्राचारशीलत्वं पुंवेदस्याश्रवा इति ॥ १०१ ॥
स्त्रीपुंसानङ्गसेवोग्राः कषायास्तीव्रकामता । पाखण्डस्त्रीव्रतभ्रंशः षण्ढवेदाश्रवा अमी ॥ १०२ ॥
साधूनां गर्हणा धर्मोन्मुखानां विघ्नकारिता । मधु[4]मांसाविरतानाम[3]विरत्यभिवर्णनम् ॥ १०३ ॥
विरता[5]विरतानां चान्तरायकरणं मुहुः । अचारित्र[6]गुणाख्यानं तथा चारित्रदूषणम् ॥ १०४ ॥
कषायनोकषायाणामन्यस्थानामुदीरणम् । चारित्रमोहनीयस्य सामान्येनाश्रवा अमी ॥ १०५ ॥
पञ्चेन्द्रियप्राणिवधो बह्वारम्भपरिग्रहौ । निर[7]नुग्रहता मांसभोजनं स्थिरवैरता ॥ १०६ ॥
रौद्रध्यानं मिथ्यात्वानन्तानुबन्धिकषायते । कृष्णनीलकपोताश्च लेश्या अनृतभाषणम् ॥ १०७ ॥
परद्रव्यापहरणं मुहुर्मैथुनसेवनम् । अवशेन्द्रियता चेति नरकायुष आश्रवाः ॥ १०८ ॥
उन्मार्गदेशना मार्गप्रणाशो गूढचित्तता । आर्त्तध्यानं सशल्यत्वं मायारम्भपरिग्रहौ ॥ १०९ ॥
शीलव्रते सातिचारे नीलकापोतलेश्यता । अप्रत्याख्यानकषायास्तिर्यगायुष आश्रवाः ॥ ११० ॥

१ अपवादनिंदे । २ ईर्ष्याविषयलुब्धते । ३ अविरतेः प्रशंसा । ४ देशविरतानाम् । ५ अचारित्रगुणकथनम् । ६ अनुग्रहरहितत्वम् ।
* °ख्यानाः क° ।

देशना ।

अल्पौ परिग्रहाऽऽरम्भौ सहृजे[1] मार्दवार्जवे । कापोतपीतलेश्यत्वं धर्मध्यानानुरागिता ॥ ११९ ॥
प्रत्याख्यानकषायत्वं परिणामश्च मध्यमः । संविभागविधायित्वं देवतागुरुपूजनम् ॥ ११२ ॥
पूर्वालापप्रियालापौ[2] सुखप्रज्ञापनीयता[3] । लोकयात्रासु माध्यस्थ्यं मानुषायुष आश्रवाः ॥ ११३ ॥
सरागसंयमो देशसंयमोऽकामनिर्जरा । कल्याणमित्रसम्पर्को[4] धर्मश्रवणशीलता ॥ ११४ ॥
पात्रे दानं तपः श्रद्धा रत्नत्रयाविराधना । मृत्युकाले परीणामो लेश्ययोः पद्मपीतयोः ॥ ११५ ॥
बालतपोऽग्नितोयादिसाधनोल्लम्बनानि[5] च । अव्यक्तसामायिकता[6] दैवस्यायुष आश्रवाः ॥ ११६ ॥
मनोवाक्कायवक्रत्वं परेषां विप्रतारणाम् । मायाप्रयोगो मिथ्यात्वं पैशून्यं चलचित्तता ॥ ११७ ॥
सुवर्णादिप्रतिच्छन्दकरणं[7] कूटसाक्षिता । वर्णगन्धरसस्पर्शाद्यन्यथापादनानि च ॥ ११८ ॥
अङ्गोपाङ्गच्यावनानि[8] यन्त्रपञ्जरकर्म च । कूटमानतुलाकर्मान्यनिन्दात्मप्रशंसनम् ॥ ११९ ॥
हिंसानृतस्तेयाब्रह्ममहारम्भपरिग्रहाः । परुषासभ्यवचनं शुचिवेषादिना मदः ॥ १२० ॥
मौखर्याक्रोशौ[9] सौभाग्योपघातः कार्मणक्रिया[10] । परकौतूहलोत्पादः परिहासविडम्बनैः ॥ १२१ ॥
वैश्यादीनामलङ्कारदानं दावाग्निदीपनम् । देवादिव्याजात् गन्धादिचौर्यं तीव्रकषायता ॥ १२२ ॥
चैत्यप्रतिश्रयारामप्रतिमानां[11] विनाशनम् । अङ्गारादिक्रिया चैवाशुभस्य नाम्न आश्रवाः ॥ १२३ ॥

१ मृदुता ऋजुता च । २ पूर्वालापः प्रथमतः स्वागतकथनम् । ३ सुखपृच्छाकथनम् । ४ सन्मित्रसंगतिः । ५ अग्निजलादिना मरणं तथा रज्ज्वादिना मरणम् । ६ अस्पष्टसामायिकता । ७ वस्तुसंयोगेन कूटस्वर्णादिकरणं । ८ अंगोपांगच्छेदनानि । ९ मौखर्यं वाचालत्वम् । १० मंत्रादिना वशीकरणादिक्रिया । ११ प्रतिश्रयः उपाश्रयो धर्मशाला च ।

एत एवान्यथारुपास्तथा संसारभीरुता । प्रमादहानं सद्भावार्पणं क्षान्त्यादयोऽपि च ॥ १२४ ॥
दर्शने धार्मिकाणां च सम्भ्रमः स्वागतकिया । आश्रवाः शुभनाम्नोऽथ तीर्थकृन्नाम्न आश्रवाः ॥ १२५ ॥
भक्तिरर्हत्सु सिद्धेषु गुरुषु स्थविरेषु च । बहुश्रुतेषु गच्छे च श्रुतज्ञाने तपस्विषु ॥ १२६ ॥
आवश्यके[1] व्रतशीलेष्वप्रमादो विनीतता । ज्ञानाभ्यासस्तपस्त्यागौ मुहुर्ध्यानं प्रभावना ॥ १२७ ॥
सङ्घे समाधिजननं वैयावृत्त्यं च साधुषु । अपूर्वज्ञानग्रहणं विशुद्धिर्दर्शनस्य च ॥ १२८ ॥
आद्यन्ततीर्थनाथाभ्यामेते विंशतिराश्रवाः । एको द्वौ वा त्रयः सर्वे वान्यैः स्पृष्टा जिनेश्वरैः ॥ १२९ ॥
परस्य निन्दावज्ञोपहासाः सद्गुणलोपनम् । सदसद्दोषकथनमात्मनस्तु प्रशंसनम् ॥ १३० ॥
सदसद्गुणप्रशंसा च स्वदोषाच्छादनं तथा । जात्यादिभिर्मदश्चेति नीचैर्गोत्राश्रवा अमी ॥ १३१ ॥
नीचैर्गोत्राश्रवविपर्यासो विगतगर्वता । वाक्कायचित्तैर्विनय उच्चैर्गोत्राश्रवा अमी ॥ १३२ ॥
दाने लाभे च वीर्ये च तथा भोगोपभोगयोः । सव्याजाव्याजविघ्नोऽन्तरायकर्मण आश्रवाः ॥ १३३ ॥
तदित्याश्रवजन्माऽयमपारो भवसागरः । प्रव्रज्यायानपात्रेण तरणीयो मनीषिणा ॥ १३४ ॥
कुमुदानीन्दुभासेवाबुध्यन्त बहवस्तदा । धर्मदेशनया भर्तुः प्राव्रजंश्च सहस्रशः ॥ १३५ ॥
अष्टाशीतिर्वराहाद्या आसन् गणभृतः प्रभोः । देशनान्ते च विदधे वराहो धर्मदेशनाम् ॥ १३६ ॥
गणभृद्देशनान्तेऽयुः स्वं स्वं स्थानं सुरा-ऽसुराः[*] । नन्दीश्वरस्य मध्येन कुर्वन्तोऽष्टाह्निकोत्सवम् ॥ १३७ ॥

१ प्रतिक्रमणक्रियायाम् । * सुरेश्वराः ।

तत्तीर्थजन्मा त्वजितः श्वेताङ्गः कूर्मवाहनः । बिभ्राणो दक्षिणौ बाहू मातुलिङ्गाऽक्षसूत्रिणौ ॥ १३८ ॥
वामौ तु* नकुलकुन्तधारिणौ धारयन् भुजौ । नित्यमासन्नवर्त्त्यासीद् भर्तुः शासनदेवता ॥ १३९ ॥
तथोत्पन्ना सुताराख्या गौराङ्गी वृषवाहना । वरदं साक्षसूत्रं च बिभ्राणा दक्षिणौ भुजौ ॥ १४० ॥
कलशाङ्कुशिनौ बाहू दधाना दक्षिणेतरौ । पारिपार्श्विक्यभून्नित्यं भर्तुः शासनदेवता ॥ १४१ ॥
ताभ्यामधिष्ठिताभ्यर्णः[1] कृपारसमहार्णवः । विजहार जगन्नाथो जगतीं बोधयञ्जनान् ॥ १४२ ॥
साधुद्विलक्षी साध्वीनां लक्षं विंशसहस्रयुक् । अवधिज्ञानिनामष्टौ सहस्राः सचतुःशताः ॥ १४३ ॥
सहस्रं पूर्विणां सार्धे मनःपर्ययिणां पुनः । पञ्चसप्ततिशत्येषा केवलज्ञानिनामपि ॥ १४४ ॥
जातवैक्रियलब्धीनां सहस्राणि त्रयोदश । सञ्जातवादलब्धीनां सहस्राणि षडेव हि ॥ १४५ ॥
सैकोनत्रिंशत्सहस्रा श्रावकाणां द्विलक्ष्यथ । श्राविकाणां चतुर्लक्षी द्वासप्ततिसहस्रयुक् ॥ १४६ ॥
ऊनमष्टाविंशत्यङ्ग्या चतुर्मास्या च केवलात् । पूर्वलक्षं विहरतः परिवारोऽभवत्प्रभोः ॥ १४७ ॥
॥ पञ्चभिः कुलकम् ॥
सम्मेताद्रिं ततो गत्वा ऋषिणां दशभिः शतैः । प्रपेदेऽनशनं स्वामी मासं चास्थात्तथास्थितः॥ १४८ ॥
नभस्यकृष्णनवम्यां[2] मूले[3] भे तैः महर्षिभिः । शैलेशीध्यानलीनः सन् स्वाम्यगादव्ययं पदम् ॥ १४९ ॥
कौमारे लक्षपूर्वार्धमथ राज्यस्य पालने । युक्तमष्टाविंशत्याङ्गैः पूर्वलक्षार्धमेव हि ॥ १५०॥

१ आश्रितमभ्यर्णे सामीप्यं यस्य सः । २ नभस्यः भाद्रपदः । ३ नक्षत्रे । * च ।

अष्टाविंशत्यङ्गहीनं पूर्वलक्षं पुनर्व्रते । इत्यायुः पूर्वलक्षे द्वे सुविधिस्वामिनोऽभवत् ॥ १५१ ॥
श्रीचन्द्रप्रभनिर्वाणात् सुविधिस्वामिनिर्वृतिः । सागरोपमकोटीनां गतायां नवतावभूत् ॥ १५२ ॥
विधिवदमरनाथाः कायसंस्कारपूर्वम् मुनिदशशतयुक्तस्यार्हतोऽष्टाधिकस्य ।
शिवगतिमहिमानं चक्रिरे निःसमानं तदनु सपरिवाराः स्वं स्वमीयुर्विमानम्[1] ॥ १५३ ॥
सुविधिस्वामिनिर्वाणाद्गते काले कियत्यपि । हुण्डावसर्पिणीदोषात् साधूच्छित्तिरजायत ॥ १५४ ॥
स्थविरश्रावकान् धर्ममथापृच्छन्नतद्विदः । पन्थानं पथिसम्मूढाः पथिकान् पथिका इव ॥ १५५ ॥
किञ्चित् कथयतां तेषां धर्ममात्मानुसारतः । *अर्थपूजां विदधिरे ते जनाः श्रावकोचिताम् ॥ १५६ ॥
पूजया जातगर्द्धास्ते[2] शास्त्राण्यासूत्र्य तत्क्षणम् । महाफलानि दानानि विविधान्याचचक्षिरे ॥ १५७ ॥
कन्यादानं महीदानं प्रदानमयसामपि[3] । तिलदानं च कार्पासदानं[4] दानं गवामपि ॥ १५८ ॥
स्वर्णदानं रुप्यदानं प्रदानं सद्मनामपि । अश्वदानं गजदानं शय्यादानमथापरम् ॥ १५९ ॥
दानं महाफलं सर्वमत्रामुत्र सुनिश्चितम् । एवं व्याचख्युराचार्यीभूय ते गृध्नवोऽन्वहम् ॥ १६० ॥
दानस्य चोचितं पात्रमात्मानं व्याचचक्षिरे । अपात्रं चापरं सर्वं■[5] खर्वेहादुराशयाः ॥ १६१ ॥
अप्येवं वञ्चकास्तेऽयुर्लोकानां गुरुतां तदा । निर्वृक्षे देशे क्रियते ह्येरण्डस्यापि वेदिका ॥ १६२ ॥

१ स्थानम् । २ द्रव्यादिषु लुब्धाः । ३ लोहानाम् । ४ तूलदानम् । ५ उत्कटेच्छया दुष्टाशयाः ।
* °अथ पू° । ■ °सर्वं सुखार्थेहा° ।

जज्ञे तीर्थोच्छेद एवं समन्तात् क्षेत्रेऽस्मिन्नाशीतलस्वामितीर्थम् ।
एकच्छत्रं विप्रखेटैस्तदानीं चक्रे राज्यं निश्युलूकैरिवोच्चैः ॥ १६३ ॥
मिथ्यात्वमाशान्तिजिनेशमित्थमन्येष्वभूत् षट्सु जिनान्तरेषु ।
तीर्थप्रणाशादभवच्च तेषु मिथ्यादृशामस्खलितः प्रचारः ॥ १६४ ॥

✣ ✣ ✣

इत्याचार्य श्रीहेमचंद्रविरचिते त्रिषाष्टिशलाकापुरुषचरिते महाकाव्ये तृतीये पर्वणि सुविधिस्वामिचरितवर्णनो नाम सप्तमः सर्गः ।



अष्टमः सर्गः ।

श्रीशीतलनाथचरितम् ।

श्रीशीतलजिनेन्द्रस्य पादाः शीतरुचेरिव । बोधयन्तः कुवलयं[1] सन्तु वः शिवतातयः[2] ॥ १ ॥
इदं जगत्त्रयश्रोत्रशीतलीकारकारणम् । शीतलस्य भगवतश्चरितं कीर्तयिष्यते ॥ २ ॥
पुष्करवरद्वीपार्धे प्राग्विदेहविभूषणे । विजये वत्ससंज्ञेऽस्ति सुसीमा नाम पूर्वरा ॥ ३ ॥
तस्यां पद्मोत्तराख्योऽभून्नृपः सर्वनृपोत्तरः । अनुत्तरविमानिभ्य इवैकः कश्चिदागतः ॥ ४ ॥
अलङ्घ्यशासने सर्वप्राणिनां करुणापरे । सोदराविव तत्रास्तां वीरशान्ताभिधौ रसौ ॥ ५ ॥
उपायैर्वर्धयंस्तैस्तैः सोऽनपायैरनेकशः[3] । नित्यं धर्मे जजागार भाण्डागार[4] इवेश्वरः ॥ ६ ॥
अद्य श्वो वा भृशममुं त्यजामीति स चिन्तयन् । संसारवासे विदेशस्थायीवास्थादनास्थया ॥ ७ ॥
अन्यदा राज्यमुत्सृज्य प्राज्यमप्यश्मखण्डवत्[5] । स्रस्ताघसूरिपादान्ते स प्रव्रज्यामुपाददे ॥ ८ ॥
व्रतानि निरतीचाराण्याचरन्नार्जयत् सुधीः । स तीर्थकृन्नाम कर्म स्थानकैरागमोदितैः ॥ ९ ॥
विविधाभिग्रहैस्तीव्रैस्तपोभिर्विविधैरपि । जन्मातिवाह्य सकलं सोऽभवत्प्राणतेश्वरः ॥ १० ॥
इतश्च जम्बूद्वीपेऽस्मिन् क्षेत्रे चात्रैव भारते । श्रीभद्रं भद्रिलपुरं नामास्ति प्रवरं पुरम् ॥ ११ ॥

---

१ पृथ्वीमंडलम्–पक्षे कुमुदम् । २ मोक्षजनकाः । ३ अविघ्नैः । ४ द्रव्यकोशे । ५ पाषाणवत् ।

परिखावलयेनोच्चैः प्राकारस्तत्र काञ्चनः । जम्बूद्वीपजगत्यब्धिवलयेनेव शोभते ॥ १२ ॥
सायमापणवीथीषु प्रदीप्ता दीपधोरणी[1] । तत्र संलक्ष्यते स्वर्णकण्ठिकेव पुरश्रियः ॥ १३ ॥
रुद्ध्या महत्या[2] भुजङ्गवृन्दारकविलासभूः । भोगावत्यमरावत्योरिव सारेण[3] तत्क्षणम् ॥ १४ ॥
तस्मिंश्च सत्रशालासु[4] महेभ्यैर्भोजनार्थिनः । भोज्यन्ते विविधैर्भोज्यैरुत्सवे स्वजना इव ॥ १५ ॥
तस्मिन् दृढरथो नाम नामितारातिमण्डलः[5] । अभूद्भूमण्डलं व्याप्य स्थितोऽब्धिरिव भूपतिः ॥ १६ ॥
स महर्षिगणेनापि वर्ण्यमानैर्निरन्तरम् । अधिकाधिकमव्रीड्यद् गुणैरप्यगुणैरिव ॥ १७ ॥
प्रत्यर्थिभ्यो बलादात्तामर्थिभ्यः[6] स श्रियं ददौ । अदत्तादानदोषस्य प्रायश्चित्तमिवाचरन् ॥ १८ ॥
तस्याग्रतो भूपतयः कृतभूलुठना मुहुः । सर्वाङ्गलिङ्गितभुवो भूपतित्वं चिराद्ययुः ॥ १९ ॥
ज्ञानोपदेशलेशोऽपि तस्मिन् गुरुजनैः कृतः । वितस्तार महाप्राज्ञे सलिले तैलबिन्दुवत् ॥ २०॥
मन्दाकिनीव[7] सरितां सतीनामग्रतः सती। तस्याभूद् हृदयानन्दा पत्नी नन्देति नामतः ॥ २१ ॥
मन्दमन्दपदन्यासैर्विचरन्त्या मनोरमम् । गतौ शिष्या इवैतस्या राजहंस्योऽपि लक्षिताः ॥ २२ ॥
सुगन्धिमुखनिःश्वासं यद् यत् किञ्चिदुवाच सा । प्रपेदे वचनं तत्तद्भ्रमराकृष्टिमन्त्रताम्[8] ॥ २३ ॥
रुपवत्या अभूत्तस्याः स्वस्मिन्नेवोपमानता । विहायसो महत्त्वे हि नोपमानं भवेत्परम् ॥ २४ ॥
स्यूते च स्वगुणैः स्वान्ते दृढं दृढरथस्य सा । अभूद् दृढरथोऽप्यस्या उत्कीर्ण[9] इव चेतसि ॥ २५ ॥

१ दीपश्रेणिः । २ भुजंगाःनागकुमारदेवाः पक्षे रसिकाः वृंदारका वैमानिकदेवाः पक्षे प्रधानपुरुषाश्च तेषां विलासस्थानम् । ३ नागपुरीदेवपुर्योः । ४ दानशालासु । ५ शत्रुभ्यः । ६ गृहीताम् । ७ गंगा । ८ भ्रमराणामाकर्षणे मंत्रोपमत्वम् । ९ आलिखितः ।

इतश्च प्राणते कल्पे पद्मोत्तरमहीपतेः । जीवः स्वायुरपूरिष्ट विंशतिसागरोपमान् ॥ २६ ॥
च्युत्वा [1]राधकृष्णषष्ठ्यां पूर्वाषाढास्थिते विधौ । पद्मोत्तरनृपजीवो नन्दाकुक्षाववातरत् ॥ २७ ॥
नन्दास्वामिन्यपि तदा सुखसुप्ता व्यलोकयत् । चतुर्दश महास्वप्नांस्तीर्थकृज्जन्मसूचकान् ॥ २८ ॥
माघस्य कृष्णद्वादश्यां पूर्वाषाढागते विधौ । श्रीवत्साङ्कं स्वर्णवर्णं श्रीनन्दासूत नन्दनम् ॥ २९ ॥
अष्टाधोलोकवास्तव्या उर्ध्वलोकजुषोऽष्ट च। अष्टाष्टौ रुचकदिशां चतस्रो विदिशां पुनः ॥ ३० ॥
रुपकद्वीपमध्यस्थाश्चतस्रश्चलितासनाः । षट्पंचाशद्दिक्कुमार्यः सूतिकर्मैत्य चक्रिरे ॥ ३१ ॥
शक्रोऽप्युपेत्य तत्राशु गृहीत्वा स्वामिनं स्वयम् । सुमेरुपर्वतविशरस्युपेयाय वृतोऽमरैः ॥ ३२ ॥
अतिपाण्डुकम्बलायां रत्नसिंहासनोपरि । अङ्काधिरोपितपतिर्दिव[2]स्पतिरुपाविशत् ॥ ३३ ॥
ह्रदि[3]नीनाथ–ह्रदिनी–ह्रदादिभ्यः समाहृतैः । अभ्यषिञ्चन् जलैर्नाथमथेन्द्रा अच्युतादयः ॥ ३४ ॥
ईशानाङ्के प्रभुं न्यस्य शक्रोप्यस्नपयत्ततः । विकृतस्फाटिकवृषविषाणाग्रोद्गतैर्जलैः ॥ ३५ ॥
दिव्याङ्गरागैश्चर्चित्वार्चित्वा चाभरणादिभिः । जगत्पतिमिति स्तोतुं समारेभे दिवस्पतिः ॥ ३६ ॥
जयेक्ष्वाकुकुलक्षीररत्नाकरनिशाकर ! । जगन्मोहमहानिद्राविद्रावणदिवाकर !॥ ३७ ॥
त्वामालोकयितुं त्वां च स्तोतुं त्वामर्चितुं तथा । आशंसाम्यात्मनोऽनन्ता दृशो जिह्वा भुजा अपि ॥ ३८ ॥
स्वामिन् दशमतीर्थेश तव पादारविन्दयोः । न्यस्तान्यमूनि पुष्पाणि सम्पन्नं तु फलं मयि ॥ ३९ ॥
अमन्दं दददानन्दं दुःखतापार्दितात्मनाम् । मर्त्यलोकेऽवातरस्त्वं जीमू[4]त इव नूतनः ॥ ४० ॥

१ वैशाखकृष्णषष्ठ्याम् । २ इंद्रः । ३ ह्रदिनीनाथः समुद्रः ह्रदिनी नदी । ४ मेघ इव ।

वसन्तसमयेनेव दर्शनेन तव प्रभो ! । स्युरद्य नूतनश्रीकाः प्राणिनः पादपा[1] इव ॥ ४१ ॥
त्वद्दर्शनपवित्राणि यानि तानि दिनानि मे । दिनानि शेषाणि पुनः कृष्णपक्षतमस्विनी ॥ ४२ ॥
स्यू[2]तानीवात्मना नित्यं कुकर्माणि शरीरिणाम् । त्वयाद्य विघटन्तां द्रागयस्कान्तेन लोहवत् ॥ ४३ ॥
अत्र वा दिवि वा तिष्ठंस्तिष्ठन्नन्यत्र वा क्वचित् । त्वद्वाहनमहं भूयां त्वामेव हृदये वहन् ॥ ४४ ॥
एवं दशममर्हन्तं स्तुत्वा दे[3]शशतेक्षणः । आदायानीय चामुञ्चन्नन्दापार्श्वे यथास्थिति ॥ ४५ ॥
चक्रे द्ढरथेनापि कारामोक्षादिनोत्सवः । जगतोऽपि हि मोक्षाय ता६शां जन्म पावनम् ॥ ४६ ॥
राज्ञः सन्तप्तमप्यङ्गं नन्दास्पर्शेन शीत्यभूत् । गर्भस्थेऽस्मिन्निति तस्य नाम शीतल इत्यभूत् ॥ ४७ ॥
द्युसत्कु[4]मारकैर्वेला[5]धारीन्द्रैरिव सेवितः । ववृधेऽम्भोधिवेलावज्जगन्नाथो दिने दिने ॥ ४८ ॥
शैशवं व्यत्यलङ्घिष्ट क्रमेण परमेश्वरः । शैशवाद्यौवनं चाप ग्रामात्पुरमिवाध्वगः ॥ ४९ ॥
प्रभुर्नवतिधन्वोच्चो रराजाजानुबाहुकः । पार्श्वतो लम्बमानोरुवल्लीक इव पादपः ॥ ५० ॥
विषयेषु निरीहोऽपि पितृभ्यां प्रार्थितः प्रभुः । चकार पाणिग्रहणं पिण्डादानमिव द्विपः ॥ ५१ ॥
अथ पूर्वसहस्राणां गतायां पञ्चविंशतौ । जग्राह पितृदाक्षिण्याद्राज्यं श्रीशीतलप्रभुः ॥ ५२ ॥
पञ्चाशत्पूर्वसहस्रीमपूर्वभु[6]जविक्रमः । पूर्वक्रमागतं राज्यं शशास विधिवत्प्रभुः ॥ ५३ ॥
अथ संसारसंवासाद् व्यरज्य[7]त प्रभोर्मनः । आसनानि प्रचेलुश्च लौकान्तिकदिवौकसाम् ॥ ५४ ॥

१ कृष्णपक्षरात्रिसदृशानि । २ प्रोतानि । ३ इंद्रः । ४ देवकुमारैः । ५ यथा वेलाधारी लवणसमुद्रः देवकुमारैः सेवितः ववृधे तद्वत् । ६ अपूर्वः भुजयोः विक्रमो यस्य सः । ७ विरक्तमभूत् ।

अबुध्यन्तावधिज्ञानादेवं ते त्रिदिवौकसः । जम्बूद्वीपाभिधे द्वीपे भरतार्धे च दक्षिणे ॥ ५५ ॥
दशमो भगवानर्हन् व्रतेच्छुर्वर्तते ततः । तं वयं प्रेरयामोऽद्य सदाकृत्यमिदं हि नः ॥ ५६ ॥ ॥ युग्मम् ॥
विमृश्यैवं ब्रह्मलोकात्सुराः सारस्वतादयः । एत्य विज्ञापयामासुरिति स्वामिनमानताः ॥ ५७ ॥
अरण्यस्रोतसीवास्मिंस्तीर्थाभावेन दुस्तरे । संसारे विश्वकृपया तीर्थं नाथ ! प्रवर्तय ॥ ५८ ॥
इत्युदित्वा ययुर्ब्रह्मलोकं लौकान्तिकामराः । शीतलस्वाम्यपि ददौ दानं संवत्सरावधि ॥ ५९ ॥
अन्ते च तस्य दानस्य सुरेन्द्रैश्चलितासनैः । दीक्षाकल्याणकस्नात्रं विदधे शीतलप्रभोः ॥ ६० ॥
कृताङ्गरागो भगवानामुक्तांशुकभूषणः । त्रिजगद्भूषणं नाथो दत्तबाहुर्बिडौजसा ॥ ६१ ॥
अन्यैरपि धृतच्छत्रचामरादिः सुरेश्वरैः । अध्यारुरोह शिबिकारत्नं चन्द्रप्रभाभिधम् ॥ ६२ ॥
॥ युग्मम् ॥
सुरासुरसहस्राणां सहस्रैः परिवारितः । सहस्राम्रवणं नाम स्वपुरोपवनं ययौ ॥ ६३ ॥
ततस्तितीर्षुः संसार भारवद्भूषणादिकम् । उज्झाञ्चकार झगिति प्रभुः शिवगतिप्रियः ॥ ६४ ॥
शक्रन्यस्तं देवदूष्यांशुकमंसस्थले दधत् । पञ्चभिर्मुष्टिभिः केशानुच्चखान जगत्पतिः ॥ ६५ ॥
क्षीरोदे न्यस्य तान् केशान् शक्रे पुनरुपेयुषि । निषिद्धतुमुले बद्धाञ्जलौ द्वाःस्थ इव स्थिते ॥ ६६ ॥
सुरासुरनरेन्द्राणां प्रत्यक्षमपरेऽहनि । माघस्य कृष्णद्वादश्यां पूर्वाषाढास्थिते विधौ ॥ ६७ ॥

१ पक्षे जलावतारामावेन । २ आमुक्तानि स्वीकृतानि अंशुकभूषणानि येन सः । ३ मोक्षगतिप्रियः । ४ स्कंधदेशे । * °च्छुर्यतते ।

समं नृपसहस्रेण कृतषष्ठतपाः प्रभुः । सावद्ययोगविरतिप्रतिज्ञां[1] प्रत्यपद्यत ॥ ६८ ॥
॥ त्रिभिर्विशेषकम् ॥
तुर्यं ज्ञानं प्रभोर्जज्ञे मनःपर्ययसञ्ज्ञकम् । कृत्वा प्रणामं च ययुः स्वं स्वं स्थानं सुरादयः ॥ ६९ ॥
द्वितीयेऽह्नि रिष्टपुरे पुनर्वसुनृपौकसि । पारणं परमान्नेन विदधे शीतलप्रभुः ॥ ७० ॥
चक्रे च वसुधारादिपञ्चकं विबुधैस्ततः । स्वर्णपीठं पुनस्तत्र पुनर्वसुनृपो व्यधात् ॥ ७१ ॥
विविधाभिग्रहधरः सहमानः परीषहान् । छद्मस्थतया त्रीन् मासान् व्यहार्षीच्छीतलप्रभुः ॥ ७२ ॥
सहस्राम्रवणं भूयोऽप्याजगाम जगद्गुरुः । तत्र प्रतिमया तस्थावधस्तात्प्लक्षशाखिनः ॥ ७३ ॥
भटो[2] वप्रमिवारुह्य शुक्लध्यानं द्वितीयकम् । जघान घातिकर्माणि रिपूनिव जगद्गुरुः ॥ ७४ ॥
पौषकृष्णचतुर्दश्यां पूर्वाषाढागते विधौ । केवज्ञानमुत्पेदे शीतलस्वामिनस्ततः ॥ ७५ ॥
वप्रैस्त्रिभिश्चतुर्द्वारै[3]रत्नसौवर्णराजतैः[*] । ततः समवसरणं चक्रुर्देवाऽसुरेश्वराः ॥ ७६ ॥
तत्र प्रविश्य प्राग्द्वारा प्रदक्षिण्यकरोत्प्रभुः । चैत्यवृक्षमशीत्यग्रदशधन्वशतोन्नतम् ॥ ७७ ॥
"नमस्तीर्थाये" ति वदन् पूर्वसिंहासने प्रभुः । न्यषदद् दिक्षु चान्यासु तद्रूपाण्यमरा व्यधुः ॥ ७८ ॥
तत्र तस्थुर्यथास्थानमथान्येऽप्यमरादयः । स्वामिवाचं प्रतीच्छन्तः स्तनितं बर्हिणा इव[4] ॥ ७९ ॥
स्वामिनं शीतलमथ शिरःसंस्पृष्टभूतलः । नमस्कृत्याञ्जलिधर इति वज्रधरोऽस्तवीत् ॥ ८० ॥
त्वत्पादपञ्कजनखद्युतिजालजलाप्लवैः[5] । स्नायं स्नायं पुनन्ति स्वं धन्यास्त्रिभुवनेश्वर ॥ ८१ ॥

१ प्रतिज्ञां प्रत्याख्यानम् । २ योधः । ३ रत्नसुवर्णरुप्यमयैः । ४ मेघगर्जितम् । ५ स्नात्वा स्नात्वा ।
* °तैः । समवसरणं चक्रुर्देवास्ततः सुरा-ऽसुराः ।

भास्करेणेव गगनं हंसेनेव महासरः । पार्थिवेनेव नगरं शोभते भारतं त्वया ॥ ८२ ॥
आलोकस्तिमिरेणेव सूर्यास्तेन्दूदयान्तरे[1] । मिथ्यात्वेन पराभूतो धर्मस्तीर्थद्वयान्तरे ॥ ८३ ॥
जगदन्धमिदं जज्ञे निर्विवेकविलोचनम्[2] । अपथेषु प्रववृते दिङ्मूढमिव सर्वतः ॥ ८४ ॥
अधर्मो धर्मबुध्या चादेवता देवताधिया । गुरुबुध्या चागुरवो भ्रान्तैर्जगृहिरे जनैः ॥ ८५ ॥
नरकावटपाताय[3] जगत्यस्मिन्नुपस्थिते । निसर्गकरुणाम्भोधिस्तत्पुण्यैस्त्वमवातरः ॥ ८६ ॥
मिथ्यात्वाशीविषो[4] लोके प्रभविष्णुरसौ चिरम् । तावदेव न यावत् ते प्रसरेद्वचनामृतम् ॥ ८७ ॥
तन्मिथ्यात्वापसारेण सम्यक्त्वं जगतोऽधुना । भावि प्रभो ! केवलं ते घातिकर्मक्षयादिव ॥ ८८ ॥
इत्थं स्तुत्वा स्थिते शक्रे भगवान् शीतलप्रभुः । गिरा सुधामधुरया विदधे देशनामिति ॥ ८९ ॥
संसारे क्षणिकं सर्वं नानादुःखनिबन्धनम् । मोक्षाय यतितव्यं तद्भवेन्मोक्षस्तु संवरात् ॥ ९० ॥
सर्वेषामाश्रवाणां तु निरोधः संवरः स्मृतः । स पुनर्भिद्यते द्वेधा द्रव्यभावविभेदतः ॥ ९१ ॥
यः कर्मपुद्गलादानच्छेदः स द्रव्यसंवरः । भवहेतुक्रियात्यागः स पुनर्भावसंवरः ॥ ९२ ॥
येन येन ह्युपायेन रुध्यते यो य आश्रवः । तस्य तस्य निरोधाय स स योज्यो मनीषिभिः ॥ ९३ ॥
क्षमया मृदुभावेन ऋजुत्वेनाप्यनीहया[5] । क्रोधं मानं तथा मायां लोभं रुन्ध्याद्यथाक्रमम् ॥ ९४ ॥
असंयमकृतोत्सेकान्[6] विषयान् विषसन्निभान् । निराकुर्यादखण्डेन संयमेन महामतिः ॥ ९५ ॥

१ सूर्यास्तादनंतरं चंद्रोदयात्पूर्वे च । २ विवेक एव विलोचनं नेत्रं तेन रहितम् । ३ नरकगर्तायां पतनाय । ४ आशीविषः सर्पः । ५ अनिच्छया लोभमित्यनुक्रमेण । ६ असंयमेन कृत उत्सेको गर्वो यैस्तान् ।

तिसृभिर्गुप्तिभिर्योगान् प्रमादं चाप्रमादतः । सावद्ययोगहानेन विरतिं चापि साधयेत् ॥ ९६ ॥
सद्दर्शनेन मिथ्यात्वं शुभस्थैर्येण चेतसः । विजयेतार्त्तरौद्रे च संवरार्थं कृतोद्यमः ॥ ९७ ॥
यथा चतुष्पथस्थस्य बहुद्वारस्य वेश्मनः । अनावृतेषु द्वारेषु रजः प्रविशति ध्रुवम् ॥ ९८ ॥
प्रविष्टं स्नेह[1]योगाच्च तन्मयत्वेन बध्यते । न विशेन्न च बध्येत द्वारेषु स्थगितेषु[2] च ॥ ९९ ॥
यथा वा सरसि क्वापि सर्वैर्द्वारैर्विशेज्जलम् । तेषु तु प्रतिरुद्धेषु प्रविशेन्न मनागपि ॥ १०० ॥
यथा वा यानपात्रस्य मध्ये रन्ध्रैर्विशेज्जलम् । कृते रन्ध्रपिधाने तु न स्तोकमपि तद्विशेत् ॥ १०१ ॥
योगादिष्वाश्रवद्वारेष्वेवं रुद्धेषु सर्वतः । कर्मद्रव्यप्रवेशो न जीवे संवर[3]शालिनि ॥ १०२ ॥
संवरादाश्रवद्वारनिरोधः संवरः पुनः । क्षान्त्यादिभेदाद् बहुधा तथैव प्रतिपादितः ॥ १०३ ॥
गुणस्थानेषु यो यः स्यात् संवरः स स उच्यते । मिथ्यात्वानुदयात्परस्थेषु मिथ्वात्वसंवरः ॥ १०४ ॥
तथा देशविरत्यादौ स्यादविरतिसंवरः । अप्रमत्तसंयतादौ प्रमादसंवरो मतः ॥ १०५ ॥
प्रशान्तक्षीणमोहादौ भवेत् कषायसंवरः । अयोग्याख्यकेवलिनि सम्पूर्णो योगसंवर ॥ १०६ ॥
संवृतः संवरेणैवं भवस्यान्तं व्रजेत्सुधीः । निश्छिद्रयानपात्रेण सांयात्रिक इवाम्बुधेः ॥ १०७ ॥
प्रभोस्तया देशनया प्रबुद्धा बहवो जनाः । प्रव्रज्यां जगृहुः केऽपि केऽपि श्रावकतां पुनः ॥ १०८ ॥
आनन्दाद्या एकाशीतिः प्रभोर्गणभृतोऽभवन् । देशनान्ते प्रभोश्चक्रेऽथानन्दो धर्मदेशनाम् ॥ १०९ ॥
आनन्ददेशनान्ते च नमस्कृत्य जगद्गुरुम् । स्थानं निजनिजं जग्मुः सुराऽसुरनरेश्वराः ॥ ११० ॥

१ रागयोगात् । २ पिहितेषु । ३ संवरेण शालते शोभते तस्मिन् ।

तत्तीर्थभूर्ब्रह्मनामा यक्षस्त्र्यक्षश्चतुर्मुखः । पद्मासनः श्वेतवर्णश्चतुर्भिर्दक्षिणैर्भुजैः ॥ १११ ॥
मातुलिङ्गिमुद्गरभृत्सपाशाभयदायिभिः । वामैस्तु नकुलगदाङ्कुशाक्षसूत्रधारिभिः ॥ ११२ ॥
तथोत्पन्ना त्वशोकेति मुद्गवर्णाऽ*[1]ब्जवाहना । बिभ्राणा दक्षिणौ बाहुदण्डौ वरदपाशिनौ ॥ ११३ ॥
फलाऽङ्कुशधरौ बाहू वहन्ती दक्षिणेतरौ ■ । उभे अभूतां दशमार्हतः शासनदेवते ॥ ११४ ॥
उपास्यमानस्ताभ्यां च विजह्रे शीतलप्रभुः । ततः पूर्वसहस्रांस्त्रिमासोनां पञ्चविंशतिम् ॥ ११५ ॥
लक्षं मुनीनां साध्वीनां लक्षमेकं षडुत्तरम् । चतुर्दशपूर्वभृतां चतुर्दशशतानि तु ॥ ११६ ॥
अवधिज्ञानधराणां द्वासप्ततिशती पुनः । सार्धाः सप्तसहस्रास्तु मनःपर्ययधारिणाम् ॥ ११७ ॥
शतानि सप्ततिरथ केवलज्ञानधारिणाम् । जातवैक्रियलब्धीनां सहस्रा द्वादशैव तु ॥ ११८ ॥
शतानि चाष्टपञ्चाशद्वादलब्धिमतां पुनः । श्रावकाणामुभे लक्षे नवाशीतिसहस्रमपि ॥ ११९ ॥
श्राविकाणां चतुर्लक्ष्यष्टपञ्चाशत्सहस्रयुक् । इति जज्ञे परीवारः प्रभोर्विहरतः सतः ॥ १२० ॥
मोक्षकालेऽथ सम्प्राप्ते सम्मेताद्रिं ययौ प्रभुः । प्रपेदेऽनशनं तत्र सहस्रेणर्षिभिः सह ॥ १२१ ॥
मासान्ते वैशाखकृष्णद्वितीयायां निशाकरे । पूर्वाषाढागते स्वामी मोक्षेऽगात्तैः महर्षिभिः ॥ १२२ ॥
कुमारभावे पूर्वाणां सहस्राः पञ्चविंशतिः । पञ्चाशत्पूर्वसहस्राः पृथिवीपरिपालने ॥ १२३ ॥
प्रव्रज्यापालने पूर्वसहस्राः पञ्चविंशतिः । एवमायुः पूर्वलक्षमभूच्छ्रीशीतलप्रभोः ॥ १२४ ॥

---

१ मेघवाहना । * र्णाब्जवा° । ■ पाशाङ्कुशधरौ बाहू बिभ्रती द°।

सुविधिस्वामिनिर्वाणान्निर्वाणं शीतलप्रभोः । सागरोपमकोटीषु व्यतीतासु नवस्वभूत् ॥ १२५॥
श्रीशीतलस्य मुनिभिः सह तैर्विमुक्तिमासेदुषो दिविषदां पतयो यथावत् ।
निर्वाणयानमहिमानमुदारशोभं चक्रुर्ययुर्निजनिजं पुनरेव लोकम् ॥ १२६ ॥
श्रीसम्भवप्रभृतितीर्थकृतां तृतीयेऽष्टानां चरित्रमिह पर्ववरेऽष्टसर्गे ।
ध्येयं पदस्थमिव वारिरुहेऽष्टपत्रेऽनुध्यायतो भवति सिद्धिरवश्यमेव ॥ १२७॥

✣ ✣ ✣

इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये
तृतीयपर्वणि श्रीशीतलस्वामिचरितवर्णनो नामाष्टमः सर्गः ।

तृतीयं पर्व समाप्तम् ।